अर्वाचीनसंस्कृतम्

(नवमवर्षे प्रथमोऽङ्कः)

१५ जनवरी १९८७

सम्पादकः
डा० रमाकान्त शुक्लः
एम० ए०, पीएच० डी०, साहित्याचार्यः
सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

अर्वाचीनसंस्कृतम् (९/१)

(R. N. 34554/79)

(जनवरी १९८८ ई०)

विषय-सूची

	विषयः	लेखकः	पृष्ठाङ्काः
१.	सम्पादकीयम्		१
२.	संस्कृतवाणी	कविरत्न ओम्प्रकाश ठाकुरः, दिल्ली	३
३.	कोऽहम्	प्रो० सत्यव्रत शास्त्री, दिल्ली	७
४.	भारत्यर्चनम्	डा० कैलाशनाथ द्विवेदी, इटावा	९
५.	आतङ्कवादः पुनरुग्रवादः	श्री रामेश्वरदत्त शर्मा, भिवानी	१०
६.	अर्वाचीनसंस्कृतसाहित्ये प्रतिबिम्बिताः समकालीनाः घटनाः	श्रीमती शशिप्रभा गोयल, दिल्ली	११
७.	लक्ष्मीशतके उदाहृतानाम् आख्यानकानां संग्रहः	प्रो० वरदराज कण्णन्, हैदराबादः	१७
८.	श्रीगङ्गावन्दनम्	डा० रामकिशोर मिश्रः, खेकड़ा	३३
९.	शिमला	आचार्य श्रीनिवास रथः, उज्जयिनी	३७
१०.	अहं स्वतन्त्रता भणामि	डा० रमाकान्त शुक्लः दिल्ली	४०
११.	मैं स्वतन्त्रता तुम्हें पुकारती	श्री कृष्णमुरारिशर्मा	४१
१२.	मा भव	श्री मधुर शास्त्री, दिल्ली	४८
१३.	देववाणी-परिषद्वार्ता	श्रीमती रमा शुक्ला	४९
१४.	संस्कृत-जगद्वार्ता	श्रीमती रमा शुक्ला	५१-५६

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली

२. प्रकाशनकालावधिः—त्रैमासिकम्

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नयी दिल्ली-११००५९

डा० रमाकान्तशुक्लः इति नामाहं उद्घोषयामि यदुपरिलिखित सकलमपि विवरणं मम मतौ सत्यमस्ति ।

डा० रमाकान्त शुक्लः
प्रकाशकः मुद्रकश्च

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य अस्मिन्नङ्के कवितासप्तकम्, एका सानुवादा कविता, लेखद्वयं, देववाणी-परिषद्वार्ता संस्कृत-जगद्वार्ता च प्रकाश्यन्ते ।

मात्रिकवृत्तविरचितायां 'संस्कृतवाणी'-इत्यस्यां कवितायां कविरत्नश्री-ओम्प्रकाशठाकुरमहाभागेन संस्कृतभाषाया गरिमा समुपस्थापित: । गतिमय्यामस्यां रचनायां कविना संस्कृतभाषाया भाषागतवैशिष्ट्यस्य, समृद्धवाङ्मयस्य, प्राचां ग्रन्थकृतां, समकालीनकवीनां, प्रमुखसंस्कृतपत्रपत्रिकाणां च उल्लेखेन साकं साम्प्रतिके काले तस्या उपेक्षाया अपि सङ्केतो दत्त: । कविः सामर्थ्यशालिनोऽपि जनान् उदासीनान् वीक्ष्य तान् संस्कृतस्य सेवायै सोद्यमान् कर्तुमिच्छति । श्रीठाकुरमहाभागस्येयं रचना ऐतिहासिकं महत्त्वमपि बिभर्ति ।

'कोऽहम्' इत्यस्यां कवितायां पुरीस्थश्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना सम्प्रति च दिल्लीविश्वविद्यालयस्य संस्कृतविभागाचार्येण 'थाईदेशविलास'-'बोधिसत्त्वचरित'-'गुरुगोविन्दसिंहचरित'-'श्रीमतीन्दिरागान्धि-चरित' - प्रभृत्यनेकग्रन्थकर्ता संस्कृतजगते सुपरिचितेन विदुषा कविवरेण डा० सत्यव्रतशास्त्रिमहाभागेन मनोज्ञरीत्या अष्टसु शार्दूलविक्रीडितवृत्तेषु अद्यत्वे शिक्षा- चिकित्सा- राजनीति - सार्वजनिककार्यपद्धत्यादिषु विद्यमानेन कदाचरणेन ग्रस्तस्य दिग्भ्रान्तस्य मनुजस्य दशा वर्णिता । असमस्तपदानां प्रयोगेण कविनास्यां रचनायामाद्यन्तं सरलता-सरसते निर्व्यूढे ।

'भारत्यर्चनम्' - इत्यस्यां रचनायां डा० कैलाशनाथद्विवेदिमहाभागेन भारती स्तूयते । 'आतङ्कवादः पुनरुग्रवादः द्वावेव संसारविनाशकौ तौ' इयस्यां रचनायां भिवानी-वासिना श्रीरामेश्वरदत्तशास्त्रिमहाभागेन अद्यत्वे 'पञ्चाम्बु' राज्ये प्रत्यहं ताण्डवं कुर्वतः आतङ्कवादस्य उग्रवादस्य च दुष्परिणामाः प्रदर्शिताः । कविरस्यान्तं कामयते । न ज्ञातुं पार्यते, कदा वै देशस्य कर्णधाराः निरागसां संहारं रोत्स्यन्ति !

'श्री गङ्गावन्दनम्' इत्यस्यां दीर्घरचनायां डा० रामकिशोर मिश्रः कृषिवृद्धिकरीं गङ्गां नौति । आचार्यश्रीनिवासरथप्रणीता 'शिमला'-कविता शिमलानगर्या रामणीयकं व्यनक्ति । प्रसिद्धहिन्दीगीतकारस्य श्रीमधुर शास्त्रिणः 'मा भव' इतीयं रचना कविभारतीमुद्दिश्य रचिता ।

'अर्वाचीनसंस्कृतसाहित्ये प्रतिबिम्बिताः समकालीना घटनाः' इत्यस्मिन् लेखे दिल्लीस्थराज्यशिक्षासंस्थान-सस्कृतप्राध्यापिकया श्रीमत्या शशिप्रभा गोयल-महाभागया विंशशताब्द्यां स्वातन्त्र्यपूर्वं स्वातन्त्र्योत्तरं च रचितेषु

कतिपयेषु संस्कृतकाव्यनाटकादिग्रन्थेषु रचनाकारैः स्वसमकालीनाः घटनाः कथं वर्णिता इति सोदाहरणं प्रतिपादितम् । श्रीमत्या गोयलमहाभागाया इयं सोदाहरणवार्ता आकाशवाण्याः दिल्लीकेन्द्रतः १४-१२-१९८६ तारिकायां 'साहित्यिकी'-कार्यक्रमे प्रसारिता बभूव ।

अस्माभिः अर्वाचीनसंस्कृतस्य विगतेऽङ्के यथा सूचितमासीत तदनुसारं लक्ष्मीशतककर्त्रा डा० वरदराजकण्णन् - महाभागेन लिखितः 'लक्ष्मीशतके उदाहृतानाम् आख्यानकानां संग्रहः' इत्ययं लेखः प्रकाश्यते । आशासे मूलकाव्ये क्वचित्काठिन्यमनुभवतां पाठकानां कृतेऽयं लेख उपकर्त्ता सेत्स्यति ।

देववाणी-परिषद्वार्तायां संस्कृतजगद्वार्तायां च विगतेषु त्रिषु मासेषु परिषदि अन्यत्र च समायोजितानां कार्यकलापानां सूचना दीयते ।

अनेनाङ्केन अर्वाचीनसंस्कृतम् नवमं वर्षं प्रविशति । १९७९ तमेशवीयेऽब्दे अस्य प्रकाशनं प्रारब्धम् । दशवर्षाणि यावदस्य प्रकाशनं प्रथमे चरणे सङ्कल्पितमासीत् । अष्टवर्षेषु महर्घता अभ्रंलिहा संवृत्ता । मुद्रणव्ययश्चतुर्गुणः सञ्जातः । बहवः कृपालवो ग्राहकाः पुनः पुनः प्रार्थ्यमाणा अपि शुल्कं न मुञ्चन्ति । केचन डाकविभागस्य कृपया प्रथमवारे अङ्कमेव न लभन्ते । अतः पुनरपि तेभ्योऽङ्कः प्रेष्यते । सर्वकारेण यत्पुनरनुदानं दीयते तत्तु पत्रस्य 'शाकाय वा लवणाय वा'पि नालं भवति । वेतनेन कर्मकरा नियोक्तुं नैव शक्यन्ते । किं क्रियेत ! तथापि दशवर्षाणि यावत्तु अर्वाचीनसंस्कृतं प्रकाशयिष्यत एव । किन्तु वर्तमानग्राहकशुल्केनातःप्रभृति पाठकेभ्योऽर्वाचीनसंस्कृतं दातुं न शक्यते । अतो वैवश्येन मूल्यवृद्धिः क्रियते । आशासे, जीवनस्य प्रत्येकं क्षेत्रे महर्घतां सहमाना पाठका अर्वाचीनसंस्कृतस्य ग्राहकशुल्केऽपि तां सहिष्यन्त एव ।

२५.१.१९८७ तारिकायां आकाशवाण्याः सर्वभाषाकविसम्मेलने प्रसारिता एतत्पंक्तिलेखकस्य 'अहं स्वतन्त्रता भणामि' इतीयं रचना श्री कृष्णमुरारि शर्मकृतहिन्दीरूपान्तरेण साकं अनेकश्रोतृणामनुरोधादस्मिन्नंके प्रकाश्यते । नववर्षं गणतन्त्रदिवसं चोपलक्ष्य पाठकेभ्यः शुभकामनाः समर्प्यन्ते । अंकस्य प्रकाशने दशदिनानां विलम्बः क्षन्तव्यः सुधीभिः ।

२६-१-१९८७ गणतन्त्र-दिवसः
आर-६, वाणी-विहारः
नयी दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

संस्कृतवाणी

(कविरत्नम् ओम्प्रकाश ठाकुरः, डी-७५७, सरस्वती-विहारः,
दिल्ली-११००३४)

(१)

सृष्टेररुणोदयवेलायामात्मानमवालोके जातां
शब्दार्थमयं शुचिपरिधानं दधतीं तारुण्यमथ प्राप्तां
परमेशकृपावशतो वर्णः सर्वो मे मन्त्रमयो जातः
आविर्भूतं वेदज्योतिस्तिमिरस्य चयो विलयं यातः
दिवि देवैः प्रतिष्ठापिताऽहो स्वीये हृदये वदनाम्भोजे
मनुजैर्व्यवहारपदे निहिता देशे देशे गेहे गेहे
ऋषिभिर्गीता मुनिभिर्ध्याता परिशुद्धा मन्त्रमयी वाणी
नाम्ना व्याजह्रेऽहं विबुधैः संस्कृतभाषा संस्कृतवाणी।

(२)

वैज्ञानिकता भाषाध्वनिषु लिप्यामपि रचनासुन्दरता
नवपदनिर्माणकरी क्षमता संस्कृतवाण्या मे श्लाघ्यतरा
संस्काराणामाचाराणां व्यवहारविचाराणां वाणी
अक्षर-मात्रागणनाद् यमिता जाता संगीतमयी वाणी
ध्वन्यात्मकवर्णवितानवती नानाच्छन्दोऽलंकृतचरणा
नर्तननिपुणेव नटी रङ्गे नूपुरझंकृतिझंकृतचरणा
साहाय्यमपेक्षन्ते नित्यं नवपदरचने प्रान्तीयगिरः
उपजीव्यतया सौन्दर्यदृशा नवपदजातैः पुष्णामि च ताः।

(३)

विश्वे विभिन्नदिग्भागेषु पश्यामि कदाचिद् विहरन्ती
हिब्रू-जर्मन-लैटिन-रशियन-ग्रीकाद्याः पुत्रीः दौहित्रीः
नानावर्णा नानावेषा धारितभौगोलिकसंस्काराः
निवसन्तीर्जनसमुदायेषु पोषितनिजलघु-गुरुपरिवाराः

भाषाविज्ञानविदोऽस्माकं विस्मृतसम्बन्धं पूर्वतनम्
आभाष्य पुनर्ब्रुवते वाचां तासामेकान्वयतो जननम्
वसुधामखिलां निजपरिवारं सवीक्ष्यानन्दपुलकितायाः
गातुं मे मनस्तदा कुरुते हरिमहिमानं स्फुरदधरायाः।

(४)

वेदस्तु विभोर्निःश्वसितमयो विज्ञानमयोऽखिलभूतहितः
प्रथमा महती रचना जगतां छन्दोग्रथिता गीर्वाणगिरा
तन्मन्त्रजपे निरताः केचित् केचिद् यागैः प्रीणितदेवाः
तत्तत्त्वविचारार्पितजनुषो मनुतनुजनुषो भुवि महनीयाः
आत्मानमहं धन्यां मन्ये निगमागममयकायो यस्याः
सद्ग्रन्थविरचने संसक्ता ऋषयो मुनयोऽखिलविश्वहिताः
तेषां महनीयचरित्राणां तपसा संधारितभूरिबला
पठिता रटिता मननं नीता गीता ज्ञाताऽहं कामदुघा।

(५)

श्रीवृद्ध्यै मम कवयोऽसंख्या कृतबहुयत्नास्तत्परमनसा
सत्काव्य-गद्य-चम्पू-रूपकरचना महतीर्व्यदधुश्च पुरा
व्यासो वाल्मीकिरथो भासः कविताकामिन्या मृदुहासः
बाणो जयदेवो भवभूतिः काव्योद्याने किल मधुमासः
भारतसंस्कृतेरमरगायककविकालिदासतुल्याः केऽन्ये ?
सर्वेऽप्यानतशिरसस्तस्मै यद्दत्तं तेन सकलजगते
आयुर्वेदे ज्योतिःशास्त्रे व्याकरणे धर्मे नयशास्त्रे
अध्यात्मे नाट्य-कथाशिल्पे के समाः कथय सकले विश्वे।

(६)

बह्व्यः संस्था यद्यपि देशे विदुषामपि भूयिष्ठा संख्या
अर्वाचीना प्राचीना वा दिङ्मात्रमुदाह्रियतेऽत्र मया
भात्यखिलभारतीया संस्था संस्कृतसम्मेलननामयुता
परिषत् संस्कृतसेवानिरता नाम्ना प्रथितेन्द्रप्रस्थीया
एषा च देववाणी-परिषद् विविधं सुरगिरं समर्चयते
संस्कृतसेवासंस्थानं च विमलां कीर्तिं संधारयते

कर्ता श्रीराधासुधानिधेरभिनन्द्यः श्रीहितहरिवंशः
श्रीरूप-जीव-गोस्वामिद्वयकीर्त्या राजन्ते सर्वदिशः ।

(७)

श्रीजगन्नाथपण्डितराजो रससिद्धकवीनां ख्याततमः
वेदान्तदेशिकः काव्यपटुः क्षेमेन्द्रो मुनिविद्यारण्यः
बुधवरमधुसूदनसरस्वती व्यासः शिवराजविजयकारः
गिरिधरशर्मा दाधीचो वा संस्कृतवाण्याः सदलङ्काराः
वैयाकरणानां मूर्धन्यः श्रीचारुदेवपण्डितवर्यः
भट्टः श्रीमान् मथुरानाथो हृदयावर्जकवाङ्माधुर्यः
यः शास्त्रविदां धुर्यः कविराट् सद्ग्रन्थविनिर्मितिलब्धयशाः
श्रीमानमीरचन्द्रः शास्त्री शशिधरशर्मा विद्वद्वर्यः ।

(८)

एवं शास्त्राणां मर्मविदो नानाविद्यानां वक्तारः
साहित्यविधानां विविधानां स्रष्टारो ह्याविष्कर्तारः
सत्यपि संघर्षमये समये प्रबलोत्साहैर्द्रावितबाधाः
लोकानामालोकस्तम्भाः केषामिह लोके नाराध्याः
या क्षमा विचाराविष्करणे योग्या याचां चालङ्करणे
यस्या भात्यद्भुतपदकोषः यस्यां सर्वाः साहित्यविधाः
यत्काव्यसुधां पायं पायं निर्वृतिमतुलां लभते प्राणी
मधुरा सरसा संगीतमयी विख्याताऽहं संस्कृतवाणी ।

(९)

गम्भीरघोषकवितापाठी श्री श्रीनिवास आचार्यवरः
भास्कराचार्य आलंकारिकनवलोकगीतरचनाचतुरः
कोकिलकण्ठो नवगीतकरो राजेन्द्रमिश्र-कविताकान्तः
गायन् मधुरं 'भाति मे भारतं' कविशार्दूल-रमाकान्तः
सत्यव्रत - शुक्लरमेशचन्द्र - वर्णेकर - वेलणकरादयः
कविरत्नं ठाकुर ओम्प्रकाश इत्येवं समकालिककवयः
नलिनी - लीना - पुष्पाः सर्वाः कवयित्रीणां परमप्रथिताः
गीतैर्ललिताभी रचनाभिः सततं मदर्चनायां निरताः ।

(१०)

गाण्डीव-सुधर्मा - गुञ्जारव - ऋत - ऋतम्भरा -गीर्वाणसुधाः
दूर्वा संस्कृतचन्दामामा शोधप्रभाऽथ परमार्थसुधा
संस्कृतप्रतिभाऽर्वाचीनसंस्कृतं विश्वसंस्कृतं व्रजगन्धा
लोकसंस्कृतं संस्कृतामृतं संगमनी तथा सर्वगन्धा
संवित् - संस्कृतभवितव्य - विश्वभाषा-सूक्तिसुधा - सागरिकाः
गैर्वाणी स्वरमङ्गला पारिजातं मनोरमा मालविका
भारती कामधेनुर्मेधा प्रतिभा शारदा देववाणी
एतैरन्यैः पत्रैश्च नवैः सप्राणाहं संस्कृतवाणी ।

(११)

एषा न केवलं भाषाहं नो वाग्व्यवहाराणां वाणी
सन्देशममरताया लभते मत्तो नैराश्यगतः प्राणी
अस्यामाशाया दीप्तविभा विश्वासस्योज्ज्वल आलोकः
जीवेम शतं वर्षाणीति जीवितुमिच्छा मनसि प्रबला
आस्तां मनसो दैन्यं दूरे केयं हीना नैराश्यकथा
अपयातु पराश्रितता चित्ताद् देहादपयातु च निर्बलता
एवंविधसूक्तिसुधाधारा सत्साहित्योदधिसम्भूता
अपवाह्य समस्तं नैराश्यं प्रददाति पराश्चित्ते प्रमुदः ।

(१२)

विपिने मुनिपर्णोटजमध्ये सुरमन्दिरस्थविद्याकेन्द्रे
आचार्यकुले च गृहस्थानां धनिनामावासे वा हर्म्ये
तीर्थे पुण्ये चैत्ये च मठे प्रीत्या शालासु विहरमाणा
राजाश्रयमनपेक्ष्यापि विभोः कृपया सर्वत्राऽऽद्रियमाणा
सम्प्रत्युपेक्ष्यमाणा लोकैः भौतिकताया दीप्त्या मुग्धैः
अपचीयमानसर्वावयवा जीवामि हन्त किं नात्मबलैः
बहवः किलः सन्ति मठाधीशाः जीवन्तो नाम जपन्तो मे
उद्यमरहिताः सति सामर्थ्ये, कुर्वे किमदृष्टे विपरीते !

कोऽहम् ?

(डा० सत्यव्रतशास्त्री, ३/५४ रूपनगरम्, दिल्ली-११०००७)

(१)

प्रश्नोऽयं समुदेति मे मनसि भोः कोऽहं कुतस्त्यस्तथा
किं वा नाम करोम्यहं जगति किं कुत्रास्म्यहं संस्थितः ।
किं लक्ष्यं किमु वा महत्त्वमथवा किं वा ममाऽऽस्ते पदं
आत्मा मे सुतरामसंस्तुत इति प्राप्तोऽस्मि चित्रां दशाम् ॥

(२)

यद्यच्चिन्तनमस्ति मे मनसि किं वाचा भवेत् तत् स्फुटं
किं वा कर्मणि तद्भवेत्परिणतं किं वा परेभ्यो भवेत् ।
तत्सम्यक् प्रतिपादितं किमथवा ज्ञातं मया स्यान्नवे-
त्येवं विप्रतिपन्नमानसतया नो शान्तिमाप्नोम्यहम् ॥

(३)

किं मे धावनमस्तु वा सुविरतिः कार्यान्तरेभ्यो भवेत्
किं वा तेष्वभिरक्तिरस्तु किमु वा तेभ्यो विरक्तिर्भवेत् ।
चिन्ताचान्तमना इति प्रविततं सर्वं चरं चाचरं
पश्यन् व्याप्तमिदं जगत् किमपि किं नैवाहमालोकये ॥

(४)

ज्ञानं मे प्रथितं मया च पठिता ग्रन्था अनेके भुवि
तत्किं मे परवञ्चनादिकृतिषु स्वीया प्रवृत्तिः सदा ।
दीनां दुर्विधतां गतां च जनतां नो वीक्ष्य चित्तद्रुति-
र्मेऽन्धो वा बधिरोऽथ वाहमिति मे नैवास्त्यहो निर्णयः ॥

(५)

दिव्योऽहं सुविभूषितो गुणगणैर्लोकस्य पूज्यस्तथा
कुर्वन् वैभवशालिभव्यभवने वासं सदर्पं सदा।
ध्यायन् द्रव्यमुपार्जितं कुसृतिभिर्नैकैस्तथा गर्हितैः
कृत्यैश्छद्मपरैर्नृशंसपरमैः शान्तिं परां नाप्नुवे ॥

(६)

आढ्यानामकृतात्मनां बत ! कृते श्राम्यामि रात्रिन्दिवं
नैवाहं च लभे कथञ्चिदपि हा स्वीयामभीष्टां भृतिम् ।
हर्म्याणां रचनाविधावनुदिनं श्रान्तस्य मे हन्त भो !
वासः पर्णकुटी विशीर्णमलिनं वासो ममाच्छादनम् ॥

(७)

आचार्योऽप्यनुशास्मि नैव सततं राज्ञां नयेऽवस्थितो
वैद्योऽहं परमातुरादिविषया चिन्ता न मां बाधते ।
कार्याणां लय इत्यनेन विधिना कार्यालये कार्यकृद्
उत्कोचादिपरः परार्थघटकः सौख्यं परं व्यश्नुवे ॥

(८)

कः पन्थाः किमु मे स्वरूपमथवा कस्यास्म्यहं भूतले
किं वा कर्म करोमि कस्य च कृते श्राम्याम्यहं सन्ततम् ।
किं वा वच्मि शृणोमि किं किमथवा ध्यायामि यामि क्व च
कोऽहं वेति न वेद्मि हन्त ! किमिति भ्राम्यामि दिग्भ्रान्तवत् ॥

(इयं कविता कतिपयवर्षाणि पूर्वम् आकाशवाणी-समायोजिते सर्वभाषा-कविसम्मेलने प्रसारिता बभूव । सम्पादकः)

भारत्यर्चनम्

(डॉ० कैलाशनाथ द्विवेदी, डी०लिट्०, इटावा)

गायन्ति वेदाः वरदानदात्रीं, पश्यन्ति प्राज्ञाः परमात्मरूपाम् ।
शृण्वन्ति सर्वे शुभलोकलीलां, लीलामयीं लोकनुतां नमामः ।।१।।

या कीर्तिता भारतभाग्यलक्ष्मीः,
या पूज्यते प्राणिषु मातृशक्तिः ।
या धार्यते धीर्धृतियुज्जनेषु,
तां ज्ञानदेवीं सततं नमामः ।।२।।

आसिन्धुशैलेन्द्रसुशोभिते हे,
भागीरथीनीरतरंगिते हे ।
काशीपुरीभिः परमां सुरम्यां,
त्वां भारतीं भक्तिप्रदे भजामः ।।३।।

देशे दशा दैन्यकरी दरिद्रा,
स्वाधीनतायां गतराष्ट्रभक्तिः ।
विभिन्नभाषामतजातिधर्माः,
सर्वे सहायाः जनतैक्यनाशे ।।४।।

स्वार्थान्धकूपे कतिचिद्विमग्नाः
केचित्तु नग्नाः पशुताबलेन ।
हा हन्यते मानवता वराकी,
रक्षस्व हे भारतभाग्यदेवि ।।५।।

हिंसाप्रचण्डा जनप्राणहन्त्री,
संगीतशून्या त्रुटतारतंत्री ।
गंत्री गता गर्त्तमये कुमार्गे,
संचालयेमां गतिनाशु देवि ।।६।।

आतंकवादं जननाशकं त्वं,
धर्मान्धतातीव्रविषञ्च रुन्धि ।
हिंसानलं नाशयितुं तुदेवि,
तेजोमयी तत्परता तवैव ।।७।।

रक्षा भवेत् राष्ट्रभुवो भविष्ये, भवेत् समृद्धिः सततं च शान्तिः ।
भूयात् सुकीर्तिः भरतावनेर्हि, देशेषु देदीप्यतु देश एषः ।।८।।

आतङ्कवादः पुनरुग्रवादः ।
द्वावेव संसारविनाशकौ तौ ।।

(श्रीरामेश्वरदत्तशर्मा, ३ विकासनगरम्, भिवानी)

अयि भारतवर्षवासिनः ! यवना हिन्दु-सिखाखिला जनाः ।
क्रियते निजबन्धुहिंसनम्, कथमद्यास्तमिता विवेकिता ।।१।।
परतन्त्रतया श्ववृत्तयो गतगर्वाः परसंस्कृतौ ताः ।
निजबन्धुविशेषदूषकाः शतशो वर्षमिता वयं यतः ।।२।।
सुचिरात् समयात् पृथक्चरा, रिपुछद्मेन विभिन्नतां गताः ।
अरिणा त्वरया विमर्दिताः, न वयं जागृमहेऽधुनाप्यहो ।।३।।
अलभन्त यदा स्वतन्त्रताम्, सहभागान्वित नायकोत्तमाः ।
प्रकृतिस्थित-भेदभावतो वयमालेभिमहे द्विराष्ट्रकम् ।।४।।
स्मरत प्रथमं दशाननम्, अनुजेनैव स घातितः पुरा ।
बलबुद्धिकलाविशारदो बहुसेनापरिवारसंयुतः ।।५।।
कुरुपाण्डववीरसैनिकाः, गृहयुद्धेन मिथः क्षयं गताः ।
न तदा बलिनो मृताः पुनः, सकलं वैभवमस्ततां गतम् ।।६।।
बहुधान्यधनादिकेन ये, परिपूर्णा अभवन् बलादिभिः ।।७।।
यदवो बहुसंख्यकास्तु ते, गृहयुद्धेन विनाशमाप्नुवन् ।
जयचन्दनृपो व्यघातयत्, निजकं बन्धुमतीर्ष्यया यदा ।
शतशो हि समा वयं गताः, यवनानां परतन्त्रतां तदा ।।८।।
पुनरद्य त एव शत्रवो भवतां राष्ट्र-विखण्डनं पुनः ।
जनताविकृतिं विकुर्वते निजषड्यन्त्रबलैः सुयोजितैः ।।९।।
अबला विधवा निराश्रिताः पितृहीनाः शिशवो रुदन्ति ये ।
करुणं रुदनं विलोक्य हा ! शतधा किन्नु हृदा न भिद्यते ।।१०।।
महती कटुता विवर्धिता, ग्रसते सौहृदयं परस्परम् ।
गमनागमने विशङ्किने, भवतान्निसरणं सुदुष्करम् ।।११।।
बलवानबलं सुरक्षति, विपरीतं बहु चात्र वर्तते ।
असुरस्य वधे हि शूरता, जनसामान्यवधे क्व वीरता ।।१२।।
न कदापि जनो धरातले सफलोऽभूत् प्रतिहिंसया सखे ।
समतासहभागितादयाक्षमताशान्तिसुखैः सुजीवनम् ।।१३।।
जगतीजनजीवनं वरम्, सकला एकपथेन यान्ति ते ।
इह भेदविखण्डनैकता विविधा भिन्नपथा हि देहिनः ।।१४।।
ननु जाग्रत देशवासिनः, उत नो चेत् परतन्त्रता पुनः ।
पशुवद् भविता हि जीवनम्, न तदा हिन्दुसिखौ न मुस्लिमः ।।१५।।

अर्वाचीनसंस्कृतसाहित्ये प्रतिबिम्बिताः समकालीना घटनाः

(श्रीमती शशिप्रभा गोयल, राज्यशिक्षासंस्थानम् दिल्ली)

संस्कृतभाषा भारतीयानामाचारविचाराणां भाषा अस्ति। तत्र भारतस्य पुरातनः इतिहासः, शास्त्राणि, दर्शनं, विज्ञानं, संगीतं, चित्रकलादिकाश्चतुष्षष्टिः कलाः, शिल्पम्, मनोरञ्जनानि, कथोपन्यासादिपरकं साहित्यं, काव्यानि च उत्तमोत्तमानि शोभन्ते। जगति सर्वत्र तद् वाङ्मयं विकीर्णं भवद् विभाति। साम्प्रतमपि प्रत्यहं नवीनं साहित्यमवतीर्णं दृग्गोचरतां याति। इदं हि अनुदिनम् उत्पद्यमानं तदीयं नूतनं साहित्यं तस्याः संस्कृतभाषायाः जीवितत्वमुपपादयितुम् अलम्।

साहित्यं तु समाजस्य प्रतिबिम्बमात्रम् एव इति स्वीक्रियते मनीषिभिः। प्रतिदिनं संघटितानाम् समाकलनं तु नूनमेव प्राप्स्यति स्थानम् साहित्ये। स्वाधीनतासंग्रामः, देशभक्तानाम् प्राणोत्सर्गः कथं न प्रेरणाप्रदः स्यात् कविभ्यः। एकैको भारतीयो भवेत् स्वराज्ये अनुरागवान्, स्वराष्ट्रे भक्तिमान्, स्वधर्मे संस्कृत्यां सभ्यतायाञ्च दृढस्नेहः अयमेव स्वरः सम्यक् उद्घोषितः अनुगुञ्जितश्च विंशशताब्द्याम् रचिते संस्कृतसाहित्ये।

केचन कवयः महर्षिदयानन्दस्य स्वामिनः पूजनीयं चरित्रं, स्वकाव्यस्य वर्णनीयविषयत्वेनावरिषत। महर्षिदयानन्दसरस्वती वस्तुतः स महापुरुषो बभूव, यो यदा सितांगाः भारते समाविशन्, स्वतन्त्रतार्थम् स्वराज्याधिगमनार्थं च शंखमधमत्। पण्डितप्रवराखिलानन्दविरचितदयानन्ददिग्विजयनाममहाकाव्ये, आचार्यमेधाव्रतस्य अपि दयानन्ददिग्विजये, शास्त्रिविद्याधरप्रणीतदयानन्दर्षिचरिते, आचार्यरमाकान्तोपाध्यायकृतदयानन्दचरिते च सम्यक् तत्कालीनसामाजिकावस्थायाः चित्रणम् दृश्यते।

स्वामी दयानन्दः देशे प्रसृताः कुरीतीः, मुखं व्यादाय विचरताम् दम्भाडम्बरच्छलकपटपरिपूर्णमतमतान्तराणां निविडां विशालां ततिं च समूलमक्षिणोत्, देशस्य सांस्कृतिकराष्ट्रियतादिकान् भावान् भारतीयानाम् स्वान्तेषु सञ्चारितवान् यथा स आदिष्टः आसीत् गुरुविरजानन्दमहाभागैः। महर्षिः न्यवेदयत्—

अकिञ्चनोऽहं गुरुदक्षिणाक्षमः,
समर्पये नाथ लवङ्गदक्षिणाम्।
कृतोपकारस्य गुरोर्भवदृणात्
कदापि मुक्तो भवितुं क्षमोऽस्म्यहम्॥

राष्ट्रप्रेमसिक्तः गुरुः तदा उपदिशति—

'विनाशय त्वं प्रसृतं स्वभारते,
कुरीतिवृन्दं छलदम्भभीषणम्।
अवैदिकं सर्वमितः मलीमसम्,
इयं मता स्यात् तव दक्षिणाधुना॥

एवम् प्रतिबिम्बितं वर्तते अस्मिन् विंशतिसर्गात्मके दयानन्दचरितमहाकाव्ये आचार्यरमाकान्तकवेः हृदयस्य स्वदेशोद्धारभावना देशप्रेम च।

राष्ट्रीयतां, भारतीयां संस्कृतिं, भारतीयानां आचारविचारान् धर्मञ्च भारतीयानां सचेतसां पुरतः प्रस्तवीतुं यानि महाकाव्यानि अस्मिन् वर्तमानशतके प्रणीतानि तेषु कानिचत् स्वामिविवेकानन्दस्य, लोकमान्यबालगंगाधरतिलकस्य महनीयं चरित्रं महात्मनः गान्धिनो वन्दनीयं चरित्रं, पण्डितजवाहरलालनेहरूमहापुरुषस्य पावनं जीवनचरित्रं गायन्ति कीर्तयन्ति च।

तत्तन्ममहापुरुषजीवनचरित्रवर्णनद्वारेण ते ते महाकवयः स्वातन्त्र्यसंग्रामस्येहितासमपि अवर्णयन्।

श्रीअमीरचन्द्रशास्त्रिविरचितनेहरुचरितात् उद्ध्रियन्ते काश्चन पंक्तयः—

'कारागृहे निगडितस्तिलकोऽत्र हेतुः'

अपि च—

यूरोपीये महति समरे दान्त उत्साहलेशो
देशे व्याप्तः प्रतिपदमहो यन्त्रशालाः प्रवृत्ताः॥

अन्यदपि दृश्यताम्—

चौरीचौराकाण्डतोऽन्तरं नोऽमन्दावेगान्दोलनं रुद्धमासीत् ।
मन्ये कांग्रेसस्य नेतृष्वमर्षो भूयान् व्याप्तो गान्धिमेकं विहाय ।।

यरवदाकारागृहतः लिखितम् सन्धिपत्रम् अधिकृत्य लिख्यते—

यरवदाकेन्द्रीयकारागारतः पूनास्थितैः,
लिखितमेतत्सन्धिपत्रं पण्यबन्धनमास्थितैः ।
व्रतपरैः कांग्रेसनेतृभिरत्र सप्रजयकरौ,
प्रति तु नेहरुगान्धिनायडुभिः पटेलसमन्वितैः ।।

श्रीनेहरूमहाभागेनः कृतां स्वाधीनताविषयकप्रतिज्ञामधिकृत्य लिख्यते तत्र—

षड्विंशं जनवर्यहोऽथ सकलस्वाधीनतावासरः
स्यादस्माकमिति प्रतिज्ञपयता श्रीनेहरूब्रह्मणा ।
देशस्यास्य विशालभालपटले स्वातन्त्र्यमालेखितम्
वर्षे व्योमगुणग्रहेन्दुगणिते शालातुरे संसदि ।।

श्रीविश्वनाथकेशवच्छत्रेप्रणीतमहाकाव्ये श्रीसुभाषचरिते तु आजादहिन्दसेनेतिहासः त्यागः शौर्य्यम् च मर्मस्पर्शिण्या वाण्या प्रतिपादितम् । आह्वयति सुभाषः स्वदेशवासिनः

भाव्यं शार्मण्यराष्ट्रस्य युष्माभिर्युद्धवन्दिभिः,
स्वतन्त्रहिन्दसेनां तद्द्वारा युङ्क्तातिसत्वरम् ।
विलम्बोऽल्पोपिः युष्माभिः कार्यनाशाय सम्भवेत् ।
त्वर्यतां त्वर्यतां तस्माद् भ्रातरो 'जयहिन्द' वः ।

तत् क्रान्तियुद्धम् भारतीयस्वातन्त्र्यसमरकथां च सम्यक् वर्णयन्ति महारानीझांसीलक्ष्मीबाईचरितम्, द्वाविंशतिसर्गात्मकम् महाकाव्यम् झांसीश्वरीचरितम् च इत्यादयः काव्यग्रन्थाः ।

अणुविस्फोटध्वस्तजापानदेशस्यापि मार्मिकं चित्रणं दृश्यते नेहरूयशःसौरभमहाकाव्ये—

ध्वस्तोऽणुविस्फोटवशाद् विपन्नो,
जापानदेशः सहसा पपात ।
व्यादाय कालो मुखमट्टहासैः
यत्र स्थितां मानवतामलीढ ।।

अस्मिन्नेव ग्रन्थे भारतस्य राष्ट्रसंघसदस्यता अपि वर्णिता। अपि च ताशकन्दसन्धिः, पाकिस्तानबंगदेशयोर्गृहयुद्धं, पाकिस्तानस्य भारतस्योपरि आक्रमणम्, भारस्य विजयः बंगदेशस्योदयः इत्यादि-घटना अपि नोपेक्षिताः।

स्वतन्त्रताप्राप्तेरनन्तरम् भारतस्य विभिन्नप्रदेशानाम् विलयस्य यः प्रयत्नः कृतः तस्यापि वर्णनम् समुपलभ्यते नीरपाजेभीमभट्टरचिते काश्मीरसन्धानसमुद्यमम् हैदराबादविजयम् इति नाटकद्वये। श्रीरामकृष्णशर्मविरचिते बंगलादेशोदये नाटके बंगलादेशनामकस्य नवोदितराष्ट्रस्य जन्मकथा अतीव मर्मस्पर्शिण्यां शैल्याम् प्रस्तुता।

इन्दिरागांधीमहाभागा यदा प्रधानमन्त्रिपदमासीना तदपि वर्ण्यते नेहरूःशयसौरभे महाकाव्ये—

राष्ट्रं विलोक्य परितः सहसाऽसहायं
तामिन्दिरां सपदि लोकसभासदस्याः।
चक्रुश्चरित्रगुणभूषणभूषितांगीं,
मन्त्रिप्रधानपदवीपरिमण्डितां ते ॥

अर्वाचीनसाहित्ये न केवलं राजनैतिकघटनानामेव वर्णनम् प्राप्यते अपि तु वैज्ञानिकी प्रगतिः, देशस्य चतुर्मुखविकासश्चापि नोपेक्ष्यते साहित्यकारैः। डा० रमाकान्तशुक्लमहाभागैः 'भाति मे भारतम्' इति स्वरचनायाम् भारतस्य वैज्ञानिकी प्रगतिः अपि सम्यक् वर्णिता—

भाखडाबन्धदामोदरीयोजनां,
बाणगंगाफरक्कादिभिः सेचितम्।
ब्रह्मपुत्रादिसन्दर्शिताम्बुच्छटं,
भूतले भाति मेऽनारतं भारतम् ॥
विद्युदुत्पादने तैलसंशोधने,
इन्धनान्वेषणे लौहनिष्पादने।
यन्त्रनिर्माणकार्ये च पूर्णक्षमम्.
भूतले भाति मेऽनारतं भारतम् ॥
आर्यभट्टम् वियन्मण्डले स्थापयद्,
पोखरण्भूमिगर्भेऽणुशक्तिं किरत्।
शान्तिकार्येष्वणुं प्रेरयत्सन्ततं,
भूतले भाति मेऽनारतं भारतम्।
रोहिणीं प्रक्षिपद् भास्करं साधयद्

आत्मनीनैरमोघैर्मितैः साधनैः ।
युद्धपोतांश्च सिन्धूरसि स्थापयद्,
भूतले भाति मेऽनारतं भारतम्॥

बरौनी-भिलाईबोकारोयन्त्रशालानाम् संयन्त्रणाम् ध्वनिघोषेण उपमीयते भारतस्य उन्नतिस्यन्दनस्य स्वरः ।

यद् बरौनीभिलाईबुकारोस्वनैः
स्वोन्नतिस्यन्दनोत्थं शुभं घर्घरम् ।
दिक्षु विस्तारयद् वीक्ष्यते सर्वदा,
भूतले भाति तन्मामकं भारतम् ॥

पाश्चात्यसभ्यतागतभौतिकविलासैः प्रभावितो अद्य भारतः शोचनीयामवस्थाम् गतः । गोदावर्म्मयुवराजेन प्रणीते भाणे अद्यतन-चित्रपटसभ्यतावशीभूताः आधुनिकाः युवकाः युवतयश्च कथम् देवानन्दाशोककुमारसाधनावैजयन्तीमालादितारकगणैः प्रभाविताः वस्त्रधारणम् कुर्वन्ति इत्यस्यापि वर्णनम् संलक्ष्यते । भ्रान्तभारते नाम नाटके नारदः आधुनिकताप्रवणं भारतमनुशोचति । कथ्यते च तत्र संस्कृतेः सुरक्षा वैदेशिक-शिक्षाबलेन न विधातुम् शक्यते । मूलमुच्छिद्य चेच्छेत् को विद्वान् वृक्षस्य रक्षणम् । अस्मिन्नेव ग्रन्थे ततो विवाहायु-रधिकृत्य तर्कवितर्का जायन्ते । डा० रमाकान्तशुक्लमहाभागैरपि भारतस्य दुर्दशाम् वीक्ष्य कथ्यते—

दुःखदावानलैर्दग्धदेहान्नरान्,
क्षुत्पिपासाकुलान् वृत्तिकष्टार्दितान् ।
वीक्ष्य कारुण्यपूर्णा नरा यत्र तद्
भूतले भाति मेऽनारतं भारतम् ॥

यद्यपि भारतेऽनेके दोषाः सन्तु परन्तु कविस्तत्र उदारमनाः राष्ट्रभक्तिभावनया ओतप्रोतहृदयः संस्तौति—

सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः,
किन्तु नाहं प्रपश्यामि तान्मन्दधीः ।
वन्दनीयं मया, कीर्तनीयं मया,
मोदताम् वर्धताम् राजताम् भारतम् ॥

एवं मे भारतम्, संस्कृतभाषा, संस्कृतसाहित्यम् च नित्यं विलसन्तु नूतनैः विचारैश्च मानवान् देशरक्षायै सततम् प्रेरयन्तु ।

उपभोक्ताओं की सेवा में
चलता-फिरता बाजार

"चलते-फिरते-बाजार" की 35 चलती-फिरती दुकानों ने दिसम्बर, 1986 तक 6 करोड़ 60 लाख रुपये मूल्य की प्रतिदिन काम में आने वाली वस्तुओं की बिक्री की है। इस बाजार की स्थापना अक्तूबर, 1983 में की गई थी।

पिछले तीन वर्षों में इस बाजार को बहुत लोकप्रियता मिली है और उपभोक्ताओं में एक नई चेतना जागृत हुई हैं। इस बाजार से दूर-दराज की कालोनियों के, विशेषकर जहाँ कमजोर वर्गों के लोग रहते हैं, 25 लाख 25 हजार से अधिक परिवारा को लाभ पहुंचा है।

ये चलती-फिरती गाड़ियां प्रतिदिन 100 से अधिक स्थानों से रोजमर्रा के काम में आने वाली वस्तुएं उचित मूल्य पर लोगों को उनके घर के पास उपलब्ध कराती हैं।

प्रशासन इस बाजार के लिये गाड़ियों की संख्या में तथा प्रतिदिन काम में आने वाली वस्तुओं की संख्या में वृद्धि करके इसे और मजबूत बनाने का प्रयास कर रहा है। प्रशासन का लक्ष्य है कि यह व्यवस्था दिल्ली के सभी क्षेत्रों के लिये उपलब्ध हो।

दिल्ली प्रशासन ने उपभोक्ता-मामलों के निदेशालय की भी स्थापना की है जो सरकारी तथा स्वैच्छिक संगठनों के प्रयासों में तालमेल रखकर उपभोक्ताओं के हित के लिए सार्वजनिक वितरण प्रणाली को मजबूत बनाने का कार्य कर रहा है।

उपभोक्ता-आन्दोलन को मजबूत करने के लिये यदि आपके पास कोई सुझाव है तो कृपया लिखें :-

जग प्रवेश चन्द्र
मुख्य कार्यकारी पार्षद,
पुराना सचिवालय दिल्ली-110054

सूचना एवं प्रचार निदेशालय, दिल्ली प्रशासन, दिल्ली द्वारा प्रचारित

लक्ष्मीशतके उदाहृतानां आख्यानकानां संग्रहः

(डा० वरदराज कण्णन्, हैदराबादः)

१. अमृतमथनकथा

पुरा देवा असुराश्च क्षीरसागरं ममन्थुः। भगवान् नारायणः कूर्मरूपी गिरिं धृत्वा मथनाय साहाय्यमकरोत्।

भगवान् शम्भुः तत्रोत्थितं हालाहलविषं स्वयं भुक्त्वा लोकोपकारी बभूव।

ततः परं क्षीरसमुद्रात् कामधेनुः, उच्चैःश्रवाः, ऐरावतः, कौस्तुभं, पारिजातः अप्सरसश्च क्रमेण समुत्पन्नाः। तदनन्तरं महालक्ष्म्या अवतारः

"ततश्चाविरभूत् साक्षात् श्रीरमा भगवत्परा।
रञ्जयन्ती दिशः कान्त्या विद्युत् सौदामनी यथा॥"

महर्षयः यथाविधि तस्या अभिषेकमकल्पयन्। अनेके तस्यै उपहारान् समार्पयन्।

सा तत्र समन्तात् विलोकयन्ती आत्मनः उचितं पदं व्यचिनोत्। अवद्यरहितं सद्गुणपूर्णं वरं कामयमाना मुकुन्दमेव वव्रे। पश्यत्सु सर्वेषु विष्णोः वक्षस्स्थलं झटित्यारुरोह।

२. इन्द्रस्य राज्यावाप्तिः

कदाचित् देवेन्द्रः ऐरावतारूढः सञ्चरन् आसीत्। तदा महर्षि-दुर्वासाः तस्मै दिव्यमालामेकां ददौ। तां स्वीकृत्य सः गजस्य मस्तकोपरि न्यस्यत्। स च गजः तां मालां भूमौ आक्षिपत्। एतेन महर्षिः क्रुद्धो बभूव। लक्ष्मीवासस्थानभूतां मालां अवज्ञया इन्द्रः एवमकरोत्

---

१. अस्मिन् लक्ष्मीशतके १०, ४६, १०३ श्लोकेषु अन्यत्र च बहुत्र इयं कथा परिगृह्यते।

२. अस्मिन् लक्ष्मीशतके १७, १०२-तमयोः श्लोकयोः अयं कथाभागः निर्दिश्यते।

इति स दुर्वासाः देवेन्द्रं शशाप । ततः देवेन्द्रः नष्टैश्वर्यः विगलितलक्ष्मीकटाक्षोऽभवत् । लोकाश्च क्षीणसमृद्धयः अभूवन् ।

शापाक्रान्त इन्द्रस्सावरोधः क्षीरसागरसमुत्पन्नां लक्ष्मीं शरणमगमत् । तां वहुधा अस्तौत् । पुरन्दरकृतमिदं लक्ष्मीस्तोत्रं विष्णुपुराणान्तर्गतं प्रसिद्धम् । अनेकैराचार्यैरनुसन्धीयमानं च ।

तेन प्रीता महालक्ष्मीः इन्द्रमनुजग्राह । ततः परं इन्द्रः त्रिलोकीसाम्राज्यं सर्वसमृद्धिसहितमवाप्य संपदं निरविशत् ।

३. लक्ष्म्या अवतारस्थलानि

पृथिव्यप्तेजोवाय्वाकाशाः पञ्चभूतानि । तत्र प्रथमायां पृथिव्यामवतारः सीतायाः ।

"क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता ।
भूतलादुत्थिता सा तु व्यवर्धत" इति ह्युच्यते ।

अथ द्वितीयभूतात् पयसः लक्ष्म्या अवतारः अमृतमथनकाले । अथ तृतीयभूतान् अग्नेरपि कदाचित् अवतारस्तस्याः । तद्यथा । भृगुरिति प्रसिद्धो महर्षिः यज्ञमेकमकरोत् । तस्मिन् यागाग्नौ लक्ष्मीराविर्बभूव । भृगुना सा पोषिता संवर्धिता च । परस्तात् विष्णुमेव सा पर्यणयत् । अत एवोक्तम्—

"आविर्भावः कलशजलधावध्वरे वाऽपि यस्याः"
इत्याचार्यवरेण ।

अथ शिष्टौ वाय्वाकाशौ ।

तयोरपि कथं लक्ष्म्यवतारः ?

"ऋचो यजूंमि साषानि सा हि श्रीरमृता सताम्" इति प्रमाणेन "स्वाधीनपतिकां श्रुतिम्" इत्याचार्योक्तया च लक्ष्मीरेव श्रुतिरूपेणावततार इति निश्चिते सति ईश्वरनिश्वासरूपवायोः शब्दगुणकादाकाशाच्च तदुत्पत्तिस्सुवचा भवति । एवं च पञ्चापि भूतानि कालविशेषेषु लक्ष्म्या अवतारस्थलानि ।

४. सीतासमक्षं न वधः

सीता करुणामयी ।

---

३. अयमर्थः अस्मिन् लक्ष्मीशतके ८१-तमे श्लोके उपवर्णितः ।

४. अयमर्थः अस्मिन् लक्ष्मीशतके ५५-तमे श्लोके टंकितः ।

यद्यपि रामः बहूनां राक्षसानां वधमकरोत् तत्र कश्चन सूक्ष्मार्थः सावधानमवलोकनीयः ।

काकासुरः सीतायामार्द्रापराधी । अतितीव्रदण्डार्हः । निस्संशयं वध्य एव । तथाऽपि स रामात् लघुदण्डमेव प्राप्नोति । कुतः ? सीता-सान्निध्यात् ।

मारीचः मायामृगरूपं धृत्वा विचरति । सीता तं मृगं ग्राहयितुमभि-लषति । चोदयति च दयितम् । राघव तेन मृगेन अतिदूरं नीतः । अन्ते मृत्युमाप्नोति मारीचः । तत्र सीतासान्निध्याभावात् दण्डो न लघूकृतः ।

एवमेव विराधोऽपि रामलक्ष्मणावाहृत्य सीतां परित्यज्य किंचिद्दूरं गच्छति । तौ विमुच्य मामाहर इति क्रोशति सीता । तदविगणय्य सः तावेवाहृत्य गच्छति । रामश्च लक्ष्मणं प्रति "अनेनैव पथा गन्तव्यम-स्माकम् । अतः सः गच्छतु" इत्येव वदति । दूरगमनानन्तरमेव विराधवधः ।

एवमेव श्रीमद्रामायणे सर्वत्रेति द्रष्टव्यम् ।

५. सुग्रीवस्य कथं राज्यम् ?

वाली बलीयान् । वयसा च ज्यायान् । सुग्रीवः तस्य अनुजः । वालिना रामे न किञ्चिदपराद्धम् । वालिसख्यात् रावणजयोऽपि सुलभतरः स्यात् । एवं सति किमर्थं रामसुग्रीवसख्यं समपद्यत ? किमर्थं च वाली हतः ? किमर्थं सुग्रीवस्य राज्यलाभः ?

अत्रेदमुच्यते । रावणः सीतामादाय नभोमार्गेण गच्छति । राम रामेति क्रोशन्ती सीता रक्षकं कमपि न पश्यति । स्वकीयान्याभरणानि वस्त्रे निक्षिप्य आकाशतः ऋश्यमूकपर्वतोपरि पातयति । तत्र सुग्रीवः सचिवसमेतः तमादाय रक्षन् पश्चात् रामाय दर्शयति । इति कथा-

'ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती ।
ददर्श गिरिश्रृंगस्थान् पञ्च वानरपुंगवान् ॥"

इत्यारभ्य रामायणे विव्रियते ।

एवं सीतायाः क्षणकालिकस्य सकृत्कटाक्षस्य पात्रभूतः सुग्रीवः । तत्फलत्वेन राज्याधिकं लभते । इत्यहो सीताकटाक्षमहिमा ।

६. वेषः किमर्थम्

रावणो भिक्षुवेषेण जहार जनकात्मजाम् । स्वेनैव रूपेण किमिति

---

५. अस्मिन् लक्ष्मीशतके षट्पंचाशे श्लोके अयमर्थः निगदितः ।

नाजगाम ? किमर्थं वेषधारी बभूव ?

सीतावञ्चनार्थमयं वेष इति समाधानं किंचिदुपपन्नमपि न समग्रतया। सीतादर्शनानुपदमेव तस्या लावण्यं प्रशंसमानः अनतिचिरमेव "अहं स रावणो नाम सीते रक्षोगणेश्वरः" इति याथार्थ्यं प्रकटयति किल ? तर्हि वेषेण किं साधितम् ? सचमत्कारमत्रेदं समाधानम्।

रावणः स्वकीयं स्वाभाविकमाकारं संछाद्य परिव्राजकाकारेण सीतासमक्षमागच्छत्। तथा च सीतायाः कटाक्षः साक्षाद्रावणस्योपरि नापतत्। किन्तु तच्छरीरस्योपरि स्थितेषु वेषोपकरणेष्वेव। एवं विधिचोदनादेव रावणस्य भिक्षुवेषधारणम्। मनागिदं सूचितं वाल्मीकिनैव—

"द्विजातिवेषेण हि तं दृष्ट्वा रावणमागतम्"

इत्यत्र हीतिपदस्य प्रयोगेण।

एवमेव मारीचवृत्तान्तेऽपि। सीताकटाक्षः मायामृगस्योपरि न्यपतत्, न तु कञ्चुकान्तस्स्थितस्य मारीचस्योपरि।

एतदुक्तं भवति। येषामायत्यशुभं, ते यद्यपि सीतासमीपमागच्छन्ति, यद्यपि तया दृष्टा भवन्ति, तथाऽपि विधिवशात् सा दृष्टिः तेषामुपरि न पतति, तेषां वेषच्छन्नत्वात्।

इदमप्यवधेयं यत् यदा रावणः वेषं विना अशोकवने सीतां द्रष्टुम् आगच्छति, तदा सीता तमदृष्ट्वैव तृणमन्तरतः कृत्वा भाषते इति।

७. सीतापरिष्वङ्गः

जनस्थाने महत् युद्धम्। खरदूषणादिराक्षसानां चतुर्दश सहस्राणि। तेषां प्रतियोद्धा राम एकाकी। युद्धान्ते राक्षसा निहताः। रामो विजयी प्रतिनिवर्तते। अस्य अद्भुतविजयस्य पुरस्काररूपेण सीता रामाय किं ददौ ? निबिडालिङ्गनमेव।

"तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम्।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे॥"

रामायणरसिकाः व्याख्यानकुशलाः श्रीवैष्ववाचार्याः अस्मिन् श्लोके प्रतिपदं गभीरानर्थान् प्रोक्तवन्तः।

विजयहेतुरपि सीता। विजयफलमपि सीता। इति हन्त साध्यसाधनयोरैक्यम्।

६· अयं वृत्तान्तः लक्ष्मीशतकेऽस्मिन् ५७, ५८ श्लोकयोः प्रकटितः।

७. इदमस्मिन् लक्ष्मीशतके शततमे श्लोके पादेनैकेन संगृहीतम्।

८. पावकस्यापि शैत्यम्

हनूमतः लाङ्गूले अग्निर्निक्षिप्तः। रावणाज्ञया हनूमते विहितो दण्डोऽयम्। तेनाग्निना सह लंकायां वहुत्र संचरन् स मारुतिः तत्र तत्राग्निं निक्षिप्य निक्षिप्य लङ्कानगरं दहति समग्रम्। किन्तु स्वयं न दग्धः। "शीतो भव हनूमतः" इति सीतायाः प्रार्थनया अग्निः वस्तुस्वभावविरुद्धं शिशिरोऽभवत्। इति हन्त सीतायाः प्रभावः।

एवमेव सीताया अग्निप्रवेशकालेऽपि सा न दग्धेति नाश्चर्यम्।

"तपसा सत्यवाक्येन अनन्यत्वाच्च भर्तरि।
अपि सा निर्दहेदग्निं न तामग्निः प्रधक्ष्यति॥"

इति किल हनूमतो वाक्यम्।

९. राक्षसीष्वपि दया

अशोकवने सीता। तां परिवार्य घोरा राक्षस्यः। रावणविधेयाः सदा परुषवादिन्यः अनेकधा तामतर्जयन्। अभर्त्सयन्। अपीडयन्। सीता तीव्रं कष्टमन्वभवत्।

रामरावणसंग्रामः संवृत्तः। रावणं हत्वा रामो विजयी राजते। सीतासकाशं हनूमन्तं प्रेषयति। सीतासन्निधिमागतो हनूमान् ताः राक्षसीः हन्तुं सीताया अनुज्ञामीहते।

"इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे।
हन्तुमिच्छाम्यहं सर्वा याभिस्त्वं तर्जिताः पुरा॥

इति हनूमद्वाक्यं निशम्य सीता

"पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम।
कार्यं करुणमार्येण न कश्चिन्नापराध्यति॥"

इति प्रतिवदति। हन्त तस्याः क्षमा दया च। अत एव

"मातर्मैथिलि राक्षसीस्त्वयि तदैवाद्रापराधास्त्वयं
रक्षन्त्या पवनात्मजात् लघुतरा रामस्य गोष्ठी कृता"।

इत्याह श्रीभट्टः।

१०. मन्मथमाता

श्रीकृष्णावतारकाले लक्ष्मीः रुक्मिणीरूपेणावततार। रुक्मिण्याः पुत्रः प्रद्युम्नः साक्षात् मन्मथस्य अवतारभूतः। रुद्रकोपात् प्रदग्धो

---

८. अस्मिन् लक्ष्मीशतके ५९ तमे श्लोके इयं कथा स्मर्यते।

९. लक्ष्मीशतकेऽस्मिन् नवमे श्लोके अयं वृत्तान्तो ग्रथितः।

मन्मथ एवं प्रद्युम्नरूपेण शरीरमवाप । इतः पूर्वमपि वासुदेवांश एव किल मन्मथः । प्रद्युम्नो जगति विख्यातः कृष्णतुल्यः शम्बरसूदनश्च । अस्य कथा श्रीमद्भागवते दशमस्कन्धे पठ्यते ।

मन्मथः सर्वानपि वशीकर्तुं समर्थः । ब्रह्मरुद्रविष्णवः अपि तद्वशे स्थिता इति चाटूक्तिः । मन्मथस्य एतावान् प्रभावः कथं सम्प्राप्तः ? तस्य लक्ष्मीसुतत्वात् एव ।

लक्ष्म्याः सकृत्कटाक्षस्य पात्रभूता यदि सकलकुशलसीमासार्वभौमा भवन्ति, तर्हि लक्ष्मीलालितं तत्सुतं प्रति किमु वक्तव्यम् ?

मन्मथस्य सर्वदेहिवशीकरणसामर्थ्यं श्रीदेवीसुतत्वाधिगतप्रभावानुगुणमिति निश्चप्रचम् ।

११. कटाक्षतदुपेक्षे

अमृतमथनावसरे लक्ष्मीरवतीर्णा । तस्या कटाक्षः ब्रह्मादीनां देवानामुपर्यपतत् । भागान्तरस्थाः असुरास्तु तत्कटाक्षं न लेभिरे । फलतः किमभूत् ? इमौ भागवतश्लोकौ—

"श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः ।
शीलादिगुणसम्पन्ना लेभिरे निर्वृतिं पराम् ।
निस्सत्त्वा लोलुपा राजन् निरुद्योगा गतत्रपाः ।
यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ।।"

न केवलमिदम् । विष्णुः मोहिनीरूपधरः यदा अमृतं व्यभजत्, तदा दैत्यदानवानां अमृतं नादात् ।

"इति दानवदैतेया नाविन्दन्नमृतं नृप"

अतः न केवलं धनं, किन्तु शीलादिकं आयुरादिकं च सर्वं शुभजातं लक्ष्मीकटाक्षाधीनमित्युक्तं भवति ।

"ऐश्वर्यं यदशेषपुंसि जगतां सौन्दर्यलावण्ययोः
रूपं यच्च हि मंगलं किमपि यल्लोके सदित्युच्यते ।
तत्सर्वं त्वदधीनमेव"

इति श्रीकूरेशसूक्तिः ।

---

१०. अस्मिन् लक्ष्मीशतके ६४-तमे श्लोके अस्य वृत्तान्तस्य संग्रहः ।

११. अस्मिन् लक्ष्मीशतके ८४-तमे श्लोके पूर्वार्धे पूर्वाचार्यसूक्तिपद्यान्येव प्रयुज्य अयमर्थो निगदितः ।

"इदं सदसदात्मना निखिलमेव निम्नोन्नतं
कटाक्ष-तदुपेक्षयोस्तव हि लक्ष्मि तत्ताण्डवम्।

इति श्रीभट्टसूक्तिः।

१२. गोमाता

एकदा महालक्ष्मीः गोशरीरे क्वचित् वासं रोचमाना गोवृन्दमुपेयाय। गावस्तु चञ्चलायै तस्मै स्थानं दातुं नैच्छन्। लक्ष्मीर्यदा तत्र नित्यवासं कर्तुमङ्गीचकार, तदा गावः परमसन्तुष्टा अवोचन्—"अस्माकं शरीरे तु अनेके अवयवाः पूर्वमेव देवतान्तरैरधिष्ठिताः। योऽवयवो भवत्यै रोचते तमेवाधितिष्ठतु भवती" इति।

"प्रिया गावः! भवद्गुदस्थानं ममावासाय भवतु। तत्र मम सान्निध्येन गोमयस्य गोमूत्रस्य च पवित्रत्वं पावनत्वं च संपद्येत" इति लक्ष्मीराह।

"तथाऽस्तु मातः! धन्या वयम्" इति गावः अङ्गीचक्रिरे।

लक्ष्मीः गोगुदमध्यतिष्ठत्। ततः प्रभृति गोगुदस्य मांगल्यं, गोमूत्रस्य शुद्धिश्च समभवत्। वस्तूनां माङ्गल्यपावनत्वादि सर्वं न तु स्वभावसिद्धं, किन्तु देव्या लक्ष्म्याः संकल्पाधीनं किल!

१३. गुरुपङ्क्तौ लक्ष्मीः

"आचार्याणामसावसावित्याभगवत्तः" इति प्रमाणानुसारेण "आभगवत्तः प्रथितामनघामाचार्यसन्ततिं वन्दे" इति श्रीदेशिकसूक्त्यनुसारेण च श्रीवैष्णवाः स्वाचार्यप्रभृति भगवन्नारायणपर्यन्तमविच्छिन्नामनुस्यूतामाचार्यपरम्परां अहरहस्स्तुवन्तीति तेषामितरवैलक्षण्यम्।

तत्र शठकोपमुनेराचार्यो विष्वसेनः। तस्य सेनेशस्य आचार्यस्थानम् अलंकरोति भगवती लक्ष्मीः। अत एव दैनंदैनिके गुरुपरम्परानुसन्धानक्रमे "सेनेशं श्रियमिन्दिरासहचर" मिति।

"सहधर्मचरीं शौरेः संमन्त्रितजगद्धिताम्।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम्॥"

---

१२. अस्मिन् लक्ष्मीशतके इयं कथा श्लोके ६१ तमे एकस्मिन् पदे संक्षिप्य सूच्यते।

१३. इदं ७२-तमे श्लोके अस्मिन् लक्ष्मीशतके विव्रियते।

इति च पठ्यते ।

इदमत्रावधेयम् । ज्ञानाधिका अपि येन केनापि हेतुना बाह्यमतानां कुदृष्टिपथानां च प्रवर्तका भवन्ति कालविशेषेषु । यथा बृहस्पतिश्चार्वाकमतस्य । किन्तु लक्ष्मीर्न तथा । वैदिके सनातने श्रीवैष्णवसंप्रदाये मात्रं सा आचार्यस्थानं वहति । नान्यस्मिन् । अनुग्रहमयी किल सा ।

१४. दिव्यप्रबन्धावतारः

भगवद्भक्तिनिमग्नानां द्वादशद्रमिडकवीनां प्राचीनानां सूक्तयः चतुस्सहस्रगाथामिता दिव्यप्रबन्धनाम्ना विख्याताः । तेषु प्रधानभूतो ग्रन्थः शठकोपमुनेः तिरुवाय्मोषि (लक्ष्मीमुखोक्तिरित्यर्थोऽस्य पदस्य) शठकोपमुनिः कलियुगारम्भकालीनः ।

दिव्यप्रबन्धः वेदस्यैव द्रमिडभाषायां अपरः आकारः इति आचार्याणां निष्कर्षः ।

"सहस्रशाखोपनिषत्समागमं नमाम्यहं द्राविडवेदसागरम्" इति
"धत्ते यत्सूक्तिरूपेण त्रिवेदी सर्वयोग्यताम्" इति

"आम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तम्" इति च बहुत्र उद्घोषितोऽयमर्थः ।

अनेकसहस्रेभ्यस्संवत्सरेभ्यः पश्चात् श्रीमन्नाथमुनिः योगदशायां शठकोपमुनिं साक्षात्कृत्य तत्प्रसादात् दिव्यप्रबन्धं लब्ध्वा देवगानेन संयोज्य लोके प्रचारमकरोत् इति कथा ।

ततः पश्चात् भगवद्रामानुजस्याज्ञया तच्छिष्येष्वग्रगण्यः पिल्लान् नामा तिरुवाय्मोषिग्रन्थस्य षट्सहस्रग्रन्थमितां व्याख्यां प्रप्रथमं चकार ।

सर्वमिदं लक्ष्मीकैंकर्यरूपम् ।

१५. गोदादेवी

द्विसहस्रसंवत्सरेभ्यः पूर्वतना कथेयम् ।

पाण्ड्यदेशे श्रीविल्लपुत्तूरु नामकं क्षेत्रमस्ति, यत्र भगवतः श्रीवटपत्रशायिनः आलयः प्रसिद्धः । तत्र विष्णुचित्तनामा भक्ताग्रेसरः भगवते पुष्पकैंकर्यं कुर्वाण आसीत् । यश्च 'आल्वार्' इति प्रसिद्धेषु विष्णुभक्तेषु अन्यतमत्वेन गण्यते ।

---

१४. इति वर्ण्यते ६६-तमे श्लोके ।

एकदा स्वकीये उद्याने तुलसीवने स्त्रीशिशुमेकं ददर्श सः। तल्लक्षणै-रियमयोनिजाऽतिविलक्षणाऽस्माकं भाग्यवशादत्रावतीर्णेति निश्चिकाय। गृहमानीय लालनपालनादिभिः पोषयति स्म। सा च गोदा-संज्ञिका सदा भगवति रता, तमेव परिणेतुमुत्सुकाऽभवत्।

तत्कृतयः द्रविडगाथाः दिव्यप्रबन्धान्तर्गताः। त्रिशंत्-गाथात्मकः तिरुप्पावै (श्रीव्रत) प्रबन्धः उपनिषत्तुल्यतया सर्वैराचार्यैराद्रियमाणो विलसति।

भक्तवत्सलो भगवानपि गोदायाः प्रेम अंगीकुर्वन्निव, तन्मस्तक-घृतमालामेव स्वयं धर्तुमौत्सुक्यमदर्शयत्। तस्याः प्रेम्णः उत्कटदशायां हन्त तामेव पर्यणयच्च।

अत्यद्भुतमर्चासमाध्यतीतमिमं वृत्तान्तं दृष्ट्वा श्रुत्वा च जना विस्मयभरिता बभूवुः। नूनं लक्ष्मीरेव गोदारूपेणावतीर्णेति निरणैषुः।

१६. नाथमुनिचरित्रे देव्या अनुग्रहः

श्रीमन्नाथमुनिः भक्तियोगनिष्ठः योगमहिम्ना दीर्घायुश्च (५८३-९२५ ए० डी०) स कदाचित् योगदशायां श्रीशठकोपमुनिध्यानपर आसीत्। तदा श्रीदेवी स्वप्रशिष्यं शठकोपमुनिमेवमाज्ञापयत्—

"अस्मिन् कलिकाले भक्तियोगाधिकारिणो दुर्लभाः।
'भक्त्या परमया वाऽपि प्रपत्त्या वा महामते' इति

विकल्पितस्य प्रपत्तियोगस्य आविष्कारणायायमवसरः प्राप्तः। नाथमुनिः भवद्ध्यानपरो वर्तते। भवान् तत्प्रत्यक्षभूतस्सन् प्रपत्तिशास्त्रं तन्मुख्यकरणभूतं मन्त्ररत्नं तदुपयुक्तांशान् च तस्मै उपदिशतु। तदनुष्ठाय अन्यानपि अनुष्ठाप्य वर्तितव्यमिति स नियोज्यः। अवि-च्छिन्नया आचार्यशिष्यसन्तत्या लोकोज्जीवनमुद्दिष्टम्" इति।

एतदाज्ञानुसारं शठकोपमुनिरपि तथैवाकरोत्।

"लक्ष्म्या नियोगतः पूर्वं कुरुकाधीशकारिजः।

---

१५. इयं गोदादेवी तस्याः श्रीव्रतप्रबन्धश्च प्रथमे श्रीव्रतदले विशिष्य च ३, ४ श्लोकयोः गद्येते।

१६. अयं वृतान्तोऽस्मिन् ग्रन्थे ७८-तमे श्लोके सूचितः।

मन्त्ररत्नमदाद्यस्मै" इति
"व्योम्नः परस्तात् सविधं समेत्य
लक्ष्म्या नियोगात् कुरुकाधिराजः ।
स मन्त्ररत्नं द्वयमाह यस्मै
नाथाय तस्मै मुनये नमोऽस्तु ॥"

इत्युक्तरीत्या लक्ष्मीनियोग एव शरणागतिसंप्रदायावतरणहेतुः ।

१७. यामुनमुनये लक्ष्म्या अनुग्रहः

श्रीश्वरभट्टः श्रीमन्नाथमुनेः पुत्रः । तस्य पुत्रः यामुनः कल्यब्दे ४०१७-तमे (९१५ ए.डी.) अजनि ।

यामुनस्य शैशवे महालक्ष्मीरतिवात्सल्येन तस्मै सकृत् स्तन्यमदात् । येन हेतुना बाल्य एव स लोकातिशायिज्ञानविशिष्टो विरराज । वेदान् शास्त्राणि चातिशीघ्रमधिजगाम । राजसभाप्रधानपण्डितं स्वमेधया वादे विजित्य राज्ञ्याः अभिमानपात्रमभवत् । यामुनस्य राजसभावाद-वैखरीप्रकारः अतिविलक्षणो ग्रन्थारूढोऽद्यापि पठितॄणामाह्लादकः । येन राज्यार्धमपि तस्य वशेऽभवत् । परन्तु पश्चात् स राज्यसुखादधिकं भगवदनुभवरसं विज्ञाय तल्लग्नोऽभवत् ।

आगमप्रामाण्यप्रभृत्यनेकग्रन्थानां रचयिता चायं यामुनार्यः भगवद्रामानुजस्य प्राचार्यः । अपि च यामुनार्यपुत्रस्य दौहित्रः रामानुजः । अत एव लक्ष्मीविषयिकगद्यचूर्णिकायां 'अखिलजगन्मातरम् अस्मन्मातरम्' इति स्वस्य यामुनमुनिवंशजननतः विशिष्टाकारेण लक्ष्मीर्माता भवतीति आशंते ।

यामुनाचार्यश्च 'कान्तस्ते पुरुषोत्तम' इत्यारभ्य लक्ष्मीविषयिकां चतुश्श्लोकीं व्यरचयत् । या चाद्य भारते श्रीवैष्णवसमूहे सुप्रसिद्धा नित्यानुसन्धीयमाना च ।

पश्चात् यामुनाचार्यस्यैव वंशे जाताय अपरस्मै शिशवेऽपि एवमेव लक्ष्म्याः अनुग्रहोऽभवत् (प्रायः १५७२ A.D.) सः लक्ष्मीकुमारताताचार्य इति नाम्नैव प्रसिद्धोऽभवत् ।

---

१७. कथेयमस्मिन् लक्ष्मीशतके ६२, ६३, ६४, ७३ इति श्लोकेषु वर्णिता ।

१८. ताताचार्यकथा

सहस्राधिकसंवत्सरेभ्यः प्राक् श्रीवेङ्कटाचलक्षेत्रे भगवतः श्रीनिवासस्य कैंकर्ये निरतः श्रीशैलपूर्णनामा भक्ततल्लजः। भगवन्नियमनेन प्रतिदिनमाकाशगंगानदीतः जलमादाय आतपकण्टकादिजन्यं खेदं सोढ्वा पद्भ्यामेव सुदूरं चलन् भगवते वेङ्कटेशायार्पयति स्म।

एकदा भगवान् बाणहस्त (किरात) बालवेषेण पथि जलमाहरन्तमिमं संगम्य संबभाषे।

बालः मम पिपासाऽधिका। जलं दीयताम् तात!

पूर्णः—भगवते उद्दिष्टमिदम्। तुभ्यं दत्वा तदुच्छिष्टं भगवतेऽनर्हं स्यात्।

बालः—तर्हि गम्यताम्।

किन्तु स बालः पश्चात्तः आगम्य शिरस्स्थघटे आस्यं न्यस्य जलमपिबत्।

पूर्णः—किमेतत् कृतं बाल !

बालः—मास्तु कोपः। पिपासा अधिका। अतः पिबामि।

पूर्णः—(घटं भूमौ निक्षिप्य) यथारुचि पिब।

बालः—(समग्रं पीत्वा) तृप्तोऽस्मि।

पूर्णः—पुनराकाशगंगां गत्वा स्नात्वा घटं विशोध्य भगवते तीर्थमादायागन्तव्यम्।

बालः—तावद्दूरं न गन्तव्यम्। आकाशगंगामत्रैवानयामि (तस्य बाणेन विद्धात् गिरेः स्रोतः प्रवहति)

पूर्णः—नूनमियमाकाशगंगैव। तान्येव चह्लानि। अहो !

अतित्वरया जलमादाय देवालयं गच्छति पूर्णः किन्तु तत्र भगवदाराधनं समाप्तं दृष्ट्वा विषीदति। भगवानावेशरूपेण "तात ! उत्तिष्ठतु भवान्। अलं सन्तापेन। भवतस्तीर्थं मार्गे एवापिबमहम्। भवदर्थं नदीं च समीपे आनयम्। अपि च भवन्तं तातेत्याह्वयम्।" ततः प्रभृति सः तद्वंशीयाश्च ताताचार्यपदेन व्यवह्रियन्ते।

---

१८. इयमस्य कथा लक्ष्मीशतकेऽस्मिन् ६५-तमे श्लोके संक्षिप्ता।

अयं श्रीशैलपूर्णो भगवतो रामानुजस्याचार्येष्वन्यतमः। श्रीमद्रामायणस्य विशेषार्थानस्य सकाशादष्टादशकृत्वः पठित्वा जग्राह रामानुज इत्यैतिह्यम्।

अनुसन्धीमहि च—"पितामहस्यापि पितामहाय

प्राचेतसादेशफलप्रदाय ।

श्रीभाष्यकरोत्तमदेशिकाय

श्रीशैलपूर्णाय नमो नमस्तात्" इति।

लक्ष्मीनिवासकैंकर्यशीलोऽयं पूर्णः सीताचरित्रविशेषार्थप्रवक्ता।

१९. रामानुजमुनिचरित्रे कश्चनांशः

चोलदेशे श्रीरङ्गक्षेत्रे लक्ष्म्याः श्रीरङ्गनायिकाया आलयेऽलंकृतः मण्डपः। फाल्गुनपौर्णमीशुभदिवसः। श्रीरङ्गनाथः लक्ष्म्या सह तत्रोत्सवं भजते। भगवान् रामानुजः स्वशिष्यवृन्देन साकं शरण्यदम्पतीसेवार्थमागतः। ध्यानमग्नः तदेकचित्तः ताभ्यां सह संभाषमाण इवासीत्। तदानीं तन्मुखादाविर्भूतः ग्रन्थः शरणागतिगद्यमिति। अतिसरलमिदं गद्यम् अतिमधुरं च। पामरस्यापि भक्तिजनकं पण्डितस्यापि भोग्यम्।

प्रतिसंवत्सरमद्यतनकालेऽपि एतद्वृत्तान्तस्मारणरीत्या फाल्गुनीपौर्णमीदिने दिव्यदम्पत्योस्संमुखे गोष्ठीगानरूपेण पठ्यते शरणागतिगद्यमिदम्। तत्र प्रथमचूर्णिका लक्ष्मीविषयिका—

"भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणां

पद्मवनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं

निरवद्यां देवदेवदिव्यमहिषीमखिलजगन्मातरं

अस्मन्मातरमशरण्यशरण्यामनन्यशरणश्शरणमहं प्रपद्ये" इति।

२०. श्रीपराशरभट्टः

भगवतो रामानुजस्य प्रशिष्योऽयं प्रकाण्डपण्डितः लक्ष्म्याः श्रीरङ्गनायिकायास्तीव्रभक्तः। श्रीगुणरत्नकोशग्रन्थरचयिता। सः स्वान्तेवासिनः लक्ष्म्युत्कर्षं बहुधा बोधयति स्म।

---

१९. अयं वृत्तान्तो लक्ष्मीशतकेऽस्मिन् ७४-तमे श्लोके निर्दिश्यते।

"श्रियं त्वत्तोऽप्युच्चैर्वयमिह भणामः शृणुतरा" मिति रंगनाथं संबुध्य उदघोषयत् ।

"ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति रीत्या श्रियः पतित्वमेव परतत्त्वनिर्धारकम् । अन्यलिंगैर्मन्दमतीनां निर्धारणाभावात् । अतः

"वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति" इत्याह । न केवलमिदम् । हरेः परत्वमेव लक्ष्मीकटाक्षायत्तमिति स्पष्टमाह—

"अपाङ्गा भूयांसो यदुपरि परं ब्रह्म समभूत्
अमी यत्र द्वित्रास्स च शतमखादिस्तदधरात्" इति ।

अस्मिन् लक्ष्मीशतके क्वचित् श्रीभट्टप्रयुक्तानां पदानां तथैव प्रयोगः क्रियते । क्वचित् तदर्थानां चानुवादः क्रियते ।

अस्य श्रीपराशरभट्टस्य पिता श्रीकूरनाथः (श्रीवत्सांकमिश्रः) श्रीस्तवस्य रचयिता ।

२१. वेदान्तदेशिकचरित्रे कश्चनांशः

श्रीवेङ्कटनाथार्यः सप्तशतवत्सरेभ्यः पूर्वं श्रीरङ्गक्षेत्रे निवसतिस्म । कवितार्किकसिंह, वेदान्तदेशिकः इत्यादि विरुदैर्विशिष्टोऽयम् । तत्क्षेत्रमागतः कश्चन दरिद्रब्रह्मचारी तत्रत्यानाढ्यान् स्वविवाहार्थं धनं ययाच । तेषु केचन श्रीवेंकटनाथस्य कीर्तिमसहमानाः तमवमन्तुमनसः तद्गृहं प्रदर्श्य याचकमूचुः "एतद्गृहस्वामी धनिकः । दाता च । अभीष्टं भवते देयात्" इति । वस्तुतस्तु श्रीवेंकटनाथोऽपि परमदरिद्रः धने निस्स्पृहश्च । तमुपेत्य स ब्रह्मचारी यथावत् सर्वमाचचक्षे । कृपालुराचार्यः "यद्येवमेतत्क्षेत्रवासिभिः भागवतैश्चोदितः तन्नियमनेन भवान् मामुपागतः, तर्हि नैष मोघो भवेत्" इत्युक्त्वा महालक्ष्मीविषयिकां श्रीस्तुतिं 'मानातीतप्रथितविभवा"मित्यारभ्य मन्दाक्रान्तावृत्तेन प्रणिनाय । श्रीश्चास्य भक्त्या भागवतप्रावण्येन निस्स्वार्थतया च सन्तुष्टाऽभवत् ।

"तेषां भूमेर्धनपतिगृहादम्बरादम्बुधेर्वा

---

२०. इमेऽर्थाः ८२, ८५ तम श्लोकयोः द्रष्टव्याः ।

धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम्"

इति पठनावसरे हन्ताश्चर्यम्। आकाशात् कनकधाराया वर्षः। अहो महालक्ष्म्याः करुणा। आचार्यस्तु तत्सर्वं ब्रह्मचारिणे प्रादात्। स चास्य माहात्म्यवेदी प्रणम्य निर्जगाम। तच्चोदकाश्च एतदीयं प्रभाव विदित्वा सलज्जाः एनं प्रणम्य अपचारक्षामणमकुर्वन्।

तुण्डीरमण्डले काञ्चीक्षेत्रे लक्ष्म्या महादेवीनाम्न्याः सन्निवौ प्राकारभित्तौ एकं चित्रं लिखितमद्यापि दरीदृश्यते यस्मिन्नयं वृत्तान्तः चित्रितः।

२२. वेदान्तदेशिकचरित्रे अन्योंऽशः

कवितार्किककेसरी वेङ्कटनाथः श्रीरंगनाथेन 'वेदान्तदेशिक' इति दत्तविरुदः। श्रीरङ्गनायिका चास्मै सर्वतन्त्रस्वतन्त्र इति विरुद-मनुजग्राह।

"तत्प्रेयस्या सर्वतन्त्रेषु दाक्ष्यं
दत्तं यस्मै प्रीतया देशिकाय" इति
"लब्धवेदान्तगुर्वाख्यो रङ्गराजाज्ञया गुरुः।
सर्वतन्त्रस्वतन्त्राख्यां स भेजे तत्प्रियाज्ञया" इति चाहुः।

लक्ष्मीदत्तत्वादेवास्य विरुदस्य, सः गुरुः शिल्पशास्त्रकूपनिर्माणा-दिष्वपि स्वनैपुण्यमाविरकरोत् पश्चात्तनसन्दर्भेषु।

२३. लक्ष्मीलोलनरसिंहः

आन्ध्रदेशे श्रीमदहोविलक्षेत्रे नवनरसिंहानामालयः। नव नृसिंहेष्वन्यतमः श्रीमालोलनरसिंहः। प्रायः षट्शत संवत्सरेभ्यः प्राचोना कथेयम् श्रीवण्शठकोपनामा मुनिः ज्ञानानुष्ठानवैराग्यशेवधिरासीत्। तस्य स्वप्ने मालोलनरसिंह एवमाज्ञापयत् —

"मम उत्सवमूर्तिमादाय भवान् ग्रामे ग्रामे पर्यटतु। दिव्यविग्रहस्य आराधनं दैनन्दैनिकं भवानेव करोतु। बहुजनानुग्रहकुतूहली अहम्" इति।

---

२१. इयं कथा लक्ष्मीशतकेऽस्मिन् ७५-तमे श्लोके वर्णिता।

२२. अयं विषयः लक्ष्मीशतकेऽस्मिन् ७६-तमे श्लोके सूच्यते।

स च मुनिः अहोबिलमठं संस्थाप्य श्रीमालोलनृसिंहाराधनपरो भारतदेशे बहुत्र संचार्य सिद्धान्तस्थापनं जनसंघानुग्रहं च कुर्वाण आसीत्। सेयं वृतिरद्याप्यनुस्यूता। यदहोबिलमठे मूर्धाभिषिक्तः अद्यतनयतिरद्यापि मालोलनृसिंहाराधको बहुत्र संचरतीति।

प्रसिद्धदिव्यदेशालयस्य मूर्तिरेवं संचरतीत्यपि विलक्षणमेव। न कुत्रचिदप्यन्यत्रैवं दृश्यते। भगवन्नियमनं शास्त्रानुमतेरपि बलीय इति महान्तोऽप्याहुः।

एतादृशी अभूतपूर्वा कृपा मालोलनृसिंहस्य कथमुत्पन्ना? लक्ष्मीलोलः किल सः? दयासमुद्रभूताया लक्ष्म्याः प्रेरणेनैवैतत्सर्वम्।

२४. कोमलवल्ली देवी

श्रीकुम्भघोणक्षेत्रं चोलदेशे। श्रीशार्ङ्गपाणेरालयः। तत्र अर्चारूपिण्या लक्ष्म्या नाम कोमलवल्लीति।

क्रैस्तवीयाष्टादशशताब्दे 'नायक' राजानः चोलदेशपालका अभवन्। राजपुरोहितः श्रीकुमारतातार्यः। स्वगुरौ तातार्ये अत्यन्त भक्तिमान् राजा। नृपसाह्येन श्रीतातार्यः कोमलवल्लीदेव्यै पृथक् सन्निधिं निरमापयत्। तेन सुतरां प्रसन्ना लक्ष्मीः। एकाञ्जलिमात्राय सर्वाभीष्टदायिनी किल सा। आश्चर्यमिदं यत् सा राजानं चोदयामास गुरवे कुमारतातार्यायापि सन्निधिमेकं निर्मातुम्। राजाऽपि तथैवाकरोत्। अधुनाऽपि तस्मिन् देवालये संदृश्यते तातार्यस्य सन्निधिः नित्यपूजाविधानं च तत्र। अहो मातुः करुणा!

२५. हयवदनाङ्कलक्ष्मीः

श्रीवैष्णवसिद्धान्ते प्रख्याता आचार्या अनेके। तेषामाराध्यदैवतं प्रायः लक्ष्मीनरसिंहलक्ष्मीहयग्रीवयोरन्यतर एव। सिद्धान्ताभिवृद्धये आराध्यदेवस्य अङ्कस्थिता लक्ष्मीर्नितरामनुगृह्णातीति तत्त्वम्।

तुण्डीरमण्डले नावल्पाक्कग्रामे चतुर्वेदशतक्रतुकुलतिलकभूतः

---

२३. लक्ष्मीशतकेऽस्मिन् ७७-तमे श्लोके इदमाख्यानकं ग्रथितमस्ति।

२४. अयं वृत्तान्तः लक्ष्मीशतकेऽस्मिन् ६८-तमे श्लोके संगृहीतः।

प्रायस्साधंशतसंवत्सरेभ्यः पूर्वंमण्णयार्यंमहादेशिक नामा (१७९१-१८६३ A.D.) प्रसिद्ध आसीत् ।

स कदाचित् पूर्वोदधितीरवर्तिनि श्रीस्थलशयनक्षेत्रे श्रीज्ञानवराह-सन्निधिसविधे पुष्करिणीजले आकण्ठमग्नस्तिष्ठन् तीव्रव्रतानुष्ठानं संकल्प्य उचितैर्नियमैस्सह हयग्रीवमन्त्रावृत्तिं कुर्वाणस्तपस्तेपे ।

तेन प्रसन्नो हयग्रीवः तस्य स्वप्न इवाविर्भूय "प्रीतोऽस्मि । व्रतं समाप्यताम् । ज्ञानसमृद्धिर्भवेत् । अर्चारूपिणं लक्ष्मीहयग्रीवमाराध्य उत्तरोत्तराभिवृद्धिं भजस्व" इत्यनुगृह्णात् ।

तेनाराधितो लक्ष्मीहयग्रीवः अद्यापि तदनुबन्धिभिराराध्यमानः नावल्पाक्कग्रामे ज्ञानसमृद्धिहेतू राजते । तदङ्कस्थिता लक्ष्मीः अस्मान् अधिकमनुगृह्णाति च ।

२६. अष्टलक्ष्म्यालयः

मद्रास्नगरे वसन्तनगराभिधः समुद्रतीरप्रदेशः ।

अस्मत्समकालीनेयं नवीना कथा ।

करुणामयी लक्ष्मीः कंचन भाग्यशालिनं नरं संचोद्य एकमालयं स्वस्मै स्वप्रीतये स्वयमेव निर्मापितवती ।

यत्र चाष्टधा रूपमादाय ओंकारविमानमध्यस्था आगमविद्भिः पण्डितैराराध्यमाना सती अस्मान् कृपया पालयति ।

या चेयं मामपि एतद्ग्रन्थनिर्माणे सज्जनद्वारा नियुनक्तिस्म । या च महज्जनद्वारैव स्वकीयालये एतद्ग्रन्थ (लक्ष्मीशतक) एकदेशं शुश्राव जनानश्रावयच्च ।

अस्याः कीर्तनमसकृत् क्रियतेऽस्मिन् स्तोत्रे ।

---

२५. इदमस्मिन् लक्ष्मीशतके ६९-तमे श्लोके ज्ञापितम् ।

२६. अर्वाचीनतममिदमाख्यानकं लक्ष्मीशतकेऽस्मिन् ७, ८, १०, १५, ३१ आदिषु श्लोकेषु निबद्धमस्ति ।

श्रीगङ्गावन्दनम्

(डा० रामकिशोर मिश्रः, म०मा०डिग्री कालेजः
खेकड़ा २०११०१)

गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।

भागीरथीं त्रिपथगां प्रणमामि गङ्गाम्,
त्रिस्रोतसं जगति जह्नुसुतां च वन्दे ।
आयासि देवि ! हिमपर्वतो धरित्रीम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।१।।

विष्णोः पदाज्जननमाप्तवती त्वमेव,
तस्माद् बुधैर्जगति विष्णुपदी त्वमुक्ता ।
स्वच्छं शुभं त्वमरजीवनदं जलं ते,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।२।।

निस्सृत्य विष्णुचरणादधिकन्तु कालं,
स्रष्टुः कमण्डलुगता भ्रमणं ह्यकार्षीः ।
ब्रह्मा तवाऽमृतजलं त्वपिबत्प्रसन्नः,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।३।।

तस्मात्कमण्डलुमुखाद् बहिरागता त्वं,
देवि ! स्ववासमकरोः स्वशिवाऽलकेषु ।
देवापगा सुरनदी सुरनिम्नगा त्वम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।४।।

भागीरथेन तपसा भवती प्रसन्ना,
तस्याऽन्वये सगरषष्टिसहस्रपुत्रान् ।
तानुद्दधार कृपयोद्धर भारतं माम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।५।।

हे देवि ! सिञ्चसि पवित्रजलेन देशे,
प्राचीपयोधिमितभारतमातृभूमिम् ।
रत्या पतिं च सरितामुपयासि भद्रे,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥६॥
जीवाणुजीवनवती सुरनिम्नगे ! त्वं,
धारा जलस्य तव देवि ! विषाणुहन्त्री ।
एष त्वदीयजलगन्धकतत्त्वसारः,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥७॥
स्वर्गे च भूमिविवरे च वसुन्धरायां,
तिस्रो वहन्ति सुभगे ! तव नीरधाराः ।
तस्माद् बुधैस्त्रिपथगा गदितासि शुभ्रे,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥८॥
सत्त्वं रजस्तम इति त्रिगुणप्रदासि,
तत्सद्गुणोऽस्ति तव भक्तजनेषु भक्तिः ।
तैर्मोक्षदा मृतवती सुखदा त्वमुक्ता,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥९॥
पत्न्यो नवाश्च पतयश्च विवाहिता ये,
कुर्वन्ति ते तव तटं प्रगतास्तु पूजाम् ।
तत्प्रेम सिञ्चसि रजस्तरसा गृहेषु,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१०॥
तीरस्थितानि नगराणि निपातयन्ति,
मूत्रं मलं च तव निर्मलशम्बरेऽस्मिन् ।
तस्मात्तमःप्रदरसं प्रददासि देवि,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥११॥
ये स्नान्ति देवि ! मनुजास्तव शुभ्रतोये,
तेषामपुण्यनिकरं हरसे त्वमेव ।
मातासि भारतमहीसुरवंशजानाम्
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१२॥
शक्त्याऽमृतस्य तव भारत उत्तरस्यां,
क्षेत्राणि शस्यभरितानि फलैर्युतानि ।
धान्यप्रदा कृषकजीवनदा सुभङ्गे !
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१३॥

मृत्युं गतस्य हि जनस्य मुखे जलं ते,
दाहात्पुरो गृहजना विनिपातयन्ति ।
मोक्षप्रदं तदमृतं सलिलं त्वदीयम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१४॥
द्वारं हरेः प्रथितमत्र च रामघट्टः
सोरोंपुरी तदिह कर्णपुरं प्रयागः
वाराणसी शिवनिवासपुरी च काशी,
तीर्थानि देवि ! तव तीरगतानि गङ्गे ।१५॥
वङ्गाच्च मालवपुरेभ्य इहाऽङ्गपूर्भ्य
आयान्ति देवि ! पुरुषा बहुदूरदेशात् ।
ते त्वां नमन्ति च रजस्तव धारयन्ति,
शान्तिप्रदं तव जलं ह्यमृतं च गङ्गे !॥१६॥
त्वं शान्तिदा शमनदासि च तृप्तिदासि,
शीर्षं विषस्य शमनाय शिवेन नीता ।
प्राप्ता प्रशान्तिरिह शीतजलेन तेन,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१७॥
ऐश्वर्यमस्य जगतः परिहाय गङ्गे !
पीयूषतुल्यजलमद्य पिबामि तेऽहम् ।
प्राप्तिर्जलस्य तव पुण्यकृतां हि देवि !
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१८॥
ते भाग्यशालिमनुजाः खलु सन्ति विश्वे,
ये प्राप्नुवन्ति सुखदं शुभदर्शनन्ते ।
पूतेन मां स्वसलिलेन पुनीहि देवि !
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥१९॥
त्वां याचते सुतवरं पतिरात्मपत्न्याम्,
पुत्रीं च काऽपि गृहिणी स्वपतेस्तनूजाम्
त्वां प्रार्थयन्ति निजकामनया मनुष्याः,
तत्कामनां झटिति पूरयसीह गङ्गे ! ॥२०॥
पुत्रं प्रसूय जननी तव तीरमेत्य
स्नाता च मुण्डयति तं स्वसुतं त्वदप्सु ।
तस्याऽलकानपि च वाहयति स्वभक्त्या,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ॥२१॥

आरुह्य यं मकरमत्स्यमहो ! प्रयासि,
जीवान् स भक्षयति सन्तततोयजातान् ।
तत्स्वास्थ्यवर्धकपयस्तव दुग्धतुल्यम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।२२।।

भक्तास्त्वदीयममृतं सलिलं निपीय,
देवा इवाऽत्र भुवने ह्यमरा भवन्ति ।
ते धारयन्ति तिलकं तव मृत्तिकायाः,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।२३।।

कुर्वन्ति ते तटगता जयकारशब्दान्,
मातः ! प्रपाहि, जय देवि ! सुखप्रदासि ।
भोगप्रदासि सुतदासि नमोऽस्तु तुभ्यम्,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।२४।।

स्नामि, त्वदीयममृताम्बु मुदा पिबामि,
स्वे मस्तके तव रजस्त्वपि धारयामि ।
भक्तिं प्रदाय भुवि माममरं कुरुष्व,
गङ्गे ! त्वमेव कृषिवृद्धिकरी नमस्ते ।।२५।।

आचार्यवर्यकविरामकिशोरमिश्रो
यद् वन्दनं व्यरचयत्सुरनिम्नगायाः ।
तत्पाठकाय भुवि या हि सुखानि दत्ते,
सर्वान् सदा स्वपयसा खलु पातु गङ्गा ।।२६।।

भारत उत्तरप्रदेश एटाजनपद-सोरोंवासी
कालोदधिखात्माब्दे(२०४३) गङ्गादशमीदिवसे धीमान् ।
होतीलालकलावतीसुतो रामकिशोरमिश्र इह
श्रीगङ्गावन्दनमिति काव्यं वसन्ततिलके कृतवान् ।।२७।।

शिमला

(आचार्य श्रीनिवास रथः, उज्जयिनी)

गौरीगुरोः प्रदेशे विमला
शिमला सपदि मनो हरते ।।

(१)

सस्मितमधुरवधूवचनानि
अथवा केशकलितकुसुमानि
उपर्युपरि परितः प्रतिशिखरं
खचितानि तथा भवनानि
शरणागतजनतापहारिणी
सुखदं तपनातपमपि तनुते ।
गौरीगुरोः प्रदेशे विमला
शिमला कतिधा न मनो हरते ।।

(२)

क्षेत्रपंक्तिसोपानविधानम्
भवति पर्वतानां परिधानम्
सरलद्रुमराजीविराजिता
मनसि जनानां परा सरलता
खेलतीव सर्पति लघुयानम्
दरीं निविशते दरीदृश्यते ।
गौरीगुरोः प्रदेशे विमला
शिमला कतिधा न मनो हरते ।।

(३)

यज्ञोपवीतसूत्रोपमिता
क्वचिदपि काञ्चीगुणमिव घटिता

उरगाश्रितपशुपतितनूपभा
प्रसरति सरणिदीपिता सुषमा
हनूमता विश्रामसत्कृता
सञ्जीवनीप्रसादं भजते ।
गौरीगुरोः प्रदेशो विमला
शिमला कतिधा न मनो रमते ॥

(४)

स्मरति पार्वतीलास्यमहत्त्वं
जानीते शिवताण्डवतत्त्वम्
रक्षति कालक्रमोपनीतं
परिचिनोति किन्नरसङ्गीतम्
हिमाचलपरम्परापोषितां
शान्तिसम्पदं सदा कलयते ।
गौरीगुरोः प्रदेशो विमला
शिमला कतिधा न मनो हरते ॥

हम भारतवासी

अपने गणतंत्र के महान आदर्शों

लोकतंत्र
समाजवाद
धर्म-निरपेक्षता
न्याय
स्वतंत्रता
समानता
भ्रातृत्व
सद्भावना
एकता
अखंडता
शांति
उन्नति

के प्रति समर्पित हैं

हम इनके प्रति सदा ही
वचनबद्ध रहेंगे

आकाशवाण्याः समस्तकेन्द्रेभ्यः २५.१.१९८७ ई० तारिकायां रात्रौ ९.४५ वादनकाले प्रसारिते सर्वभाषाकविसम्मेलने पठिता संस्कृतकविता

अहं स्वतन्त्रता भणामि

(डा० रमाकान्त शुक्लः, आर ६, वाणी-विहारः, नयी दिल्ली-११००५९)

अहं स्वतन्त्रता भणामि मद्वचो निशम्यताम् ।
निधाय मानसे च तद् यथोचितं विधीयताम् ।।
अहं स्वतन्त्रता भणामि .... ।

(१)

मदर्चनाकृते शिरांस्युपायनीकृतानि यैः,
धनं वपुस्तथा मनः सहर्षमर्पितानि यैः ।
अवापुरात्मवक्षसि ज्वलद्भुशुण्डिगोलिकाः,
गता त एव मे जना सदैव वन्दनीयताम् ।।
अहं स्वतन्त्रता भणामि ......।।

(२)

भवद्भिरन्तरिक्षगा जनाः स्वदेश ईक्षिताः,
भवद्भिराततायिनाशकारिणोऽपि दीक्षिताः ।
कृतं भवद्भिरेशियाद्ध्यशीतिखेलयोजनम्,
तदेतदर्थमद्य मे शुभेहितं प्रगृह्यताम् ।।
अहं स्वतन्त्रता भणामि ......।।

(३)

भवद्भिरद्य दृश्यते यथार्थिकी समुन्नतिः,
भवद्भिरद्य दृश्यते नवा च या विनिर्मितिः ।
भवभिद्रद्य यः स्वतन्त्रतारसो निपीयते,
तदेतदात्मजीवने चिरं चिराय धार्यताम् ।।
अहं स्वतन्त्रता भणामि ......।।

आकाशवाणी द्वारा २३.१.१९८७ को भोपाल में आयोजित तथा
२५.१.१९८७ को दिल्ली से प्रसारित
सर्वभाषा कवि सम्मेलन में प्रस्तुत संस्कृत कविता

मैं स्वतन्त्रता तुम्हें पुकारती !

('अहं स्वतन्त्रता भणामि' का हिन्दी काव्यानुवाद)

(रूपान्तरकार-श्री कृष्णमुरारि शर्मा, विश्वेश्वरानन्द वैदिक शोध संस्थान, साधु आश्रम, होशियारपुर, पंजाब)

मैं स्वतन्त्रता तुम्हें पुकारती सुनो।
सोचकर हृदय वितान कर्म के बुनो।

अर्चना-पलों में जो शिरों की भेंट दे गये।
देह-गेह सौंप हर्ष पूर्ण चित्त से गये।
गोलियाँ सही जिन्होंने आत्म वक्ष पर सदा
जो रहे सदैव ही नृवीर देश की गदा।

उन्हीं महान् वन्दनीय के चरित गुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।१।।

अन्तरिक्ष में विहार के समर्थ जन यहाँ।
देखते रहे सुपुत्र! दुष्टता-दलन यहाँ।
इस शती में एशिया-बयासी खेल-योजना
सफल, चिरायु देश के लिए हैं भद्रभावना।

नित्य नव सृजनमयी सुकल्पना ठनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।२।।

आज जो समुन्नति निहारते सहर्ष हो।
आज जो भी निर्मिति सँवारते प्रकर्ष हो।
आज रस स्वतन्त्रता समोद पान कर रहे।
आज जो दिगन्त कोटि कण्ठ गान कर रहे।

अहो! वरेण्य चेतना-पलो! अमृत बनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ।।३।।

(४)

शुभा हि कामनाः भवत्कृते समर्पयाम्यहम्
समुन्नतिं सुखं च वः सदैव चिन्तयाम्यहम् ।
परन्तु वर्तमानया विचित्रकाललीलया,
मनाग् विचिन्तिता यदेव वच्मि तन्निशम्यताम् ।।
अहं स्वतन्त्रता भणामि……।।

(५)

मया न कल्पितं कदापि दुर्बलाभिशोषणम्,
मया न कल्पितं कदापि दुर्जनाभिपोषणम् ।
मया न कल्पितं कदापि सज्जनावमाननम्,
सहेऽखिलं च च तद् यथा सहै न, तद्विधीयताम् ।।
अहं स्वतन्त्रता भणामि……।।

(६)

विलोकयामि वृत्तिहीनतामहं यदा यदा,
विलोकयामि नीतिहीनतामहं यदा यदा ।
नतानना गतासुका भवाम्यहं तदा तदा ।
इयं दशा न मेऽस्तु येन, तत्सदा विधीयताम् ।।
अहं स्वतन्त्रता भणामि……।।

(७)

यदा यदा शृणोम्यहं वधूविदाहपातकम्,
यदा यदा शृणोम्यहं बलात्कृतिं विहिंसनम्,
तदा तदा भवाम्यरुन्तुदव्यथाप्रपीडिता ।
इयं व्यथा प्रणाशमेतु येन, तद्विधीयताम् ।।
अहं स्वतन्त्रता भणामि……।।

(८)

स्वदेशवासिभिः स्वदेशवासिनां विहिंसनम्;
पृथक्त्वभावपोषणं स्वदेशदेहदारणम् ।
अधीतिपण्यविक्रयं करप्रदातृनिःस्वतां,
विलोक्य यां शुचं गतास्मि, सा द्रुतं विलोप्यताम् ।।
अहं स्वतन्त्रता भणामि……।।

दे रही तुम्हें अरे अनन्त भद्र कामना।
शान्ति सुख समृद्धि के लिए उदार भावना।
परन्तु दैवयोग से विचित्र काल आ गया।
युग-युगों की एकता अभाग्य हाय! खा गया।
चिन्तनीय पल, परन्तु शीश ना धुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥४॥

नहीं थी कल्पना अबल कि इस तरह भी रोयेंगे।
और कुकर्म रत मनुज ऊंचाइयों में खोयेंगे।
नहीं था भान सत्य-पथ में शूलमात्र छायेंगे।
भोले देश जन कहो, दुआर किसके जायेंगे।
सह चुकी बहुत, न और यूँ निठुर बनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥५॥

देखती हूँ वृत्तिहीनता अहो मैं जिस समय।
देखती हूँ नीतिहीनता अहो मैं जिस समय।
शर्म से नतानना मैं दीखती हूँ उस समय।
और प्राणहीन सी मैं दीखती हूँ उस समय।
यह दशा निवारदो सुकर्मपथ चुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥६॥

है अपार वेदना, वधू के अग्निदाह से।
दुःख है असह्य, हिंसा और छल की राह से।
हठात् भ्रष्ट आचरण और ना सहूँगी मैं,
चुप रही भले मगर, आज सब कहूँगी मैं।
रोक दो प्रवाह यह, तुम्हीं शिला तनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥७॥

आप ही करें सभी जो नष्ट भ्रष्ट हाथ से।
पार्थक्य भावना से होंगे सब अनाथ से।
बिक रहा हो ज्ञान, जन दबा करों के भार से।
व्यक्ति स्वार्थ मुख्य, भाव भूलता समस्त का।
दुर्दशा जनित जो दुःख ताप तुम हरो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥८॥

(९)

जलं न लभ्यते तथा, यथा सुरा पदे-पदे,
वचांसि सन्ति भूरिशो न हि क्रियाः पदे-पदे।
पुनश्च भेदभावना प्रवर्त्यते पदे-पदे
इयं दशा समर्थनं किमर्हतीति चिन्त्यताम् ॥
अहं स्वतन्त्रता भणामि……॥

(१०)

दलाद् दले पलायनं, प्रवञ्चनं क्षणे क्षणे,
प्रतारणं जने जने, विहिंसनं पणे पणे।
विलोक्य रोगदायकं त्रिमिश्रणं कणे कणे,
गतास्मि यां शुचं हि, सा द्रुतं द्रुतं विलोप्यताम् ॥
अहं स्वतन्त्रता भणामि……॥

(११)

अयोग्यता पदोन्नता, सुयोग्यता पदच्युता,
अमोघलाभकारिणी मता च चाटुकारिता।
इयं स्थितिर्विलोक्यते यदा, तदा मम स्थितिः
सुपुष्टतां भजेत्कथं? भवद्भिरेव कथ्यताम् ॥
अहं स्वतन्त्रता भणामि……॥

(१२)

क्वचिद्विलाससाधनैर्विमण्डिता विलासिनः,
क्वचित्क्षुधाप्रपीडिता वसन्ति देशवासिनः।
क्वचित्पयस्विनी धनस्य कुत्रचिच्च निःस्वता,
इयं दशा विलोपमेतु येन तद्विधीयताम् ॥
अहं स्वतन्त्रता भणामि……॥

(१३)

कथं पदातिमार्ग एव शेरते हि कार्मिकाः
कथं च धर्मनाम्नि सर्वमाचरन्ति धार्मिकाः।
कथं च देहविक्रयो विधीयते सुयोजितम्
इदं निरीक्ष्य मानसे समीक्षणं विधीयताम् ॥
अहं स्वतन्त्रता भणामि……॥

जल नहीं मिले, सुरा मिले कदम कदम।
शब्द मात्र रह गये हैं, भूल गये कर्म।
भेद भाव हर तरफ बढ़ा है मीत जोर से।
हो गये दुखी सुहृद्‌य स्वार्थ की हिलोर से।
दूर जो इसे करे वही सुपथ चुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥९॥

एक दल से दूसरे में जाना बार-बार।
लोक से प्रवंचना, ठगी और लूटमार।
स्वास्थ्य शत्रु खाद्य वस्तु से भरे बजार।
देखकर वड़ी दुःखी हुई हूँ दुराचार।
शीघ्र दुख हरो मेरा, न अनसुनी करो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१०॥

अग्रणी अयोग्यता, सुयोग्यता उदास है।
चाटुकार वर्ग का सहर्ष अट्टहास है।
यही दशा करोगे तो बनेगी बात ही नहीं।
कब हँसेगी भोर, ख़त्म होगी रात ही नहीं।
ऋद्धि कैसे आयेगी, रे सत्य तुम कहो।
मैं स्वतन्त्रता तुम्हें पुकारतो सुनो ॥११॥

कहीं विलास वस्तुएँ आपार स्वप्न-लोक सीं
भारती-तती कहीं है मूर्तिमान शोकसी।
कहीं है सपंदा सरित् समान बह रही अरे।
पर अभाव है कहीं विपन्नता से जन भरे।
दुर्दशा के मौन पक्षधर क्यों तुम वनो ?।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१२॥

कैसे रात पटरियों पे श्रमिक वर्ग सो रहा।
क्या न धर्म-ओट में विचित्र कर्म हो रहा।
किस तरह से रूप और देह का बजार है।
शील, शौर्य, शान्ति का तीव्र तिरस्कार हैं।
देखकर उदास हूँ, उठो मेरे जनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१३॥

(१४)

अहं स्मरामि कष्टपद्धतिं पुरानृणां यदा,
अहं भवामि गद्गदाभिमानसंयुता तदा ।
विलोक्य किन्तु वर्तमाननेतृलाभकांक्षितां
व्रजान्यहं मुदं ह्यथो शुचं ? स्वयं विचार्यताम् ।।
अहं स्वतन्त्रता भणामि······।।

(१५)

धनस्य वा श्रमस्य वा न कृच्छ्रतास्ति भारते ।
समस्त धातवो मिलन्ति भारते प्रभारते ।
उदेति या यदा-कदा तथापि बुद्धिहीनता
न सा कदाप्युदेतु येन तत्सदा विधीयताम् ।।
अहं स्वतन्त्रता भणामि······।।

(१६)

न निर्धनो न निर्बलो जनोऽत्र कोऽपि जायताम्,
न कस्यचित्समादरो विखण्डितश्च जायताम् ।
निजावलम्बनं जने जने सदा प्रवर्तताम् ।
जनो जनोऽस्य भारतस्य मोदताम्, प्रमोदताम् ।।
अहं स्वतन्त्रता भणामि······।।

(आकाशवाणीतः ?, ६, ११, १३, १४संख्यकानि पद्यानि न प्रसार्यन्त
इयं कविता इतः पूर्वम् अर्वाचीनसंस्कृतस्य पञ्चवर्षीये चतुर्थेऽङ्केऽपि प्रकाशि
बभूव किन्तु २, १३ संख्यके पद्ये तत्र न आस्ताम् । सम्पादकः)

जब अतीत की तपःपरम्परा विलोकती।
हो विभोर हर्ष-अश्रु किस तरह मैं रोकती।
किन्तु नेतृ वर्ग नित्य लाभलिप्त आज का।
कैसे हो भला कहो इस तरह समाज का।
अतीत से हँसू या आज रोऊँ तुम भनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१४॥

श्रम व धन से राष्ट्र का भण्डार है भरा।
समस्त धातुएँ लिए हुए वसुंधरा।
पर अभाग्य से कभी कुबुद्धि का उदय।
युग-युगों की चेतना का हो रहा है क्षय।
कभी न हो, कभी न, धीर देश के जनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१५॥

दरिद्र शक्तिहीन कोई राष्ट्र में नहीं रहे।
आत्म-मान-भंग हाय कोई भी नहीं सहे।
स्वावलम्ब से प्रदीप्त भाल देश का सदा।
प्रेम का प्रसार, ऐक्य भावना की सम्पदा।
व्यक्ति-व्यक्ति में हँसों प्रकाश-पाहुनो।
मैं स्वतन्त्रता तुम्हें पुकारती सुनो ॥१६॥

मा भव

(श्री मधुर शास्त्री, दिल्ली)

मा भव लीना,
त्वम् स्वाधीना।

दर्शय तद् रूपम्।
स्मारय भवभूपम्,

कथम् मलीना ?
भव स्वाधीना।

त्यागमयी वृत्तिः,
पर-सुखसंपत्तिः,

तया विहीना,
भज स्वाधीना।

दिनलुब्धा माता,
रजनी संजाता,

व्यथयति दीना,
मा स्वाधीना।

पश्चिम-परिणीता,
विस्मृत - नवगीता,

श्रुति - मतिहीना,
कुरु स्वाधीना।

अति मधुरा वाणी,
करुणा कल्याणी,

लुप्ता वीणा,
स्मर स्वाधीना।

देववाणी-परिषद्वार्ता

(१) २५.१०.१९८६ तारिकायां देववाणी-परिषदा कलिकातायाम् समायोजिते एकस्मिन् समारोहे प्रो० प्रभाकर नारायण कवठेकर-महाभागेन परिषत्प्रकाशितं श्रीत्रिगुणानन्दशुक्ललिखितं च 'अध्यात्मरामायण में अध्यात्म-चिन्तन' इत्याख्यं पुस्तकं समुन्मीलितम् । समारोहस्याध्यक्ष्यं जबलपुरस्थ-रानीदुर्गावतीविश्वविद्यालयस्य संस्कृतविभागाचार्याध्यक्षेण डा० कृष्णकान्त-चतुर्वेदमहाभागेन कृतम् । परिषद उपाध्यक्षेण डा० उमाकान्तशुक्लमहाभागेन विद्वद्भ्योऽभिनन्दनं व्याहृतम् महासचिवेन डा० रमाकान्त शुक्लेन च धन्यवादो ज्ञापितः । अस्मिन्नवसरे एका संस्कृतकाव्यगोष्ठ्यप्यायोज्यत यत्र डा० कवठेकर-डा० राजेन्द्र मिश्र-महाभागाभ्यां स्व रचनाः प्रस्तुताः । समारोहे उपस्थितेषु विद्वत्सु डा० कृष्णकान्त शुक्ल-डा० सत्यपाल नारंग-डा० चन्द्रकान्त शुक्ल-डा० कमलाकान्त मिश्र-श्रीबलदेवानन्द सागर-प्रभृतयः प्रमुखा आसन् ।

(२) ९.११.१९८६ ई० तारिकायां परिषदस्तत्त्वावधाने 'आर ६, वाणी विहार, नयी दिल्ली-११००५९ ई०' इत्येतत्स्थाने अमेरिकादेशस्य बोस्टननगरात् प्रतिनिवृत्तस्य संस्कृतकवेः श्रीश्रीसुन्दरराजमहाभागस्य सम्मानार्थमेका विद्वद्-गोष्ठी समायोजिता बभूव । परिषन्महासचिवेन डा० रमाकान्तशुक्लेन श्रीसुन्दरराजमहाभागस्य संस्कृतरचना अवलम्ब्याभिभाषितम् । श्री सुन्दरराज-महाभागेन काश्चन स्वनवीना रचना अपि श्राविताः । गोष्ठ्या आध्यक्ष्यं शास्त्रचूडामणिपण्डितेन पं० ज्वालाप्रसादगौड-महाभागेन सम्पादितम् ।

(३) देववाणी-परिषदः स्थापनायाः दशाब्दपूर्तिमालक्ष्य त्रिदिवसीयः कार्यक्रमः१३-१५.१२.१९८६ ई० तारिकासु नवदिल्यां वाणी-विहारे सम्पन्नः ।

प्रथमदिवसे १३.१२.१९८६ ई० तारिकायां परिषत्प्रकाशितग्रन्थानां प्रदर्शनी आयोज्यत या दिनत्रयं यावदागन्तुकानां कृते उद्घाटिता अतिष्ठत् । परिषदा अतीते समायोजितानां संस्कृत-कविसम्मेलन-नाट्य-समारोहादीनां वीडियोफिल्मानां प्रदर्शनमप्यनुष्ठीयत ।

१४.१२.१९८६ ई० तारिकायां दिल्लीविश्वविद्यालयस्य वरिष्ठहिन्दी-प्राध्यापकस्य श्रीवेदप्रकाशगौतमस्याध्यक्ष्ये 'दृश्य श्रव्य संचार माध्यम और संस्कृत'-इत्येतद्विषये विचारगोष्ठी आयोज्यत । विषयं प्रवर्तयन् परिषन्महा-

सचिवः डा० रमाकान्त शुक्लो राष्ट्रैक्यस्य प्रबलपोषकस्य संस्कृतस्य समाचार-काव्य-नाटक-परिचर्चा-प्रभृतीनां कार्यक्रमाणाम् आकाशवाण्या इव दूरदर्शनतोऽपि प्रसारणं सविशेषमाचकांक्ष । गोष्ठ्यां श्रीबुधसिंहवर्मा, श्रीमुरलीधरखन्ना, श्रीआनन्दवर्धनशुक्लः श्री मदनलाल मेंहदीरत्ता, श्रीचन्द्रभानशर्मा अन्ये चानेके वक्तारः स्वविचारान् प्रकटयन्तः संस्कृतस्य कार्यक्रमाणां दृश्यसंचारमाध्यमेषु द्रागेव समुचितं प्रसारणं राष्ट्रहिताय प्रत्यपीपदन् । गोष्ठ्यनन्तरं संस्कृतकवि-सम्मेलनस्य वीडियोफिल्मं प्रदर्शितमभूत् ।

१५.१२.१९८६ ई० तारिकायां त्रिदिवसीयस्य समारोहस्य समापन-गोष्ठ्यां डा० शास्त्रपुरं रामकृष्ण स्वामिनाथ-महाभागेन परिषत्प्रकाशितं डा० रामकिशोरमिश्रप्रणीतं 'श्रीगरुडध्वजसपादशतकं' समुन्मीलितम् । ग्रन्थस्य प्रथमं प्रतिरूपं राजस्थान-संस्कृत-अकादमी-सचिवेन श्रीराधेश्याम व्यासमहा-भागेन स्वीकृतम् । समारोहस्याध्यक्ष्यं कुर्वता राष्ट्रियसंस्कृतसंस्थाननिदेशकेन डा० मण्डनमिश्रमहाभागेन संस्कृतप्रचारार्थं स्वयंसेविसंस्कृतसंस्थानां भूमिका रेखांकिता । तेन स्वयंसेविसंस्थानां संरक्षणार्थं सर्वकारीयसाहाय्येन साकं समाजसेविनां प्रयासा अप्याकांक्षिताः । तेन संस्कृतस्य नूतनरचनानां पठनपाठनानुसन्धानार्थमपि शिक्षाविद आहूताः ।

(४) २०.१.१९८६ ई० तारिकायां परिषदस्तत्त्वावधाने समायोजिते एकस्मिन् समारोहे उज्जयिनीस्थ-विक्रमविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण किञ्च सुप्रसिद्धसंस्कृतकविना आचार्यश्रीश्रीनिवासरथ-महाभागेन परिषत्प्रकाशितः पुरीस्थ-श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य दर्शनविभागे प्राध्यापकस्य डा० केशवचन्द्रदाशमहाभागस्य 'निकषा' इत्यभिधानः संस्कृतोपन्यासः समुन्मीलितः । ग्रन्थस्य प्रथमं प्रतिरूपं स्वीकुर्वता परिषदध्यक्षेण आचार्यश्रीरमेशचन्द्रशुक्लमहाभागेन नूतनसंस्कृतरचनानां सम्यक् प्रचारस्य उपयोगिता रेखांकिता । अस्मिन्नवसरे आचार्यरथमहाभागेन अद्यत्वे प्रणीयमानस्य 'श्रीबलदेवचरित' नाम्नः स्वमहाकाव्यस्य केचन अंशा अपि श्राविताः । कविनाऽस्मिन् महाकाव्ये प्रसिद्ध-संस्कृतविदुष आचार्यश्रीबलदेवोपाध्यायस्य चरितं वर्ण्यते ।

संस्कृत-जगद्वार्ता

(१) १४.१०.१९८६ ई० तारिकायां दिल्लीविश्वविद्यालयस्य दक्षिण-परिसरे पुरीस्थ-लोकभाषाप्रचार-समितेः दिल्लीशाखायाः स्थापना जाता। अस्मिन्नवसरे मुख्यातिथिः राष्ट्रियसंस्कृतसंस्थाननिदेशकः डा०मण्डनमिश्र-महाभागः संस्कृतसम्भाषणशिविरप्रतिभागिभ्यः पुरस्कारान् प्रमाणपत्राणि च प्रदत्तवान्। समारोहस्याध्यक्ष्यं देववाणी-परिषन्महासचिवेन डा०रमाकान्तशुक्लेन कृतम्।

(२) नवदिल्ल्यां २१.१०.१९८६ ई० तारिकायां श्रीलालबहादुरशास्त्रि-केन्द्रीयसंस्कृतविद्यापीठस्य रजतमहोत्सवः केन्द्रीयमानवसंसाधनविकास-मन्त्रिणा श्री पी०वी०नरसिंहरावमहाभागेन समुद्घाटितः। तेन इन्दिरा गांधी-विशेषाङ्कोऽपि समुन्मीलितः। विद्यापीठप्राचार्येण डा० मण्डनमिश्रमहाभागेन विद्यापीठस्य विशिष्टाः कार्यकलापाः संसूचिताः।

(३) अखिलभारतीयप्राच्यविद्यासम्मेलनस्य त्रयस्त्रिंशत्तममधिवेशनं, कलिकातास्थ-'एशियाटिक सोसाइटी'-तत्त्वावधाने २४—२६.१०.१९८६ ई० तारिकासु कलिकातायां सम्पन्नम्।

कलिकातास्थे साल्टलेक-क्रीडाङ्गणे समायोजितस्यास्याधिवेशनस्योद्घाटनं पश्चिमबङ्गालमुख्यमन्त्रिणा श्रीज्योतिवसुमहाभागेन कृतम्। अधिवेशने नानोपभागोपवेशनेसु विद्वद्भिः शोधपत्राणि पठितानि। कलिकातास्थ-संस्कृत-साहित्य-परिषदा 'अभिज्ञानशाकुन्तलं' प्रयुक्तं, श्रीरञ्जनगांगुलिना सितारवादनं कृतम्, रवीन्द्रभारतीविश्वविद्यालयेन च श्रीरवीन्द्रनाथठाकुरविरचिता 'श्यामा' इतिनृत्यनाटिका प्रस्तुता। डा० रमाकान्तशुक्लस्य संयोजकत्वे एकं संस्कृत-कविसम्मेलनमायोजितमभूत् यत्र डा० दीपक घोष-डा० राजेन्द्र मिश्र-डा०मनोरमा तिवारी-डा० पुष्पा दीक्षित-डा० भगवतीलालपण्ड्या-श्रीकौशलेन्द्र पाण्डेय-श्री कृष्णनारायण पाण्डेय-प्रभृतिभिः कविभिः स्वरचनाः प्रस्तुताः।

सम्मेलनस्य कार्यसमित्या प्रो० रामचन्द्रनारायणदाण्डेकर-महाभागः आगामिनोऽधिवेशनस्य महाध्यक्षत्वेन सर्वसम्मत्या वृतः। अधिवेशनस्य समयेन संयोजनार्थं स्थानीयसचिवः प्रो० जगन्नाथचक्रवर्ती-महाभागः सपरिकरः साधुवादानर्हति।

(४) ८-११-१९८६ ई० तारिकायां नवदिल्ल्यां भारतस्य महामहिमोपराष्ट्रपतिः श्रीरामस्वामी वेंकटरामन्-महाभागः काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्यासंकाये साहित्यविद्याविभागाध्यक्षेण आचार्यरेवाप्रसादद्विवेदि-महाभागेन पुनःसम्पादितां 'कालिदासग्रन्थावलीं' लोकार्पितवान्। अस्मिन् समारोहे देशस्य नैके विद्वांस उपस्थिता आसन्।

(५) कालिदास-समारोहः—उज्जयिन्यां १२-१८ ११.१९८६ ई० तारिकासु विक्रमविश्वविद्यालयेन कालिदास-अकादेमी-मध्यप्रदेशशासनाभ्यां साकं कालिदाससमारोहः समायोज्यत। म०प्र० मुख्यमन्त्रिणः श्रीमोतीलाल-वोरामहाभागस्य सान्निध्ये समारोहस्योद्घाटनं महाराष्ट्रराज्यपालेन डा०शंकरदयालशर्ममहाभागेन कृतम्। कालिदाससमितेः सचिवेन आचार्य-श्रीनिवासरथमहाभागेन कालिदाससमारोहे समागतेभ्योऽतिथिभ्यः स्वागतं व्याहरता समारोहस्य ऐतिह्येन साकमागामिन्यः संकल्पनाः संकेतिताः।

सप्तदिवसीयेऽस्मिन् समारोहे शोधपत्रवाचनगोष्ठीत्रयम्, कालिदासकृतीनां पारम्परिकसमीक्षाम् अनुवादांश्चोद्दिश्य विचारगोष्ठीद्वयम्, श्रीमत्या कमलारत्नम्-महाभागायाः कालिदासजन्मस्थानमवलम्ब्य पं० सूर्यनारायण-व्यासस्मृतिव्याख्यानम्, डा०रमाकान्तशुक्लस्याध्यक्ष्ये किञ्च म० प्र० संस्कृत-अकादमीसचिवस्य डा०भास्कराचार्यत्रिपाठिमहाभागस्य सञ्चालकत्वे समकालीनविंशतिकवीनां काव्यपाठेन समृद्धः संस्कृतकविसमवायः, कविवर-डा० शिवमंगलसिंहसुमन-महाभागस्याध्यक्ष्ये सर्वभाषाकवि-समवायः, डा० वनेश्वरपाठकमहाभागस्याध्यक्ष्ये 'विद्वेषातङ्कविध्वंसप्रतिरोधाय निश्चितम्। भारतं प्रेरयत्येव कालिदासस्य भारती ।।'-इति विषयमवलम्ब्य अन्तर्विश्वविद्या-लयीनसंस्कृतवाद-विवाद-प्रतियोगिता, श्रीबलदेवानन्दसागरमहाभागस्याध्यक्ष्ये अन्तर्महाविद्यालयीयश्लोकपाठ-प्रतियोगिता, डा० राजेन्द्रमिश्रमहाभागस्या-ध्यक्ष्ये अन्तर्महाविद्यालयीन-हिन्दीवादविवादप्रतियोगिता च आयोज्यन्त।

अनेके सांस्कृतिककार्यक्रमा अप्यायोज्यन्त; तद्यथा कु०डी० उमामाहेश्वरी-दलेन संस्कृतभाषायां हरिकथाशैल्यां, एथेन्सतः समायातेन 'वोलोस थियेटर ग्रुप'-नामधेयेन नाट्यदलेन ग्रीकनाट्यपरम्परायां, तिरुअनन्तपुरतः समायातेन 'सोपान' नाट्यदलेन च कूडियाट्टम्-शैल्याम् अभिज्ञानशाकुन्तल प्रस्तुतम्, अहमदाबादतः समायातेन 'दर्पण अकादेमी'-दलेन मेघदूतं नृत्यनाटिकारूपेण प्रस्तुतम्, उज्जयिन्या 'उस्ताद कालूराम माच अखाड़ा'-इतिनाट्यदलेन मालव्यां माच-शैल्यां 'हास्यचूडामणि' नाटकं प्रस्तुतम्, भोपालस्थ-रंगमण्डल-कलाकारैः 'स्कन्दगुप्त' नाटकं प्रयुक्तम्, इम्फालतः समायातेन 'कोरस रेपर्टरी थियेटर'-दलेन मणिपुरीशैल्यां चक्रव्यूह-नाटकं प्रस्तुतम्, हैदराबादतः समायातया श्रीमत्या मालिनी राजूरकर-महाभागया शास्त्रीयगानं बम्बईतः समायातेन श्रीरघुनाथ-सेठमहाभागेन च वंशीवादनं प्रस्तुतम्।

अखिलभारतीयकालिदास चित्र-मूर्ति-कलाप्रदर्शन्यपि आयोजिता बभूव।

समापनसमारोहे मध्यप्रदेश-राज्यपालेन प्रो० चाण्डीमहाभागेन पुरस्कार

वितीर्णाः। समारोहस्य सफलतार्थं कालिदाससमिति-सचिवः आचार्यश्रीनिवासरथ-कालिदासअकादमी-सञ्चालकडा०कमलेशदत्तत्रिपाठि - प्रभृतयः सर्वेऽपि आतिथेया आयोजका अभिनन्दनं साधुवादं चार्हन्ति।

(६) १७.११.८६ ई० तारिकायाम् उज्जयिन्यां विक्रमकीर्तिमन्दिरे संस्कृत-युवसमवायस्य पुरस्कारवितरणोत्सवः सम्पन्नः। संस्कृतयुवसमवायस्य सचिवेन श्रीशीतांशुरथमहाभागेन संस्थाया गतिविधयः संसूचिताः। वयोवृद्धा विदुषी श्रीमती कमला रत्नम् महाभागा विजेतृभ्यः पुरस्कारान् प्रादात्। कालिदास-अकादमी-सञ्चालकेन डा० कमलेशदत्त त्रिपाठि महाभागेन उज्जयिन्यां संस्कृत-भाषायाः संस्काराणां च समृद्ध्यै क्रियमाणा समवायस्य प्रयत्नाः आशंसिताः। समारोहस्याध्यक्ष्यं कुर्वता देववाणी-परिषदो महासचिवेन डा० रमाकान्त शुक्लेनोक्तं यद् भारतस्य अनितरसाधारणधनं संस्कृतं संरक्षितुं प्रचारयितुं च स्वयंसेविसंस्थाभिः महत्त्वपूर्णा भूमिका अनुष्ठीयते। तेन देववाणी-परित्प्रकाशिताः पञ्चसहस्ररूप्यक-मूल्यात्मकाः संस्कृतग्रन्थाः संस्कृतयुवसमवायाय उपहृताः।

(७) भारतीयज्ञानपीठेन 'भारतीय कविता १९८४' इत्येतच्छीर्षके ग्रन्थे पञ्चसंस्कृतकवीनाम् डा०रामकिशोरमिश्र - श्रीरंगनाथशर्म-डा० विन्ध्येश्वरीप्रसाद मिश्र-डा०उमाकान्त शुक्ल-डा० पुष्पा दीक्षित-महाभागानां संस्कृतकविताः हिन्द्यामनूद्य प्रकाशिताः। एतासु पञ्चकवितासु द्वे देववाणी-परिषत्प्रकाशितात् 'कूहा' 'सारस्वतसमुन्मेष'श्चेति काव्यद्वयात् अनुवादार्थं सञ्चिते। काव्यानुवादः प्रसिद्धहिन्दीगीतकारेण श्रीमधुरशास्त्रिणा कृतः। ग्रन्थस्य प्रकाशनं सद्य एव जातम्।

(८) हरियाणा-साहित्य-समित्या १९८६ तम वर्षाय निर्धारितः संस्कृतसाहित्य पुरस्कारः रोहतकस्थ-महर्षिदयानन्दविश्वविद्यालये संस्कृत-पालि-प्राकृत-विभागाध्यक्षाय डा० सुधीकान्तभारद्वाज-महाभागाय **'वयं के स्मः'**, इत्येतन्नाटकसंग्रह-रचनार्थं समर्पितः।

(९) आकाशवाण्या दिल्ली 'ख' केन्द्रेण १४-१२-१९८६ ई० तारिकायां **'साहित्यिकी'** ति कार्यक्रमे श्रीमत्याः शशिप्रभा गोयल-महाभागाया **'अर्वाचीन-संस्कृतसाहित्ये प्रतिबिम्बिताः समकालीना घटनाः'** इतीयं वार्ता डा० रमाकान्त-शुक्लस्य **'भारतजनताहम्'** इतीयं कविता च प्रसारिते। संस्कृतकार्यक्रम-प्रसारणार्थं संयोजकः श्री गंगानाथचतुर्वेदी धन्यवादार्हः।

(१०) हावड़ा-संस्कृत-समाजेन स्वरजतजयन्तीं समालक्ष्य २७-२८.१२.१९८६ ई० तारिकयोः एकं संस्कृतसम्मेलनमायोजितम्। अस्मिन्ननुष्ठाने संस्कृत-कविसम्मेलनं, विचारगोष्ठ्यः शोधपत्रपाठगोष्ठ्यश्च समायोज्यन्त।

(११) संस्कृतसेवासंस्थानस्य द्वादशतमो वार्षिकसमारोहः दिल्ल्या रामलीला-प्राङ्गणस्थे श्रीराममन्दिरे ४.१.१९८७ तारिकायां सम्पन्नः। मुख्यातिथिना डा० मण्डनमिश्रमहाभागेन १४.१२.१९८६ तः ३.१.१९८७ यावत् संस्थानस्य तत्त्वावधाने प्रशिक्षितेभ्यः पौरोहित्य-कर्मकाण्डपण्डितेभ्य प्रमाणपत्राणि प्रदत्तानि। संस्थानस्य सचिवेन आचार्यरामदयालुशास्त्रिणा सूचितं यत् पञ्च प्रशिक्षणशिविरेषु अद्यावधि २२५ प्रशिक्षवः प्रशिक्षिता.।

(१२) **त्रिदिवसीया संस्कृताभ्युसंगोष्ठी** : इलाहाबादविश्वविद्यालयशताब्दी-समारोहशृङ्खलायां समायोजिता त्रिदिवसीया संस्कृताभ्युदयसंगोष्ठी ९-११.१.१९८७ तारिकासु महता साफल्येन विश्वविद्यालयस्य सीनेटहॉलनाम्नि आस्थानमण्डपे सम्पन्ना जाता। ऐतिहासिकोऽयं महोत्सवो भव्यतमारम्भः प्रयाग-विश्वविद्यायलयीस्य शततमवर्षस्य। किञ्च देववाण्यात्मके संस्कृतक्षेत्रे समाचरितो महानध्यवसायोऽपि कश्चिद् वर्तते।

संगोष्ठीयं पञ्चसत्रेषु विभक्ताऽऽसीत् महोत्सवोद्घाटनं, कविसमवायः, संस्कृताभ्युदयः, शाकुन्तलमञ्चप्रस्तुतिः समापनञ्चेति। विंशतिप्राया लब्धप्रतिष्ठाः विपश्चित्तल्लजाः तावन्त एवं कवयः रंगकर्मिणः साहित्यकाराः शतमिताश्च प्रतिनिधयः स्वोपस्थित्या महोत्सवमिममलंचक्रुः।

शुक्रवासरे ९.१.८७ तारिकायां वेदमंत्रोच्चारणपरिपूते **'निनादय नवीनामये वाणि ! वीणाम्'** इति सरस्वतीस्तवननिनादिते सीनेटास्थानमण्डपे समारोहस्यास्योद्घाटनं कृतम् अवधविश्वविद्यालयकुलपतिना डा० अतुलचन्द्र बनर्जिमहोदयेन। सभाध्यक्षपदं निर्व्यूढं प्रो० डा० विश्वनाथभट्टाचार्यवर्येण। सारस्वतसम्मानव्यतिकरेण महिमाऽस्य महोत्सवस्य द्विगुणितः। प्रयागविश्व-विद्यालयीयसंस्कृतविदुषां वृहत्त्रयी (डा० आद्याप्रसादमिश्रः, पं० लक्ष्मीकान्त-दीक्षितः डा० चण्डिकाप्रसादशुक्लश्चेति) प्रतिकुलपतिना डा० श्रीत्रिविक्रम-पतिमहाभागेन साक्षतचन्दनमाल्योष्मप्रावारकं सादरमभिनन्दिता।

तस्मिन्नेव दिनेऽपराह्णे कविसमवायाख्ये द्वितीयसत्रे रसगर्भनिर्भरं हृदयावर्जकम् अभूतपूर्वञ्च संस्कृतकवितामृतवर्षणसौख्यमनुभूतं मध्येशालं निषण्णैरविषण्णैस्सहृदयैः। इयं कविगोष्ठी प्रतिकुलपतिभिः प्रो० त्रिविक्रम-पतिभिः स्वोपज्ञसरस्वतीमहिम्नःस्तोत्रपाठेन समुद्घाटिता, डा० रेवाप्रसादद्विवेदि-भिश्च स्वाध्यक्षतया सम्भूषिता। कविसमज्यां सञ्चालयामास मिश्रोऽभिराज-राजेन्द्रः संस्कृताभ्युदयसंगोष्ठीसंयोजकः। डा० कमलेशदत्तत्रिपाठी (वाराणसीतः) प्रो० श्रीनिवासरथः (उज्जयिनीतः) डा० भास्कराचार्यत्रिपाठी (भोपालतः) डा० रमाकान्तशुक्लः (दिल्लीतः) डा० दीपकघोषः (कलिकातातः) डा० पुष्पा दीक्षिता (विलासपुरतः) डा० नलिनी शुक्ला (कानपुरतः) डा० वीरभद्रमिश्रः

(लखनऊतः) डा० घनश्यामतिवारी (रायबरेलीतः) डा० प्रशस्यमित्रः (रायबरेलीतः) श्रीसुव्रतत्रिपाठी (एटातः), श्री जनार्दनप्रसादपाण्डेयः, डा० हरिदत्तशर्मा डा० चन्द्रभानुत्रिपाठी (प्रयागतः), डा० रेवाप्रसाद द्विवेदी (अध्यक्षः) डा० राजेन्द्र-मिश्रश्च स्वललितललिताः कविताः श्रावितवन्तः । आकाशवाण्याः सेवानिवृत्तः संस्कृतकार्यक्रमनिष्पादकः (प्रोड्यूसरः) श्रीनर्मदेश्वरोपाध्यायः काव्यामृतं प्रत्यक्षमास्वादयन् कविसमवायमिमं स्वजीवनस्यानुत्तमं श्रेष्ठञ्च काव्यानुभवं स्वीचकार ।

१०.१.८७ तारिकायां पूर्वाह्णे संस्कृताभ्युदयनाम्नि तृतीये सत्रे संस्कृता-भ्युदयविषयिणी परिचर्चा जाता । काशीविद्यापीठकुलपतिभूतेन डा० विद्यानिवास-मिश्रमहाभागेन समुद्घाटिता डा० कमलेशदत्तत्रिपाठिमहाभागेनाध्यक्षत्वेन श्रीमण्डिता इयं परिचर्चा होराचतुष्टयं यावत् प्रावर्तत । आचार्यमानिकचन्द्र-मिश्रः, पं० प्रभातशास्त्री (प्रयागतः) डा० विश्वम्भरनाथत्रिपाठी (गोरखपुरतः) प्रो० श्रीनिवासरथः (उज्जयिनीतः) डा० कृष्णकान्तचतुर्वेदी (जबलपुरतः) डा० रेवाप्रसादद्विवेदी (वाराणसीतः) च प्रमुखवक्तृरूपेण स्वविचारान् स्थापित-वन्तः । परिचर्चान्ते च सर्वसम्मत्याऽङ्गीकृतः प्रस्तावोऽप्येकः पारितो येन केन्द्रीयशासनं निवेद्यतेऽधिसंस्कृतं स्वदृष्टिकोणं परिवर्तयितुम् ।

अस्मिन्नेव परिचर्चासत्रे प्रथमचरण एव संगोष्ठीसंयोजकेन डा० राजेन्द्र-मिश्रमहाभागेन प्रणीतम् इलाहाबादविश्वविद्यालयजीवनयात्रानिरूपकं शताब्द्युत्सवस्मारकञ्च नूतनं काव्यं "शताब्दीकाव्यम्" डा० विद्यानिवासमिश्र-महोदयेन लोकायार्पितम् ।

महोत्सवस्य नैशे चतुर्थसत्रे कविकुलगुरुकालिदासविरचिता आकल्पमक्षत-यौवना नाट्यकृतिः अभिज्ञानशाकुन्तलनाम्नी छात्रैरध्यापकैश्च मञ्चमुपनीया-भिनीता । सीनेटहालस्थैः पञ्चसहस्रप्रायैः छात्रदर्शकैः प्राध्यापकैः नागरजनैः पुरुषैर्महिलाभिश्च साभिरुचि नयनपाथेयीकृतमिदं नाट्यरसायनं केषां तृप्तिं विस्मयं च न चक्रे ? दर्शकाणामियती संख्यां विलोक्य सर्वेऽपि प्राघुणा आश्चर्यचकिताः सञ्जाताः । डा० राजेन्द्रमिश्रस्य डा० राजलक्ष्म्याश्च समवेतनिर्देशने डा० हरिदत्तशर्मणा संयोजितं, डा हरिशंकरत्रिपाठिना च प्रस्तुतमिदं मञ्चनमद्यापि यथावसरं चर्च्यते दर्शकवृन्दैः । दिल्ल्याः देववाणी-परिषदो महासचिवेन डा० रमाकान्तशुक्लेन परिषत्पक्षतः सार्धद्विसहस्ररूप्यक-मूल्यस्य पुस्तकानि नाट्यकलाकारेभ्यः पुरस्काररूपेण उपहृतानि ।

११.१.१९८७ तारिकायां पञ्चमसत्रे समारोहसमापनं जातम् । अस्मिन् सत्रे सभाध्यक्ष आसीत् सागरविश्वविद्यालये संस्कृताध्यक्षः डा०. राधावल्लभ-त्रिपाठिमहोदयः मुख्यातिथिश्चासीत् जबलपुरविश्व- विद्यालयसंस्कृतविभागाध्यक्षः डा०कृष्णकान्तचतुर्वेदमहोदयः । इलाहाबादविश्वविद्यालयकुलपतिः डा० रामेश्वरप्रसादमिश्रमहाभागः सर्वेभ्योऽभिनेतृभ्यः प्रमाणपत्राणि पारितोषिकाणि समुपायनानि च समर्पितवान् ।

इयं स्मरणीया संस्कृतोपकारकरणी सस्कृतसामर्थ्यदर्शिनी च संगोष्ठी कुलपतेः डा० रामेश्वरप्रसादमिश्रस्य संरक्षणे संस्कृतप्रवाचकेन लोकप्रियहिन्दीसंस्कृत-भोजपुरीकविनाऽभिराजडा०राजेन्द्रमिश्रेण संयोजिताऽऽसीत् । संगोष्ठीसमितेरन्ये सदस्याः आसन् प्रो० डा० सुरेशचन्दपाण्डेयः डा० सत्यनारायणश्रीवास्तवः पं० राजकुमारशुक्लः, डा० हरिशंकरत्रिपाठी डा० कु० राजलक्ष्मी वर्मा, डा० वीरेन्द्रकुमारसिंहः, डा० रुद्रकान्तमिश्रः, डा० हरिदत्तशर्मा, डा० शंकरदयाल-द्विवेदी, डा० मीता बनर्जी डा० साधना वेदी च ।

(१३) आकाशवाण्या भोपालनगरे रवीन्द्र-भवने २३.१.१९८७ ई० तारिकायां सर्वभाषाकविसम्मेलनं समायोजितम् यत्र देशस्य चतुर्दशभाषाणां मूलरचनाः तदनुवादाश्च कविभिः प्रस्तुताः । सर्वभाषाकविसम्मेलनस्य प्रारम्भः डा० रमाकान्तशुक्लस्य 'अहं स्वतन्त्रता भणामि' इत्येतया संस्कृतकवितयाभूत् यस्यानुवादः श्रीकृष्णमुरारिशर्मणा हिन्दीगीतमाध्यमेन प्रस्तुतः । कविसम्मेलनस्य सम्पादिता अंशाः आकाशवाण्याः समस्तकेन्द्रेभ्यः गणतन्त्रदिवसपूर्वसन्ध्यायां २५.१.१९८६ तारिकायां प्रसारिता जाताः । कार्यक्रमोऽयं डा० राजेन्द्रकुमार माहेश्वरी-महाभागेन निष्पादितः ।

(१४) सप्तमविश्वसंस्कृतसम्मेलने अर्वाचीनसंस्कृतसाहित्ये कार्यशाला—नीदरलैण्डदेशे लायदननगरे लायदनविश्वविद्यालयस्य 'कर्न इन्स्टीट्यूट' इति संस्थानस्य तत्त्वावधाने 'इन्टरनेशनल एसोसियेशन आफ संस्कृत स्टडीज' इत्येतया संस्थया २३—२९.८ १९८७ ई० तारिकासु समायोज्यमाने सप्तम-विश्वसंस्कृत-सम्मेलने अष्टादश विषयेसु कार्यशाला आयोज्यन्ते यत्र अर्वाचीन-संस्कृतसाहित्यमवलम्ब्याप्येका कार्यशाला आयोजयिष्यते यस्याः संयोजकोऽस्ति दिल्लीविश्वविद्यालयस्य संस्कृत-विभागाचार्यो डा०सत्यव्रतशास्त्रिमहाभागः । अन्ये भागग्रहीतारः सन्ति- डा०देवदत्त भट्टी, डा०रमाकान्त शुक्लः डा०श्रीमती उषा सत्यव्रतमहाभागा च । कार्यशाला सफला भूयादिति काम्यते ।

(प्रस्तोत्री—रमा शुक्ला)

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू०एस०डालराः 10
आजीवनं (भारते) रु० 300 00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू०एस०डालराः १०
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू०एस० डालराः 100 00

डाकव्ययः [यदि पंजीकृत (रजिस्टर्ड) डाक द्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस०डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **"देववाणी-परिषद्,-दिल्ली"** (Devavani Prishad, Delhi) इत्यंकितेन **'अर्वाचीनसंस्कृतम्'** (Arvacheenasasnkritam/*Arvācīnasaṁskṛtam*) इत्यंकितेन वा बैंकड्राफ्टेन धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते :

महासचिवः
देववाणी-परिषद्, दिल्ली
आर 6, वाणी विहारः, नई दिल्ली-110059 (भारतम्)

अथवा

सम्पादकः
अर्वाचीनसंस्कृतम्
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नई दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (९/१) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः २६.१.१९८७।

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१. भाति मौरीशसम् (डा० रमाकान्त शुक्लः) रु० ६
२. सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः) रु० २०
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्) रु० ४०
४. कूहा (काव्यम्) (डा० उमाकान्त शुक्लः) रु० २०
५. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु० १५
६. आभाणकमञ्जरी (,, ,,) रु० १५
७. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ३०.
८. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,) रु० ३०.
९. ,, ,, ,, (द्वितीय खण्डः) (,,) रु० ३०.
१०. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु० ४०.
११. निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः) रु० २०.
१२. अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः) रु० २०.
१३. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ४०.
१४. संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित) रु० १५०.
१५. साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा) रु० ५०.
१६. अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० २०.
१७. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया) रु० २०.
१८. साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः) रु० ४०.
१९. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु० २०.
२०. मर्कूतिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०.
२१. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु० ५०.
२२. श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः) रु० २०.
२३. सुरश्मिकाश्मीरम् (,,) (,,) रु० २०.
२४. पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० १०.
२५. श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्) रु० १०.
२६. पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः) रु० २०.
२७. नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,) रु० २०.
२८. श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्र) रु० १२.
२९. लक्ष्मीशतकम् (डा० वरदराजकण्णन्) रु० २०.
३०. अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल) रु० १०.

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाष ५५३४६६

अर्वाचीनसंस्कृतम्

(नवमवर्षे द्वितीयोऽङ्कः)

१५ अप्रेल १९८७

सम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

अर्वाचीनसंस्कृतम् ९/२

(R. N. 34554/79)

(अप्रैल १९८७ ई०)

विषय-सूचिः

विषयः	लेखकः	पृष्ठांकः
१. सम्पादकीयम्		५७
२. रौति ते भारतम्	डा० रमाकान्त शुक्ल, नयी दिल्ली	५८
३. षोडशाक्षरीस्तोत्रशतकम्	डा० शा० रा० स्वामिनाथः दिल्ली	६१
४. अनात्मवादः खलु दुःखमूलम्	प्रो० हरिश्चन्द रेणापुरकर गुलबर्गा	७५
५. श्रीनूतनसत्यनारायणकथा	डा० रमेशचन्द्र शुक्लः, दिल्ली	८३
६. कालिदास-प्रशस्तिः	डा० रमाशङ्कर तिवारी, फैजाबादः	९९
७. प्रौढसखीसङ्गमसङ्गीतम्	श्री सम्पूर्णदत्त मिश्रः, भरतपुरम्	१०४
८. आशीविषः	श्री देवदत्त भट्टिः, मालेरकोटला	१०५
९. अन्योक्तिद्वयम्	डा० वच्चूलाल अवस्थी, उज्जयिनी	१०७
१०. मिहिरावलीं दृष्ट्वा	ड० राजेन्द्रमिश्रः, प्रयागः	११०
११. श्रीबदरीशस्तुतिः	डा० उमारमण झा, जम्मू तवी	१११
१२. हैमन्तिकप्रार्थनम्	डा० दीपक घोषः, कलकत्ता	११२
१३. रामगिरि-परिसरः	डा०प्रकाश पाण्डे, नागपुरम्	११३
१४. देववाणी-परिषद्वार्ता	श्रीमती रमा शुक्ला	११५
१५. संस्कृतजगद्वार्ता	"	११५
१६. ज्ञानमूर्तिः श्रीचारुदेवशास्त्री	सम्पादकः	११९-१२२

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली

२. प्रकाशनकालावधिः—त्रैमासिकम्

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९

डा० रमाकान्तशुक्ल इति नामाहं उद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

—रमाकान्त शुक्लः

प्रकाशकः

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य नवमवर्षीये द्वितीयेऽस्मिन् पद्यमयेऽङ्के विविधा सामग्री दीयते। 'रौति ते भारतम्'-इतीयं रचना मया १२-१०-१९८५ ई० तारिकायां विनिद्यग नागपुरविश्वविद्यालये संस्कृतविभागेनायोजिते अखिलभारतीयसंस्कृत-कविसम्मेलने पठितासीत्। कानिचन पद्यानि अस्यां सद्य एव योजितानि। 'भाति मे भारतम्'-इतिशीर्षकस्य मम संस्कृतकाव्यस्य सञ्चारिभावत्वेनेयं रचना सहृदयैः स्वीकार्या। 'षोडशाक्षरीस्तोत्रशतकम्' इत्यस्मिन् स्तोत्रे डा० स्वामिनाथेन भगवती कामाक्षी स्तुता। 'अनात्मवादः खलु दुःखमूलम्' इत्यस्यां रचनायां श्री हरिश्चन्द्र रेणापुरकरः विज्ञानधर्मयोरविरुद्धतां परस्परपूरकतां च निर्दिशति। आचार्यरमेशचन्द्रशुक्ल-कृता 'नूतनसत्यनारायणकथा' सत्यस्य महत्त्वं निर्दिशति। डा० रमाशङ्करतिवारी-कृता 'कालिदासप्रशस्तिः' इति मुक्तच्छन्दोरचना कालिदासं स्तौति। कविपुण्डरीकश्रीसम्पूर्णदत्तमिश्रप्रणीतं 'प्रौढसखीसङ्गमसङ्गीतम्' मर्मस्पृक् गीतं वर्तते। 'आशीविषः' इति व्यङ्ग्य-रचनायां डा० देवदत्तभट्टी आतंकवादस्य संवर्धनमधिक्षिपति। डा० बच्चूलाल-अवस्थिकृतमन्योक्तिद्वयं परवशस्य मनस्विनो दशां व्यनक्ति। डा० राजेन्द्र मिश्रः 'मिहिरावलीं दृष्ट्वा' इत्यस्यां रचनायां मिहिरावल्यां निखिलदिल्ल्याः पीडां पश्यति। अन्या अपि रचना शीर्षकमनुसृत्य स्ववैभवं प्रदर्शयन्ति।

पाठका एता रचना आस्वादयितुं समीक्षितुं च सादरमाहूयन्ते।

अग्रिमेऽङ्कद्वये अभिनवपाणिनेः श्रीचारुदेवशास्त्रिमहाभागस्य (८-५-१८९६-९-४-१९८७ ई०) 'श्रीगांधीचरितं' नाम गद्यकाव्यमविकलरूपेण तत्स्मृतौ प्रकाशयिष्यते। तत्परिचयस्तु अस्माभिः ११९-१२२ पृष्ठेषु दीयते।

१५-४-१९८७
आर ६, वाणी-विहारः
नयी दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

रौति ते भारतम् !

(डा० रमाकान्त शुक्लः, ६ वाणी विहारः, नयी दिल्ली-११००५९)

कश्चिदुवाच—

किं रमाकान्त ! नित्यं त्वया भण्यते
'भाति मे भारतं भाति मे भारतम् ।'
किं न पश्यस्यनेकैरभावैर्युतं
रौति ते भारतं रौति ते भारतम् ॥१॥

कुत्रचिद्दीर्घपंक्तिस्थिता मानवाः
यापयन्ति स्वकालं प्रतीक्षापराः ।
मोचयन्ति स्वनिःश्वासराशीनहो !
यैर्व्यथामाप्नुवद् रौति ते भारतम् ॥२॥

रेलयानेषु भिक्षापरान् बालकान्
अङ्गहीनानवस्त्रान् दयोत्पादकान् ।
गालिभिः पोषितान् न्यक्कृतैस्तोषितान्
वीक्ष्य चिन्तामयं रौति ते भारतम् ॥३॥

वृत्तपत्रेषु नित्यं बलात्कारिणां
निन्द्यपैशाचकृत्यानि पश्यत् पठत् ।
किञ्च हत्यापहारादिगाथा वहत्
रौति ते भारतम् रौति ते भारतम् ॥४॥

क्वाप्यशिक्षातमोभिर्वृतं कष्टदैः
क्वापि रोगैः परीतं महादारुणैः ।
नित्यमुत्कोचलीलाविलासैर्युतं
रौति ते भारतं रौति ते भारतम् ॥५॥

यौतकप्रेप्सुभिर्लोलुपैर्निन्दितैः
मर्त्यरूपे स्थितैः राक्षसैः कौटिकैः ।
दह्यमाना वधूर्वीक्ष्य दुःखेन हा
रौति ते भारतं रौति ते भारतम् ॥६॥

देहपण्याजिरे नूपुराकर्णनैः
पारवश्यांकितैर्नृत्यकृत्यैस्तथा ।
येन दारिद्र्यगाथोच्चकैर्गीयते
तद् व्यथापूरितं रौति ते भारतम् ।।७।।
यत्र रक्षाभटैः रक्षणीयो हतः
यत्र गोप्ता न गोप्यं क्षमो रक्षितुम् ।
यत्र सन्तो मता दस्यवो हिंसका
रौति तद् भारतं रौति तद् भारतम् ।।८।।
उच्चशिक्षां समाप्याऽपि वृत्त्यर्जने
न क्षमो जायते यत्र यूनां गणः ।
यत्र कुत्रापि वृत्त्यर्थमाहिण्ड्यते
रौति तद् भारतं रौति तद् भारतम् ।।९।।
हा कराधानकर्ताधिकारी स्वयं
यत्र धत्ते स्वगेहे विना सूचनाम् ।
कृष्णवित्तं तथा स्वर्णभाण्डं महद्
रौति तद् भारतं रौति तद् भारतम् ।।१०।।
कार्यरोधैस्तथा हिंसकान्दोलनैः
चाटुकारप्रणीतैर्वृथा भाषणैः ।
ईश्वरम्मन्यमानैरहो दम्भिभी
रौति ते भारतम् रौति ते भारतम् ।।११।।
उग्रकृत्यैर्नरैर्यत्र मध्येपथ
पूवसेनापतिर्हन्यते गोलिभिः ।
यत्र चार्ता भिषग्भिर्बलाद्दूष्यते
निन्द्यकृत्यान्वितं रौति तद् भारतम् ।।१२।।
यत्र यूनां नवैर्मादकैर्वस्तुभिः
क्षीयते शक्तिरोजस्तथा लुप्यते ?
यत्र दृश्या युवानो जराजर्जरा
रौति तद् भारतम् रौति तद् भारतम् ।।१३।।

कर्हिचिद्विश्वबन्धुत्वमुद्घोषयत्
पावयद्विश्ववन्द्यैश्चरित्रैर्जगत् ।
यत्तदेवाद्य विद्वेषहिंसाप्लुतं
रौति ते भारतम् रौति ते भारतम् ॥१४

कर्षकेभ्यो यदान्नं भवेद् दुर्लभं
कार्मिकेभ्यश्च गेहं यदा दुर्लभम् ।
वस्त्रकृद्भ्यश्च वस्त्रं यदा दुर्लभं
तर्हि नूनं हहा ! रौति ते भारतम् ॥१५

कर्गले राष्ट्रभाषास्ति, नो भाषणे
संस्कृतं स्तूयते, नैव तत्सेव्यते ।
स्वीयपादे कुठारः स्वयं पात्यते
वीक्ष्य सर्वं ध्रुवं रौति ते भारतम् ॥१६

रमाकान्त उवाच—

यत्त्वया कीर्त्यते दोषजातं सखे !
तन्मया सूचितं ह्येकपद्ये[1] पुरा ।
दोषवर्जं मया सद्गुणाः सञ्चिता-
स्तेन प्रोक्तं मया 'भाति मे भारतम्' ॥१

कीर्तनेनैव वा क्रन्दनेनैव वा
लोपमेष्यन्ति दोषा न देशस्य वै ।
तेन सर्वैः क्रियन्तां सदा सुक्रियाः
येन भातु प्रसन्नं सदा भारतम् ॥१

लोलुपा नायका नैव सन्त्वत्र भोः
सन्तु कर्तव्यशून्या न चापि प्रजाः ।
देशसेवां मिलित्वा कुरुध्वं समे
येन भूयोऽपि भासेत नो भारतम् ॥१

---

१. सन्तु दोषा अनेकेऽत्र कैश्चिन्मताः
किन्तु नाहं प्रपश्यामि तान् मन्दधीः ।
वन्दनीयं मया कीर्तनीयं मया
मोदतां वर्धतां राजतां भारतम् ॥

—'भाति मे भारतम्'—इत्यस्मिन् काव्ये १०७ संख्यके

षोडशाक्षरी-स्तोत्रशतकम्

(रचयिता : डा० शा०रा० स्वामिनाथः 'कार्यकारः')

प्रथमा षोडशी

काद्यां विद्यां कृतसुकृतिभिः[1] केवलं सेव्यमानां
कामरातिप्रणयनिकषप्रस्तरोरोजकुम्भाम् ।
काञ्चीक्षेत्रे भुवनमहिते काञ्चिदानन्दरूपां
कामाक्ष्याख्यां कलितकरुणां भावये कल्पवल्लीम् ।।१।।
एकैश्वर्यात् च्युतिमुपगतं भिक्षुमीशं स्वदृष्ट्या
कुर्वाणा तं धनपतिसखं विश्ववन्द्यं महेशम् ।
एकाम्रेशप्रियसहचरी प्रैधमानप्रभावा
सैका माता सकलजगतामेतमुद्धर्तुमेतु ।।२।।
ईशानि त्वं परशिवमये भासि पर्यङ्कतल्पे[2]
ईशत्वं ते कथयति जनो राजराजेश्वरीति ।
ईक्षामात्रात्सृजसि निखिलं विश्वमम्ब त्वमीष-
त्मात्रां दीने कुरु मयि कृपां येन धन्यो भवेयम् ।।३।।
लज्जां याति त्रिभुवनजयी मन्मथस्त्वत्समक्षं
लावण्यं ते मदनदहनख्यातिमीशस्य मार्ष्टि ।
लाक्षारक्तं ललितचरणं ये भजन्ते नरास्ते
लक्ष्मीवाण्योः कृतकतनयास्ते भवन्त्यम्ब नूनम् ।।४।।
ह्रीङ्काराख्यं मनुमनुदिनं ये जपन्त्यम्ब तेषां
हृत्पद्मे ते नियतवसतिर्नित्यकल्याणदात्री ।
ह्रीविध्वस्तास्तदितरमनुव्रातवर्णा भवानि !
ह्रासं यान्ति स्वयमथ पुरो ज्ञानबीजाक्षरस्य ।।५।।
हत्वा दैत्यं महिषवपुषं केवलं पादघाता-
त्तद्वक्षोत्थक्षतजमलिनं सिंहपृष्ठे निविष्टम् ।
पादं शर्वो मुकुटघटितस्वर्धुनीवारिभिस्तं
प्रक्षाल्येशे[3]! तव हृदि गतं मार्ष्टि सापत्न्यरोषम् ।।६।।

---

१. कर्मधारयादिनिः

२. परितोऽङ्का लक्षणानि यस्मिन् तस्मिन् तल्पे

३. ईशे इति मातुस्संबोधनम्

सर्पाकारा स्वपिषि कुहरे कुण्डलिन्याख्यया या
मूलाधारे निजमनुरवोद्बोधिता सत्वरं त्वम् ।
संसर्पन्ती दशशतदलाम्भोजकिञ्जल्कमध्ये
प्रीत्या पत्या रहसि मिलिता धोक्षि पीयूषधाराम् ॥७॥

कम्पातीरे[४] कनककदलीकाण्डवेतण्डशुण्डान्
न्यक्कुर्वाणौ पुरहरमनोमोषणे बद्धदीक्षौ ।
ऊरू चारू रहसि वसतस्तस्करौ ते विधेयौ
ताभ्यां बिभ्यन्मदनमथनो नेच्छति स्नातुमम्ब! ॥८॥

हंसी हंसं मृगयितुमहङ्कारपद्माधिरूढा
हृद्यैस्सप्तस्वरविरचितैराह्वयन्ती स्वनादैः ।
आज्ञाचक्रं निजविभुतयोल्लङ्घ्य पद्माटवीस्थं
कान्तं प्राप्य प्रकटितरतिं मोदते मोहिनीयम् ॥९॥

लब्ध्वा देवि त्वदधररसाकारपीयूषधारां
शम्भुः स्वैरं गरलमपिबत्सागरे मथ्यमाने
लक्ष्मीकान्तो वहति निटिले त्वत्पदाग्निस्सरन्तीं
लाक्षालेखां निखिलजगतीरक्षणे बद्धदीक्षाम् ॥१०॥

ह्रींबीजं ते वदनकुहरे यस्य नृत्यत्यजस्रं
हस्तप्राप्तास्तव करुणया सिद्धयस्तस्य सर्वाः
हाहाहूहूमुखमुखरिताः स्त्रोतशब्दाश्च नित्यं
त्वद्भक्तस्य श्रवणविषयं यान्ति ते दृष्टिपातात् ॥११॥

संगीतं ते सरसरशनाकिङ्किणीभिः प्रवृत्तं
साम्नां राशिं जनयति महादेवि सच्चित्स्वरूपे !
यन्माधुर्यानुकरणविधौ निष्फलारम्भयत्ना
मूकीभूता द्रुहिणगृहिणीवादिता कच्छपीयम् ॥१२॥

कल्पान्ते ते भ्रुकुटिचलनप्रेङ्गितज्ञः पतिस्ते
सर्वं दग्ध्वा त्रिभुवनमहाप्रेतभूम्यां कपाली ।
एकाकी यन्न हि स रमते तेन वामाङ्गसंस्थां
कालीं त्वाऽयं व्रजति शरणं रन्तुमिच्छुः स कालः ॥१३॥

---

४. गतौ रतौ च । इति कम्पा नितम्बः । पचाद्यच् ।
तस्यास्तीरे तटे ।

लावण्यं ते सुदति ! सुमनःकामिनीवृन्दचित्ते
लज्जाहेतुर्मनसिजरिपोः कौतुकाधानहेतु ।
लक्ष्मीवाण्योर्हृदि च सततं देवि मात्सर्यहेतुः
रत्या भूयो मदनमिलनप्रत्ययोत्पत्तिहेतुः ॥१४॥

ह्रीमित्यस्मिन् हरपदगतौ हार्द्धरार्द्धौ समेता-
वीमित्यम्बामुखकुचयुगं भात्यनुस्वारबद्धम् ।
यस्मात्सर्गस्थितिलयतिरोधाननाशप्रमोक्षा-
स्सम्पद्यन्ते शिवशिवधूसामरस्यप्रसङ्गात् ॥१५॥

श्रीमित्यम्भोनिधितनुजया व्याप्त एषो मनुस्ते
सर्वैश्वर्यं वितरति यतस्त्वत्पदाम्भोजभाजाम्
श्रीविद्याख्यां वहति भुवने देव्युपास्तिक्रमोऽतः
श्रीमातेति प्रथमगणना नामसाहस्रके ते ॥१६॥

द्वितीया षोडशी

केने[५] यक्षस्त्रिदशपरिषद्दर्पदुर्ज्ञेयतत्त्वः
शुद्धं ब्रह्मेत्यनिमिषगणं बोधयित्री त्वमेवम् ।
काले काले तुहिनगिरिजे देशिकत्वं प्रपन्ना
मोहान्धानां नयनतिमिरं देवि दूरीकरोषि ॥१७॥

एकं चन्द्रं तव मुखनिभं प्राहुरेतत्त्वलीकं
मौलौ डिम्भो हिमगुरपरस्त्वग्रजो भालदेशे ।
तस्य ज्येष्ठौ रचितवसती गण्डपार्श्वे तव स्तो
बालेन्दुस्ते चिबुकघटितश्शम्भुना लालितोऽसौ ॥१८॥

इच्छाशक्त्या निखिलजगतां सर्गरक्षाप्रणाशा-
न्कुर्वाणां त्वां विधिहरिमहेशैस्त्वदादेशकृद्भिः ।
स्तोतुं नैव प्रभवति महादेवि ! जिह्वासहस्र-
स्साक्षाच्छेषः कथमिव वद प्राकृतो मादृशस्त्वान् ॥१९॥

लावण्यं यद्युवतिवनितादेहसर्वस्वभूतं
सत्काव्यानां सहृदयमनोरञ्जकं यद्रसाख्यम् ।
पात्रे वर्षर्द्धनिकविभवे दम्भहीना च या श्रीः
सर्वो देव्यास्तव हि महिमा सर्वमाङ्गल्यरूपे ॥२०॥

---

५. केनशब्दोऽनुकरणभूतः केनोपनिषदः संज्ञा ततः प्रातिपदिकत्वा-
त्सप्तमी ।

ह्रीङ्कारस्ते वियति विततो विश्वमाप्लाव्य संस्थः
सर्पो येन त्र्यधिकवलयो मुञ्चति स्वापमम्ब ।
वैखर्याख्यां भजति तु गले हंसतां फालमूले
मेरोः पृष्ठे त्रिपुररमणीनूपुरारावरूपम् ॥२१॥

हन्तुं रक्तस्रवकणभवं दैत्यमिद्धप्रकोपा
युद्धयत् काल्याः प्रसृतरशनारङ्गसंस्थं विधाय
क्षारं क्षारं क्षतजमखिलं कालिकां पाययन्ती
नीरक्तं तं जघनिथ रिपुं कीदृशं वर्णये त्वाम् ॥२२॥

सन्ध्यानृत्तव्यसनिनि सभानायके नायके ते
शिक्षाकर्मण्यनुमतिमुपेत्याऽथ तेऽपाङ्गशिष्यः ।
शिक्षां शम्भो रतिविलसिते नर्त्तने चैककालं
कुर्वन् शिष्यो निजमपि गुरुं कर्मणा सोऽतिशेते ॥२३॥

काठिन्यं यन्नगपतिसुते ! भाति वक्षोजयुग्मे
पित्रा दत्तं परिणयविधौ स्त्रीधनं स्वानुरूपम् ।
शश्वत्तस्मात्पितृगृहगतामृद्धिमालोच्य दृप्ता-
मीर्ष्यावेगात्प्रहरति मुहुर्दक्षवैरी कुचे त्वाम् ॥२४॥

हन्तुं दैत्यं निजकरतले खड्गमुद्यम्य दक्षे
वामे धृत्वा कचभरममुष्याननं द्रष्टुकामा ।
भुग्नं कण्ठं हृदि च करुणां लोचने रोषवह्निं
धृत्वा ग्रीवां लुलुविथ रिपोर्भावये तत्स्वरूपम् ॥२५॥

लक्ष्मीस्तावत्कतिपयधनैर्वश्यतामेति पुंसां
वाणी शश्वन्मननपठनव्यापृतानां विधेया
कामाक्ष्यास्ते स्पृशति न मनाङ् मानसं ह्येकपत्न्या-
स्त्वन्यं कञ्चित्त्रिपुरमथनात्त्र्यम्बकाच्चन्द्रचूडात् ॥२६॥

ह्रीमित्येषस्तव मनुवरः कल्पवृक्षाद्विशिष्टो
यस्मादर्थान् सुरतरुरसौ प्रार्थितानेव दद्यात् ।
भक्तेभ्यः किं किमिव हितमित्यर्थनानिर्व्यपेक्षं
दातुं शक्तो निजकरुणया मध्यबीजाक्षरं ते ॥२७॥

सच्चिद्रूपं निगमशिखरैर्नेति नेत्यादिवाक्यै-
स्ताटस्थ्येनाऽप्यनुमितिवचोभङ्गिभिस्सूच्यमानम् ।
अध्यात्मं तत्त्वविदभिमतिं निजां शक्तिमावृत्यभिख्यां
व्यावर्त्य त्वं करबदरवत्साधकेभ्यो ददासि ॥२८॥

कल्याणानां निलयनमवस्थानमार्त्तस्य जन्तो-
र्मीमांस्यं यन्निगमवचसां योगिनां ध्यानगम्यम् ।
मारारातेर्हृदयकरिणो बन्धनालानमेकं
काञ्चीक्षेत्रे विलसतितरां पादमूलं भवान्याः ॥२९॥

लक्ष्मीवाण्योः करतलचलच्चामरोत्थैस्समीरै-
र्मन्दं मन्दं चलति निटिलोपान्तभागेऽलकश्रीः ।
वारं वारं जलदपटलैश्छादितं मुच्यमानं
राकाचन्द्रं गमयति तुलामम्ब ! ते वक्त्रचन्द्रः ॥३०॥

ह्रीङ्कारस्ते मुकुटघटितश्चन्द्रकान्तो मुखेन्दोः
सान्निध्ये यः स्रवति करुणां भक्ततापोपशान्त्यै ।
सायुज्यश्रीनिटिलघटितश्चारु सिन्दूरबिन्दुः
नित्यानन्दामृतजलनिधेरुत्थितश्शीतरश्मिः ॥३१॥

श्रीकण्ठे च प्रणयकलहे याचमाने प्रसादं
रुष्टायास्ते चरणयुगलस्याग्रतस्सन्नताङ्गे ।
पञ्चास्योऽपि प्रतिफलनतस्त्वन्नखादर्शपङ्क्तौ
कैलासोत्थापनकुतुकिना रावणेनैति साम्यम् ॥३२॥

तृतीया षोडशी

कण्ठे कालो भुजगततिभिर्वेष्टितो भैक्षवृत्तिः
कृत्तिं धृत्वा पितृवनचरस्संवृतो भूतसंघैः ।
इत्थंभूतस्स हि पशुपतिस्त्वत्करस्पर्शभाग्या-
द्विश्वेशोऽभूत्तव करुणया शंकरोऽभूच्छिवोऽभूत् ॥३३॥

एकस्मिन्नप्यतुलमहिमन्यक्षरब्रह्मतत्त्वे
भात्यां सत्यां त्वयि पृथगिव द्वित्वमाभाति तस्मिन् ।
तेनाद्वैते श्रुतिवचनतात्पर्यमासादयन्न-
प्याचार्यस्त्वां कथयति परब्रह्मणो गेहिनीति[६] ॥३४॥

६. "महामाया विश्वं भ्रमयसि परब्रह्ममहिषि" इति सौन्दर्य-
लहर्याम् ।

ईक्षामात्रान्मदनशलभं शम्भुकोपाग्निदग्धं
प्रोज्जीव्य त्वन्नयनकुहरे न्यस्य तं गूहसे यत् ।
तेनैव त्वद्भुवनमहिता देवि कामाक्ष्यभिख्या
सार्थीभूता विलसतितमामाश्रितत्राणशीले ॥३५॥

लब्ध्वा मातर्वदनकमलात् त्वत्प्रसादप्रतीकं
दिव्यं सारस्वतरसभरं देवि ताम्बूलसारम् ।
पूगेलाद्यैस्सुरभि निखिलाम्नायसर्वस्वभूतं
मूर्खो यातः कविकुलमणिः कालिदासः कवीन्द्रः ॥३६॥

ह्रीमित्युक्ते सपदि हृदयान्तःस्थषट्कोणमध्ये
शम्भोर्भाग्यं धृतवपुरिवाभाति कोणत्रयस्थम् ।
कोट्यर्काभं निगमनिचयैर्मृग्यमानन्दकन्दं
पञ्चप्रेतैर्विरचितमहामञ्चगं पुण्यपुञ्जम् ॥३७॥

हस्ते धृत्वा सुमशरततिं चैक्षवं चापदण्डं
वीक्षामात्रान्मदनवशगं मन्मथारिं विधाय ।
शस्त्रास्त्रौघं परिकरमहं नाश्रये स्वेच्छयैत-
त्सेत्स्यत्येवं प्रथयसि निजं सर्वशक्तत्वमम्ब ॥३८॥

सद्योजातस्मितविकसिते वक्त्रपद्मे मधुस्य-
त्यक्ष्णोर्युग्मं मधुकरनिभं मन्मथारेस्त्वदीये ।
योगभ्रंशं मम रिपुरयं प्राप्त इत्यात्तहर्षः
कामः कामं हसति नयनप्रान्तरे ते निलीनः ॥३९॥

कल्माषं यद्धरगलगतं कालकूटस्य चिह्नं
पत्युः कण्ठग्रहणजनितं त्वत्कृतं वर्णयन्ति ।
शर्वान्तःस्थं बहिरपि ततं रक्षितुं जीवराशिं
कोऽन्यः शक्तो भुवनजननीं त्वां विना लोकनाथे ॥४०॥

हस्तग्राह्यो हरमहिषि ते मध्यभागः कदाचि-
द्भङ्गं यायात्कुचयुगभरेणेति चिन्तामुपेतः ।
गाढं श्लिष्यन् निजभुजलतापाशबद्धं वितन्वन्
वक्षोभारं तदितरकरेणोद्वहत्यम्ब शम्भुः ॥४१॥

लक्ष्मीर्लज्जावनतवदना त्वन्मुखेन्दोस्समक्षं
वाणी मूका भवति भवतीनूपुरारावमात्रात् ।
त्वत्कारुण्यं सुरतरुमपि ह्रेपयत्यर्थिनां यत्
कामानर्थानपि वितरति प्रापयत्यम्ब मोक्षम् ।।४२।।

ह्रीङ्कारोऽयं भवजलनिधौ मज्जतां मानवाना-
मेका नौका दुरितविपिनध्वंसने दाववह्निः
मोहव्याधिप्रशमनविधौ याति सिद्धौषधत्वं
कामाक्ष्यास्ते निरवधिकृपावर्षणे कृष्णमेघः ।।४३।।

सन्धाय त्वद्भ्रुकुटिवलयाकारचापे कटाक्षान्
पुष्पेषूंस्त्वन्नयनरथगो भीतिमुत्सार्य दूरे ।
स्वैरं मारः प्रहरति शिवे त्वत्कृपायत्तधैर्य-
स्तुच्छः को वा न भवति महान्त्वत्करालम्बलाभात् ।४४।

कामाक्षि त्वां हृदयकमले सर्वदा सन्निधाप्य
त्वत्पादाब्जे मधुकरमयीं वृत्तिमातिष्ठमानाः ।
काञ्चीक्षेत्रे कृतवसतयश्शेखराश्चन्द्रपूर्वाः
जीवन्मुक्ताः भुवनमखिलं पावयन्तो जयन्ति ।।४५।।

लीये मातस्तव पदयुगे ध्वस्तमोहः कदाऽहं
कायेऽहंधीविरहितदशां त्वत्प्रसादादुपैमि ।
प्रायेणाम्बाचरणयुगलान्निस्सरद् ज्ञानगंगा-
तोये मज्जन् धुतजनिमृतिर्धन्यधन्यश्चरेयम् ।।४६।।

ह्रीङ्कारस्ते भगवति दयाम्भोधिकल्लोलनादो
भक्तालीनां चरणकमलास्वादझंकारनादः ।
श्रीकण्ठस्य प्रशमकरिणस्त्रासने सिंहनादो
योगीन्द्राणां हृदयनलिनीनिस्सरद्धंसनादः ।।४७।।

श्रीमातेति श्रितजनपरित्राणदेत्यम्बिकेति
प्रत्यग्रूपेत्यखिलजगतामेकरक्षाकरीति ।
कामाक्षीति प्रथितकरुणेत्यद्रिराजात्मजेति
नामालापैर्दिवसनिवहान्नेतुमिच्छामि शेषान् ।।४८।।

चतुर्थी षोडशी

कन्दर्पः स्वं सुमशरततिं चैक्षवं चापदण्डं
न्यासीकुर्वंस्तव करयुगे नेत्रकोणे निलीनः ।
शंभुस्थैर्यद्रवणनिपुणैस्तावकापाङ्गबाणै-
र्भ्रूचापोत्थैः प्रहरति हरं वैरनिर्यातनेच्छुः ॥४९॥

एकं स्रोतः कविकुलगिरां हेतुरेको जगत्या-
श्चैदम्पर्यं निगमवचसामैश्वरं भागधेयम्
एकीभूतं विधिहरिहराकारमेकं च तत्त्वं
ह्येकाम्रेशप्रणयचषकं भाति काञ्चीनगर्याम् ॥५०॥

ईक्षामात्राच्छवमपि शिवं कर्त्तुमीशानजाये
प्रावीण्यं यन्नयनयुगलं लाघवेनैव धत्ते ।
किं तन्नष्टं कथय हृदयान्तःस्थजाड्यापनुत्त्यै
नो चेन्मातर्दुरितनिचयो मामकस्त्वां रुणद्धि ॥५१॥

लास्यव्याजान्नटनरसिकं जेतुकामा महेशं
तस्यैवोर्ध्वप्रसृतचरणाल्लज्जिता त्वं जितः च ।
भूयस्तस्मात्परिभवकथां सर्वथा वारयन्ती
देहार्द्धे त्वं रचितवसतिश्चन्द्रचूडस्य भासि ॥५२॥

ह्रीङ्कारस्ते नलिनपदयोर्मञ्जुमञ्जीरनादो
घण्टानादस्तव पदजुषां मोक्षसौधप्रवेशे ।
उद्गारस्ते स्मितमधुरसप्राशिनां साधकानां
सीत्कारस्त्वद्वदनकमलामोदपाने शिवस्य ॥५३॥

हासव्याजात्त्रिपुरदहनं कुर्वतश्शूलपाणे-
श्चित्तस्थैर्यं हरति निखिलं मन्दहासस्त्वदीयः ।
भालस्थं तद्दहननिलयं मन्मथारातिचक्षु-
स्त्यक्त्वा क्रोधं हिमकरतुलां याति तेऽपाङ्गपातात् ॥५४॥

संविद्रूपे परशिवतनौ भासि वामार्द्धभागे
संयोगो यस्सुमुखि युवयोस्साभरस्यं व्यनक्ति ।
चित्त्वं यत्ते सहचरगतेनाऽथ सत्त्वेन साकं
ह्यानन्दत्वे परिणतिमुपेत्याद्वयत्वे च भाति ॥५५॥

कम्बुग्रीवे कुरु मयि कृपामर्थिनां कामधेनो
मोहग्रस्तोप्यकृतसुकृतोऽप्यम्ब पुत्रोऽस्मि तेऽहम् ।
मार्जारी स्वं मुखगतशिशुं दुर्घटेऽप्युत्सृजेत् किं
वानर्या किं तनुगतशिशुः शक्यते हातुमम्ब ॥५६॥

हर्यश्वाद्या महिषदितिजात्त्राणकामा भवत्याः
पादौ प्रापुश्शरणमवधीस्तं पदाघातमात्रात् ।
तद्वन्मातस्तव चरणयोरेष यातोऽभयार्थी
मच्चित्तस्थान् जहि दितिसुतान् रागविद्वेषमुख्यान् ॥५७॥

लब्ध्वा मातुर्नयनकमलस्यन्दि कारुण्यधारां
जात्या मूकस्समजनि महाकाव्यनिर्माणदक्षः ।
स्तन्यं पीत्वा कनककलशप्रख्यवक्षोरुहात्ते
ख्यातिः प्राप्ता द्रविडशिशुना ज्ञानसम्बन्धनाम्ना ॥५८॥

ह्रीङ्कारस्ते वदनकुहरे यात्यबुद्ध्यापि यस्य ।
प्रज्ञाऽभावादतिजडमतेः प्राकृतस्यापि तस्य ।
प्रायः सारस्वतरसभराः श्रोत्रपेयाश्च वाचां
धारा वक्त्रान्मधुमधुरतामाक्षिपन्तः स्रवन्ति ॥५९॥

सन्तप्तानां तव पदजुषां नीरदौ तापशान्त्यै
शर्वस्यान्तःकरणमथने मन्दराद्रीयमाणौ ।
नाट्याचार्यौ त्रिपुरदहनस्याश्रयौ मन्मथस्य
जेजीयेते भुवनमहितौ नेत्रकोणौ भवान्याः ॥६०॥

कामारातेर्मनसिजकलाशिक्षणे देशिकाभौ
शम्भुक्रोधाद्रतिसहचरारक्षणे राजभृत्यौ ।
ब्रह्मानन्दे सरसि सततं राजहंसायमानौ
जेजीयेते कलितकरुणौ कौचिदम्बाकटाक्षौ ॥६१॥

लब्धुं मातर्वदनकमलात्सर्वदा संप्रफुल्लात्
भृङ्गोऽहं ते स्मितसुमरसाकाङ्क्षया बंभ्रमामि ।
कारुण्यं चेद्यदि न भविता मत्कृते कामदोग्ध्रि
कामाक्ष्याख्या कथय कथमेत्यर्थवत्त्वं त्वदीया ॥६२॥

ह्रीङ्काराख्ये कनककलशे न्यस्य भक्त्याखयतोयं
तस्मिन् मातुश्चरणयुगले चूतपत्रे निधाय।
तत्र स्थाप्य स्वहृदयफलं षोडशीमन्त्रजापं
कुर्वन् भक्तो रचयति शिवे ! शुद्धिपुण्याहकृत्यम् ॥६३॥

श्रीमित्येतं मनुमतिशुभं यो वहत्यम्ब वक्त्रे
तस्योपान्ते सततवसति ! सिद्धयः कामयन्ते।
तद्गेहान्नापसरति रमा शंखपद्मादयश्चा-
प्यासेवन्ते ह्यहमहमिति प्राप्तुकामाः कृपां ते ॥६४॥

पञ्चमी षोडशी

कल्याणि त्वत्पदयुगजुषामन्तकान्नास्ति चिन्ता
दीर्घापाङ्गो द्रवति दुरितं दीनता याति दूरम्।
यान्ति स्वैरं तव करुणया मानमोहादिदोषाः
साम्राज्यश्रीः स्वयमथ वृणोत्यम्ब तान् माल्यहस्ता ॥६५॥

एकं स्थानं नियतकरणैर्योगिभिर्मृग्यमाणं
मूलस्थानं शिवगुरुसुतख्यातिदेवद्रुमस्य।
मुक्तिस्थानं वरदमहितं स्थानमीशस्य भूमे-
र्नाभिस्थानं तव विजयते देवि काञ्चीपुराख्यम् ॥६७॥

ईशस्येक्षा सृजति निखिलं विश्वमित्याह वेदः
सा चेदीक्षा यदि न भवतीवीक्षिता लोकमातः।
किं वा कर्त्तुं प्रभवति परं ब्रह्म शुद्धं ततस्त्वा-
माद्यां मूलप्रकृतिमखिलोत्पत्तिहेतुं वदन्ति ॥६७॥

लीयन्ते त्वन्नयनसुषमानिर्ज्जिता लज्जया ते
मीनव्रातास्सरसिजदलैः छादितास्तोयमध्ये।
स्थित्वा तीव्रे तपसि भवतीं प्रार्थयन्तः स्वकीये-
ष्वेकं मारध्वजपटगतं प्रेक्ष्य धन्या भवन्ति ॥६८॥

ह्रीमित्युक्ते भगवति मणिद्वीपमाभाति चित्ते
तन्मध्ये च द्रुहिणहरिपत्न्यौ तवादेशरक्ते।
सद्योजातप्रमुखरचिते मञ्जु मञ्चे निषण्णा
हासोद्रेकोल्लसितवदना तत्र देदीप्यसे त्वम् ॥६९॥

हंसायन्तस्तव मुखविधोर्ज्योत्स्नया लिप्तगात्राः
षोडश्याख्यं बिसकिसलयं चञ्चुमध्ये वहन्तः ।
त्वद्वात्सल्यामृतमधुरतां शश्वदास्वादयन्तः
सिद्धाः केचिज्जगति विगतद्वन्द्वमोहाश्चरन्ति ॥७०॥

सन्ध्याकाले त्वमसि धरणीदेवदत्तार्घ्यतोयै-
स्तुष्टा तेभ्यो वितरसि धियं विश्वकल्याणहेतोः ।
वेदत्रय्याः सुरसरिदिव प्राप्तमार्गत्रया त्वं
गायत्र्याख्यां वहसि तनुमित्युच्यते वेदविद्भिः ॥७१॥

कस्त्वं भर्त्ता, क्व मम गिरिजा, मूर्ध्नि, नाऽस्मि त्वदीया
कस्य त्वं भोः मथितमदनस्याऽस्मि, कोऽहं, विटस्त्वम् ।
भोगी नाऽहं, भुजगततयस्सन्ति, नाऽहं भुजङ्गो
देव्या इत्थं प्रणयकलहे नर्मवाचो जयन्ति ॥७२॥

हर्षोत्फुल्लां हरमुकुटगां वीक्ष्य गङ्गां सफेनां
पत्या साकं रतिविलसितां शंकमाना द्युनद्याः ।
पादाघाताद्युगपदुभयोर्दण्डनायोद्यतं तद्
देव्या वामं चरणकमलं पातु मां पातकेभ्यः ॥७३॥

लोपामुद्रा भृगुकुलमणिर्नन्दिदत्तात्रिपुत्राः
दुर्वासास्त्वद्भजननिरताः कादिहाद्यादि मार्गैः ।
आराध्य त्वां जनिमृतिमयात्, कर्मबन्धाद्विमुक्ता-
स्त्वत्सायुज्यं भवभयहरं प्राप्तवन्तो रमन्ते ॥७४॥

ह्रीङ्कारस्ते सुरभि दयितो वत्सकः कामधेनोः
यत्सान्निध्यात्स्रवसि निखिलान् कामितान् साधकेभ्यः ।
ह्रीङ्कारोऽयं भगवति तवान्तःपुरे द्वारपालो
यत्कारुण्यात्त्वयि कृतधियस्त्वत्सकाशं व्रजन्ति ॥७५॥

संकल्पस्ते भ्रमयति जगच्चक्रमेतद् विचित्रं
यस्मिन् जीवाः सुकृतदुरितप्रेरिता बम्भ्रमन्ति ।
यन्त्रो यत्र भ्रुकुटियुगलं तावकं, कर्मपाश-
स्सूत्रं येन भ्रमणविषयं याति जीवश्शरावः ॥७६॥

कर्णाभ्यर्णं नयनसुहृदौ दीर्घदीर्घं सरन्तौ
पैशुन्यं त्वत्पतिविषयकं मन्दमन्दं ब्रुवन्तौ ।
दृष्ट्वा शर्वं त्वनघचरितं त्वत्पदा ताड्यमान-
मस्त्रैः पूर्णावनुशयवशाल्लज्जितौ तौ जयेताम् ॥७७॥

लङ्काभर्त्तुर्भुजततिबलाच्चालिते राजताद्रौ
संभ्रान्ता यत्पशुपतिगलालिङ्गनं तेनिथ त्वम् ।
तावद्वामां विगलितरुषं प्रेक्ष्य तुष्टः पतिस्ते
वक्त्राम्भोजं पुलकिततनुर्निर्विरोधं चुचुम्ब ॥७८॥

ह्रीं मायाख्यस्तव मनुरिति प्रोच्यते यत्तदास्तां
कामं मायां तव पदजुषां दूरमुत्सार्य चित्तात् ।
कामारातेर्मनसि जनयत्यम्ब कामं निकामं
मायाधीनं रचयसि शिवं यो हि मायाधिनाथः ॥७९॥

श्रीवत्साङ्कः सुरदितिजयोरम्बुधौ मथ्यमाने
स्पर्धां दृष्ट्वाऽमृतविषयिणीं मोहयन् दैत्यवर्गम् ।
त्वत्कारुण्यात् त्रिनयनमनोमोहनं मोहिनीत्वं
प्राप्तः सर्वानदितितनयान् प्राशयद् व्याजवृत्त्या ॥८०॥

षष्ठी षोडशी

कामाक्षि ते वदनबिंबतुलां यियासुस्तप्तुं तपोऽम्बुरुहममम्बुनि तिष्ठदेतत् ।
प्रागेव ते वदननिर्जितमिन्दुबिम्बं दृष्ट्वा ह्रिया मुकुलतां भजते निराशः ८१

एणाङ्कमौलिपरिरम्भणसंभ्रमेण शोणप्रभं तव वपुः पुलकाञ्चितं यत् ।
प्राणप्रियस्य हृदये मदनस्य पञ्चबाणप्रयोगविधिमाचरतीव मन्ये ॥८२॥

ईशे त्वदीयपदयोः प्रणयापराधक्रोधप्रसादनविधौ विनतोत्तमाङ्गे ।
तत्रस्थशीतकिरणो दशधा विभक्तः प्रत्येकमेतिनखचन्द्रकलङ्कतां ते ॥८३॥

लाक्षारसार्द्रमुपमर्दितदुष्टरक्षोवक्षःक्षरत्क्षतजलक्षितमङ्घ्रियुग्मम् ।
कामाक्षि नीरजदलाक्षि कृपाकटाक्षसंरक्षितत्रिभुवने परिरक्षतान्नः ॥८४॥

ह्रीङ्कारपेटकनिवेशितदिव्यरत्नं ह्रीङ्कारनन्दनवनस्थितकल्पवृक्षम् ।
ह्रीङ्कारदुग्धजलधिस्थसुधासवं तत्कामाक्ष्यभिख्यपरतत्त्वमहं स्मरामि ॥८५॥

हस्तावलम्बमभयार्थिजनस्य नित्यं हर्यश्वमुख्यदिविषद्गणवन्द्यमानम् ।
हंसं हृदंबुजगतं परमार्थतत्त्वं कामाक्ष्यभिख्यमनिशं मनसा स्मरामि ॥८६॥
संगीतमेव तव नादशरीरमाहुर्लावण्यमम्ब तव सत्कवितासु दृश्यम् ।
अव्याकृतं तव वपुर्नहि दृश्यतामेत्यानन्द इत्यभिहितं ह्यनुभूतिवेद्यम् ॥८७॥
कामेश्वरः शिरसि देवनदीं कपर्दैश्चछन्नां दधत्तव दृशोर्विषयं व्रजन्तीम् ।
आच्छाद्य गांगनयनायितमीनशोभां खण्डेन्दुना रहसि रक्षति तां सपत्नीम् ॥
हत्वाऽसुरं महिषमेकपदाभिघाताद्धर्षं गतांस्त्वमभिवीक्ष्य यदात्थ देवान् ।
दुःखं यदा भवति वस्तदपाकरोमी त्येतत् त्वदीयवचनं खलु मेऽवलम्बः ८९
लक्ष्मीस्त्वदीयचरणार्पितकुङ्कुमेन नष्टां स्वदेहसुषमां पुनराप्तुकामा ।
काञ्चीपुरे चरति देवि तपस्सुतीव्रं श्रीदेव्यपि श्रियमुपैति तव प्रसादात् ९०
ह्रींबीजमम्ब भवसागरतारणाय नौकायितं मदनजीवनहेतुभूतम् ।
भोगीन्द्रभोगमणिरूर्ध्वगकुण्डलिन्यास्त्वन्मस्तके घटितमैन्दवबिम्बखण्डम् ९१
संसाररूपविषवृक्षपविस्त्वदङ्घ्रिर्दुष्कर्मदावशमने नववारिवाहः ।
मोहान्धकारदलने च सहस्ररश्मिः कामाक्षि ! वीक्षणपथं समलंकरोतु ।९२।
कान्तस्तवाम्ब कवलीकृतकालकूटश्चिन्तां विहाय नटनं कुरुते यदीशः ।
उद्वाहमङ्गलविधौ तव कण्ठनद्धमांगल्यसूत्रमहिमा खलु तत्र हेतुः ॥९३॥
लक्ष्मीनिवासमरुणोत्थितमन्दहासं सौन्दर्यकोशमलिवृन्दनिषेव्यमब्जम् ।
त्वद्वक्त्रनिर्जितमुपैति हि पङ्कजत्वं नष्टश्रियं व्यपदिशन्त्यकुलप्रसूतम् ॥९४॥
ह्रींबीजमब्जनयने तव नासिकाग्रे सन्मौक्तिकं हृदयविभ्रमहेतुभूतम् ।
सिन्दूरबिन्दुरथवा तव भालदेशे बीजायितं भुवनसर्गविधौ युगान्ते ॥९५॥

श्रीमन्मुखं तव विलोकयतः पुरारे-
भालस्थितं नयनमेति सुधांशुसाम्यम् ।
क्रोधानलो व्रजति चन्दनशीतलत्वं
येनाऽपयाति मनसो मदनस्य भीतिः ॥९६॥

परिशिष्टम्

जित्वा वाणीमधिगतयशः प्राप्य सारस्वताख्यां
विश्वाचार्यश्शिवगुरुसुतः पूज्यपादोऽनुवत्त्वाम् ।
मूकाचार्यस्तव हि करुणालब्धवाग्वैभवेन
स्तोत्रं चक्रे क्व नु मम तथास्त्यर्हता स्तोतुमीशे ॥९७॥

किञ्चिज्ज्ञोऽहं सुकृतरहितो दूरवर्ती त्वदङ्घ्रेः
सर्वज्ञा त्वं कृतसुकृतिभिः स्तूयसे या कवीन्द्रैः ।
कोऽहं स्तोतुं तुहिनगिरिजे त्वाममेयप्रभावा-
मत्याचारो निजशिशुकृतो मर्षणीयो जनन्या ॥९८॥

दारिद्र्यं मे वचसि हृदये नास्ति भक्तिप्रवाहः
रिक्तं चित्तं विनयविभवात् काव्यनिर्माणशक्तेः ।
त्वत्पूजायां विरतमपि मे वाचमायोज्य मात-
र्भाविन्यम्बास्तवनकवने शेमुषीं लब्धुमीहे ॥९९॥

स्तोत्रं वर्णैर्मनुवरगतैः कल्पितं षोडशैर्यत्
श्रीकामाक्ष्याः कलितकरुणादृष्टिपातप्रभावात् ।
अल्पज्ञेन ग्रथितममुना कार्यकारोपनाम्ना
भूत्यै भूयाच्छ्रवणपठनव्यापृतानां समेषाम् ॥१००॥

इति अनन्तश्रीविभूषितानां काञ्चीकामकोटिपीठाधीश्वराणां श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीचरणानां श्रीकामाक्ष्या अवतारभूतानां पदपांसुकणायितेन कार्यकारोपनाम्ना भारद्वाजेन स्वामिनाथेन रचि[तं]

षोडशाक्षरीस्तोत्रशतकम्

संपूर्णम्

अनात्मवादः खलु दुःखमूलम्

(प्रा० हरिश्चन्द्र रेणापुरकरः, गुलबर्गा)

ऐश्वर्यपुण्योदयभृंगरूढः स्वर्गस्थदेवैरपि वन्दनीयः ।
भूमण्डले भारतवर्षदेशस्त्रैलोक्यचारित्र्यगुरुर्बभूव ॥१॥

यत्कीर्तिरम्याद्भुतगन्धलुब्धं भृङ्गायमानं भुवनं समस्तम् ।
तत्पादपद्मार्चनसंप्रसक्तं मनोज्ञगुंजारवमाततान ॥२॥

नूनं दिवः खण्ड इवावनिस्थो हैमो गरुत्मानिति लोकवित्तः ।
प्रेप्सुर्जनिं देवगणोऽपि यत्र घोरं तपो दुश्चरमाचचार ॥३॥

अहो यदीयोज्ज्वललोकवृत्तं यत्कैकयश्चाश्वपतिर्जुघोष ।
स्तेनो न मे जानपदे न शौण्डी स्वैरी न कश्चिन्न च पांसुलेति ।४॥

उदारचारित्र्यमहो जनानां यद्गेहमभ्यागतमानवेभ्यः ।
आपस्स्थले दुग्धमुपाहरन्ति कुर्वन्ति सत्कारमुदारवाचः ॥५॥

लुण्ठाकपाटच्चरवीतचिन्तास्तालैर्विहीनेषु गृहेषु रात्रौ ।
स्वपन्ति लोकाः सुखशान्तियुक्ता इत्यंकितं यात्रिवरैरनेकैः ॥६॥

अलक्षितं यत्र विशन्ति रात्रौ सुप्तेषु लोकेषु निकेतनेषु ।
चन्द्रस्य पादा न तु चोरपादा अहो सुधन्यो भुवि नाक एव ॥७॥

आस्तामियं गौरवपूर्णगाथा प्राचीनभव्योज्ज्वलभारतस्य ।
यन्नव्यवैदेशिकसूरिवर्यैरुद्घोषितं तत्स्मरणीयमत्र ॥८॥

भूमण्डलेऽहं यदि मार्गयेयं स्वर्गायमानं विषयं सुधन्यम् ।
यत्र प्रकृत्या निजरूपसंपन्नूनं विकीर्णा खलु मुक्तहस्तम् ॥९॥

यस्मिन् कृतो मानुषमानसेन देवोपहारीकृतदिव्यशक्तेः ।
अत्यद्भुताश्चर्यकरो विकासो रहो गभीरं निपुणं वगाह्य ॥१०॥

मानुष्यदुर्बोधमहासमस्याः समाहिता गूढतमाः सलीलम् ।
यद्विस्मिताः स्युः खलु काण्टशिष्याः प्लेटोसमप्राज्ञवरानुगाश्च ॥११॥

यूनानरोमादिविमर्शपुष्टा अद्यापि तां जीवनदायिशक्तिम् ।
सत्प्रेरणां चाप्य विधित्सवश्चेत् स्वजीवनं दिव्यमहोच्चभावम् ॥१२॥

यशोन्वितं सर्वजनीनमेव संप्लावितं चात्मिकदिव्यशक्त्या ।
न भारताबन्यत एति दृष्टिरित्याघुषन्मूलरनाम धीमान् ॥१३॥

"ग्रन्थस्य कस्यापि समस्तलोके पाठो न तादृग् हृदयङ्गमोऽस्ति ।
कल्याणकृच्चोन्नयनैकहेतुर्यादृग् हि नामोपनिषद्वराणाम् ॥१४॥

स एव मे जीवनशान्तिहेतुर्भवेच्च मृत्योरपि मे स एव ।"
इत्यब्रवीत् शोपनहावरोऽपि शार्मण्यदेशीयमहाविपश्चित् ॥१५॥
प्रामाण्यमेवास्य समीहितं चेद् दीर्घायुषा मे समुदं ददामि ।
संसारधर्माध्ययनारतेन प्रोवाच धन्यः खलु मूलरोऽसौ ॥१६॥
इत्थं हि संसारदिगन्तभागादुदात्तचारित्र्यसुधर्मशिक्षाम् ।
जिघृक्षवो धर्मतृषार्तलोकाः संप्रापुरत्र भ्रमरा इवाब्जम् ॥१७॥
विलोक्य तस्यैव दिगन्तकीर्तेर्देशस्य कष्टां स्थितिमद्य शोच्याम् ।
रुदन्ति देवा अपि दुःखतप्तास्ततो नराणां किमु वर्णनीयम् ॥१८॥
पर्याप्तमन्नं न जलं न वासः सामान्यलोकाय सुलभ्यमद्य ।
सौविध्ययुक्तानि गृहाणि दूरे कुट्योऽपि सामान्यजनैर्न लभ्याः ॥१९॥
ऐश्वर्यसंपन्ननिकेतनेषु वसन्ति केचिद् बहुभूमिकेषु ।
कुबेरकल्पाः सुखसंभृतेषु हर्षप्रमोदान् खलु निर्विशन्तः ॥२०॥
उत्तुंगसौधेषु वसन्त एव जना उदात्तोज्ज्वलचारुवेषाः ।
उदारवाचोऽपि सुसभ्यमन्या भवन्ति संस्कारविचारदीनाः ॥२१॥
सर्वोच्चविद्यापदवीं दधाना महाकुलीना सधनाश्च छात्राः ।
गर्ह्याणि पापापि समाचरन्तो भवन्ति भीता न च लज्जिताश्च ।२२॥
अभ्यंकरो नाम जगत्प्रसिद्धः पुण्यस्थवैयाकरणोऽतिवृद्धः ।
छात्रैर्हतो निष्करुणं सभार्यो दग्धस्य वित्तस्य कृते धिगेतत् ॥२३॥
मद्यादि पातुं न धनं ददाना मातामही काऽपि हता स्वनप्त्रा ।
अन्येन केनापि धनस्य हेतोः पुण्यस्थछात्रेण हतः स्वतातः ॥२४॥
तत्रैव कस्मिन्नपि भोज्यकक्षे मदोद्धताभ्यां पुरपालकाभ्याम् ।
प्रसह्य नार्यः परिधर्षिताश्च वृत्यैव सस्यं खलु भक्षितं हा ! ॥२५॥
उद्दण्डविद्रोहिजनैश्च छात्रैः स्वगर्हितस्वार्थसमर्जनाय ।
संधाय राष्ट्रस्य विपक्षिसार्धं प्रचालितं निर्ममघातसत्रम् ॥२६॥
राष्ट्रस्य भाग्योदयसाधिकारा अमात्यसंसज्जनशास्तृवर्याः ।
स्वार्थार्चका भ्रष्टपथप्रवृत्ता भवन्ति राष्ट्रस्य विरोधिभूताः ॥२७॥
हिंसाघृणाचौर्यवितथ्यवादाः स्वार्थार्चना भ्रष्टपथानुसारः ।
पूर्वं ह्यभूवन्नपवादभूता हा हन्त ! जाता नियमा इदानीम् ॥२८॥
अर्थं ह्यभूत् साधनमेव पूर्वं साध्यस्य सामाजिकसौख्यसिद्धेः ।
वित्तं नु साध्यं खलु जातमद्य तस्माज्जना वित्तपरा भवन्ति ॥२९॥

मोक्षार्थमासीत् खलु धर्मसिद्धिर्धर्मार्थमास्तां ननु वित्तकामौ ।
धर्म्यान्वितस्तावुभयावपीष्टौ नो चेदनर्थोऽपरिहार्य एव ॥३०॥

उद्दामनियंत्रितवित्तकामौ धर्मप्रतीपौ च निरंकुशौ च ।
त्रैलोक्यवैक्लव्यरुजार्तिमूलं कूलंकषा निर्झरिणी न भूत्यै ॥३१॥

शारीरसौख्यावहवस्तुपूर्णे वैज्ञानिकीमुन्नतिमादधाने ।
देशे न कश्चिन्न सुखी न शान्तः सर्वत्र हाहाकृतिरेव दृश्या ॥३२॥

अभ्रंकषात्यन्तिकमूल्यवृद्ध्या भ्रष्टप्रजापीडकशास्तृकृत्यैः ।
त्रस्तैर्हि सामान्यजनैः कथंचित् कृच्छ्रेण लोके क्रियतेऽसुयात्रा ॥३३॥

उत्कोचदानेन विना न किंचित् कुत्रापि कार्यं भवतीह देशे ।
लभ्यं न कुत्रापि विशुद्धवस्तु सर्वत्र साम्राज्यमसाधुतायाः ॥३४॥

वित्तं न कस्यापि न जीवनं च नारीजनानां च सतीत्वमेव ।
मानं न शीलं न पवित्रता च संरक्षितं भाति न किंचिदद्य ॥३५॥

महर्षिवर्याध्युषितार्यभूमिर्विश्वस्य चारित्र्यगुर्वरुरिष्ठः ।
विदुष्टपापासुरवृत्तिलक्ष्यं कथं बभूवेति विचारणीयम् ॥३६॥

इयं हि नः सार्धशताब्दकाले ह्यनात्मवादाश्रितभोगमूल-
पाश्चात्यलोकायतसभ्यताया अन्धानुकारस्य करालसिद्धिः ॥३७॥

प्राचीनभव्योज्ज्वलसंस्कृतेर्नो जीवातुभूतानि च शाश्वतानि ।
तत्त्वानि लोकैः खलु विस्मृतानि तस्यास्ति वै कष्टविपाक एषः ।३८।

अस्मन्महासंस्कृतिमूलतत्त्वमुद्घुष्टमासीन्मुनिसार्वभौमैः ।
यच्चेतनाचेतनविश्वमेतद् व्याप्तं च सृष्टं परमात्मनैव ॥३९॥

सर्वेऽपि तस्यैव भवन्ति पुत्राः सर्वज्ञसर्वेश्वरसर्वगस्य ।
आत्माऽपि सर्वेषु समानरूपः सौभ्रात्रमस्मात्सहजं समेषाम् ॥४०॥

ब्रह्माण्डपिण्डौ परिदृश्यमानौ नैकान्तिकौ पूर्णयथार्थसत्यौ ।
पश्चात्तयोर्यत्परमात्मतत्त्वं तदेव नित्यं परमार्थसत्यम् ॥४१॥

विश्वं विलोक्यापि च विश्वमूलं देहं विलोक्यापि च देहमूलम् ।
स्मृतेनं सार्यं मनुजेन नूनमित्येव नः संस्कृतिमूलतत्त्वम् ॥४२॥

शरीरमात्रं नहि मानवोऽयं देहात्मनोः संहतिरेव मर्त्यः ।
देहात्परं चेतनमात्मतत्त्वमतो न भाव्यं तनुमात्रलक्ष्यैः ॥४३॥

किन्त्वद्य चार्वाकपथप्रवृत्ता अनाद्यनन्तामरनिर्विकारम् ।
आत्मानमानन्दमयं विहाय भवन्ति देहार्चनमात्रसक्ताः ॥४४॥

अभद्रभद्राखिलवासनानां शुभाशुभाशेषमनोरथानाम् ।
पूर्तिः समेषामविवेकपूर्वं नरं नयत्याशु पशुत्वभावम् ॥४५॥
पशुत्वभावः सहजो नराणां तस्मात्तदीयोन्नयनं नरत्वम् ।
ततश्च नारायणरूपसिद्धिरुच्चैस्तमं संस्कृतिलक्ष्यमेतत् ॥४६॥
अशेषसंपद्धनधान्यपूर्णे वैज्ञानिकोत्कर्षशिखाधिरूढे ।
अमेरिका-नामसमृद्धदेशे जना न तुष्टा न च शांतियुक्ताः ॥४७॥
ऐश्वर्यरत्नाकरसंनिमग्नाः समस्तसंभाव्यसुखोपपन्नाः ।
तथापि तत्रस्थजना गुडाकां विना न निद्रागुलिकां लभन्ते ॥४८॥
हिंसाऽऽत्महत्यावधवातुलानां प्रमाणमात्यन्तिकवर्धमानम् ।
निदर्शनं नाम सुखस्य तेषामुद्दामभोगा न सुखाय नूनम् ॥४९॥
स्वार्थार्चकाः भौतिकवादनिघ्नास्त्यजन्ति वृद्धौ पितरौ युवानः ।
विवाहविच्छेदपराश्च नूनं स्वपूर्वसंतानमपि त्यजन्ति ॥५०॥
अनात्मवादैहिकवादनिष्ठा नग्नार्थकामोपहतात्ममेधाः ।
अन्यानपेक्षात्महितैकचिन्ता निरर्गला नागरिका भवन्ति ॥५१॥
अर्थेन लभ्यानि यदा भवन्ति सर्वाणि मानास्पदसाधनानि ।
अर्थप्रधानेऽपि च राजतंत्रे स्पष्टं जना अर्थपरा भवन्ति ॥५२॥
अनेन केनापि शुभाशुभेन मार्गेण वित्तार्जनमेव लक्ष्यम् ।
संपद्यते मानवजीवनस्य तत्रावकाशो नहि धर्मनीत्योः ॥५३॥
महोच्चमानार्हपदाधिरूढाः शालीनसंमानितसभ्यमन्याः ।
विद्याविदग्धा अपि वित्तमूढा जना अकार्याणि समाचरन्ति ॥५४॥
नराधमैर्यौतुकलाभहेतोर्भार्या नवोढा निहताः स्नुषाश्च ।
अन्यैश्च राष्ट्रीयनिगूढगुह्यं पणायितं वैरिगणाय गुप्तम् ॥५५॥
देहातिरिक्तं च विविक्तमन्यच्चिदात्मतत्त्वं नहि मन्यमानाः ।
जना हि वैरोचनबुद्धियुक्ताः किं धर्मस्त्वानि समाचरेयुः ॥५६॥
नान्त्या समस्या मनुजस्य वित्तं नरो न भूतात्मकदेहमात्रः ।
अन्तर्गतं तस्य चिदात्मतत्त्वं तदेव मुख्यं न धनैकतृप्यम् ॥५७॥
विश्वं प्रकृत्या न विकारमात्रं नूनं मनुष्यो न शरीरमात्रम् ।
पश्चात्प्रकृत्याः परमात्मतत्त्वं तथाऽऽत्मतत्त्वं वपुषोऽस्ति पश्चात् ॥५८॥
व्याप्ता त्रिलोकी परमात्मशक्त्या व्याप्तं वपुश्चापि तथात्मशक्त्या ।
सत्ता द्वयोश्चेतनयोर्यथार्था तस्माद्धि लिप्तैर्जडयोर्न भाव्यम् ॥५९॥

भोगैर्विना नैव शरीरयात्रा ततो न भोगा नितरां प्रहेयाः ।
आत्मानमाभ्यन्तरमुख्यतत्त्वं विस्मृत्य भाव्यं न तु भोगलिप्तम् ।।६०।।

दृश्या यथा संसृतिरस्ति सत्या सत्यो वियोगोऽपि तथैव तस्याः ।
स्थेयं मनुष्यैरत एव तस्यां निर्लिप्तभावं सरसीव पद्मम् ।।६१।।

आकण्ठभोगाब्धिनिमग्नलोका दूरेऽस्तु संतोषसुखानुभूतिः ।
भवन्ति निर्वेदघृणाभिभूताः निःसीमभोगा न सुखाय नूनम् ।।६२।।

सीमातिरिक्ता विषयोपभोगाः कुर्वन्ति भोगं ह्युपभोक्तुरेव ।
भोगो वरं त्यागपुरःसरोऽस्ति त्यक्तेन भोक्तव्यमिति श्रुतिर्हि ।।६३।।

भोगेन भोगः खलु सीमितोऽस्ति त्य गेन भोगस्त्वमितो विशालः ।
तत्त्यागपूर्वो विषयोपभोगः आभ्यन्तरानन्दसुखैकहेतुः ।।६४।।

स्वार्थं विहायापि परार्थसिद्ध्यै दिवानिशं ह्युद्यमिनो लभन्ते ।
शान्तिं सुखं दिव्ययशश्च लोके तत्त्यागसिद्धिर्न तु भोगलब्धिः ।।६५।।

संपत्तिवादोऽपि च साम्यवादः सामन्तवादश्च समाजवादः ।
वित्तं मनुष्यस्य समामनन्ति मुख्यां समस्यां परमं च साध्यम् ।।६६।।

क्षुत्तृट्प्रशान्तेः समनन्तरं किमाध्यात्मिकी नास्ति नरस्य वाञ्छा ।
देहावृते किं मनुजो न किञ्चित् किं देहनाशेन नरस्य नाशः ।।६७।।

आहारनिद्रादिकभौतिकानां प्रयोजनानामपि पूरणेन ।
तुष्टा न केचित्सततं यतन्ते ह्युच्चैस्तरं साधयितुं परार्थम् ।।६८।।

तृष्णाबुभुक्षादिकवासनानां त्यागं विधायापि परोपकारम् ।
कर्तुं महद्भिर्यतितं सदैव प्राणार्पणेनापि सहर्षमत्र ।।६९।।

गान्धीदयानन्दमसीहबुद्धैः स्वार्थं विहायापि परार्थमेव ।
सहर्षमात्मार्पणमाचरद्भिः किमत्र लेभे न दिगन्तकीर्तिः ।।७०।।

स्वार्थार्पणेनापि परार्थसिद्धिः क्लेशान् सहित्वापि परोपकारः ।
त्यागोऽपि भोगाद् ग्रहणाच्च दानं सर्वैश्च सर्वत्र समाद्रियन्ते ।।७१।।

अन्त्याऽत्र सत्ता परमात्मनश्चेद्देहेऽपि चेदात्मन एव मुख्या ।
अतोऽत्र निष्कामनिरीहवृत्त्या भोग्या त्रिलोकीति यथार्थमार्गः ।।७२।।

सत्यं दयास्नेहपरोपकाराः अक्रोधशौचेन्द्रियनिग्रहाश्च ।
आध्यात्मतत्त्वानि भवन्ति नूनं त्रैलोक्यशान्त्यावहपावनानि ।।७३।।

संस्थापनार्थं स्थिरविश्वशान्तेर्विश्वैक्यबन्धुत्वकुटुम्बितानाम् ।
घोषो हि सर्वत्र विधीयतेऽद्य नाध्यात्मतत्त्वानि विना तु शक्यम् ।।७४।।

एतन्महामौलिकतत्त्वजातं मान्यं न तैर्भौतिकवादिमन्यैः ।
यैः केवलं स्वार्थपरैः शरीरात् तत्त्वान्तरं स्वीक्रियते न किञ्चिद् ।।७५।।

नैवेश्वरो नैव च सृष्टिकर्ता लोकान्तरं नैव च नान्यजन्म ।
अत्रैव जन्मापि च मृत्युरत्र ह्येवं गते धर्मकथैव नास्ति ।।७६।।

इत्थंगते भौतिकवादिमन्यः स्वार्थार्थमेवात्र करोति कार्यम् ।
स्वार्थार्थमेवान्यहितं करोति स्वार्थोपकाराय परोपकारम् ।।७७।।

प्राबल्यमस्मात्खलु संबभूव सर्वत्र कामान्धधनातुराणाम् ।
दुर्वृत्तजाल्माधमलुण्ठकानां हिंसाघृणापापकृतां समाजे ।।७८।।

संपूर्णमानुष्यविनाशहेतोरण्वस्त्रयुद्धस्य विभीषिकाभिः ।
संत्रस्तविश्वस्य विमोचनाय नूनं न विध्यन्तरमस्ति किंचित् ।।७९।।

अर्थेन धर्मानुगुणेन भाव्यं भाव्यं च कामेन तथैव धर्म्यम् ।
अन्ते च कल्याणकरावुभाभ्यां नो चेद् विनाशोऽपरिहार्य एव ।।८०।।

चैतन्यमन्यन्नहि चेच्छरीराद् दृश्यान्न विश्वाज्जगदात्मतत्त्वम् ।
अस्मान्न जन्माज्जननान्तरं चेद् हर्षप्रमोदान्नहि लक्ष्यमन्यत् ।।८१।।

निष्पत्तिरस्यैव भयावहस्य निरात्मवादाश्रितदर्शनस्य ।
यन्नाम सर्वत्र विमुक्तराज्यं हिंसाघृणाचौर्यविलुण्ठनानाम् ।।८२।।

सत्यं क्षमाशान्तिपरोपकाराः अस्तेयदाक्षिण्यदयानुरागाः ।
हास्यास्पदं ह्येव भवन्ति लोके कस्मै किमर्थं खलु पालनीयाः ।।८३।।

ऊर्ध्वं हि मृत्योर्यदि शून्यमेव समाजकल्याणकथाऽपि मिथ्या ।
अन्तोऽपि मे चेत्सह मृत्युनैव कल्याणचिन्ता किमु कस्य हेतोः ।८४।।

अनात्मवादोपहतेन तेन मत्वा जयं प्राकृतिकं स्वलक्ष्यम् ।
प्रचण्डविज्ञानसहायकेन ह्यभूतपूर्वोऽभ्युदयः प्रपेदे ।।८५।।

समस्तनैसर्गिकभूतशक्तीर्जित्वा नरेणारचितानि ताभ्यः ।
यानानि वायोरपि वेगवन्ति चाण्वस्त्रशस्त्राणि भयंकराणि ।।८६।।

तडित्प्रदीपोज्ज्वलसव्यजानि दूरेक्षणाकाशगिरान्वितानि ।
वातानुकूलानि सुखावहानि तुंगानि हर्म्याणि विनिर्मितानि ।।८७।।

मानुष्यसौविध्यसुखावहानि नानाविधात्यद्भुतसाधनानि ।
विचित्रयंत्राणि विनिर्मितानि मानुष्यमस्तिष्कचमत्कृतिर्नु ।।८८।।

उच्चैस्तमं भौतिकभूतिशृङ्गं प्राप्यापि सौख्यं न नरः प्रपेदे ।
अशान्तिदुःखानलदह्यमानो हा हन्त ! दूरं स सुखात्प्रयाति ।।८९।।

स्वान्तर्गतं शान्तिसुखस्य केन्द्रमात्मानमानन्दमयं विहाय ।
सौख्यं न केनापि कदापि लभ्यं जलं न लभ्यं मृगतृष्णिकायाः ॥९०॥

एतद्धि भूमण्डलसभ्यतायै अस्मन्महामौलिकयोगदानम् ।
यद्विश्वशान्त्यैक्यसुखोपलब्धिराध्यात्मवर्जं न कदापि शक्या ॥९१॥

वित्तेन भूतात्मकदेहशान्तिर्नाध्यात्मिको भौतिकसाधनेन ।
अतः श्रुतीनामुपदेश एव न तर्पणीयो मनुजो धनेन ॥९२॥

प्राप्तव्यमाध्यात्मिकशान्तिरेव तत्साधनं भौतिकभूतिसौख्यम् ।
उभेऽनिवार्येऽपि च मुख्यगौणे आत्मैव साध्यं करणं शरीरम् ॥९३॥

किन्त्वद्य जातं विपरीतमेव शरीरमेवाद्य बभूव मुख्यम् ।
तस्यैव संतर्पणसंनिमग्नाः शरीरिणं चापि विहाय सर्वे ॥९४॥

उत्तुंगसौधेषु वसन् मनुष्यः क्षौमौर्णवासांसि वसान एव ।
स्पृशन् विमानेन च चन्द्रलोकं भात्यद्य संस्कारचरित्रहीनः ॥९५॥

आरुह्य यानानि महाजवानि करोति चेत्प्राणधनापहारम् ।
धावन् विमानेन च निर्मलेषु ह्यस्त्राणि संवर्षति चेत् फलं किम् ॥९६॥

भूतानि पञ्चापि जितानि तेन न स्वान्तरस्थः षडरातिवर्गः ।
चन्द्रो जितस्तेन नभस्तलस्थो न स्वान्तरस्थस्तु मनोमृगाङ्कः ॥९७॥

समस्तभूतानि विजित्य तेन प्रचण्डवैज्ञानिकशक्तिसिद्ध्या ।
न्यूनीकृतं कालदिगन्तरालं नरान्तरालं तु महत्प्रवृद्धम् ॥९८॥

पक्षीव नाके डयते स मुक्तं विगाहते मीन इवाम्बुराशिम् ।
नरैस्तु वस्तुं भुवि नैव वेत्ति स्नेहानुरागं च सबन्धुभावम् ॥९९॥

प्रत्येति कस्मिन्नपि कोऽपि नैव न कोऽपि कस्मायपि रोचते च ।
हिंसाघृणाऽऽतङ्कभयादिकानां सर्वत्र पर्यावरणं प्रपञ्चे ॥१००॥

आत्मेन्द्रियाणां विजयं विनैव कल्याणकारी न जयः प्रकृत्याः ।
विश्वस्य नाशाय भवेद् ध्रुवं तद् यद्धर्मबुद्ध्या न समन्वितं स्यात् ।१०१।

प्राचीनदेवर्षिमुनिप्रकाण्डैरनादिकालात् सुविचारपूर्वम् ।
उद्घोषितं तत्त्वमिदं वरिष्ठमात्मातिरिक्तं न सुखं यथार्थम् ॥१०२॥

आत्यन्तिकी भौतिकसौख्यसिद्धिः कामं सुलभ्या विजयात्प्रकृत्याः ।
संपूर्णसाम्राज्यमपि त्रिलोक्याः किन्त्वात्मशांतिः सुतरामशक्या ॥१०३॥

इत्थं बभाषे मुनियाज्ञवल्क्यो यथार्थकल्याणमभीप्सुपत्न्यै ।
यमो नुशासन्नचिकेतसे च सनत्कुमारोऽपि च नारदाय ॥१०४॥

अस्यैव तत्त्वस्य महानुभूतिः स्वजीवने किं क्रियते न सर्वैः ।
ऐश्वर्यसंपत्तिसुखाप्लुतेऽपि नाध्यात्मशान्तिर्न सुखप्रतीतिः ॥१०५॥

नादीरतैमूरमिकन्दराणां धनाप्तये विश्वविलुण्ठकानाम् ।
तथैव साम्राज्यधुरंधराणां भिन्ना कथा नास्ति दुरन्तभाजाम् ॥१०६॥

शान्तिं परां भद्रमवाप्तुकामैरात्मैव वेद्यो मनसा विभाव्यः ।
तेनैव दुःखोपशमोऽपि नूनमित्थं हि शास्त्राणि समामनन्ति ॥१०७॥

धावन्ति नद्यो जलधिं स्वकेन्द्रं सूर्यं प्रयात्यग्निशिखाऽऽत्मकेन्द्रम् ।
उत्क्षिप्तलोष्ठोऽपि धरां प्रयाति प्रेप्सुस्तथाऽऽत्मा परमात्मतत्त्वम् ॥१०८॥

आत्मा स्वयं साधनरूपदेहं धृत्वाऽस्ति लिप्सुः परमात्मतत्त्वम् ।
तदेव तस्याऽस्ति परं निधानं साध्यं च गन्तव्यपदं तदेव ॥१०९॥

मन्तव्यमेतन्न पुराणकाले विज्ञानवृद्धिर्न तथा बभूव ।
यथा वयं संप्रति भावयामस्तथ्यं तु नूनं विपरीतमेव ॥११०॥

विज्ञाननिष्ठैरपि भारतीयैर्नैवात्मतत्त्वेन विहीनभूतम् ।
अतो न तैर्दुःखसमुद्रमग्नैर्भूतं हि विज्ञानशिखां स्पृशद्भिः ॥१११॥

मानुष्यसर्वांगसमुन्नतिर्वै धर्मस्य साध्यं भवतीति हेतोः ।
वैज्ञानिकोत्कर्षमपीह नूनं धर्माद् बहिर्नैव विकल्पनीयम् ॥११२॥

ब्रह्माण्डविध्यध्ययनं सुसूक्ष्मं विज्ञानशास्त्रप्रमुखाभिसन्धिः ।
विधातृविध्यन्वयमार्गणं च धर्मस्य कार्यं न मिथो विरोधः ॥११३॥

ब्रह्माण्डसर्वोच्चविधातृशक्त्यां श्रद्धा नराणां भुवि धर्ममूलम् ।
तत्प्रेरिताचारविचारजातं लब्धप्रतिष्ठं भुवि धर्मनाम्ना ॥११४॥

चराचरव्यापकविश्वशक्तेश्चित्तेऽनुभूत्याऽखिलभूतमात्रैः ।
सौभ्रात्रसौहार्दसहानुभूतिर्यथार्थधर्मो भुवि मानवानाम् ॥११५॥

सत्यक्षमाशांतिपरोपकाराः अक्रोधविद्याविनयानुरागाः ।
भूतानुकम्पा नियमा यमाश्च त्रैलोक्यसंधारकधर्मतत्त्वम् ॥११६॥

विज्ञानधर्मौ न मिथो विरुद्धौ परस्परं पूरकमित्रभूतौ ।
यत्रोभयौ संचरतः सखायौ विश्वैक्यकल्याणसुखानि तत्र ॥११७॥

विनम्रभावेन विहीनविद्या सौरभ्यहीनं कमनीयपुष्पम् ।
धर्मेण हीनं च मनुष्यजन्म व्यर्थानि सर्वाणि भवन्ति लोके ॥११८॥

श्रीः

श्रीनूतनसत्यनारायणकथा

(रचयिता—आचार्य डा॰रमेशचन्द्रशुक्लः, ए-१/२०३ जनकपुरी
नयी दिल्ली-११००५८)

व्यवहारोऽस्ति सत्यस्य सत्यदेवाभिवादनम् ।
सत्यस्य भाषणात् सत्यमीशोऽवश्यं प्रसीदति ।।

मानवाः सन्ति ते धन्याः सत्यदेवं भजन्ति ये ।
प्राप्नुवन्ति शुभं लोकं सद्गतिञ्च हरिप्रदाम् ।।

दिव्यां कथामिमां नव्यां सत्यदेवरमापतेः ।
रमेशः कृतवान् शुक्लः सत्यनारायणं स्मरन् ।।

कल्याणानां निधानं वितरति सकलां सम्पदं सत्यगोप्ता
सत्याख्यः सः प्रदाता निखिलजनमनःकाङ्क्षितानां हरीशः ।
सोऽस्ति स्रोतः सुखानामखिलभवपतिर्व्यापकः सर्वदर्शी
सृष्ट्यां सत्यं तदेव प्रभुरिह करुणासिन्धुसर्वेश्वरोऽस्ति ।।१।।

लोकाः सर्वेऽप्यनन्ताः समुदमतितरां सर्वथा भान्त्यजस्रं
गृह्णन्तो मङ्गलानां शुचितमकरुणानुग्रहान्मञ्जुलांस्ते ।
शोभां भव्याञ्च रम्यामतिशयसुखदां वैभवानां भजन्तो
द्योतन्ते यस्य शक्त्या नमति मम मनस्तं हरिं सत्यसंज्ञम् ।।२।।

प्रत्याश्रुतानिह जना बहवो धरित्र्याम्
उक्तां स्ववाचमपि हन्त न संस्मरन्ति ।
उद्धर्तुं माधवकृपामयमानसोऽसौ
सत्यप्रियः सपदि तान् नयते सुमार्गम् ।।३।।

दण्डेन सोऽनृतपथस्थजनान् क्षमाब्धिः
स्नेहेन दर्शयति सत्यपथं हि सद्यः ।
सत्यानुरागहृदयो भगवान् दयालुः
श्रेयस्करो भुवनसर्वपती रमेशः ॥४॥

सत्यात्मको हरिजगद्भरणस्थचित्तो
नारायणोऽखिलमहीजनतानियन्ता ।
सत्यस्वरूपसदयो हितकारिलीलः
सत्याभिरक्षणरतः शरणं समेषाम् ॥५॥

सत्यप्रेमपरायणो मृदुमना ब्रह्माण्डकर्त्ता हरिः
सत्यप्राणवसुन्धराखिलपितोदारो महाञ्छ्रीपतिः ।
सत्यस्नेहरतान् जनानवति सः सत्याधिपः सत्यभृत्
शश्वत्पाति समस्तलोकनिकरं सत्योद्भवे तत्परः ॥६॥

वात्सल्यं निदधाति सत्यचरणस्नेहेषु सर्वेष्वपि
भर्ता प्राणभृतामभीक्ष्णमनिशं मातेव पद्मापतिः ।
तं नित्यं भजताज्जनोऽनुदिवसं सर्वत्र सच्चेतसा
चेत् सः काङ्क्षति भद्रमेव सततं लोके भृशं जीवने ॥७॥

सत्याधारहरिः करोति रमणं सत्येऽनिशं ह्लादितः
सत्यान्नो पृथगस्ति साधुजगतीरक्षारतः सन्ततम् ।
सत्यं काङ्क्षति सर्वदाखिलजनास्तं भक्तिभावस्थिताः
सेवन्तां सततं पवित्रमनसा सत्यं श्रयन्तो मुदा ॥८॥

सत्यं मङ्गलमन्दिरं शिवमयं श्रेयोविधानोत्सुकं
कल्याणामृतवर्षिमेघमतुलं श्रेष्ठं प्रकर्षोज्ज्वलम् ।
भूत्वा तद्धितकारकं त्रिभुवनं स्नेहेन गोपायति
तस्मात् तत् प्रियबन्धुरं शुभपरं प्रीत्या भजन्तां जनाः ॥९॥

यत् किञ्चित् परिवीक्ष्यते जगति वा लोकान्तरे संस्थितं
तत् सर्वं हि विनश्वरं न च वरं सत्यं परं केवलम् ।
स्थायि प्रीतिरतञ्च शान्तिसुखदं ग्राह्यं समेषामतः
सर्वेषां सुहृदस्ति तच्च जननी बन्धुः पिताधीश्वरः ॥१०॥

सत्योपासकमानवो भगवतः सत्यस्य हृद्यः प्रियः
सर्वत्रैव सदा च रक्षति हरिः सत्याभिधानो जनम् ।
तं स्नेहेन निरन्तरं करुणया सत्यानुरागः प्रभु-
स्तस्मात् सत्यमनारतं मतिमता संसेवनीयं हि तत् ॥११॥

साधुस्तिष्ठति सर्वदा शुचिहृदा सत्ये, सुधी नन्दति
सत्ये सन्ततमेव सज्जनकुलं विन्दत् सुखं प्रीयते ।
सद्भक्तो निदधाति सत्यदयिते शुद्धं स्वकीयाग्रहं
धर्मात्मा वसति करोति च, जनैर्हेयं न तस्माद्धि तत् ॥१२॥

न हि सत्यात् परो धर्मो न च सत्यात् परं बलम् ।
शोभन्ते सन्ततं सत्ये ज्ञानं विद्या तपांसि च ॥१३॥

चारित्र्यस्य विभा भव्या सत्येऽजस्रं विराजते ।
सत्ये भाति हरेः प्रेम तस्मात् सत्यं सदा श्रयेत् ॥१४॥

सत्यं जयति सर्वत्र सत्यं सर्वत्र पूज्यते ।
समस्तेष्वपि लोकेषु सत्यं प्रीत्या प्रशस्यते ॥१५॥

सत्यभक्तो जनो जातो विश्रुतामरकीर्तिमान् ।
सत्यस्याराधना कार्या तस्मान्नित्यं जनाखिलैः ॥१६॥

सत्यमाश्रित्य प्राङ्मर्त्यः कष्टं विन्दति दुःसहम् ।
कालान्तरे परं याति श्रीप्रदं परमं सुखम् ॥१७॥

लोके वेत्ति जनो न कः सुविदितं सत्यश्रिया शोभितं
सत्याचाररतं प्रियं क्षितिपतिं विश्वाभिरामोज्ज्वलम् ।
सत्यात्मानमुदारमानसहरिश्चन्द्रं जगत्पूजितं
भक्त्याद्यापि समस्तविश्वजनता श्रद्धानता ध्यायति ॥१८॥

दातारं प्रथितं यशःसुललितं भूपालवृन्दप्रियं
भूत्वा मौलिनता समस्तवसुधा सत्येऽवदाते रतम् ।
प्रीत्या गायति रन्तिदेवनृपतिं दान्युत्तमाराधितं
नूनं प्राप्य तथाविधं नृपमियं क्षोणी कृतार्थास्त्यहो ॥१९॥

तस्मै तद् ह्यविलम्बमेव मनसा याचेत यद् योऽतिथिः
दत्तं स्यादिति सत्यभाषणशिविः सर्वत्र घोषं व्यधात् ।
प्रीत्या भूभुवनेऽत एव तरसायच्छत् स्वकीयं महान्
मांसं सः स्वशरीरतो भुवि ततं तस्याद्य राज्ञो यशः ॥२०॥

विख्यातः किल भूपतिर्दशरथः सत्यं ररक्ष क्षितौ
प्राणान् सादरमत्यजत् परमसौ सत्यप्रतिज्ञो वचः ।
स्वं प्रीत्येति जुगोप विश्वविदितं सर्वत्र भूमण्डले
श्रीरामस्य पिताखिलेन जगता संस्मर्यते श्रद्धया ॥२१॥

देशस्यास्य महर्षयोऽनुदिवसं कष्टान्यसह्यान्यपि
सत्यार्थं भुवि सेहिरेऽतिसमुदं सत्यं ररक्षुः परम् ।
ख्याताः सन्ति वसिष्ठ-कण्व-मनवोऽगस्त्यादिकाः भूतले
सत्यस्थापितजीवनर्षितपसा ख्यातं भृशं भारतम् ॥२२॥

सत्यत्राणवशादसौ सुविदित सर्वत्र भीष्मो भुवि
धर्मप्राणयुधिष्ठिरश्च नृपतिः क्षोण्यां भृशं विश्रुतः ।
लोकाराधितशूद्रकोऽवनिपतिः सत्यं सदात्रायत
सत्यं विक्रमचन्द्रगुप्तनृपती पान्ति स्म भोजोऽपि च ॥२३॥

सञ्जाता महिला महीसुविदिता गार्ग्यादिविद्योन्नताः
ताः सत्ये सततं मनो हि निदधुः स्नेहेन विज्ञोत्तमाः ।
प्रह्लादध्रुवबालकौ जगति च ख्यातौ सदाचारिणौ
सत्याराधनमानसौ भरतभूश्रीगौरवाधायकौ ॥२४॥

न साधवो बुधा एव साधारणजना अपि ।
अस्मद्भारतवर्षेऽत्र बभूवुः सत्यवादिनः ॥२५॥

विद्याभिरामचारित्र्याः भगवद्भक्तिसंश्रिताः ।
असेवन्त सदा सत्यं भक्तिसंसक्तचेतसः ॥२६॥

नृपाणां सत्यभक्तत्वात् तादृशी जनताप्यभूत् ।
एतस्मिन् भारते देशे सर्वदेशशिरोमणौ ॥२७॥

सत्यदेवं समाराध्य भारतं विबभौ भृशम् ।
भूत्वा लक्ष्मीकृपापात्रं ज्ञानभास्वरभूषितम् ॥२८॥
श्रीशस्य सत्यदेवस्य महीयान् महिमा महान् ।
सोऽगम्यः सर्वथाऽज्ञेयो मुनीनामप्यसंशयम् ॥२९॥
सयत्नारायणो देवः सत्ये रज्यति सर्वदा ।
कष्टेभ्यस्त्रायते भक्तं सत्याचरणपावनम् ॥३०॥
कलौ साधनमुत्कृष्टं सत्यं ज्ञेयं हि वस्तुतः ।
तदवलम्ब्य को नाभूत् सफलो निजकर्मसु ॥३१॥
पूजा सत्यं तपः सत्यं स्तोत्रं सत्यं मनोरमम् ।
यज्ञः सत्यं व्रतं सत्यं सत्यं कीर्तनमेव च ॥३२॥
सत्यं ब्रह्मा शिवः सत्यं विष्णुः सत्यञ्च तत्त्वतः ।
तदेव निदधत् संज्ञा भाति तास्ताः अनारतम् ॥३३॥
सत्यं भजन्त्वतो विज्ञा मानवा इह भूतले ।
विनाऽऽलस्यं विनाऽऽयासं विना खेदमहर्निशम् ॥३४॥
सत्याच्छ्रीः परिवर्धेत तेजो वर्धेत सत्वरम् ।
वर्चश्च नितरां दिव्यं पौरुषं किञ्च सात्त्विकम् ॥३५॥
कस्मिन्नपि न लोभेऽत्र कस्मादपि न कारणात् ।
हेयं सत्यं शुभाभीष्टं प्राणापद्यपि नो जनैः ॥३६॥
दत्तेऽनृतं हि यद् वस्तु तद् भवत्यपकारकम् ।
न स्थायि विभवं दत्ते न च शान्तिं प्रयच्छति ॥३७॥
सत्यं यच्छति यद् वस्तु तद् भवत्युपकारम् ।
स्थिराञ्च सम्पदं दत्ते शान्तिं यच्छति सन्ततम् ॥३८॥
भवन्तः सन्तु सत्यस्य सर्वेऽपि समुपासकाः ।
भारतस्य भवेद् भद्रं तेन सर्वविधं भृशम् ॥३९॥
शक्तिं संश्रित्य सत्यस्य कुर्वन्तु राष्ट्रमुन्नतम् ।
सर्वविश्वसमुत्थानं धर्मो हि परमोज्ज्वलः ॥४०॥

कृपया यस्य सत्यस्य जगदीशस्य लभ्यते ।
स्वाभीष्टं तस्य कर्तव्या नुतिर्भक्त्यानिशं मुदा ॥४१॥

सत्यदेवकरुणार्णव ईशः सर्ववंद्यभुवनाखिलनाथः ।
रक्षकोऽमितचराचरसृष्टेः ईड्यते सविनयं जगदीड्यः ॥४२॥

रामकृष्णमधुसूदनबुद्धश्रीपतिप्रभृतिनामबहूनि ।
सन्ति तस्य हरिसत्यकृपालोस्तं विभुं पतिमुपास्यमुपास्व ॥४३॥

सोऽस्ति पूज्यजननी च पितापि बन्धुमित्रपतिनाथगुरुश्च ।
सः समस्तजगताञ्च विधाता विन्द्यते प्रियतमः प्रियसत्यः ॥४४॥

धर्मसेतु जगतीदयितोऽसौ पापकर्म पतितोद्धरणार्थम् ।
सत्यदेवजगदीश्वर एव वीक्ष्यते हरिसमुद्यतचित्तः ॥४५॥

सत्यं सनातन-सनत्सनकाभिधानं
जातं सनातनधराखिलपूज्यपादम् ।
मार्गं मनोज्ञमधुरं सुखदं समिद्धं
प्रादीदृशत्सकललोकहितेच्छया तत् ॥४६॥

संसारमङ्गलमनोरमसत्यदेवः पृथ्वीं
रसातलगतां करुणाम्बुधिः सः ।
उद्धर्तुमीड्यचरितो निदधौ वराहरूपं
द्वितीयहितवर्ष्यवतारकाले ॥४७॥

देवर्षिनारद इहाथ हरिर्दयालु-
र्भूत्वा तृतीयमवतारमसौ स्वकीयम् ।
जग्राह सत्यरमणो जगदेकमान्य-
स्तन्त्रञ्च सात्वतमुपादिशदीड्यवृत्तः ॥४८॥

नारायणोऽथ च नरो भगवान् भवन् सः
चक्रे तपोऽतिपरुषं सदयश्चतुर्थे ।
नैजेऽवतारसमये जगतीहिताय
सत्यात्मभासुर शुभोदयभावभव्यः ॥४९॥

ईशोऽवतारसमये कपिलो बभूव
सांख्यञ्चकार जगतीपतिसत्यगोप्ता ।
तत्त्वप्रियञ्च विदधावुपदेशरम्यं
शिष्यासुरिं द्विजवरं प्रति पञ्चमेऽसौ ॥५०॥
अत्रेर्बभूव तनयो भगवान् ऋषेः सः
ज्ञानं ददौ च शिवसत्यमलर्कनाम्ने ।
ब्रह्मस्थिताय मृदुलाय दयासमुद्रः
प्रह्लादसंज्ञसुधिये ह्यवतारषष्ठे ॥५१॥
स्वायम्भुवं हरिरसाववति स्म यज्ञो
मन्वन्तरं प्रभुकृपामयसत्यशीलः ।
आकूतिमातृतनयोऽखिलविश्वभर्ता
यामादिदेवसहितो ह्यथ सप्तमे च ॥५२॥
भूत्वार्षभो हरिरसौ प्रियसत्यदेवः
प्रादीदृशत् परमहंसपदं मनोज्ञम् ।
नाभिं नृपं स्वपितरं जननीञ्च कृत्वा
मेरुं त्रिलोकदयितो जननेऽष्टमे च ॥५३॥
जातः पृथुः क्षितिपतिर्जगदेकनाथः
सत्योपकारपरके नवमेऽवतारे ।
दुग्धे स्म सोऽवनिमिमामखिलौषधार्थं
श्रेयो विधातुममितं जगतीजनानाम् ॥५४॥
अत्रायत प्रलयसागरनीरमध्ये
मग्नाः श्रुतीः सपदि मीनवपुर्निधाय ।
सत्यस्थितः सदयसर्ववसुन्धरेशो
भूत्वा वदान्यहृदयो दशमेऽवतारे ॥५५॥
धृत्वा हरिः सुदृढकच्छपरूपमीशः
पाथोधिमन्थननिमित्तमसौ स्वपृष्ठे ।
दध्रे प्रकृष्टगिरिमन्दरसंज्ञकञ्च
स्वैकादशेऽवतरणे परमेशसत्यः ॥५६॥

धन्वन्तरिः　समभवज्जगतीप्रियोऽसा-
　　वादाय　सत्यहृदयो जगतीहिताय।
पाणौ सुधाघटमपांनिधितो　दयावान्
　　सन् द्वादशे समुदियाय शुभावतारे ॥५७॥

सत्येश्वरः　परमसुन्दरदिव्यरूपा
　　भूत्वाऽसुरान् निदधती ललनाऽथ मोहे।
द्राङ्मोहिनी प्रियसुधामददात् सुरेभ्यो
　　रम्ये　त्रयोदशकसंख्यकजन्मकाले ॥५८॥

भूत्वा हरिः परमभीतिकरो नृसिंहः
　　वक्षो ददार करजैर्नितरां कठोरैः।
क्षिप्रं　हिरण्यकशिपोरवतारकाले
　　प्रह्लादभक्तमवति स्म चतुर्दशेऽसौ ॥५९॥

पादत्रयावनिमयाचत　वामनः　सन्
　　विष्णुर्बलिं वितिकुलोद्भवदानिभूपम्।
इष्टां　तदा मनसि पञ्चदशेऽवतारे
　　सत्यानुरागहृदयो भगवान् कृपालुः ॥६०॥

विप्रद्विषः समवलोक्य नृपान् रमेश-
　　स्तान् षोडशे परशुराम इति स्वसंज्ञाम्।
धृत्वा कुवर्त्मपथिकान् निजघान दुष्टान्
　　द्राक्　सत्यरक्षणपरो　ह्यवतारकाले ॥६१॥

व्यासो बभूव भगवान् श्रुतिवल्लरीं सः
　　चक्रे कृपार्द्रहृदयस्तरसा विभक्ताम्।
शाखासु　वीक्ष्य　कृशधीधरविप्रवृन्दं
　　सत्यश्रितः　सपदि सप्तदशेऽवतारे ॥६२॥

रामो बभूव भगवान्　परमेश्वरोऽसौ
　　कर्तुं मही विगतभीमकठोरभाराम्।
सत्यं निधातुमिह भूभुवने　हितार्थी
　　चाष्टादशे स्वजनुषि श्रुतिवर्त्मयायी ॥६३॥

यज्ञे हि कौशिकमुनेर्बलधाम रामः
प्रत्यूहकारकनिशाचरदुष्टवृन्दम् ।
व्यापादयच्च परमप्रबलं सुबाहुं
यागस्य साधुविधिना व्यदधात् सुरक्षाम् ।।६४।।
भङ्क्त्वा विशङ्कटधनुः शशिशेखरस्य
सीतां विदेहतनयां लभते स्म रामः ।
सत्यप्रियस्य विजयो भवति स्म गीतो
लोकेऽत्र सर्वरमणी·युव-बाल·वृद्धैः ।।६५।।
रम्यां पुरीं सपदि गच्छति रामचन्द्रे
तस्मिन् विदेहनृपतेर्नगरादयोध्याम् ।
मार्गेऽमिलत् परशुराममहाबलाब्धि-
स्तं प्रेक्ष्य राममभवन्मुदितो भृशं सः ।।६६।।
ज्येष्ठं प्रियं दशरथस्तनयं हि रामं
राज्येऽभिषिक्तमतिमोदमना इयेष ।
कर्तुं क्षमो न सफलां तु परं स्वकाङ्क्षां
प्रत्यूहभीमजनिताद् वसुधाधिपोऽसौ ।।६७।।
रामः पितुर्दशरथस्य वचो विधातुं
सत्यं समस्तमपि राज्यमदो विहाय ।
याति स्म हन्त विपिनं सह लक्ष्मणेन
घोरं प्रचण्डपरमं सह सीतया च ।।६८।।
जह्रे विदेहतनयां रजनीचराणां
राजा यदा दशशिराः कपिवृन्दसेनाम् ।
आदाय सेतुसुदृढं जलधौ विशाले
बद्ध्वा दशाननपुरीञ्च स आरुरोध ।।६९।।
हत्वा निशाचरगणं रिपुरावणञ्च
रामो निवृत्य नगरीं मधुरामयोध्याम् ।
भूपो भवन् स्वजनतां सकलां स्वराज्ये
रक्षंस्तदीयहितमत्र सदान्वतिष्ठत् ।।७०।।

नार्यां दधत् प्रचुरलोभमयं हि रामः
कामं विदेहतनयां निदधाति गेहे ।
पत्नीं परं न च कदापि गृहे निधास्ये
त्वां लोकवादमिति सः श्रुतवान् महीपः ॥७१॥

आराधने न हि भुवोऽस्ति कदापि शक्तः
संवर्ततेऽत्र मतिमानपि वस्ततुतस्तु ।
मन्दस्य नास्ति पुरुषस्य भवे ह्यभाव-
स्तस्मादनिन्द्यन जनेन स रामभद्रः ॥७२॥

आकर्ण्य तं निगदितं परुषापवादं
रामो बभूव भयभीतमनास्तदानीम् ।
तत्याज तां जनकजामपि हन्त तस्मात्
साध्वीं सतीं सुचरितामतिचारुशीलाम् ॥७३॥

भूत्वात्र पावनकथो जगति क्षितीन्द्रः
प्रादीदृशत् सुचरितं परमोच्चसत्यम् ।
चारित्र्यचारुललितं मनुजत्वमान्यं
लोकोदयस्थितशुभं त्रिमलञ्च रामः ॥७४॥

श्रीकृष्णजन्मसमये वसुधास्मदीया
अन्यायनिष्ठकुपथस्थितपापमग्नैः ।
धर्मंप्रहर्तृ सुकृतघ्ननृपप्रभूतैः
सम्पीडनातिशयकष्टगता बभूव ॥७५॥

सत्यस्थितो भुवमिमां व्यथितां विलोक्य
कारालये च जननीं पितरं निरीक्ष्य ।
नन्दस्य सद्मनि निनाय हरिः स्वबाल्यं
क्रूराधमं शठगणं द्रुतमुद्धरंश्च ॥७६॥

कंसं जघान मथुरां समुपेत्य कृष्णः
स्वां मातरं च पितरं कृतवान् विमुक्तम् ।
कारागृहाद् व्यधित भूपतिमुग्रसेनं
श्रीद्वारकां स्ववसतिं विदधौ मनोज्ञाम् ॥७७॥

भूयिष्ठान् वसुधाधिपांश्च कलुषे लीनान् कुनीतिस्थितान्
शूरश्रेष्ठधनञ्जयेन तरसा जन्ये महाभारते ।
क्रूरांश्चापि नितान्तदुष्टहृदयं दुर्योधनं पामरं
कृष्णः क्षिप्रमजीघतन्नयमतिः सन् सत्यपक्षे स्थितः ॥७८॥
पूज्य श्रीवसुदेवनन्दनहरिः श्रीकृष्णधर्मस्थितः
इत्थं भारमसौ जहार सपदि क्षोण्याः जगद्रक्षकः ।
सत्यं सोऽतितरां सदैव मनसा प्रीत्याति गोपायति
बन्धुर्दैन्यभृतां दयालुहृदयः साधुप्रियो माधवः ॥७९॥
बुद्धो बभूव भगवान् प्रियसत्यगोप्ता
प्राप्ते कलौ हरिरसौ भुवि धर्मभर्ता ।
हिंसां मखे च विनिवारयितुं दयालु-
र्लोकं प्रदातुमुपदेशशुभं शुभंयुः ॥८०॥
कल्किर्हरिः कुपथगामिजनान् कठोरान्
म्लेच्छान् हनिष्यति भविष्यति तस्य जन्म ।
गेहे च भूमिसुरविष्णुयशोबुधस्य
ह्रस्तोन्मुखे कलियुगे सति सत्यसक्तः ॥८१॥
सत्याभिधानभगवान् करुणामयोऽस्ति
नारायणस्य चरितं जगतीह तस्य ।
गेयं सदैव सरसं महनीयरम्यं
श्रेयस्करं स्वहृदयं रमयन्तु तत्र ॥८२॥
आचारमुत्तमपवित्रमनोऽभिरामं
कर्तुं स्वकीयहृदि ये दधतेऽभिलाषम् ।
तस्माच्चरित्रकमनीयसुचारुसत्याद्
गृह्णन्तु ते भगवतो हितयुक्तशिक्षाम् ॥८३॥
श्रीसत्यदेवभगवान् करुणामयोऽस्ति
धृत्वा सदैव समये समयेऽवतारम् ।
लीलाः करोति विविधा जगतीहिताय
श्रेयःश्रिता अमितमङ्गलमोददात्रीः ॥८४॥

सत्यं सनातनमिदं सततं विभाति
तच्छाश्वतं प्रतिपदं ह्यनिशं चकास्ति ।
व्याप्तं भवत् सकलसृष्टिगुहान्तराले
विभ्राजते शुभविभामयमप्रमेयम् ॥८५॥

सर्वत्र सत्यमिदमस्ति विलासलास्यं
कुर्वत्, यदा भवति कृत्स्नतया विलुप्तम् ।
अन्यद्धि सर्वमपि वस्तु तदेदमेव
सन्तिष्ठतेऽनुपमसत्यमहो महीयः ॥८६॥

'नारा' पदं जले ज्ञेयमयनं गृहवाचकम् ।
सलिलं सदनं यस्य स नारायण उच्यते ॥८७॥

सत्यं हि सर्वदा स्थायि प्रभोः संज्ञास्ति सा प्रिया ।
नारायणस्य सत्यत्वात् सत्यमिति स गीयते ॥८८॥

भगवान् सच्चिदानन्दः सत्यमिति निगद्यते ।
नामानि सन्त्यनन्तानि सत्यनारायणप्रभोः ॥८९॥

सत्यनारायणो भूमिः सत्यनारायणो नभः
सत्यनारायणो वायुः सत्यनारायणो जलम् ॥९०॥

सर्वलोकसमुद्दीप्तः सत्यनारायणोऽनलः ।
विश्वकर्मार्यमा चापि सत्यनारायणो हरिः ॥९१॥

सत्यनारायणं देवं सन्ततं चेतसा भजन् ।
प्रीत्या भक्त्या च कुर्वीत व्रतं जगति मानवः ॥९२॥

अनन्तसत्त्वसम्पन्नश्चिदानन्दनिरञ्जनः ।
क्रान्तदर्शी स्वतन्त्रश्च मनीषी परिभूरपि ॥९३॥

असौ प्राप्तोऽस्ति सर्वत्र साधकेन स लभ्यते ।
तस्मात् तेन सदा भाव्यं तद्भक्तिरतचेतसा ॥९४॥

स्यान्मनस्वी सदा भक्तः साधकः शुचिमानसः ।
परमेशं हरिं द्रष्टुं सत्यार्चने रतो भवेत् ॥९५॥

सत्यनामा हरिर्देवः सर्वानन्दनिधिः प्रभुः ।
सम्भवा तस्य लब्धिस्तु यदि भक्तिर्द्रढीयसी ॥९६॥

सत्यनारायणो देवः सत्यप्रेमवशं गतः ।
वन्द्यतां वन्द्यतां नित्यं प्रह्वैः सरलमानसैः ॥९७॥

सत्यनिष्ठास्ति चेच्चित्ते यस्य भक्तस्य सन्ततम् ।
सोऽवश्यं प्राप्नुते सद्यः सत्यनारायणं हरिम् ॥९८॥

सत्यं मुञ्चति यो हन्त सत्यदेवस्तु तं जनम् ।
शीघ्रं दण्डेन युक्तेन सत्यस्थं कुरुते हरिः ॥९९॥

वाणिज्यलग्नहृदयो वणिजां प्रधानो
भ्रष्टो बभूव नितारमसकृद्धि सत्यात् ।
कश्चित् पुनः पुनरपि प्रथितो धनीन्दुः
जातो धनादतितरां प्रबलः प्रमादी ॥१००॥

सम्प्रेक्ष्य तं हितचिकीर्षुहरिः कृपालुः
सत्यात् पतन्तमसकृद् वणिजन्तु सद्यः ।
सत्योन्मुखं सकललोकपिता विधातुं
कर्तुं बबन्ध घिषणां द्रुतमेव तञ्च ॥१०१॥

नौकां चकार सधनां सरिति प्रलुप्तां
दृष्ट्वा न तां स विलपन् हरिसत्यदेवम् ।
सस्मार किञ्च विनयेन बभाज सत्यं
नाथ क्षमस्व मम सम्प्रति सर्वमागः ॥१०२॥

प्रत्याश्रुतं स्ववचनं विहितं न सत्यं
कृत्स्नं पुनः पुनरपि स्मरणं ह्युपेक्षे ।
सत्यं विधाय निहितं कृतवानसत्यं
सम्पूजितं मम पितः क्षमतां ममागः ॥१०३॥

सत्यं द्रुतं मम हरे वचनं करिष्ये
मन्दोऽस्मि पामरमतिः परमाधमोऽस्मि ।
स्वार्थो न चाहमिव कोऽपि जनो जगत्यां
त्वां नौमि नाथ कृपया क्षमतां पुनर्माम् ॥१०४॥

दीनं वचः परमशोकगतस्य तस्य
श्रुत्वा भृशं हरिकृपालुमनाः पुनश्च ।
मायाविलुप्ततरणीं विदधौ नदीतो
व्यक्तां विलोक्य मुदितो भवति स्म नावम् ॥१०५॥

वैश्यः सहर्षमगमन्निजवेश्म शीघ्र
मानर्च भक्तिमनसा हरिसत्यदेवम् ।
सयं सदैव वदतिस्म च जीवनेऽसौ
तस्मात् सुखेन महता न्यवसज्जगत्याम् ॥१०६॥

जातोऽभिमानिनृपतिर्भुविमानसिंहः
शौर्य्यप्रकर्षहतशत्रुगणोऽभवन् सः ।
देवानपि क्षितिपतिर्मददर्पनिष्ठो
मन्दो महान् हतमतिर्हि तिरश्चकार ॥१०७॥

सः सत्यवादिनि जने सततं जहास
सत्यस्य चापि विदधौ नितरामवज्ञाम् ।
तस्माद् बभूव जनता व्यथिता स्वचित्ते
सत्यापमानरतकार्यकलापलग्नात् ॥१०८॥

श्रीसत्यदेवभगवान् नृपति दयावान्
सद्वर्त्मगामिनममुं तरसा विधातुम् ।
चक्रे विचारसुदृढं जगतोहितस्थः
सत्याभिरक्षणधरोऽखिललोकमित्रम् ॥१०९॥

राज्यञ्चकार निहतं सुखवैभवस्थं
चक्रे च तं प्रबलशत्रुजनैः परास्तम् ।
सन्तापपीडितमना विपिनं जगाम
सस्मार सत्यभगवन्तमसावजस्रम् ॥११०॥

भूत्वा मुनिर्हरिकृपालुरुवाच दीनं
दारिद्र्यपीडितनृपं लभतां स्वकीयात् ।
साहाय्यमाशु सुहृदो लभतां कृशानोः
राज्यं भवेदधिगतं सकलं ततश्च ॥१११॥

लब्ध्वाशिषं मुनिवरात् तरसा स्वमित्रात्
सम्प्राप्य साधुहृदयाच्च सहायतां सः ।
श्रीसत्यदेवकृपयाऽधिगाम राज्यं
सत्ये धियं क्षितिपतिर्हि ततो बबन्ध ॥११२॥

शूद्रोऽपि चात्र समजायत रामदासः
कस्यापि नो सुखधने सहते स्म: नीचः ।
चक्रे निरादरमसौ ऋतभाषिणश्च
सत्यश्रितस्य कृतवान् नितरां स हानिम् ॥११३॥

द्रागेव सत्यजगतीपतिकोपवह्नेः
पत्नीसुताश्च सकला प्रियबन्धवश्च ।
मृत्युं ययुर्गृहधनादिसुखान्यनश्यन्
शोकाग्निना स नितरां भवतिस्म दग्धः ॥११४॥

सत्यानुरागिहृदया नितरामजस्रं
क्रूरातिदुष्टहृदयेन मयाधमेन ।
सम्पीडिता ह्यपकृताश्च सदैव सत्य-
मत्यन्तमेव जगतीह तिरस्कृतञ्च ॥११५॥

तस्मात् कलत्रसुतबन्धुजना विनष्टाः
गेहो धनञ्च खसाधनसर्वमेव ।
नो सन्ति मे जगति सम्प्रतिसु पापिनो हा
चक्रन्द चिन्तनमिदं विदधज्जघन्यः ॥११६॥

सत्येश्वरः सदयमानस एव नित्यं
तस्मिन् जनेऽपि मलिने दुरिताभिभूते ।
स्वप्ने स्वकीयकरुणां विदधज्जगाद
सेवेत सन्ततमहानि स सत्यभक्तम् ॥११७॥

सद्भावपूतहृदयेन नितान्तभक्त्या
सत्ये च सन्ततमसावनुरागगाढम् ।
कृत्वा वदेच्च सततं जगतीह सत्यं
गच्छेत् सुखानि च ततोऽभिमतानि सोऽत्र ॥११८॥

धीरेन्द्रसंज्ञकमहीसुरपण्डितोऽपि
सत्यानुरागसुजनावलिसत्सकाशे ।
भक्तिं चकार महतीं हृदयेन सत्ये
तस्माद् ययौ बहुसुखानि च सोऽपिदीनः ॥११९॥

सत्ये भक्त्यमलां दधाति मनुजो यः सर्वदा जीवने
सत्यञ्च श्रयतेऽनिशं दृढतया सत्यं हि संसेवते ।

सत्ये स्निह्यति पावनेन मनसा सत्यं सदा शंसति
तस्मिन् सत्यरते जने त्वतितरां सत्येश्वरः प्रीयते ।।१२०।।

सत्यं सर्वजना विदन्तु सततं लोकत्रयाधीश्वरं
सर्वेषामपि रक्षकं च पितरं स्वस्वामिनं मातरं
मित्रं बन्धुजनं गुरुञ्च जगति श्रीवल्लभं श्रीप्रदं
सर्वस्वञ्च यशस्करं प्रियतमं गान्ध्यादिभक्तस्तुतम् ।।१२१।।

तरितुमिच्छसि चेद् भवसागरं श्रय तरीं द्रुतमेव महीयसीम् ।
सुखदसत्यरमां भगवत्प्रियां हरिकृपां यदि काङ्क्षसि जीवने ।।१२२।।

हरिकृपालुसमस्तजगत्पतिः भवति तत्र जने मुदितो भृशम् ।
सरलमानसनन्दितजीवने भजति सत्यपदाम्बुजमञ्जुलम् ।।१२३।।
भज हरिं धृतसत्यशुभाभिधम् अनुदिनं समये सकले स्थले ।
प्रियतमप्रियनाथमनारतं स्वमनसा करुणामयमीश्वरम् ।।१२४।।

चलतु चलतु लोकः सर्वदा सत्यमार्गे
धरतु धरतु नित्यं सः शुभान् सत्यभावान् ।
हरतु हरतु कष्टं दुःखितानां जनानां
भजतु भजतु सत्यं सन्ततं श्रीशवासम् ।।१२५।।

जयति जयति सेव्यः सत्यकृष्णः कृपालुः
जयति जयति गोपीराधिकामानसेशः
जयति जयति नित्यं जानकीनाथसत्यं
जयति जयति सत्यं भूर्भुवः स्वः क्षमायाम् ।।१२६।।

कालिदास-प्रशस्तिः

[डा० रमाशङ्कर तिवारी, २०, लक्ष्मणपुरी कालोनी,
फैजाबादः (उ०प्र०)]

नमस्यामि कविकुलगुरुं कालिदासम् ।
नमस्यामि कविपुङ्गवं कालिदासम् ।।

१

किं कालिदास, त्वमेव सूरिः,
साशङ्को यस्तु परिकीर्तितुं वै,
रघुकुलस्य कीर्ति चरितं प्रतापम् ?

उताजानाः किं त्वं भविष्यसि,
कविकुलचक्रचूडामणिः सुप्रभश्च,
यः स्थापयिष्यति ख्यातिमानं पृथिव्याम् ?

योऽभिभविष्यति कविप्रगणनां,
विश्वस्य चारुं मनोभिरामां,
या देदीप्यते हि भारतीमन्दिरेषु ?

योऽकीर्तयद् गाथाममन्दां,
विजयानां रघुकुलभूपतीनां,
यज्ञानां शुचीनां मङ्गलमयानाम् ?

योऽकथयच्छ्रियञ्च अनघं,
सुसुखं मुनीनां तपोधनानाम्,
आश्रमाणां वा यज्ञधूमावृतानाम् ?

यो न्यरूपयत् किल गोः सेवां,
ननु नगाधिपस्य पुत्राभिलाषेण,
हित्वाभिमानञ्च संश्रित्य गौप्यम् ?

योऽवर्णयच्च महारथानां,
विजिगीषूणां शौर्यप्रियाणां,
धर्मारूढयुद्धं परिभवञ्च अरीणाम् ?

यो न्यगदच्चाजस्य वरणं;
प्रदीपशिखया खलु इन्दुमत्या,
खण्डयित्वा मनोरथान् भूपतीनाम् ?
यो न्यरूपयच्च तस्यास्तु निधनं,
प्रियस्याङ्के नु प्रेम्णः प्रकर्षे,
ज्ञापयित्वा च दैवस्यान्धं विधानम् ?

योऽचित्रयद् विनाशमवश्यं,
ललनाया लीलामुपाश्रितस्य,
हन्त विषयेषु सङ्गेषु उच्छृङ्खलस्य ?

योऽज्ञापयत् खलु निन्द्यमरणं
राजयक्ष्मया वै अग्निवर्णस्य,
अस्थापयदापन्नसत्त्वां भद्रासने स्म ?

त्वदृते को निरूपयति, कालिदास,
विलासप्रियः कामनीयकप्रियश्च,
यत् सञ्जायते विषयवशतानुबन्धम्
एवं दारुणं कामुकानामवश्यम् ?
नमस्यामि कविकुलगुरुं कालिदासम् ।
नमस्यामि कविपुङ्गवं कालिदासम् ।।

(२)

किं, कालिदास, त्वमेव सूरिः,
साशङ्को यस्तु परिकीर्तितुं वै,
रघुकुलस्य कीर्तिं चरितं प्रतापम् ?
उताजानाः किं त्वं भविष्यसि,
कविकुलचक्रचूडामणिः सुप्रभश्च ?
यः स्थापयिष्यति ख्यातिमानं पृथिव्याम् ?
योऽकीर्तयन्नगाधिराजं,
देवात्मानमवनीमानदण्डम्,
''अनन्तरत्नप्रभवं'' खलु धातुमन्तम् ?

योऽदाहयत् ननु पुष्पचापं,
विश्वोद्वेलकं सौन्दर्यदेवं,
भत्सयन् कामं लोके निकामम् ?
यो नातितिक्षत लौल्यचरणं,
धूर्जटौ समाधिमग्ने च तेन,
अनुप्राणितो धर्मबुद्ध्या तु नूनम् ?
यो नाक्षमत शालच्यवनम्,
अव्याजमनोहरशकुन्तलायाः,
अदण्डयत्ताञ्च लोकसङ्ग्रहचिकीर्षुः ?
योऽगोपयच्छापं मुनेस्तु,
अनादृत्य रागस्फुरणमवश्यम्,
अनाशङ्किहृदये नु सरले च तस्याः ?
इत्थं यो दर्शयामास यौक्त्यं,
विनयाचरणस्य तरुणीजनेभ्यः,
पन्थानं दीप्यमानं निःश्रेयसश्च ?
नमस्यामि कविकुलगुरुं कालिदासम् ।
नमस्यामि कविपुङ्गवं कालिदासम् ॥

(३)

किं, कालिदास, त्वमेव सूरिः,
साशङ्को यस्तु परिकीर्तितुं वैः
रघुकुलस्य कीर्ति चरितं प्रतापम् ?
उताजानाः किं त्वं भविष्यसि,
कविकुलचक्रचूडामणिः सुप्रभश्च,
यः स्थापयिष्यति ख्यातिमानं पृथिव्याम् ?
योऽमण्डयद् वाण्याः सदनं,
विरच्य वीथिं तरुणीजनानां,
स्तम्भमानाञ्च हृदयं नराणाम् ?
योऽवर्णयद्धि सुनिपुणं,
कामिनो विलापं गिरिं द्रावयन्तं,
संस्थाप्य कीर्तिं प्रणयिनां कुलस्य ?

यो न्यरूपयद् गौरवन्तु,
भारतसंस्कृत्या मानवहिताय,
प्रतिष्ठाप्य कामञ्च धर्माविरुद्धम् ?
यः खल्वकामयत् प्रकटं,
सर्वस्तरतु दुर्गाणि सर्वस्तु पश्यतु
भद्राणि, नन्दतु सर्वत्र सर्वलोकः ?
नमस्यामि कविकुलगुरुं कालिदासम् ।
नमस्यामि कविपुङ्गवं कालिदासम् ।।

(४)

किं, कालिदास, त्वमेव सूरिः
साशङ्को यस्तु परिकीर्तितुं वै
रघुकुलस्य कीर्तिं चरितं प्रतापम् ?
उताजानाः किं त्वं भविष्यसि,
कविकुलचक्रचूडामणिः सुप्रभश्च,
यः स्थापयिष्यति ख्यातिमानं पृथिव्याम् ?

अथ पृच्छामि, हे कालिदास,
एकातिप्रश्नं खलु साध्वसेन
किमस्ति विद्योत्तमायाः कथायाम् ?
किमस्वदः त्वं सौभाग्यरजनीं,
प्रथमसमागमे किल तद्विदुष्या,
को लापोऽपद्यत च युवयोः तदैव ?
किं त्वमुच्चारयितुमशक्तः,
'उष्ट्र' इति तत्पुरतो ननु यत्प्रवादः,
ताडितोऽभवो भूरिशः खिन्नबुद्ध्या च ?

त्यक्त्वा गृहं लज्जया तदैव,
कुत्राव्रजस्तु तस्यां निशायाम्,
अभजः कं गुरुं कं पीठमवश्यम् ?
कथमुपलब्धा कुशलता त्वया,
शारदोद्याने विचरणे सुखेन,
निपुणमीक्षमाणेन वक्रच्छटाश्च ?

कियान्कालो गतः प्रेमललिते,
प्रीणयितुं कवितावधूं स्वैरिणीन्तु,
किं विदग्धतां लभिषे ननु चारुरचने ?
नमस्यामि कविकुलगुरुं कालिदासम् ।
नमस्यामि कविपुङ्गवं कालिदासम् ॥

(५)

त्वं भूषयसि कवितातरुण्याः
हृदयं सुललितं किल प्रीतिपूर्वं,
नानालङ्कारयुक्तैर्हारैश्च बहुशः ।
तदपि विलोभयति, अयि कालिदास,
उपमा खलु त्वामलङ्कारश्रेण्यां
दीपयसि काव्योद्यानं दीपैस्तु तस्याः ।
त्वदीयोपमामालिकां वर्जयित्वा,
विवर्णीभवेत्तु गिरायाश्च सदनं,
यस्य शुद्धान्तो भासते छविभिस्तु तस्याः ।
नमस्यामि कविकुलगुरुंकालिदासम् ।
नमस्यामि कविपुङ्गवं कालिदासम् ॥

(६)

अये कालिदास !
वै तदपि विद्यते मामकः पूर्वप्रश्नः,
कियत्तथ्यं भवति विद्योत्तमायाः प्रवादे ?
जिज्ञासाऽस्ति, सत्यं वद, मे कवीश्वर,
वा छिन्तान्मौनं, प्रतीक्षारतोऽस्मि ।
नमस्यामि कविकुलगुरुं कालिदासम् ।
नमस्यामि कविपुङ्गवं कालिदासम् ॥

प्रौढसखीसङ्गमसङ्गीतम्

[कविपुण्डरीकः श्रीसम्पूर्णदत्त मिश्रः, गोपालगढ़,
भरतपुरम् (राजस्थानम्)]

मधुपवनं सखि ! केनोच्छिन्नम् ?
यन्मधुराम्रमेदिनीखण्डं मूलविखण्डितपादपदण्डम् ।
चिरपरिचितमपि रुचिपरिहीनं दृश्यत एवं सर्वथा भिन्नम् ॥१॥
मधुपवनं ····

जम्बूफलान्वेषणचलितानां बालानामालीवलितानाम् ।
सा न क्वापि नयनपथमेतातो लोचनयुगलं मे क्लिन्नम् ॥२॥
मधुपवनं ·····

जम्बुरसालफलद्रुमनाशो नायं दीनजनोद्भवकृत्यम् ।
नूनं कृपणकुसीदजनानां निष्करुणं हृदयं न स्विन्नम् ॥३॥
मधुपवनं······

चल, सखि! चल, निलयं प्रतियावो विलपनकल्पकलापेनालम् ।
गतवयसौ नौ केलिकथाभी रमयावश्चेतो ननु खिन्नम् ॥४॥
मधुपवनं······

आशीविषः

[प्रो० देवदत्त भट्टिः, संस्कृतविभागाध्यक्षः राजकीय-
महाविद्यालयः, मालेर कोटला (पंजाबः)]

पुराऽहमेकदा बालमाशीविषं
धर्ममन्दिरमेकं प्रति गच्छन्तमपश्यम्।

तदा य इयान् प्रियः सुन्दरश्चासीत्
यन्नाहं तं मारयितुमैच्छम्
पादेन दलितश्च न स्यादिति तं सप्रयत्नमरक्षम्।

कतिचिद् वर्षाणि पश्चात्
तत एव निरस्यन्तमेकं युवभोगिनमपश्यम्।

तत्र धर्ममन्दिरवासिभिः सः भूरि पूजितः
भगवतो हरस्य प्रतीकमिव मत्वा
पयःपानेन च भूयान् वर्धितः सत्वरमेव युवाऽजायत।

तं दृष्ट्वा स एव बालः सरीसृपः
मे स्मृतिपथमायात्,
यः कदाचित् तत्र मयाऽदृश्यत।

सः सफूत्कारं मां भाययन् निरसरत्।
पार्श्वे एव स्थितमेकमन्यद् धर्ममन्दिरं प्राविशत्।
दैवात्, किंचित्कालानन्तरम्,
ततोऽपि निःसरन् स मयावलोकितः।
इदानीं सः न केवलं प्रौढिमभजत
प्रत्युतालंकारान् प्रशिक्षणमपि च प्रापत्।
सः कण्ठे मन्त्रशक्तिपूरितं ताबीजमधारयत्।
नैकनवशस्त्रास्त्रैर्मण्डितः सः मां शरव्यंकर्त्तुमिव प्रातीयत।
तस्य विभषीकामसहमानः
सत्वरं ततः प्रपलाय्य स्वजीवितमरक्षम्।

मन्ये, धर्मोन्मादस्तं पर्यवर्धयत्,
प्रौढं प्रशिक्षितं चाकरोत् ।
अधुना
तस्य दंशवाहान्,
जगति प्रसरन्तं विषं च पश्यामि ।
नित्यमेव सः
निरागसो दशति हन्ति च ।
धर्ममन्दिरैर्वर्धितशक्तिरेधितदंशविषश्च
सोऽधुना जगत्कवलयितुमीहते ।
अस्ति कश्चिद् विषपायी नीलकण्ठः ?
यस्तस्य विषं पिबेत् तं च कीलयेत् ।
हन्त ! तं बालमाशीविषमहमहन्निष्यम्
पुरैव ।

अन्योक्तिद्वयम्

(ज्ञानोपाह्वोऽवस्थी डा० बच्चूलालः, कालिदास अ ादेमी, उज्जयिनी)

शुक उवाच

त्रिक्रीतकः क्वचन कश्चन पोष्यमाणः
क्षीरं पिबन्नपि च जातु न जाततोषः ।
कारां चिकर्तिषुरथो यतमानचञ्चुः
स्वस्मिन् स्वयं प्रणिहितः शुक इत्युवाच ॥१॥

उक्तेन येन मुनयः किल मुक्तिमापु-
स्तद् राम-नाम रसना मम राटीति ।
एकापि किन्तु जटितेयमयःशलाका
शैथिल्यमेति न मनागपि पञ्जरस्य ॥२॥

बन्धाय संयतमना इव दोद्रुहीमि
द्रुह्यंश्च नाम विमना इव दोदुहीमि ।
तेनैव भोजनमवाप्यत इत्यपेक्षं
सर्वं तपः परकृते परवान् करोमि ॥३॥

व्याधेन कायपरवत्त्वमिह प्रणीतं
वावपारतन्त्र्यमपि सम्प्रति पालकेन ।
यस्मिन् द्वयोयमथ तस्य मनोऽन्यदीयं
स्वीयं किमस्ति हरये यदुपाहरामि ॥४॥

आत्मा स्वतन्त्र इति चेन्निगमा निराहु-
र्नाथस्य तस्य यदि नास्ति च नाथवत्ता ।
विश्वस्त एव भव जीव मदीय तावत्
कारास्वपीह भगवानवतर्तरीति ॥५॥

× × ×

इत्थं विचिन्तयत एव च कोऽपि बालो
लीलापरायणमनाः परिकूर्दमानः ।
तत्पञ्जरं प्रति शनैः सहसोपयातो
द्वारं विपाट्य विजहास सपाणितालम् ॥६॥

उड्डीय पञ्जरमपास्य स एव कीरः
खेलंश्च खे पुनरुपेत्य रसालशाखाम् ।
चाकाश्यमान-महिमानमितः सुपर्णं
स्वादूनि मङ्गलमना बुभुजे फलानि ॥७॥

त्रोट्या विसृज्य तनुमप्यपनीत-किट्टः
पक्षौ प्रसार्य सुमनास्तरसा तपस्वी ।
व्योमन्यसीमनि गतोऽनुगतः सखायं
स्वीयं स्वभावमभिगम्य समुत्पपात ॥८॥

○

२. श्येन उवाच

श्येनोऽहमस्मि बहुचर्चित-हिंस्रवृत्तिः
किं हिंसनं कतिविधं च न जातु जाने ।
जाने परं यदुदरम्भरयो मनुष्या
गूढं चरन्ति तदिह प्रकटं चरामि ॥१॥

एते प्रतिग्रह-परिग्रह-गर्धगृद्धा
दम्भानुवृत्तिमनु वृत्तिमुपार्जयन्तः ।
कह्व[1]-प्रवृत्तिमनुमृत्य च याजयन्त-
स्ते हिंसका न किमिति प्रतिभाति चित्रम् ॥२॥

वित्तार्जनाय निपुणा विपणिप्रधाना
हिंसन्ति लुब्ध[2]-मनुजा मनुजान् निरीहान् ।
यावद् भ्रियेत जठरं मम तावदेषा
हिंसैव चेत् कथमसूयति सूरिवर्गः ॥३॥

× × ×

एकत्र खे स्थित इव प्रतिभा[3]-स्वभावः
पक्षद्वयं मम पुनः पुनरेजयामि ।
लक्ष्यं समीक्ष्य समरेखमसावधानं
सम्पातितं च तरसा सहसा निहन्मि ॥४॥

व्यापाद्य कञ्चिदपरं प्रथमानमानः
सर्वोऽपि लोकमहितं महिमानमेति ।
इध्माशनेन दहनो लभते स्वरूपं
शुक्रप्रभामुपशमय्य विभाति भानुः ॥५॥

× × ×

व्याधस्य पञ्जरमवाप्य समावृताक्षो
बाढं प्रमीलितपराक्रम एव वर्ते ।
सेवां श्ववृत्तिमधिगम्य निजेच्छयापि
प्रायस्तथैव चतुरा न किमाचरन्ति ॥६॥
संकेतितश्च वयकेन निरस्तपट्टः
पत्री भवन्नपि पतत्रिणमेव हन्मि ।
स्वामिप्रभाव-पिहितात्मधियो हि लोके
कृत्वैव जातिरिपुतां सुहिता भवन्ति ॥७॥
अभ्यस्तमेव परवत्त्वमतः प्रमुक्तः
सन्नुत्सहे विगणनाय न पालकस्य ।
आमन्त्रणे श्रवणयो पतिते च साला-
दुड्डीय प्राणिशरणोऽस्य पुनर्भवामि ॥८॥
आखेटितस्य च मया दययाऽस्थिखण्डं
मह्यं प्रदाय हतको हरते समग्रम् ।
तत्रापि दास्यमविचार्य चिनोमि मांसं
कर्तान्य एव फलभुग् भवतीह चान्यः ॥९॥
अन्येन प्रतिपदमन्यथाकृतात्मा
प्रज्ञावानपि कुशलः स्वकार्यसिद्धौ ।
कर्तुं न प्रभवति किंचनात्मनीनं
मेघेन द्युमणिरिवावृतप्रतापः ॥१०॥

---

(१) कह्वो बकः । (२) लुब्धा लोलुपा व्याधाश्च ।
(३) प्रतिभा सहजा प्रवृत्तिः प्रज्ञाविशेषश्च ।
(४) पत्री श्येनः पक्षी च । (५) सालो वृक्षः ।

मिहिरावलीं (महरौलीं) दृष्ट्वा !

(अभिराजो डा० राजेन्द्र मिश्रः, ८ बाघम्बरी रोडः,
प्रयागः)

वारं वारं त्वमसि लोकिता
भग्नपञ्जरा भुग्नकन्धरा
क्षतविक्षतविग्रहा दुर्ग्रहा
श्रीहतनेत्राभ्यां मिहिरावलि !
त्वत्प्राङ्गणे न कलकलनादो जलसरणीनां
यावकरसरञ्जितचरणानां नैव मुखरता
क्षुद्रघण्टिकामण्डितनूपुरसंवलितानां
गतागतं नो चारणवन्दिद्विजनिवहानां
त्वमसि खण्डिता प्रोषितपतिका मिहिरावलिके !

किन्तु निर्दिशति ते सौभाग्यं
विष्णुध्वजः स्थाणुरिव सुदृढः
प्रत्यक्षीकृतशतसहस्रघनमासनिदाघ-
श्चन्द्रनृपतिकीर्तिश्रीसाक्षी !

लक्षमिता दर्शका विरूपां त्वां सन्द्रष्टुं
समायान्ति देशतो विदेशात् सुभगम्मन्याः
बण्डभण्डपामरा युवानो बाला वृद्धाः
मधुयामिनीनिमज्जितहृदया दयिताभक्ताः
किन्तु केन दृष्टा तव पीडा ?

शतशतशूलवेदनास्पन्दैश्छिन्ना भिन्ना
नतोन्नतं स्वातीतमिदानीं त्वं गणयन्ती जनैर्दृश्यसे !

दिल्लीनगरपरिसरे लोकः पश्यति भवतीं
निखिलां दिल्लीं त्वयि निभालये किन्त्वहमेकः !!

श्रीबदरीश-स्तुतिः

(डा० उमारमण झा, रणवीर के०सं०वि०, जम्मू तवी)

हिमाद्रौ शीताद्रौ वसति बदरीशो भुवि महः
सदा ज्योतिष्पीठे प्रभुरलकनन्दाशुचितटे ।
तपस्तप्त्वा घोरं मुनिजनहितार्थं सुविदितः
स्वयं साक्षाद्विष्णुः प्रभवित परित्रातुमनिशम् ।।१।।

युगे सत्ये लब्ध्वा तपसि "नरनारायणयती"
सुशान्तिं त्रेतायां दशरथसुतो राघवनृपः ।
ऋषिर्वेदव्यासः परमविकलो द्वापरयुगे
कलौ शान्ताः सन्ति प्रथितयतयः शङ्करसमाः ।।२।।

प्राचीनं बदरीशतीर्थमखिलं स्वर्गप्रदं भारते,
औदीच्ये बदरीवनस्य सविधे व्यासस्य पुण्या कुटी ।
विष्णोरंशनरस्य पुण्यकृतिनो नारायणाख्यस्य च
यत्रासीत्सुतपोवनं भगवतो धर्मस्य सून्वोर्द्वयोः ।।३।।

सौन्दर्यस्य निधानमत्र रचितं नारायणेन स्वयं
स्वर्लोकस्य विभूषणं सुरपतेः राज्येऽपि यद् दुर्लभम् ।
विद्युत्कान्तिसुशोभितं मुनिजनस्यार्थे महामोहनं
स्त्रीरत्नं सुसमाधिभङ्गकरणे नाम्नोर्वशी याप्सरा ।।४।।

नरनारायणौ यत्र पर्वतौ धर्मसाक्षिणौ ।
नमस्यो बदरीनाथो राजते भगवान् स्वयम् ।।५।।

"तप्तकुण्डं" "कूर्मधारां" धारां "प्रह्लाद" संज्ञकाम् ।
"ऋषिगङ्गा" महातीर्थं "नारदं" कुण्डमाभजे ।।६।।

अस्त्युत्तरस्यां बदरीशविष्णोर्मुक्तिप्रदं ब्रह्मकपालतीर्थम् ।
श्राद्धं पितॄणां हि दिवङ्गतानां पिण्डप्रदानेन च यत्र कार्यम् ।

स्वयं साक्षाद्विष्णुर्हिमकमलसंशोभितगृहे
द्वयोर्गिर्योर्मध्ये प्रभुरलकनन्दातटमना ।
सुपद्मासीनोऽसौ भवतु बदरीशोऽनु फलदः
शिला-शालग्रामो विभुरवतु दीनान् करुणया ।।८।।

भगवन् ! बदरीनाथ ! लोककल्याणकारक !
समर्प्यतेऽत्र वाक्पुष्पं मया तुभ्यं हि सादरम् ।।९।।

हैमन्तिक-प्रार्थनम्

(रचयिता—डा० दीपक घोषः कलिकाता-विश्वविद्यालयस्य
संस्कृतविभागे प्रवाचकः)

(१)

आरात्रिकार्थमुपकल्पयति प्रयत्नं
दीपावलीं प्रतिगृहं परिशोभन्तीम् ।
लज्जावगुण्ठ-रमणी सततं सबाष्पा
हेमन्तिका तव कृते समुपागताऽद्य ॥

(२)

हेमन्तिका रचयति प्रणताननाच
रक्तैरिदं नवजवाकुसुमैस्तवार्घ्यम् ।
ढक्का-निनाद-सततं ध्वनितं समन्ताद्
हैमन्तिकं सहृदयं वरणं गृहाण ॥

(३)

कल्याणि मातरयि भारत-भाग्यधात्रि
हे भारतीय-जनचिन्मयि देवि चण्डि ।
दुःखापहे त्रिभुवनस्य महाद्यशक्ते
हैमन्तिकं तव कृते वरणं गृहाण ॥

(४)

घोरं निशाघनतमो ग्रसतेऽखिलाशां
विस्फोरकाग्नि-चकितामसकृद् विमूढाम् ।
नित्यं पिशाच-गण-नर्त्तन-जात-पीडां
ज्योतिर्मयि त्रिनयने कुरु तद् विदीर्णम् ॥

(५)

मातस्तवाभीतिवरं समेत्य
हिंसादिदोषकलुषं सकलं विजित्य ।
बङ्गीय - सौभ्रात्र - महोत्सवेऽस्मिन्
सर्वे भवन्तु मिलिता इह भारतीयाः ॥

रामगिरि-परिसरः

(डा० प्रकाश पाण्डे, डी० लिट्०, नागपुरम्)

खगगणकलनादस्वान्तमालोकमात्रम्
जयरवसुखभासामाननं काननं किम् ।
निकटतमसरोभिः शीतलं 'कृष्ण-कान्तम्'
जयति जयति शश्वच्छ्यामलं राम-'धाम' ॥१॥

मृगयति सलिलानां धाम कान्तं महोभिः
रमयति कवनानां काननं मेघराशिः ।
विकुलितपरमानां दारुणध्वान्तभासां
धवलयति नितान्तं चण्डषण्डं वनान्तम् ॥२॥

अधरयति जघन्यं कल्मषं यक्षकाव्यम्
विरहमधुरभावाकृतिभिः सम्परीतम् ।
जनयति जनकाव्यं स्फूर्तिमद् "विश्व-कान्तम्"
लघयति सकलानां काननं कामनानाम् ॥३॥

अरुणिमयति चेतश्चेतना मेऽत्र चित्रम्
कलितललितदेशस्वान्तकान्त्यैककल्पा ।
नवनवमसृणानामाकृतीनां विधात्री
गगनगतिविधानां बुद्धिगात्री मदीया ॥४॥

मधुरगगनगात्रं कालीदासीयतत्त्वम्
विलसति सुविशालं भास्वदाकूतितत्त्वम् ।
इह गुरुगिरिरम्ये प्रेमरम्ये वनान्ते
जगति जगति जन्यं चाकचक्यं निहन्ति ॥५॥

विहरति गिरिरत्र प्राणतत्त्वैकपिण्डः
घन इव सकलानां मानसेषु प्रकीर्णः ।
उदयति सवितायं देशिकश्चण्डरम्यः
विदलितगणनानां प्राणरम्य-प्रकाशः ॥६॥

विहरति धनदेशे यक्षमित्रं 'नभ:'स्वान्
परजनकिरणानां हन्ति गात्राणि कश्चित् ।
जनयति मधुराङ्गं स्पर्शमात्रेण गात्रम्
मधुरयति च जन्यं कालिदासप्रभावः ॥७॥

अवनितलविमर्शं गाहमानो 'विवस्वान्'
तरललिततिग्मच्छालगात्रप्रवेशः ।
सलिलयति जनानां गात्रपात्रं महोवत्
सकलजनविरोधं जन्यमात्रं च 'यक्षः' ॥८॥

तरणिकिरणवीणागीतिराकूतितत्त्वो
अरणिरयमहो मे स्वान्तभासां स्थिराङ्गः ।
नयनपथविशालः कान्तिमन्मेखलाङ्गः
प्रणव-पर-चिदापः क्लिन्नगात्रो नभःस्वी ॥९॥

सुखकलिलविशाले मानसे येन शान्तिः
जगदघलसदङ्गं सङ्गमं नित्यहन्त्री ।
सलिलतटतरुस्था 'मालिकायोजनानाम्'
वहुविधखगरम्याऽकाशतत्त्वैकरम्या ॥१०॥

(रामगिरि (रामटेके) उपराष्ट्रपति श्री रामस्वामी वेंकटरामन-महोदया-नामागमनमभिलक्ष्याऽनन्तरं विरचिता 'रामगिरि' विषयिणी वृत्तमयी रचना। सन्दर्भः—कालिदासमहोत्सवः वसन्तपञ्चमी दिनांक २-२-१९८७)

देववाणी-परिषद्वार्ता

१. देववाणी-परिषदा ६.४.१९८७ तारिकायां **'संस्कृतसेवकः स्वामिनाथः'** -इति ग्रन्थः प्रकाशितः। ग्रन्थोऽयं परिषन्महासचिवेन डा० रमाकान्तशुक्लेन डा०शास्त्रपुरंरामकृष्ण स्वामिनाथमहाभागाय तच्छष्टिपूर्त्यवसरे एकस्मिन् समारोहे ५.४.१९८७ तारिकायां समर्पितः।

२. ६ ४ १९८७ ई० तारिकायां देववाणी-परिषदा वयोवृद्धसंस्कृतविदुषां स्व० श्री चारुदेवशास्त्रिणां स्मृतौ शोक-सभा आयोजिता।

संस्कृत-जगद्वार्ता

डा० राधावल्लभ त्रिपाठिनः शर्मण्यदेशयात्रा

सागरस्थ डा० हरिसिंह गौर-विश्वविद्यालयस्य संस्कृतविभागाचार्याध्यक्षो डा० राधावल्लभत्रिपाठी विश्वविद्यालयानुदानायोगद्वारा नामाङ्कितः भारतसर्वकारस्य सांस्कृतिकविनिमययोजनान्तर्गतं शर्मण्य (जी० डी० आर०) देशं प्रति ७. ४. १९८७ तारिकायां प्रस्थितः। डा० त्रिपाठिमहाभागस्तत्र हम्बोल्टादिविश्वविद्यालयेषु दश सप्ताहपर्यन्तं विविधेषु विषयेषु भाषणं करिष्यति। अस्य यात्रा सफला स्यात्!

डा० हरिदत्तशर्मणः शर्मण्ययात्रा

इलाहाबाद-विश्वविद्यालयस्य संस्कृतविभागे प्रवक्तृपदमलङ्कुर्वाणो डाक्टर हरिदत्त शर्मा विश्वविद्यालयानुदानायोगस्य भारत-पूर्वजर्मनसांस्कृतिक-विनिमयानुष्ठानान्तर्गतं (इण्डो-जी० डी० आर०-कल्चरल एक्सचेंज प्रोग्राम) जर्मन-जनवादी - गणतंत्र-देशं १९८७ ईसवीयवर्षस्य अप्रेलमासस्य अन्तिमे सप्ताहे प्रयाति। तत्र डा० शर्मा मासत्रयं यावत् पूर्वबर्लिनस्थितस्य हम्बोल्टविश्वविद्यालयस्य एशियनाध्ययनविभागे संस्कृतनाटकेषु लोकतत्त्वं विषयीकृत्य अनुसंधानकार्यं करिष्यति, व्याख्यानादिकं च प्रदास्यति। उभयोः देशयोः सांस्कृतिक-शैक्षणिक-सम्बन्धदृष्ट्या महत्त्वशालिनी यात्रेयं माङ्गलिकी भूयादिति काम्यते।

मिश्रोऽभिराजराजेन्द्रोऽभ्यागताचार्यपदे नियुक्तः

संस्कृतज्ञानां गौरवं लोकप्रियो गीर्वाणवाणीगीतकारः पञ्चदशप्रायाः प्रकाशितानां काव्यैकाङ्किकथागीतसङ्कलनानां यशस्वी रचनाकारः उत्तरप्रदेशशासनेन च काव्योत्कर्षार्थं पौढा पुरस्कृत इलाहाबाद-विश्वविद्यालये संस्कृतप्रवाचको मिश्रोऽभिराजराजेन्द्रो भारतसर्वकारेण इण्डोनेशियाराष्ट्र बालीद्वीपस्थे उदयनाख्यविश्वविद्यालये संस्कृतविभागे अभ्यागताचार्यः (विजिटि प्रोफेसर)-पदे नियुक्तः। मईमासस्य प्रथमसप्ताहे डा० मिश्रो दिल्लीतः डेनपसारं प्रतिष्ठते। उदयनविश्वविद्यालये वर्षद्वयं यावत् स्वपदभारं निर्वह स संस्कृतसपर्यां विधास्यति। डा० अभिराजस्तत्र भारतस्य साहित्यदौत्य सम्यक् सम्पादयतु !

प्रो० देवदत्त भट्टी सम्मानितः

पञ्चाम्बुराज्यस्थ 'मालेरकोटला' नगरे राजकीयमहाविद्यालये संस्कृ विभागाध्यक्षाय प्रो० देवदत्त भट्टि-महाभागाय, तस्य विशिष्ट समाजसेवा मुद्दिश्य, पञ्जाबीविश्वविद्यालयस्य कुलपतिः डा० भक्तसिंहमहाभागः १५. १९८७ तारिकायां स्वर्णपटलं समर्पितवान्। इतः पूर्वं ३०-९-१९८६ तारिका श्रीभट्टि-महाभागः पञ्जाब-साहित्य-अकादम्या राष्ट्रपतिभवने समायोजि विद्वत्सम्मानसमारोहे भारतस्य महामहिमराष्ट्रपतिना श्रीज्ञानी जैलसिंह-महाभागे स्वर्णपदक-योग्यताप्रमाणपत्राभ्यां सम्मानित आसीत्। श्रीभट्टि-महाभागस्य न कवितात्मिका रचनाद्वयी 'इरा' 'सिनीवाली' चाधुनिकसंस्कृतवाङ्म कामप्यपूर्वामभिख्यां भजतीति नापोहितं विदुषाम।

कमलिनी दत्त-महाभागायै 'रादुगा' पुरस्कारः

फरवरीमासे, दिल्लीदूरदर्शने वरिष्ठकार्यक्रमनिष्पादयित्री दिल्ली देववाणी-परिषद आजीवनसदस्या श्रीमती कमलिनी दत्त-महाभागा 'जयतु भारत भारती' इतिशीर्षकवृत्तचित्रनिर्देशनार्थं रूसदेशस्य दूरदर्शने 'रादुगा' (इन्द्रधनुष) पुरस्कारेण सम्मानिता। श्रीमत्या कमलिनी दत्त महा- भागया भारते विगतदिवसेषु सम्पन्नस्य 'अपना उत्सव' इति कार्यक्रमस्य सारांशः अस्मिन् वृत्तचित्रे दत्तः। तया 'भाति मे भारतम्'—इति सुप्रसिद्ध संस्कृतकाव्यस्य केचन अंशा अपि अनूद्य तत्र नियोजिताः। रूसदे षट्पञ्चाशद्देशैः 'वृत्तचित्र-प्रतियोगितायां' स्व वृत्तचित्राणि प्रेषितानि भारतस्य वृत्तचित्रं प्राथम्येन 'रादुगा' पुरस्कारमलभत। सपरिकरा कमलिनी दत्त-महाभागा मुहुर्मुहुर्वर्धाप्यते।

राजस्थान संस्कृत-अकादमी कविसम्मेलनमायोजितवती

२७-३-१९८७ तारिकायां जयपुरस्थे श्रीवीरेश्वरभवने राजस्थान-संस्कृत-अकादमी अखिलभारतीयं संस्कृतकविसम्मेलनमायोजितवती यत्र आचार्य श्रीनिवासरथ-कविपुण्डरीक सम्पूर्णदत्त मिश्र - डा० राजेन्द्रमिश्र-डा० रमाकान्त शुक्ल-डा० वासुदेवकृष्ण चतुर्वेद-श्रीगिरीश - श्रीराधाकृष्ण शास्त्रि-डा० रुद्रदेव त्रिपाठि - श्रीओमप्रकाश त्रिवेदि-डा० पद्म शास्त्रि - प्रभृतिभिः विंशतिप्रायैः कविभी रचनाः प्रस्तुताः। सम्मेलनस्य संचालनं पं० कलानाथ शास्त्रिणा कृतम्।

अस्मिन्नेव दिने एका आचार्यगोष्ठी अप्यायोज्यत यत्र अकादम्या अध्यक्षो डा० मण्डनमिश्रमहाभागो, राजस्थानविश्वविद्यालय-संस्कृतविभागाध्यक्षो डा०रामचन्द्रद्विवेदी अन्ये चानेके विद्वांसो नूतनशिक्षापद्धतौ संस्कृतस्य स्थान-मवलम्ब्य विमृशवन्तः। अकादमी-निदेशकेन श्रीललितकिशोर-महाभागेन विदुषां स्वागतं सचिवेन श्री राधेश्यामव्यासमहाभागेन च धन्यवादज्ञापनं कृतम्।

मध्यप्रदेशसंस्कृताकादेमीपुरस्काराः

मध्यप्रदेश - संस्कृत - अकादेमी - सचिवेन डा० भास्कराचार्यत्रिपाटिमहा-भागेन सूचितं यदकादेम्या १९८५ तमे वर्षे प्रकाशिता श्रीवसन्त-त्र्यम्बकशेवडे प्रणीता **'स्तवमञ्जूषा'** विंशतिसहस्ररूप्यकात्मकेन 'अखिलभारतीयकालिदास' पुरस्कारेण सम्मानिता। दशसहस्ररूप्यकात्मकः 'प्रादेशिकभोजपुरस्कारः' द्वाभ्यां ग्रन्थाभ्यां दातुं समुद्घोषितः। इमौ द्वौ ग्रन्थौ स्तः—(१) डा० जय कुमार 'जलज'-कृतः 'संस्कृत और हिन्दी नाट्य : रचना एवं रंगकर्म' इति, पं० बाबू लाल शुक्ल-कृतः 'हिन्दी नाट्य शास्त्र (चतुर्थ भाग)' इति च।

प्रादेशिकराजशेखरपुरस्कारो व्यासपुरस्कारश्च कस्मै अपि ग्रन्थाय न दीयेते।

शिकारपुरस्थ-संस्कृत-परिषदो द्वितीयं द्विदिवसीयाधिवेशनम्

१४-१५.२.१९८७ दिनाङ्कयोः सम्पन्नम्। परिषदः महासचिवेन श्रीचन्द्रमणिशास्त्रिणा वार्षिकं विवरणं प्रस्तुतम्। अधिवेशनस्य संयोजनम् आँचलस्थ - उच्चतरमाध्यमिकविद्यालयस्य प्रधानाचार्येण श्रीशिवध्यानसिंह चौहान-महाभागेन कृतम्। अस्मिन् समारोहे सुलेख-संस्कृतश्लोकान्त्याक्षरी-शब्दान्त्याक्षरी - संस्कृतभाषण-प्रतियोगिता आयोज्यन्त। समारोहस्योद्घाटनं खुर्जास्थ - श्रीराधाकृष्ण-संस्कृतमहाविद्यालयस्य प्राक्तनप्राचार्येण श्रीहरिदत्त शास्त्रिमहाभागेन, मुख्यातिथित्वञ्च दिल्लीस्थ-मोतीलालनेहरू (सांध्य) महा विद्यालयस्य प्राचार्येण किञ्च सुप्रसिद्धहिन्दी-संस्कृतकविना डा० शङ्करदेव

अवतरेमहाभागेन कृतम्। तेन श्रीचन्द्रमणिशास्त्रिणा प्रवर्तिता आचार्यश्रीब्रह्मानन्दशुक्ल-चल-वैजयन्ती आँच ःस्थ उच्चतरमाध्यमिकविद्यालयस्य प्रतियोगिभ्यामुपहृता। तेन हिन्दी-संस्कृत-काव्यपाठेन समुपस्थितश्रोतॄणां मनांसि आवर्जितानि।

तिरुपतिस्थकेन्द्रीयसंस्कृतविद्यापीठदीक्षान्तसमारोहः

तिरुपतिस्थकेन्द्रीयसंस्कृतविद्यापीठस्य रजतजयन्तीसमारोहः महता उत्साहेन ३०-३१. १. १९८७ दिनाङ्कयोः मानवसंसाधनविकासमन्त्रिणः श्री पी० वी० नरसिंहराव - महोदयस्य आध्यक्ष्ये सुसम्पन्नः। महोत्सवस्य अङ्गत्वेन रजतजयन्तीभवनोद्धाटनं विद्यापीठस्य संस्थापकनिदेशकानां डा० वी० आर० शर्ममहोदयानाम् अभिनन्दनग्रन्थविमोचनं, वैदिकसम्मेलनं दीक्षान्तसमारोहः इतरे च संस्कृतनाटकादिसांस्कृतिककार्यक्रमाः आयोजिता आसन्।

लक्ष्मणपुरे संस्कृताक्रीडः

१९८७ मार्चमासे लक्ष्मणपुरे (लखनऊनगरे) सप्तदिवसीयः 'संस्कृताक्रीडः' कार्यक्रम आयोज्यत यत्र शोभायात्रा, देवनागरी-लिपिं, संस्कृतापाठ्यक्रमं नवशिक्षानीतौ संस्कृतस्य स्थानं, दैनिकप्रयोगे संस्कृतं, संस्कृतप्रचारं चावलम्ब्य गोष्ठीचतुष्टयम्, शोधपत्रपाठगोष्ठीद्वयम्, नैके सांस्कृतिककार्यक्रमाश्चानुष्ठीयन्त। सांस्कृतिककार्यक्रमेषु संस्कृतकविसम्मेलनं, संस्कृतगीतप्रस्तुतिः, काव्याली, लघुनाट्यप्रस्तुतिः, सांगीतम्, हासिका, संस्कृतलोकगीतप्रस्तुतिः, १९०९ तम शक संवत्सरस्वागतम् इत्येवमादयः प्रमुखा आसन्।

कार्यक्रमस्य संयोजन-सञ्चालनकर्मणि 'सर्वगन्धा' सम्पादकेन डा० वीरभद्र मिश्रमहाभागेन श्री ओमप्रकाश शास्त्रिणा च सविशेषं प्रयत्ना समाचरिताः। सर्वेऽपि संयोजका भागग्रहीतारश्च वर्धापनमर्हन्ति।

गोला गोकर्णनाथ-नगरपालिका संस्कृत-काव्यनिशा

उत्तरप्रदेशस्य खीरीजनपदान्तर्गतं गोलागोकर्णनाथनगरे नगरपालिकया १३-४-१९८७ तारिकायां 'संस्कृत-काव्य-निशा' समायोजिता यत्र बरेली कालेजस्य संस्कृतविभागाध्यक्षस्य डा०कृष्णकान्तशुक्लस्य आध्यक्ष्ये, श्री अनन्तराम मिश्र 'अनन्त'स्य संयोजकत्वे, डा० सत्यप्रकाशमिश्रस्य संचालकत्वे डा०बाबूराम अवस्थिनश्च मुख्यातिथित्वे डा० प्रशस्यमित्र शास्त्रि-डा० शिव स्वरूप तिवारी - श्री शिवपूजन पाण्डेय - महेन्द्र कुमार शास्त्रि 'सरल' डा० रामप्रसाद त्रिपाठि - आचार्य छैल विहारी मिश्र-प्रभृतिभिः कविभिः स्व रचनाः प्रस्तुताः।

(रमा शुक्ला)

○

६-४-१९८७ ई० त रिकायां संस्कृतजगतो महती हानिः

ज्ञानमूर्तिः श्रीचारुदेवशास्त्री दिवं गतः !

६-४-१९८७ तारिकायां अपराह्णे ३.३५ वाददकाले ज्ञानमूर्तिः प्रो० चारुदेवशास्त्रिमहाभागः हृदयगत्यवरोधात् परलोकं गतः। देशस्य सर्वेऽपि संस्कृतज्ञा अभिनवपाणनेरस्य महाविदुषः निधनोदन्तमाकर्ण्य स्तब्धाः संजाताः !

श्री चारुदेवशास्त्रिमहाभागः संस्कृतस्याद्वितीयः विद्वान्, लब्धप्रतिष्ठो लेखकः, प्रभावी वक्ता ख्यातनामा परोपकारी चासीत्। पाणिनीयव्याकरणस्य तु स अगाधपाथोधिरेवासीत्। अत एव तन्मित्राणि प्रशंसकाश्च तमभिनव-पाणिनिं व्यपदिशन्ति स्म। सदैव ज्ञानार्जने लीनः सन् शास्त्रिमहाभागः एकनवतिप्रायवर्षावस्थायामपि प्रत्यहं सप्ताष्टघण्टापर्यन्तं काय करोति स्म। तस्य अविरतपरिश्रमः, कार्यक्षमता, नियतजीवनञ्च यूनां कृते आदर्शतां यान्ति। तत्प्रणीताः विंशतिसंख्यका ग्रन्थाः, 'व्याकरणचन्द्रोदयः' इति, 'उपसर्गार्थ-चन्द्रिका' चेति, पञ्चखण्डात्मिके द्वे ग्रन्थमाले अष्टादश शोधनिबन्धाश्च प्रकाशिताः सन्ति।

शास्त्रिमहाभागः पञ्चाम्बु-प्रदेशस्य 'होशियारपुर' जनपदानन्तर्गते अहियापुराख्ये ग्रामे पितुः श्रीरामकृष्णात् जनन्यां श्रीमत्यां भगवन्तीदेव्यां ८-५-१८९६ ई० तारिकायां जनिं लेभे। तस्य प्राथमिकशिक्षा निकटस्थे 'टांडा' ग्रामे "एंगलोवर्नाक्यूलर मिडिल-स्कूले सम्पन्ना। परीक्षां समाप्य अयं जालन्धरे एस०डी०ए०एस० हाई स्कूले प्रवशं लब्धवान्। तदनु लाहौरस्थे डी० ए० वी० कालेजे लब्धप्रवेशः सन् ततः एम०ए० परीक्षां प्रथमश्रेण्यां सर्वाधिकाङ्कलाभेन समुत्तीर्य स्वर्णपदकं प्राप्तवान्। इण्टरमीडियेट-बी०ए०-कक्षयोः विशेषयोग्यता-लाभात् अयं पंजाब- विश्वविद्यालयतः छात्रवृत्ति लेभे।

१९२१ तः श्रीशास्त्रिमहाभागेन जालन्धरस्थे डी० ए० वी० कालेजे अध्यापनं प्रारब्धम् यद्यपि तदावधि तस्य एम० ए० कक्षायाः परीक्षाफलमपि नोद्घुष्टमासीत्। मासद्वयानन्तरं यदा परीक्षाफलमुद्घुष्टं तदास्य नियुक्तिः लाहौरस्थे डी० ए० वी० कालेजे संजाता यत्र हि असौ १९४७ ई० पर्यन्त-मध्यापामयास। देशविभाजनानन्तरं डी० ए० वी० कालेजे अम्बालानगरे

पुनरुद्घाटिते सति १९४८ तः तेन पुनरपि तत्रैव अध्यापनं प्रारब्धम्। १९... तमेऽशवीयेऽब्दे पञ्चपञ्चाशद्वर्षावस्थायां स डी०ए०वी० कालेजसेवातोऽवकाशं प्राप्तवान्। तदनु किञ्चित्कालानन्तरं स अम्बालाकटके नवप्रारब्धे गान्धी-मैमोरियल-नैशनलकालेजे वर्षद्वयं यावदध्यापयामास। तदनु एकवर्षं यावत् दिल्लीस्थे पंजाब-विश्वविद्यालयस्य कैम्पकालेजे अध्यापितवान्।

स्व० श्रीशास्त्रिमहाभागः संगीते प्रगाढां रुचिं निदधाति स्म। तेन कति... वर्षैः, संगीतशास्त्रस्य नियताभ्यासः कृतः। कारयित्वा भावयित्वा च प्रतिभा... समन्वितः स महात्मनो गान्धिनः जीवनचरितं १९३० तमेशवीऽयेऽब्दे 'श्रीगान्धि-चरितम्' इति ग्रन्थमाध्यमेन न्यग्रथत्। अर्वाचीनसंस्कृतस्य अयं हि गद्यग्रन्थः श्रीशास्त्रिणः व्याकरणज्ञानस्य, लोकचेतनायाः बोधस्य देशभक्तेश्च मू... परिचायकः।

श्रीशास्त्रिणः शोधकृतिषु सविशेषमुल्लेखनीये स्तः—'व्याकरणचन्द्रोदय' इति 'उपसगार्थचन्द्रिका' चेति ग्रन्थमाले। पञ्चखण्डात्मिका व्याकरण-चन्द्रोदय-ग्रन्थमाला २३३२ पृष्ठेषु सम्पूर्णा। अस्याः प्रकाशनं १९६... १९७३ पर्यन्तं संजातम्। उपसर्गार्थचन्द्रिका १२०० पृष्ठेषु प्रकाशिता। प्रो० शास्त्री भर्तृहरेः वाक्यपदीयस्य प्रथमकाण्डस्य सर्वप्रथमः परिष्कर्ता आसीत्। वाग्व्यवहारादर्शः, महाभारतवचनामृतं, श्रीमद्भागवतभाषापरिच्छेदः, रामचरितामृतम्, नारदीयपुराणस्य भूमिका इत्यादयः अनेके महत्त्वपूर्णाः ग्रन्थाः श्रीशास्त्रिणः कीर्ति विस्तारयन्ति।

प्रो० शास्त्री संस्कृतसाहित्यस्य अपूर्वसेवार्थमनेकशः राष्ट्रीयसम्मानैः सत्कृतो जातः। १९६५ तमेशवीयेऽब्दे अखिलभारतीय-संस्कृत-साहित्य-सम्मेल-नस्य स्वर्णजयन्त्यवसरे तत्कालीनभारतराष्ट्रपतिना डा० राधाकृष्णन्-महाभागेन श्री शास्त्री 'विद्यावाचस्पति' उपाधिना सम्मानितः। १९७१ तमेशवीयेऽब्दे ... राष्ट्रपतिसम्मानपत्रेण सत्कृतो जातः। १९७३ तमेऽब्दे अस्य हीरकजयन्ती-मुपलक्ष्य खण्डद्वयात्मकः एकसहस्रपृष्ठात्मकश्च अभिनन्दनग्रन्थः प्रकाशितः यो हि ११ जनवरी १९७३ तारिकायामेकस्मिन् विशेषसमारोहे तत्कालीन-लोकसभाध्यक्षेण श्रीगुरदयालसिंहढिल्लोंमहाभागेन अस्मै समर्पितः। २५-... १९८२ तारिकायां काशीहिन्दूविश्वविद्यालयेन अयं डी० लिट्० सम्मानोपाधिना सम्मानितः। १९८२ तमेशवीयेऽब्दे एव उत्तरप्रदेश-संस्कृत-अकादमी संस्कृत-साहित्यसर्जनार्थम् अस्मै पञ्चदशसहस्रारूप्यकात्मकं पुरस्कारं समर्पितवती। २७-३-१९८३ तारिकायां पंजाबसर्वकारस्य भाषाविभागेन श्रीशास्त्री 'शिरोमणिसाहित्यकार' सम्मानेन ५१०० रूप्यकात्मकपुरस्कारेण स्वर्णपदकेन

च सभाजितः। श्रीशास्त्री संस्कृतमतिरिच्य गुजराती-मराठी- जर्मन-रूसी-फ्रैंच-प्रभृति भाषास्वपि नैपुण्यं दधार।

अधीतिबोधाचरणप्रचारैः सारस्वतं व्रतं सम्यक् पालयतो ज्ञानमूर्तेः ऋषिकल्पस्य प्रो० चारुदेवशास्त्रिमहाभागस्य द्वे अपत्ये स्तः—एकः पुत्रः डा०सत्यव्रतः शास्त्री, एका च पुत्री श्रीमती उषा। डा० सत्यव्रतशास्त्रिमहाभागः स्वपितुः न केवलं पुत्र एवापितु योग्यः शिष्योऽपि। दिल्ली-विश्वविद्यालयस्य संस्कृत-विभागे आचार्योऽसौ महानुभावः विश्वस्मिन्नपि जगति संस्कृत-विद्वत्कविरूपेण लब्धप्रतिष्ठो विराजते। परमेशः प्रार्थ्यते यत् स्व पितुर्ज्ञानसाधनापरम्पराया द्रढयित्रे डा० सत्यव्रतशास्त्रिमहाभागाय अनुभवैकगम्यं पितृविरहकष्टं सोढुं शक्तिं दद्यात्!

२२-१-१९७८ ई० तारिकायां 'देववाणी-परिषद्, दिल्ली' संस्थायाः प्रथम-वार्षिकाधिवेशनस्योद्घाटनं कुर्वद्भिः श्रीचारुदेवशास्त्रिमहाभागैः संस्कृतस्य प्रचारार्थं सङ्कीर्णवृत्तेस्त्याग उदारमार्गस्याङ्गीकारश्च वरणीयत्वेन प्रतिपादितावास्ताम्। तेषामयं सन्देशोऽद्यापि प्रासङ्गिकतां दधाति यस्य पालनं तेभ्यो वास्तविकः श्रद्धाञ्जलिरस्ति।

२२.१.१९७८ तारिकायां देववाणी-परिषदः प्रथमं वार्षिकाधिवेशनं समुद्घाटयन् प्रो० चारुदेव शास्त्री (मध्यस्थः)

अमरकीर्तेरस्य महात्मनो दाहसंस्कारः १०-४-१९८७ ई० तारि दिल्ल्यामुपयमुनं निगमबोधघाटश्मशाने वैदिकविधिना डा० सत्यव्रत महाभागेन सम्पादितः । अस्मिन्नवसरे देशस्य प्रमुखाः संस्कृतविद्वांसोऽधि णश्च उपस्थिता आसन् । १८-४-१९८६ तारिकायामपराह्णे श्रद्धाञ्जलि-सभा आयोजितास्ति यत्र दिवंगतायात्मने श्रद्धा-भावकु समर्पयिष्यन्ते ।

देववाणी-परिषदा ९-४-१९८७ तारिकायां शोकसभायोजिता यत्र दि त्मेन श्रद्धाञ्जलयः प्रदत्ता अभूवन् ।

वेदमूर्तिः श्री अनन्त सीताराम भट्ट गाडगीलः स्वर्गतः !

पुण्यपत्तनात् प्रकाशितायाः 'शारदा' संस्कृतपत्रिकायाः सम्पा श्री वसन्त गाडगिल - महाभागस्य पूज्यजनकोऽष्टाशीतिवर्षीयो वे श्री अनन्त सीताराम भट्ट गाडगील-महाभागः ९-४-१९८७ ता कोल्हापुरे स्वर्गतः ।

वेद-स्वाध्याय-परम्परारक्षणैकव्रतस्य परोपकारपरायणस्य, अ प्रियस्य, शिष्यवत्सलस्य, निर्भीकस्वभावस्य ऋषिकल्पस्य वेदमूर्तेः श्री सीताराम भट्ट गाडगील-महाभागस्य निधनेन जातामपूरणीयां क्षति संस्कृतजगते शक्ति दिवंगतात्माने च शान्ति प्रयच्छेत्परमेश्वरः ।

अर्वाचीनसंस्कृत-परिवारः उभयोरपि विदुषोनिर्धनोदन्तेन पीडामनु दिवंगताभ्यां श्रद्धाञ्जलींश्च समर्पयति ।

अर्वाचनीसंस्कृतस्य नवमवर्षीये तृतीये चतुर्थे चाङ्के स्व० चारुदे प्रणीतं 'श्रीगान्धिचरितम् तत्स्मृतिरूपेण प्रकाशयिष्यते ।

(स

अर्वाचीनसंस्कृतस्य ग्राहशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25 00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवन (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्ययः [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं 'अर्वाचीनसंस्कृतम्' Arvacheenasanskritam/*Arvācīnasaṁskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O.)वा निम्नलिखिते संकते प्रेषयितुं प्रार्थ्यन्ते :

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन देववाणी प्रिंटर्स उत्तम नगर, नयी दिल्ली-११००५९ इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (९/२) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-४-१९८७

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१. भाति मौरीशसम् (डा० रमाकान्त शुक्लः) रु०
२. सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः) रु०
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्) रु०
४. कूहा (काव्यम्) (डा० उमाकान्त शुक्लः) रु०
५. सद्राशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु०
६. आभाणकमञ्जरी (,, ,,) रु०
७. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु०
८. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,) रु०
९. ,, ,, ,, (द्वितीय खण्डः) (,,) रु०
१०. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु०
११. निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः) रु०
१२. अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः) रु०
१३. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु०
१४. संस्कृत साहित्य में राष्ट्रिय भावना
(डा० हरिनारायण दीक्षित) रु०
१५. साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन
(डा० सुलेखचन्द्र शर्मा) रु०
१६. अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु०
१७. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया) रु०
१८. साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः) रु०
१९. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु०
२०. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु०
२१. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु०
२२. श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः) रु०
२३. सुरश्मिकाश्मीरम् (,,) (,,) रु०
२४. पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु०
२५. श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्) रु०
२६. पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः) रु०
२७. नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,) रु०
२८. श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः) रु०
२९ लक्ष्मीशतकम्. (डा० वरदराजकण्णन्) रु०
३०. अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल) रु०

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५६.

दूरभाषः : ५५३४६६

अर्वाचीनसंस्कृतम्

(नवमवर्षे तृतीयोऽङ्कः)

१५ जुलाई १९८७

सम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

अर्वाचीनसंस्कृतम् (९/३)

(R. N. 34554/79)

(जुलाई १९८७ ई०)

विषय-सूचिः

विषयः	लेखकः
१. सम्पादकीयम्	
२. मामका भारतीयः क्षणं श्रूयताम्	डा० राजदेव मिश्रः, फैज़ाबादः
३. भारतीयाः स एवात्र संकीर्त्यंते	डा० शम्भुनाथ आचार्यः फर्रुखाबादः
४. विमानयात्राशतकम्	डा० राजेन्द्र मिश्रः ,उदयन-विश्वविद्यालयस्य संस्कृतविभागे ऽभ्यागताचार्यः, डेनपसारः, बाली (इण्डोनेशिया)
५. श्रीवैष्णवीदेवीयात्रावर्णनम्	डा० उमारमण झा जम्मू तवी
६. श्रीगान्धिचरितम् (१–३ परिच्छेदाः)	श्रीचारुदेव शास्त्री
७. देववाणी-परिषद्वार्ता	रमा शुक्ला
८. संस्कृत-जगद्वार्ता	रमा शुक्ला

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली

२. प्रकाशनकालावधिः—त्रैमासिकम्

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरि
च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दि
६, वाणी-विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वा
विहारः, नयी दिल्ली-११००५९

डा०रमाकान्त शुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकल
विवरणं मम मतौ सत्यमस्ति ।

१५-७-१९८७

—डा० रमाकान्त शु

प्रकाशकः, सम्पा

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य नवमवर्षीये तृतीयेऽस्मिन्नङ्के चतस्रः पद्यरचनाः एका आख्यायिका, देववाणी-परिषद्वार्ता, संस्कृतजगद्वार्ता च प्रकाश्यन्ते।

१९७९ तमेशवीयेऽब्दे एतत्पंक्तिलेखकेन स्रग्विण्यां रचिता 'भूतले भाति मेऽनारतं भारतम्' इति शीर्षकैका रचना अर्वाचीनसंस्कृते प्रकाशिता बभूव। तदनु डा० शिवदत्तचतुर्वेद-डा० वनेश्वरपाठक-आचार्यवेदानन्दझा-प्रो० श्रीनिवासरथ-प्रभृतीनां स्रग्विण्यां रचिता भारत-भारती परा रचना अर्वाचीनसंस्कृते प्रकाशिताः जाताः। मन्ये, भारत-भारती-भारतीय-वर्णनार्थं स्रग्विणी भाति नित्यं कवीनां प्रिया। अस्मिन्नेव स्रग्विणीक्रमे अस्मत्सुहृद्वर्यैः डा० राजदेवमिश्र-महाभागैः 'मामका भारतीयाः क्षणं श्रूयताम्' इत्येषा रचना कृता यस्या ८-१०-१९८६ तारिकायां आकाशवाण्या लखनऊ-केन्द्रात्प्रसारणमभूत्। डा० शम्भुनाथ आचार्यमहाभागानां 'भारतीयः स एवात्र संकीर्त्यते' इत्येषा रचनाऽपि आकाशवाणीतः प्रसारिता बभूव। उभे अपि रचनेऽत्र सहृदयानां विनोदार्थं प्रकाश्येते। एतदतिरिक्ता अपि स्रग्विणीवृत्तग्रथिता नैका रचना अधुनावधि अप्रकाशिता एव तिष्ठन्ति। आशासे, तासां प्रकाशनमायत्यामत्र पत्रे विधास्यते।

अस्मत्सुहृद्वर्याः सुख्याताः संस्कृतकवयः डा० राजेन्द्र मिश्र-महाभागाः ५.५.१९८७ई० तारिकायां, वर्षद्वयार्थम् इण्डोनेशियाराष्ट्रस्य बालीद्वीपस्थ-डेनपसारनगरस्थे उदयनविश्वविद्यालयेऽभ्यागताचार्यतां निर्वोढुं दिल्लीतो विमानेन प्रस्थिताः। मध्येमार्गं तैर्यदप्यनुभूतं तत्पत्रे विलिख्यतैः १९८७ तमेशवीयेऽब्दे मईमासस्य द्वितीये सप्ताहे मत्सकाशे प्रेषितम्। एतदेव 'विमानयात्राशतकम्' इति शीर्षकेण प्रकाश्यते। अस्मिन् यात्राकाव्ये कवेः सूक्ष्मेक्षिका, वर्णनपटुता कल्पनाकुशलता च साक्षात्कर्तुं शक्यन्ते सहृदयैः।

डा० उमारमणझा-महाभागानां 'श्रीवैष्णवीदेवीयात्रावर्णनम्' - इति यात्राकाव्यमपि यथार्थवर्णनदृशा महत्त्वं बिभर्ति।

अतः परं, विगतेऽङ्के यथाप्रतिज्ञातं स्व० श्रीचारुदेवशास्त्रिभिः (८.५.१८९६-९.४.१९८७ ई०) १९३० तमेशवीयेऽब्दे प्रणीतस्य 'श्रीगान्धिचरितम्'-इत्येतदाख्यायिकात्मकस्य गद्यकाव्यस्य प्रकाशनं प्रारभ्यते। कृतिमिमामवलम्ब्य विस्तरशश्चर्चा पश्चात्करिष्यते।

विद्वांसः क्वचिज्जातानां मुद्रणस्खलितानां समाधानार्थं सादरं प्राथ्यन्ते।

१५-७-१९८७ ई०

६ वाणी-विहारः
नयी दिल्ली-११००५९

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

मामका भारतीयाः क्षणं श्रूयताम्

(डा० राजदेव मिश्रः, प्राचार्यः, का० सु० साकेत स्नातकोत्तर
महाविद्यालयः, फ़ैजाबादः)

हृद्यभावं विना [सद्विचारः कथं सद्विचारं विना राजनीतिः कथं
राजनीतिं विना देशसत्ता कुतः शुद्धभावेन भोश्चिन्त्यतां चिन्त्यताम्
मामका भारतीयाः क्षणं श्रूयताम् ॥

जातिवादोऽथवा धर्मवादोऽधुना व्यक्तिवादश्च घोरो महानिन्दितः
खेदकारस्सदा देशहानिप्रदः सर्वतोभावतश्छिद्यतां भिद्यताम्
मामका भारतीयाः क्षणं श्रूयताम् ॥

राष्ट्रियामेकतामन्तरा, भारतं गान्धिना लोकमान्यादिभिर्नतैः
वन्दितं, खण्डितं दुःखदं स्यान्ननु तथ्यमेतत्सदा मानसे धार्यताम्
मामका भारतीयाः क्षणं श्रूयताम् ॥

राष्ट्रभाषां विना राष्ट्रशिक्षा कथं राष्ट्रशिक्षां विना राष्ट्ररूपं कुतः
राष्ट्ररूपं विना लोकतन्त्रं मुधा जन्मभूमिस्सदा सेव्यतां सेव्यताम्
मामका भारतीयाः क्षणं श्रूयताम् ॥

त्यागभावं विना लोकसेवा कथं लोकसेवां विना देशभक्तिः
देशभक्तिं विना राष्ट्ररक्षा कथं मानसे नीतिरेषा स्वके धार्यताम्
मामका भारतीयाः क्षणं श्रूयताम् ॥

नास्ति धर्मः क्वचिद् भूतले वेदितः कथ्यते वैरभावश्च भो दुःखदः
स्नेहभावं विना धर्मसत्ता कुतः भावमाश्रित्य भो जन्मभूः सेव्यताम्
मामका भारतीयाः क्षणं श्रूयताम् ॥

देशरक्षासमस्या स्वके भारते सम्मुखा विद्यते साम्प्रतं कथ्यते
निर्विवादः समाधिश्च तस्या अयं सर्वलोको मुदा भारतं त्रायताम्
मामका भारतीयाः क्षणं श्रूयताम् ॥

अन्तरा शत्रवो बाह्यतः शत्रवः सर्वलोकैश्च हन्याः समे शत्रवः
सर्वमान्यव्रतं प्राणदं रक्षणं जन्मभूमेरिदानीं समैर्धार्यताम्
मामका भारतीयाः क्षणं श्रूयताम् ॥

★

भारतीयः स एवात्र संकोर्त्यंते

(रच० डा० शम्भुनाथ आचार्यः हिन्दी विभागे प्राध्यापकः,
बद्री विशाल स्नानकोत्तर कालेजः, फरुंखाबादः २०९६२५)

यस्य वेदे रतिर्यस्य शास्त्रे मति-
र्यस्य सद्भावना प्राणिमात्रे, तथा
यस्य नायं निजः कोऽपि नायं परो
भारतीयः स एवात्र संकीर्त्यंते ॥ १ ॥

यस्य हैमो गिरिर्यस्य रामेश्वरो
द्वारका यस्य चास्ते जगन्नाथकः
मानसं यस्य बन्धुत्वभाषाश्रयं
भारतीयः स एवात्र संकीर्त्यंते ॥ २ ॥

यज्ञ-यागक्रिया यस्य नैसर्गिकी
यस्य शास्त्रीयता भाति बोधोज्ज्वला
संशयो यस्य नोदेति सत्कर्मसु
भारतीयः स एवात्र संकीर्त्यंते ॥ ३ ॥

राघवो यस्य रामः सुनीतिप्रियो
मानसं यस्य कृष्णस्य वृन्दावनम्
तूलसी-सूरदासौ यदीयौ कवी
भारतीय स एवात्र संकीर्त्यंते ॥ ४ ॥

विश्वमार्यं विधातुं च यस्योद्यमाः
श्रेयसे प्रेयसे यस्य धर्मो यमाः
चिन्तनं यस्य लोकात्मबोधप्रदं
भारतीयः स एवात्र संकीर्त्यंते ॥ ५ ॥

प्राणदानेऽपि यस्यास्ति नो संशय:
कर्मणीहैव यस्यास्ति सम्प्रत्यय:
ईश्वरे वा गुरौ यस्य निष्ठा परा
भारतीय: स एवात्र संकीर्त्यते ॥ ६ ॥

गाङ्गमम्भो यदर्थं सुधामञ्जुलं
यस्य हैमो नगो वा सदा नन्दनम्
कल्पवृक्षो यदर्थं भवानीपति:
भारतीय: स एवात्र संकीर्त्यते ॥ ७ ॥

यस्य राग: प्रवृत्तिश्च सत्कर्मत:
यद्विरागो निवृत्तिस्त्वसत्कर्मत:
निर्वृतिर्येन लब्धा जगत्सेवया
भारतीय: स एवात्र संकीर्त्यते ॥ ८ ॥

यस्य रामो जगत्पूज्यतामाप्तवान्
यस्य कृष्णो बभौ वा जगद्गौरवात्
शाश्वतो यस्य धर्मो जगद्रक्षको
भारतीय स एवात्र संकीर्त्यते ॥ ९ ॥

(रचनातिथि : २८-४-१९८७ ई०)

विमानयात्राशतकम्

[अभिराजो डा॰ राजेन्द्रमिश्रः उदयनविश्वविद्यालयस्य संस्कृतविभागे अभ्यागताचार्यः, डेनपसारः, बाली (इण्डोनेशिया)]

बहिर्भागेऽथ देहल्याः पालमाख्ये मनोहरे ।
विमानं तन्मया दृष्टं चारुवर्णं प्रभोज्ज्वलम् ॥१॥
उत्पतिष्णु स्फुरत्पक्षं हुङ्कुर्वाणं शनैः शनैः ।
पर्याकुलं च बालानां चालकानां गतागतैः ॥२॥
अधोभागस्थितैर्भृत्यैः पूर्यमाणं मुहुर्मुहुः ।
यथापेक्षितसामग्र्या यथेच्छमिन्धनादिभिः ॥३॥
अथारोहणकालोऽपि सम्प्राप्तश्चिरकांक्षितः ।
'ऐंह्रीं क्लीमों' समुच्चार्य विमाने कृतमास्पदम् ।४॥
दर्शं दर्शं च विच्छित्तिं वैमानीमान्तरङ्गिकीम् ।
परमं विस्मयं भेजे मानसं चित्रमेदुरम् ॥५॥
क्वचिच्चित्रलसद्भित्तौ पानगोष्ठीमहोत्सवः ।
क्वचिदङ्कस्थवामोरुचुम्बनादिविधानकम् ॥६॥
क्वचिदारण्यवृतान्तः क्वचिन्नागरवीथिका ।
क्वचित्तरुविहङ्गानां तौर्यत्रिकविनोदनम् ॥७॥
गवाक्षैर्वर्तुलाकारैर्बहुसंख्यैरकल्मषैः ।
साक्षादिव सहस्राक्षो विमानं तददृश्यत ॥८॥
एवमादि च साश्चर्यं चिन्तयत्येव मय्यथ ।
वारिवाह इवोद्भ्रान्तो वायुयानं चचाल तत् ॥९॥
पश्चादादौ ततस्तिर्यक् सम्मुखं चाप्यनन्तरम् ।
शनैः शनैस्ततस्तूर्णं मध्ये तूर्णतरं पुनः ॥१०॥
अथोवाच गिरा मृद्व्या चालकान्यतमो युवा ।
प्रमादो नैव कर्तव्यो यानमुद्यात् साम्प्रतम् ।११॥
बन्ध आसन्दिकालग्नो नियन्तव्यः प्रयत्नतः ।
वातायानं पिधातव्यं लोकनीयं न वा बहिः ॥१२॥

मध्येयानं कृतस्थाने घोषयत्येव चालके ।
युगान्तघर्घरारावोऽकस्मादेव समुत्थितः ॥१३॥
ततस्तूर्णतमैर्वेगैर्धावमानं महाजवम् ।
विमानं वसुधां हित्वा नभोमण्डलमाययौ ॥१४॥
ऊर्ध्वस्कन्धं स्फुरद्गत्या निमेषैः कैश्चिदेव हि ।
चन्द्रतारकमध्यस्थं विमानं तद्बभौ ततः ॥१५॥
प्राणरक्षापरीधानधारणस्य प्रदर्शनम् ।
सविलासं सविब्बोकं सुमुखीभ्यां समाहितम् ॥१६॥
एवमादिषु पूर्णेषु विमानं तन्निराकुलम् ।
निश्चलं तनु निष्कम्पं जातं शमितघर्घरम् ॥१७॥
अभून्मनसि सोत्कण्ठे यथा स्वाध्यायकक्षके ।
तिष्ठन्निर्मक्षिकं काञ्चित् पत्रिकां प्रपठाम्यहम् ॥१८॥
अथ क्रमः समारब्धः सप्रीतेः स्नेहमेदुरः ।
अनन्नसरसो जातु नारङ्गकरसोऽथवा ॥१९॥
कदाचिदुष्णपेयं वा चायकाफीसमाह्वयम् ।
लेह्यं चोष्यं क्वचिन्मध्ये विविधः फलसञ्चयः ॥२०॥
नोऽधिकं सर्वमानीतं मदिराक्ष्या कराम्बुजैः ।
वैशम्पायनकस्यास्य निभरं ह्यमृतायते ॥२१॥
चलच्चित्रं ततश्चाङ्गुल्यां चारुवृत्तं प्रदर्शितम् ।
नयनासेचनं जातं पार्थिवं गगनेऽप्यहो ॥२२॥
यथा वा जननीक्रोडे शृण्वन् बालो लयेरिकाम् ।
सुखं स्वपिति निर्द्वन्द्वो यात्रिवर्गस्तथागतिः ॥२३॥
हिन्दोलितहृषीकाणां यात्रिणां सुखनिद्रया ।
सान्ध्यकोकनदच्छायां नेत्रजातमलक्ष्यत ॥२४॥
किञ्चित्कालान्तरे तावत् वीतनिद्रे प्रबोधिते ।
अशेषे यात्रिसन्दोहे विस्मयः परिलक्षितः ॥२५॥
आकाशादधोऽभागे प्राचीमूले विभावसुः ।
तप्तजाम्बूनदच्छायः समुदेति शनैः शनैः ॥२६॥

व्यलीकां कालिदासोक्तिं मेने दृष्ट्वा तदद्भुतम् ।
न प्रभातरलं ज्योतिः रुदेति वसुधातलात् ॥२७॥
चतुर्वादनवेलेयं घटीयन्त्रप्रमाणतः ।
भारते नैशकालोऽयं जायते नात्र संशयः ॥२८॥
सूर्योदयपथे किन्तु वर्धमाने विमानके ।
होराद्वयक्षयो जातः कालमाने सुनिश्चितम् ॥२९॥
निमेषैरेव पश्यामः कुवालालम्पुरं वयम् ।
जुघोषति लसद्वाचा वायुयानप्रबन्धकः ॥३०॥
आर्द्रवस्त्राणि दत्तानि मुखप्रोञ्छनहेतवे ।
प्रातराशश्च सुस्वादुरुपहारीकृतस्ततः ॥३१॥
प्रभातं प्रथमं व्योम्नि जीवने परिलक्षितम् ।
स्मृत्वा सर्वं महच्चित्रं रोमहर्षो नु जायते ॥३२॥
दीप्ते भवति बालार्के प्रस्फुटे खगगायने ।
मलेशियालसद्भूमिं विमानं समवातरत् ॥३३॥
अत्रत्या यात्रिणः सर्वे विमानात् समवातरन् ।
अन्ये याने स्थिरा जाताः सिंगापुरयियासवः ॥३४॥
अर्धहोरान्तरं यानं पुनरुड्डीय लम्पुरात् ।
सिङ्गापुरमगात्तूर्णं भूमिस्पर्शं चकार च ॥३५॥
तत्रावरुह्य विश्रामो यावद्धोरात्रयं मया ।
कृतः शरीरसौख्याय पुनर्यात्राप्रतीक्षया ॥३६॥
चारं चारं मया दृष्टं विमानस्थलमण्डपम् ।
प्रत्यक्षसिद्धमासीद्वै येन विज्ञानवैभवम् ॥३७॥
नावरोहणदुर्भीतिर्नारोहणपरिश्रमः ।
न वा पर्यटनापेक्षा सर्वं यन्त्रव्यवस्थितम् ॥३८॥
आरोहयति सोपानं मनुजं यंत्रचालितम् ।
तिष्ठन्तं फलके यत्नात् यथाकांक्षितभूमिकाम् ॥३९॥
पृष्ठोपरि च संवाह्य दूरं नयति यात्रिणम् ।
संस्थापयति वा तूर्णं यथेप्सितमधस्तलम् ॥४०॥

तत्र दृष्ट्वा नु विक्रेयं वस्तुजातं मनस्यभूत् ।
यथा माघवनी नूनं समृद्धिः संहृता भवेत् ॥४१॥
दृष्टिबन्धक्षमं वस्त्रं विविधाकारवर्णकम् ।
दूरदर्शनयन्त्राणि छुल्लकानि वृहन्ति च ॥४२॥
छायाचित्राङ्कने दक्षं यन्त्रं त्रिपदसंस्थितम् ।
दृष्टं लघु लघीयो वा लघिष्ठं च पुनः पुनः ॥४३॥
राजराजोऽपि तत्रस्थान् पदार्थान् क्रेतुमक्षमः ।
सम्पदा स्वीयया सर्वान् मनसा चिन्तितम्मया ॥४४॥
तत्रैवाऽमेरिकादेशे नियुक्तः कोऽपि सज्जनः ।
संयोगादान्ध्रदेशीयः जातो मम सुहृद्वरः ॥४५॥
दीर्घे वार्ताक्रमे रम्ये तेन सार्धं प्रवर्तिते ।
कदा कालो व्यतीयायेत्यवगन्तुं न पारितम् ॥४६॥
विसृष्टोऽसौ मया प्रीत्या तेन चाहं समार्दवम् ।
उभावपि प्रतिस्थाते नव्ययात्राभिकांक्षया ॥४७॥
पुनरत्रापि सञ्जातं पाथेयपटकेक्षणम् ।
यन्त्रैर्ममापि सम्भूतं रक्षादृष्ट्या परीक्षणम् ॥४८॥
सिंगापुरविमानेन यात्रेदानीं प्रवर्तिता ।
अपराह्णे स्फुटालोका वातायनविलोकिता ॥४९॥
नीलाम्भोधिरधोभागे नीलाकाशश्च शीर्षके ।
ज्ञातुं नाशाकि यत्नैर्भोः कियद्व्योम कियज्जलम् ॥५०॥
उच्चैर्नीचैश्च सर्वत्र नीलाम्बरमभासत ।
एकरूपं जलं व्योम हन्त सर्वं विलक्षणम् ॥५१॥
विमानाधस्तके कीर्णा असंख्या श्वेतवारिदाः ।
दूर्वास्थल्यामभासन्त चरन्तो मेषशावकाः ॥५२॥
कदाचित्कीर्णमेघालीं संविदार्य स्वरत्पुनः ।
यानं बभौ शरत्काले काशकान्तारपारगम् ॥५३॥
विमाने संमुखीने वै मेघखण्डाः पलायिताः ।
यथा जाङ्गलिकं दृष्ट्वा पलायन्ते भियाऽर्भकाः ॥५४॥

उपरिष्टादधस्ताद्वा वामदक्षिणपार्श्वत ।
अक्षता जर्जरा मेघा यानमाहत्य विद्रुताः ॥५५॥
वारिदानामियं क्रीडा आजकातं प्रवर्तिता ।
अचिन्त्या पृथिवीस्थानामदृश्या चापि यत्नतः ॥५६॥
क्वचित्पुनर्घनीभूतमेघसन्दोहमध्यगम् ।
नालुलोके तदा यानं मुक्ततारापथं चरम् ॥५७॥
तदा हिन्दोलनभ्रान्त्या विमानं चालयन् कृती ।
मेघपाशविमुक्त्यर्थं प्रयासान् कृतवान् स्वयम् ।५८।
एवमाचरते तस्मै स्वस्तिवादं प्रयच्छतः ।
मानसे शंङ्कयाऽकीर्णे जातं भयमथोल्बणम् ॥५९॥
क्वचित्पुनः पयोदानामखण्डा पर्वसन्ततिः ।
दृश्यते स्म विमानस्य निम्नभागेसुविस्तृता ॥६०॥
तूलराशौ यथा काचित्तित्तली प्लवते सुखम् ।
तादृशी सुषमा नूनं वायुयानस्य संबभौ ॥६१॥
हिमराशौ यथोड्डीनं भवताद् देवपुष्पकम् ।
तादृशी ननु विच्छित्तिर्वायुयानस्य संबभौ ॥६२॥
यथा वा शुभ्रकैलाशे वल्गते शम्भुवाहनः ।
तादृशं ननु सौन्दर्यं वायुयानस्य संबभौ ॥६३॥
मनसा चिन्तयत्येवं यानं मयि महाजवम् ।
जयकर्तेति विख्यातं नगरान्तिकमाययौ ॥६४॥
विमानेऽवनतीभूते स्फुटं जातं महीतलम् ।
चित्रकृत्तूलिकाकृष्टालेख्यसाधनिकोपमम् ॥६५॥
यथालेख्ये क्वचिद्गाढैर्वर्णयोगैर्महीधरम् ।
वर्णविस्तारणैर्वीथीं म.लभूमिञ्च गह्वरम् ॥६६॥
रेखया सरितं वृक्षां विहगं हर्म्यमन्दिरम् ।
चित्रकारो विनिर्माति वस्तुना कल्पनेन च ॥६७॥
विमानादेवमाभाति नीचैःस्थितमहीतलम् ।
वैधातृकं महच्चित्रं न भूतं भावि नोऽथवा ॥६८॥

अथाहमतिथीभूतश्चतुस्तारकहोटले ।
भारतराजदूतस्य सारीपेसिरिफ़काभिधे ॥६९॥
जकार्तानगरे रम्ये केन्द्रस्थाने निवेशितः ।
चतुर्दशतमायां वै भूमिकायां निशामुखे ॥७०॥
तस्य नैशविहारस्य विलोक्य संविधानकम् ।
लघुता प्रस्फुटा जाता विधिसृष्टेरपि ध्रुवम् ॥७१॥
विभिन्नविश्वराष्ट्राणां प्रवेशद्वारपट्टके ।
आसीद्यन्त्राङ्कितं तत्र कालमानं पृथक् पृथक् ॥७२॥
अत्रासीत् शोभना संध्या निशीथः क्वापि गत्वरः ।
क्वचित्प्रभातं पूर्वाह्णोऽपराह्णश्चाथवा क्वचित् ।७३।
सर्वं निभाल्य सामोदं महिम्ना यन्त्रशास्त्रिणाम् ।
हस्तामलकवज्जाता वसुधा भूरिविस्तरा ॥७४॥
स्वयमुद्घाटितः प्राप्ते गते च स्वयमावृतः ।
अक्षिलक्ष्यीकृतस्तत्र कपाटश्चात्मयन्त्रितः ॥७५॥
जकार्तानगरी रम्या चलद्वाहनचञ्चला ।
स्फुरन्ती विद्युतां दीपैः कोलाहलविवर्जिता ॥७६॥
निचिता लोकसम्मर्दैः गीतध्वनिविनोदिनी ।
वलभीगोपुरद्वारसौधशृङ्गशतावृता ॥७७॥
जीवताऽपि मया सम्यक् स्वर्गस्थेनेव लोकिता ।
अन्तरिक्षावलम्बाऽसौ पुरुहूताऽमरावती ॥७८॥
शयितव्यं निकामं नो रात्रावासीत् तथापि मे ।
जातशङ्कस्य बालस्य ययाऽसंस्तुततल्पके ॥७९॥
प्रातरुत्थाय सोत्साहं सम्पादितमितक्रियः ।
श्रीमद्विनोदखन्नाख्यं राजदूतमुपाश्रितः ॥८०॥
कौंसलर्पदवीरूढं सुहृदं भटियाभिधम् ।
अपश्यं स्नेहसम्मुग्धान् दूतावासकुटुम्बिनः ॥८१॥
द्वितीयः सचिवः स्निग्धः श्रीकरारिमहोदयः ।
स्निह्यन् मयि सवात्सल्यं जातो ननु ममाग्रजः ।८२।

तेन सार्धं मया दृष्टो राष्ट्रियः संग्रहालयः ।
इण्डोनेशियराष्ट्रस्य ऐतिह्यपरिचायकः ॥८३॥
बालिजावासुमात्राणां कालीमन्तनकस्य च ।
लोम्बोकमदुरादीनामीरियञ्जयवासिनाम् ॥८४॥
विविधान्यस्त्रशस्त्राणि कलाशिल्पसमुच्चयः ।
प्रयत्नरक्षितान्यासन् नृकपालानि तत्र वै ॥८५॥
लक्षसंख्यः कथं ह्येको राष्ट्रवासी प्रतीयते ।
गत्वाऽन्यान्येषु राष्ट्रेषु ज्ञातुमेतद्धि शक्यते ॥८६॥
अथ त्रिवादने जाते सर्वं त्यक्त्वा समागतः ।
सुकर्णदत्तानामानं विमानस्थलमण्डपम् ॥८७॥
गरुडं¹ ह्यधिरूढेन मध्येमार्गं मयोहितम् ।
जीवो ब्रह्मैव यत्सत्यं विष्णुरूपमहं गतः ॥८८॥
विष्णोरंशं समाधाय गरुडो मां वहत्ययम् ।
स्वयं विमानीभूयापि मे प्रतिष्ठां प्रयच्छति ।८९॥
इत्येवं चिन्तयत्येव मयि यानं समुच्छ्रितम् ।
आससादासितव्योम दधानं मेघगर्जनम् ॥९०॥
उच्चियासु समुत्प्रेक्ष्य विमानं भूरिविक्रमम् ।
सुधार्थी गरुडः साक्षात् युयुत्सुः परिकल्पितः ।९१।
गरुडो यानरूपोऽसौ विनतानन्ददायकः ।
प्राच्यां ससार वेगेन घनमालां विदारयन् ॥९२॥
नीचैः रत्नाकरोऽपारः क्षितिजे व्योमसङ्गतः ।
समालोकि पयोहीनशुभ्रवरिदकर्बुरः ॥९३॥
ग्रामग्रामटिकाक्षेत्रनदीपर्वतमन्दिरम् ।
प्रत्यलक्ष्यत तत्सर्वं सुस्पष्टं लघुरूपकम् ॥९४॥
होरामात्रे गते काले न्गुराहरायसंज्ञके ।
वालिद्वीपस्य वायव्ये रुचिरे यानमण्डपे ॥९५॥

---

¹ 'Garuda Indonesia'—इति विमान-सेवा-नाम

घूर्णन् गर्जन् श्वसंश्चण्डं फूत्कुर्वाणश्च मेदुरम् ।
गरुडोऽवततारासौ सान्त्वितश्चालकैस्ततः ॥९६॥
तत्र प्रत्युद्गतश्चाहं प्रीत्या शिक्षाधिकारिणा ।
श्रीमत्सुपर्वताख्येन नीतश्चावासमन्दिरम् ॥९७॥
पथि गच्छन्नुदैनाख्यं विश्वविद्यालयं शुभम् ।
अपश्य स्वप्नसन्दृष्टं नियुक्तिर्यत्र मे मता ॥९८॥
धर्मप्रसारनाम्नीयं राजधानी सुविश्रुता ।
वाटिकेव समाभाति वालीद्वीपस्य गर्भगा ॥९९॥
नारिकेलवनीच्छन्ना कदलीमण्डपावृता ।
रसालैः पनसैश्चापि क्वचिद् द्वारि विमण्डिता ।१००।
पर्यायेण प्रकृतिसुलभाः प्रत्यहं वारिवाहाः
पीयूषाम्बुप्रचुरलहरीमुद्गिरन्तो निकामम् ।
सन्तप्ताङ्गान् सरणिमभितश्शाखिनो भावयन्तः
सेवावृत्तिं परमगहनामत्र सम्पादयन्ति ॥१०१॥
नित्यस्मेरा वसनकृपणाः प्रोन्नतोरोजवत्यः
नातिप्रौढाश्चटुलनयनाः स्वर्णचाम्पेयवर्णाः ।
संसेवन्ते समुदितदया रागिणां प्रोषितानां
अत्र स्वीयैर्विनतवचनैर्मानसं चन्द्रमुख्यः ॥१०२॥
विख्यातेयं शिवगुरुपुरी डेन्पसारेतिनाम्नी
उत्कल्लोलैश्चपलजलधेः क्षालिताङ्घ्रिर्नितान्तम् ।
कौवेरीयां श्रियमनुपमामापणैर्वादधाना
कुर्यात्केषां परिचयवतां विस्मयं नात्मरूपैः ।१०३॥

इति प्रोषितपथिकेन मिश्रोपाह्वेनाभिराजराजेन्द्रेण
विरचितं विमानयात्राशतकाख्यं काव्यं
परिसमाप्तम् ।

[रचनास्थलम्-डनपसारः, रचनातिथि-मईमासस्य द्वितीयः सप्ताहः १९८७]

श्रीवैष्णवीदेवी-यात्रावर्णनम्

(डा० उमारमण झा एम०, ए० न्यायाचार्यः, पी-एच० डी०,
डी० लिट्०श्री रणवीरकेन्द्रीयसंस्कृतविद्यापीठम्, जम्मू तवी)

सरम्ये सुक्षेत्र वसति जननी जम्मूनगरे
प्रसिद्धे दुर्गे भवति भुवि भक्तार्थसुलभा ।
त्रिकूटाख्ये शैले सुललितगुहायां भगवती
सदा शक्तिर्विष्णोरिह तु नगजा नृत्यतितराम् ॥१॥

जम्मूतो बसयानमस्ति सुलभं गन्तुं सहर्षं मुहु-
र्गन्तव्यं 'कटरास्थलं' भगवतीं ध्यात्वा तु होरादृ्य ।
नीत्वा तत्र प्रवेशपत्रमचिरं कृत्वाल्पहारं पुनः
पद्भ्यां सैन्धवमाश्रिताश्च जननीं प्राप्तुं समर्था जनाः ॥२॥

"माताजी" ति समुच्चरन् युवजनो मध्ये कुरङ्गीदृशां
"जै जै जै' बहुवारमेव सततं वृद्धा प्रवृद्धास्तथा ।
कुर्वन्त्यो लकुटिबलेन चलिता भावोन्मदा योषितः
सुन्दर्यः सुकुमा संगवलिता भक्तान्विता कोमलाः ॥३॥

शृङ्गारस्य च भक्तिभावसहितो मार्गे भवत्याश्रयो
यनां स्कन्धसमाश्रिता युवतयः प्रौढाश्च वृद्धास्तथा ।
पीत्वाऽऽनन्दकरं सुशीतलजलं चोष्णं पयश्चापरे
सानन्दं कृपशश्च यान्ति पुरुषा नार्यश्च मार्गे मुदा ॥४॥

गन्तव्यं कटरास्थलात्पथि पुनः प्रक्षाल्य पादान् नरैः
स्नात्वा वा शुचयो भवन्ति मनुजास्ते "वाणगङ्गा"-जले ।
ये दुष्टा अपि पापिनोऽशुचिरताः किं तत्र पुण्यात्मनः
सन्तुष्टाः प्रचलन्ति शुद्धहृदयाः प्राप्तुं स्ववाञ्छां ध्रुवम् ।५।

सोपानेन नरोऽथवा समतलप्रान्तेन गन्तुं क्षमाः
सोल्लासं सफला भवन्ति सुखिनो ध्यात्वाऽचिरं मातरम् ।
पीत्वाऽत्वा जलभोजनादिरुचिरं सम्प्राप्य मार्गे मुहु-
र्दृष्ट्वा सुन्दरदृश्यरूपमतुलं मुग्धा जनाः सोत्सुकाः ॥६॥

विद्युज्ज्योतिरुदेति दिव्यमथवा म.तुः प्रकाशो भवेत्
सन्ध्यायां प्रतिवा.ारं सुललितं भव्यं नवीनं महः ।
स्वर्लोकेऽपि सुदुर्लभं सुखमिदं प्राप्तुं यतो वर्तते
देवाश्चापि सदा वसन्ति सुखिनः प्राप्य त्रिकूटाचले ॥७॥

मातुर्ये "पदपादुका" शुभकरीं शान्तिप्रदां कामदां
प्राप्तास्ते सफला भवन्ति मनुजा यत्नं विना सर्वदा ।
धन्याश्चापि महीतले गुणयुताः पूज्याः प्रशस्ताः पुनः
किं किं नैव .दारविन्दयुगलात् प्राप्तुं च मातुः क्षमाः ॥८॥

मध्ये 'चार्धकुमारिकाख्यरुचिरं" रम्यं स्थलं पावनं
सन्त्यत्रैव सुमन्दिराणि भवनान्यन्यानि पण्यानि च ।
भुक्त्वान्नं दधिदुग्धभक्ष्यमधुराण्यन्यानि पेयानि च
प्राप्यात्रैव नरा विशालभवनं शान्तिं लभेरन् निशि ॥९॥

लोकानां गमनागमस्य सततं या शृङ्खला दृश्यते
मुग्धानां प्रमदाजनस्य बहुधा वृद्धाजनस्यापि च ।
तां दृष्ट्वा पुरुषाः प्रसन्नहृदया मुग्धासु मुग्धा बुधा
गच्छन्त्येव जना गिरौ भगवतीं स्मृत्वा तु रात्रिन्दिवम् ।१०।

सर्वे यूयं वदत मनुजा "वैष्णवि ! त्राहि दुर्गे"
उच्चैरुच्चैर्वदत सकला बालिका बालकाश्च ।
पृष्ठस्था वा वदत शिशवो येऽपि चाग्रे जना वा,
"मा दुर्गे त्वं जय जय" सदा श्रूयते कण्ठघोषः ॥११॥

काश्चिद् वृद्धा गलितदशना ध्यानमग्नाश्च भक्त्या
काश्चिच्चान्या सुपलितकचाः सस्वरं गीतमेव ।
गायन्त्योऽन्याः कम व.ना नृत्यभावैश्चलन्त्यो
दृष्ट्वा केषां मनसि न भवद् भक्तिभावस्य धारा ॥१२॥

मार्गे काचित्पतति सहसा धर्तुं कामोऽस्ति कश्चित्
काचित्कान्ता धरति सरला कामिनी कान्तदेहम् ।
काचिन्मुग्धा शिखरिदशना वीक्ष्य शैलस्य दृश्यं
विश्रान्तापि प्रचलति पुनः भक्तिभावैः प्रसन्ना ॥१३॥

भक्ताः केचिद्विदधति मुहुर्भक्तिभावं जनन्या।
केचिच्चान्ये ददति सहसा स्वं सहायं परेभ्यः।
मार्गे तावज्जलमपि कदाप्येव, नैवं च पीत्वा
धृत्वा धैर्यं नगपतिसुतां मातरं तां स्मरन्ति ॥१४॥

जीर्णा वृद्धा स्मरति जननीं दोलिकावाहनस्था
खञ्जः कुब्जो विधिहतजनः पामरो दीनहीनः।
"जै माताजी" हरतु सकलं कष्टपुञ्जं वदन्त-
स्सन्तश्चान्ये चरणचलिता मातृपादं स्मरन्ति ॥१५॥

"हस्त्याकारं" शिखरमचलं प्राप्य नूनं जनास्ते
श्रान्तास्सन्तो नगपतिसुतां मातरं तां स्मरेयुः।
गत्वा क्रोशं भवति सुलभं दर्शनं मन्दिरस्य
साक्षीभूता भवति जननी "सांझि" क्षेत्रात्सहाया ॥१६॥

पञ्चक्रोशात्मकमिह सखे! मार्गमेवं प्रयाहि
मन्दं मन्दं पथि सुखयुतं स्वेच्छयाऽनन्दयुक्तम्।
सामान्यानां सुलभगमनं सार्द्धहोरात्रयेण
भक्त्योपेतः सततसुखदं धामरत्नं परीया ॥१७॥

वैष्णव्याः शुभधाम भव्यमतुलं स्वर्गास्पदं सुन्दरं
शीतं स्वादु जलं छरन्ति सततं स्रोतांसि देव्याः स्थले।
नानापण्ययुताश्च सन्ति विविधा विश्रामगेहास्तथा
यत्रैषा जननी गुहागृहभवा "श्रीवैष्णवी" राजते ॥१८॥

स्नात्वा भक्तिपुरस्सरं हिमजलैः प्रक्षाल्य मार्गश्रमं
ध्यात्वा मातृपदारविन्दयुगलं स्थित्वा च पंक्तौ पुनः।
प्राप्ते त्वत्समये प्रविश्य तरसा नत्वा च पीठ महः
कृत्वाऽध्वे जलधारमध्यगमनात् प्रक्षालनं पादयोः ॥१९॥

मध्ये गुहाया जगदम्बिकायाः
सिंहस्य चिह्नं शुभदं करस्य।
श्रीशम्भुदेवस्य च दिव्यमूर्तिं
दृष्ट्वा प्रहृष्टा मनुजा भवन्ति ॥२०॥

महाकाली दुर्गा सततमनुकूलं प्रकुरुते
महालक्ष्मीश्चाद्या विभवसुखपूर्णान् निजजनान् ।
सदा वीणापणिः प्रचुरशुभविद्यां भगवती
त्रिदेवी पिण्डस्था किरतु सुखपुञ्जं दिशि दिशि ॥२१॥

अवतु सकलदीनान् भक्तियुक्तान् च काली
धनजनसुखपूर्णान् नः प्रकुर्याच्च लक्ष्मी ।
वितरतु बहुविद्या शारदा ज्ञानमाता
भवतु सततमाद्या "वैष्णवी" पिण्डरूपा ॥२२॥

ध्यानं भवान्या मनसा च कृत्वा
समर्च्य पिण्डस्थमहश्च दिव्यम् ।
समर्प्य देव्यै फलपुष्पधूपान्
प्राप्य प्रसादं सुखिनो नराः स्युः ॥२३॥

महाकालः शम्भुर्विलसति गिरौ शैलशिखरे
स चावश्यं दृश्यो भवभयहरो "भैरव" इति ।
त्रिकूटे देवानां भवति सुखदं दर्शनमहो
पलायन्ते पीडा विविधभवबाधाः किल यतः ॥२४॥

धनजनसुखपूर्णान् वैष्णवी लोकमाता
सकलजनहितार्थं शंकरी लोकवन्द्या ।
वितरतु सुखशान्तिं सर्वकल्याणमूर्त्तिः
किरतु विविधमोदं श्रीशिवा नः प्रसन्ना ॥२५॥

मातरं वैष्णवीं नत्वा तस्यै देव्यै पुनः पुनः ।
समर्प्यतेऽत्र वाक्पुष्पमुमारमणशर्मणा ॥२६॥

○

ॐ नमः परमात्मने ।

श्रीचारुदेवशास्त्रिप्रणीतम्

श्रीगान्धिचरितम्

अथ प्रथमः परिच्छेदः

महात्मेति समाख्यानं यस्येह विदितं भुवि ।
लोकोत्तरं च चारित्रं स वाचां विषयोऽस्ति नः ॥१॥
महितो यश्च लोकस्य महतोऽमहतोऽपि च ।
आकुमारं यशो यस्य स वाचां विषयोऽस्ति नः ॥२॥
योऽभ्यस्यति कलावेको धर्मसूनुरिवापरः ।
आसिधारं व्रतं तीव्रं स वाचां विषयोऽस्ति नः ॥३॥
ब्रह्मक्षत्रे विशश्शूद्रा अन्त्यजाश्श्वपचा अपि ।
आत्मैवाभून्मुनेर्यस्य स वाचां विषयोऽस्ति नः ॥४॥
महेश्वरे परं श्राद्धः परं सद्योगमास्थितः ।
योऽपाकरोद्द्वियं सर्वां स वाचां विषयोऽस्ति नः ॥५॥
यो न हृष्यति संपत्त्या विपत्त्या च न दुःख्यति ।
शुभोदर्काः क्रियाः कुर्वन्स वाचां विषयोऽस्ति नः ॥६॥
स्तुतिनिन्दे अनादृत्य लोकसङ्ग्रहतत्परः ।
इच्छति ब्रह्मभूयं यः स वाचां विषयोऽस्ति नः ॥७॥
येन नीतोऽनुशिष्टश्च मर्त्यलोकोऽपि नाकति ।
लब्धालोकः सहामोदः स वाचां विषयोऽस्ति नः ॥८॥
अकारणद्विषः कांश्चित्परार्थेनोदरम्भरीन् ।
यो जिगीषति हार्देन स वाचां विषयोऽस्ति नः ॥९॥

य: प्रमाथमनालम्ब्य सहोद्योगं विवर्ज्य च ।
मोक्षमीप्सति वर्षस्य स वाचां विषयोऽस्ति न:[1] ॥१०॥

अस्ति सुराष्ट्रदेशे पोरबन्दरमिति ख्यातमपृथुलं सामिस्वायत्तं राज्यम् । एतद्धि हनुमद्वंशीया बाहुजा:[2] प्रशासति । ऊर्जस्वले[3] द्विषन्तपे[4] प्रथितयशसि श्रीविक्रमजिति भूपे भुवं शासति

वंशवर्णनम् प्रधानसाचिव्यं गान्धि[5]वंशजेष्ववतस्थे । तदानीं श्रेष्ठ-युत्तमचन्द्रो गान्धी प्रधानसचिवपदं भूषयाम्बभूव । स्थिर-धीर्दीर्घदृष्टिर्यतचेता: श्रीयुत उत्तमचन्द्र: कार्यकौशलेन गुणमहिम्ना च राजवंश्यानां प्रजानां च बहुमतो बभूव । राजकार्यं निर्वाहयन् सोऽन्तरा अन्तरा स्वस्य स्वाच्छन्द्यप्रियत्वमपि प्रकटयाञ्चकार ।

अप्राप्तव्यवहारे श्रीविक्रमजित्सिंहे तस्य माता कार्यासनं परिजग्राह । एकदा किल राजप्रसू:[6] कस्यापि हेतोरमात्याय श्रीलायोत्तमचन्द्राय भृशं चुकोप, अधिकाराच्च तं भ्रंशयाञ्चकार आदिदेश च सैन्यान् गृहा अस्याग्नेयचूर्णेन निर्हण्यन्तामिति[7] । एवमव-

---

१. निरायुधा अपि परतन्त्रा: प्रजा यदि राज्यतन्त्रस्य नोपकुर्युरनिष्टानि शासनानि चातिक्रामेयुर्विप्रकृता: प्रमाथाय प्रचोदिता अपि च प्रमाथं परिहरेयुस्तर्हि ध्रुवं ता: स्वातन्त्र्यमाप्नुयुरिति कथानायकस्य श्रीगान्धिनो राद्धान्त: । वर्षशब्दोऽत्र देशवचन: । भरतस्य वर्षं चेहाभिप्रेतम् ।

२. ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्य: कृत: इत्यादिश्रुतिप्रामाण्याद् बाहुजा: क्षत्रिया: । तथा च क्षत्रियनामस्वमर:—मूर्धाभिषिक्तो राजन्यो बाहुज: क्षत्रियो विराट् इत्यादि पठति ।

३. ऊर्जस्वलमिति ज्योत्स्नातमिस्रेत्यादिना शास्त्रेण वलच्प्रत्ययान्तं निपातितम् । ऊर्जस्वल: स्यादूर्जस्वी य ऊर्जोऽतिशयान्वित:—इत्यमर: । ऊर्ज: शब्दोऽदन्त: सान्तश्च ।

४. द्विषत्परयोस्तापे: इत्यनेन खच । अरुर्द्विषत्० इति मुम् ।

५. गान्धीति गन्धानां पणितुराख्या च्युतसंस्कृतिकापि लौकिकीहादृता । महात्मन: पूर्वजा: किल गन्धानां पेणिर इति श्रूयते ।

६. जनयित्री प्रसूर्माता जननी—इत्यमर: ।

७. हन्तेरत्पूर्वस्य इत्यनेन योगेन णत्वम् ।

स्थितेऽमात्य उत्तमचन्द्रः पुत्रकलत्रादिभिः समं यवनगृह[1]मिति पत्तनं प्रति प्रतस्थे। तत्रत्यं यवनप्रभुं च प्रपेदे। यवनप्रभुश्च तस्मै प्रीतिपुरःसरं स्वागतं व्याजहार। अमात्यश्च दक्षिणेतरेण करेण मूर्ध्नि निहितेन तं प्रणनाम। सव्येन पाणिना शिरसि निहितेन प्रणतिः समुदाचारातिक्रम[2] इति लोकविद्विष्टा। राजसभायान्तु साऽधिक्षेप इवेति परं दूषणं गण्यते। तस्मात् तदमात्यस्य चरितं राजसभासदोऽत्यर्थं दिद्विषुः। यदा च यवनप्रभुः किं कारणं भवान् विरुद्धेन प्रकारेण मामभ्यवीवदतेति तं पप्रच्छ तदाऽमात्य एवं प्रत्युवाच—श्रूयतां प्रभो! पोरबन्दरराजकुलप्रसूतैः कदर्थितो निराकृतश्चाप्यहं सफलीकृतभर्तृपिण्डो भृत्य इव नित्यं तच्छिवानुध्यानपरो भविष्यामि सततं च तद्धितं कामयिष्ये। अतोऽहमेतं वामेतरं करं तन्नमस्यायां विनियोगाय रिरक्षिषामीति। एतदाकर्ण्य यवनप्रभुरस्यामात्यस्य स्वामिनि भक्तिं स्वदेशेऽनुरक्तिं तेजस्वितां च सम्यगनुमिमाय। अस्य स्फुटवादितया च प्रमनाः[3] स एनं प्रधानसाचिव्ये नियुयुजे।

ऊर्ध्वञ्च लघोः कालात् प्राप्तव्यवहारो गुणगृह्यः[4] श्रीविक्रमजित्सिंहः स्वं भूतपूर्वममात्यं सुमेधस[5]मुत्तमचन्द्रमाकार्य सम्यक् सत्कृत्य च यथापूर्वं व्यापारयामास।

श्रीयुक्त उत्तमचन्द्रे स्वर्याते सति तदात्मजः श्रीकर्मचन्द्रो गान्धी तत्पदमधितष्ठौ। अमात्यः श्रीकर्मचन्द्रः पञ्चविंशतिमब्दान्महता

---

१. जूनागढ़ इति रूढिः।

२. अत्र मुहम्मदानुगानां समुदाचारोऽभिप्रेतः। तत्रैक एव पाणिः प्रणतौ व्यापार्यते। आर्याणां तु युतं हस्तद्वयमञ्जलिरित्याख्यं शिरसि निधीयत इत्याचारः। उक्तं च। वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् इति।

३. प्रकृष्टं मनो यस्य सः। हृष्टमानस इत्यर्थः।

४. गुणं गृह्यत इति। पदास्वैरिबाह्यापक्ष्येषु च इति पक्ष्येऽर्थे ग्रहेः क्यप्। गुणपक्षपातीत्यर्थः।

५. शोभना मेधाऽस्येति सुमेधाः। सुधीरित्यर्थः। नित्यमसिच्प्रजामेधयोः इति बहुव्रीहेरसिच्समासान्तः।

नैपुणेन[1] पोरबन्दरराज्यकार्यंजातं चकार। ततः केनापि कारणेना-वनिपस्तस्मिन् विमना बभूव। एव सत्यमात्यो राजकोट इत्यत्र प्रधान-साचिव्यमवाप्य पुत्रकलत्रादिभिः समेतः तं प्रदेशं जगाम। स राजकोट-राज्यहिताय तथा प्रयेते यथास्मिन्नचिरेण पिप्रिये[2] भूमिपः। भूमि सम्पदं चास्मै दित्साञ्चक्रे। कर्तव्यनिरतोऽगृध्नुर्गतस्मयः श्रीकर्मचन्द्र-श्चिन्तयामास—एवं भूमिप्रतिग्रह उत्कोचान्न विशिष्यते। वैतनिकः सन् यदहमेतद्राज्यमुपाकार्षम्, तद् धर्ममेवाचारिषम्। सम्पदः स्वीकृतिस्त्वनौचितीं नातिक्रामतीति। एवं निश्चितमतिरमात्यः प्राभृतं प्रत्याचख्यौ। पश्चान्नृपतिना भवता स्वप्रसूतिवृत्तिरवश्यं कल्पनीयेति भूखण्डस्यादानमार्थादापद्यत इत्यादिभिर्वचोभिरसकृत् प्रयुक्तः श्रीकर्मचन्द्र उपह्रियमाणस्य कनीयांसमेवांशमादातुमनुमेने।

श्रीकर्मचन्द्रस्यापरो जीवनवृत्तान्तस्य धीरत्वं निर्भीकत्वञ्चोप-पादयति। तद्यथा—एकदा किल राजकार्यप्रतिनिधिरमात्यकर्मचन्द्रस्य संनिधौ राजानं परुषाभिर्वाग्भिस्सन्ततक्ष। इदं ह्यमात्यो न सेहे पश्यं च प्रतिनिधिं जगर्हे। क्रोधताम्राक्षः प्रतिनिधिः कर्कशमिदममात्यमूचे—त्वरितं भवतेदं दुर्वृत्तमनुशोच्यम्, अहञ्च क्षमां याच्यः। इतरथा भवानपि मत्सकाशादवज्ञामवाप्स्यतीति। परममात्यः श्रीकर्मचन्द्रः सत्यनिष्ठ इति नानुतापं भेजे, धीर इति च न क्षमां ययाचे। एवं सति सुतरां संदिदीपेऽस्य क्रोधः, ववृधे च नयनयोररुणिमा[3]।

---

१. हायनान्तयुवादिभ्योऽण् इति युवादित्वादणि रूपम्। निपुणस्य भावो नैपुणम्।

२. प्रीङ् प्रीतौ इति धातोर्दैवादिकाल्लिट्। अयं सकर्मक इति भट्टोजिदीक्षितवचः प्रायिकम्। नित्यत्वे त्वस्य महाकविप्रयोगा विरुध्येरन्। कविकुलपतिः श्रीकालिदासोऽपि नित्यं सकर्मकत्वं नाभ्युपैति। तथा हि तत्रभवान् प्रायुङ्क्त—

तत्र सौधगतः पश्यन्यमुनां चक्रवाकिनीम्।
हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये॥

३. अरुणस्य भावः अरुणिमा। वर्णदृढादिभ्यः ष्यञ्च इत्यनेन चकारानुकृष्ट इमनिच्।

परममात्यो मनागपि न विव्यथे। एवं विवदमानयोस्तयोः कियानपि कालो ययौ। पप्रथे च पुर्यां प्रवृत्तिः[1]। चुक्षुभुश्च[2] पौराः। पौरजान[3]-पदक्षोभं श्रीकर्मचन्द्राय ग्रहिलत्वं[4] च समीक्ष्य सोऽनन्यगतिः प्रतिनिधि-स्तेन सन्दधे।

श्रीकर्मचन्द्रो भगवति नितातं श्राद्धः[5] तदुपासायां नित्यं रेमे। भगवद्गीताश्च[6] नैयत्येनाधिजगे। सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेति श्लोकार्धं स परमादरेणाम्रेडयामास।

एवं पुण्यशीलस्य श्रीकर्मचन्द्रस्य भार्यापि गुणैतस्य सदृशी बभूव। पतिशुश्रूषणे रता दैवतार्चायां प्रवृत्ता ब्राह्मणादिसपर्यायां प्रसक्ता व्रतोपवासचर्यायां प्रसिता सा सर्वस्य मान्या बभूव। समृद्धिमत्यपि सा विनीतवेषा। संभाविताप्यनुत्सिक्ता। उच्चैःशिरा अप्यधोदृष्टिः। कृशतनुरपि सा महासत्त्वा। नित्यं धर्मानुष्ठानेन वनीपक[7]मनोरथ-प्रपूरणेन च सा स्वगृहं तीर्थतां निनाय। आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानामिति कविभणितिमनुवर्त्तमाना साऽऽर्तानामातु-

---

१. वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्याद्—इत्यमरः।

२. क्षुभ सञ्चलने इत्यकर्मकाद्दैवादिकाद्धातोर्लिट्।

३. पुरे वसतीति पौरः शैषिकोऽण्। जनानां पदं जनपदः। परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति परवल्लिङ्गत्वे प्राप्ते नाड्यपजनोपपदानि व्रणाङ्गपदानि इति लिङ्गानुशासनात् पुंस्त्वम्। जनपदे भवः जानपदः।

४. ग्रहिलत्वं निर्बन्धपरत्वम्। तथा च नैषधे प्रयोगः—
न निशाऽखिलयापि वापिका प्रससाद ग्रहिलेव मानिनी।

५. श्रद्धावान् श्राद्धः। प्रज्ञाश्रद्धार्चाभ्यो णः इति मतुबर्थीयो णः।

६. गीता इति पदं प्राचीनाः प्रायेण स्त्रियां बहुत्वे प्रयुयुजिर इति नागोचरं विदुषाम्। स्त्रियामेकत्वे प्रयोगस्तु नचिरप्रवृत्तः।

७. वनीयको याचनको मार्गणो याचकार्थिनौ इति याचकानामस्वमरः। तत्र वनीपक इत्यपि पाठो लिपिसारूप्यजः शिष्टानुमोदितः। अनयैव दिशा-ऽसद्रूपाणि शब्दान्तराण्यपि साधुत्वमापद्यन्ते। वनीं पातीति तु क्लिष्टो विग्रहः।

राणां च दुःखं लघयितुं[१] मुक्तहस्ता धनमुत्ससर्ज ।

श्रीगांधिनो जन्माद्युदन्तः

पञ्चविंशत्युत्तरनवशतोत्तरसहस्रतमे विक्रमवत्सरे कार्तिके मासि मङ्गल्यायां कृष्णप्रथमायां पुण्ये पोरबन्दरपुरे कथापुरुषो महात्मा गुण्याच्छ्रीकर्मचन्द्रात् प्रातःस्मरणीयायां श्रीपुतलीबाईदेव्यां सत्यामजायत । प्रसन्नदिग् मृदु-सुरभिवातं तज्जन्मदिनं सर्वेषां सुखकरमभूत् । अहो धर्ममुद्भावयिताऽधर्मं च न्यग्भावयिता कश्चित्प्राणभृद्भुवमवतरतीत्यनन्दिषुर्दिविषदः[२] । आनन्दनिर्भराश्च ते जलजानध्मासिषुः सुमनसश्चावर्षिषुः । अमात्यकर्मचन्द्रेणाधीष्टः पुरोधा अस्य पृथुकस्य जातकर्मादिक्रियाः शास्त्रदृष्टेन विधिना व्यधात् । पिता चास्य मोहनदासो गान्धीति नामाकरोत् । पञ्चवर्षदेश्य[३] एवैष मातुरुपदेशे मनोऽददात् पितुश्च कथा उपाशृणोत् । लिपिग्रहणं च प्रारभत । आसप्तमाब्दं श्रीमोहनदासः पोरबन्दरपाठशालायां विनयमग्रहीत्[४] । ततो जनयितरि राजकोटं गते सति वर्णाक्युलर् स्कूल इत्यत्र वर्षत्रयं शिक्षामुपादित । दशवर्षः[५] सोऽमदाबादसुराष्ट्रहाईस्कूल इत्यत्राध्ययनमुपाक्रंस्त । द्वादशवर्षः स कस्तूरबाई इति सुगृहीतनामधेयामात्मनः सदृशीं सुवर्णां कुलोद्गतां कन्यामुपायंस्त । सप्तदशवर्षोऽयं प्रावेशिकीं[६] परीक्षामुदतारीत् । उत्तीर्य चेमां परीक्षां भावनगरमहाविद्यालये प्रवेशमलब्ध ।

अनतिक्रान्तकैशोर एव श्रीमोहनः प्रकृत्या सत्यप्रवण आसीत् । नास्ति सत्यात्परो धर्म इति स दृढं व्यश्वसीत् । सततमाचाररक्षण-

---

१. लघूकर्तुम् । तत्करोति तदाचष्ट इति णिच् ।

२. देवा इत्यर्थः । आदितेया दिविषदो लेखा अदितिनन्दनाः—इत्यमरः ।

३. ईषदसमाप्तं पञ्च वर्षाणि भूतः पञ्चवर्षदेश्यः । ईषदसमाप्तौ कल्पब्देश्य-देशीयरः इति देश्यप्रत्ययः । तद्धितार्थे द्विगुः ।

४. विनयः शिक्षा । विनयं प्रणतौ प्राहुः शिक्षायां विनयो मतः—इति विश्वः ।

५. दशवर्षं भूत इति दशवर्षः । चित्तवति नित्यम् इति ठञो लुक् ।

६. प्रवेशः प्रयोजनमस्या इति । तदस्य प्रयोजनम् इति ठक् ।

परोऽभूत् । तनीयसीमपि स्खलितिमत्यन्तमशोचीत् । एकदा किल पितृशुश्रूषारतस्यास्य व्यायामकालोऽत्यगात् । तदाऽभ्रितमाकाशमिति स कालात्ययं नालक्षयत् । यावत्स व्यायामभुवं नाप्नोत्तावद् व्यायन्तुं समवेता जना व्यपायन् । अपरेद्युरध्यापकेन किमिति ह्योऽसंनिहित आसीरिति पृष्टो यथातथमुदाहरत् । अध्यापकस्तु वैतथ्यमस्य वचसोऽभिशङ्क्यैनमाणकद्वयं दण्डयत् । एतेन व्यतिकरेणास्य हृदय-परिमाथिनी रुजाऽऽविरासीत् । अहमनृतीत्याशङ्कितो गुरुणेति स बलवद् व्यषीदत् । परं सत्ये स्वाभिनिवेशं नेषदप्यश्लथयत् ।

हाईस्कूल इत्यत्राधीयानः श्रीमोहनः सम्पर्कमनभिलाषुकोऽपि कदाचित् तद्दोषापनिनीषयैव प्रयुक्तो दुर्वृत्तैरुद्धतैश्छात्रैः सम्पृच्य व्यसनेषु प्रासजत् । कुतर्कनुन्नः स न किमपि श्रदधत्त । ईश्वरमपि कुशलकल्पनामात्रोत्थमभ्यमंस्त । मांसादिवर्ज्यभोजने न किमपि वचनीयमैक्षत । अभुक्त चान्यैः सतीर्थ्यैः सहासकृन्मांसम् । इदं च प्रथमं विरसमुद्वेजकं च प्रतिभादपि कालेन रुच्यमापतन्मनसः । यदा यदा चैनदश्नात्तदा तदाऽशनाया मे नास्तीति व्यपदिश्य मात्रोप-कल्पितं मधुरमप्यभ्यवहारं पर्यहरत् । तेन चात्मानमनृतिकतामनयत् । परं नैष चिरमेवं भवितुमाचरितुं वाऽशकत् । सात्वतां[1] कुले जातस्यास्य संस्कारैरुदबोधि, अनुतापश्चानल्पः समजनि । यत एवं विरुद्धमाचरता ऽनेनाहारि[2] चेतःशान्तिरतस्तत्प्रत्यापत्तये महान्तं यत्नमातिष्ठत् । उक्तपूर्वैर्बालैश्च सङ्गं त्यक्त्वा पुनरपि शास्त्रेषु यथापुरं श्रद्धामदधात्, पुरातनानाचारांश्च बह्वमन्यत । प्रत्यजानीत च यतो न शक्यं मया-ऽनृतमभिवदितुमतो जीवन्त्यां महनीयायां मातरि नाहं मांसमशिष्या-मीति । एवं च परिहृतं मांसाशनमत्यन्ताय परिहृतमभूत् ।

प्रावेशिकीं परीक्षामुत्तीर्णस्य श्रीगान्धिनः पिता स्मर्तव्यशेषताम-यासीत् । भावनगरमहाविद्यालये नैदाघेऽनध्याये प्रवृत्ते सति श्रीगांधी राजकोटमागात् । तत्र कश्चिद् द्विजन्मा तमन्वशात्—कामये भवान्

अध्ययनार्थमाङ्गल-देशगमनम्

१. भागवतानामित्यर्थः ।

२. हरतेर्ण्यन्तात्कर्मणि लुङ् । हारितेत्यर्थः ।

पित्राध्यासितपूर्वं सचिवपदमधिरोहेदिति। तच्चेहाध्ययनेन न शक्य-मधिरोढुमिति पश्यामि। अद्य विपरिवृत्तो लोकः, क्षिप्रं च परिवर्तते। उपाधिपरीक्षोत्तीर्णा अपि विरलमेव वेतनं लभन्ते। यावता च कालेन भवान् उपाधिपरीक्षामुत्तीर्य व्यवहाराध्ययनं परिणमयिष्यति तावताऽधीतव्यवहारा बहवोऽपरे सचिवपदप्राप्तये कल्पिष्यन्ते। अतोऽक्षमोऽयमर्थः कालहरणस्येत्यत्र विद्योपादानं विरमय्यैषम एवाङ्ग्लदेशं प्रति प्रस्थानीयम्, उत्तरवादित्वलाभाय[1] च व्यवहाराध्ययनं प्रक्रमणीयमिति। एवमनुशिष्टस्य श्रीमोहनस्याङ्ग्ल-देशदिदृक्षोच्चपदप्रेप्सा चाङ्ग्लदेशगमने प्रयोजिके अभूताम्। अतः सोऽग्रजाय स्वाभिलाषं न्यवेदयत्। स चानुजस्य हितमनुरुन्धानस्तम-भ्यनन्दत्, अचिन्तयच्च पित्र्यं रिक्थमपि विक्रेयं चेत्स्यात् स्यान्नाम, न तेनास्मत्क्षतिः। व्यवहाराधीतये तु तातेन मोहनेना[2]ङ्ग्लदेशस्य गमनमवश्यसंविधेयं मयेति। परं यदास्य माता विदेशगमनोपन्या-समवेदीत्तदाऽशोचीत्। विदेशस्थोऽयं विलासप्रियो वा भवेत्, स्वैरितां वा व्रजेत्, खृस्तमतं वाऽऽश्रयेद्, उपतप्तो[3] वाऽनवेक्षितोऽनुपक्रान्तश्च[4] महद्दुःखमनुभवेदित्याद्याशङ्कमाना सा परं पर्याकुलाऽभूत्। उद्विग्नां मातरमुपसान्त्वयितुमनुमानयितुं च श्रीगान्धी बहुधा प्रायतिष्ट।

विविधं बोधिता सनिर्बन्धं प्रार्थिता च सा यदा नानुमतिमद-दात्तदा श्रीगान्धिनो हिताकांक्षी कश्चिद्यतिस्तां विदेशगमनेन भवित्रीं स्वसूनोर्भूतिमावेदयत्। श्रदधापयच्च नैष कदाचिन्न्याय्यात्पथः प्रविचलिष्यतीति। तत्र यतौ श्रद्धामुपेयुषी सा तद्वाचोयुक्त्या[5]ऽपास्त-संशया प्रस्तुतं विदेशगमनमन्वमन्यत। प्रस्थानात् प्राक् च सा तनूज-

---

१. पर्याप्तिवचनस्य क्लृपेरलमर्थत्वाद् नमःस्वस्तीत्यादिना चतुर्थी।

२. मोहनोऽत्र गमनक्रियायाः कर्ता देशश्च कर्म। उभयप्राप्तौ कर्मणि इति नियमात्कर्मण्येव षष्ठी कर्तरि चानुक्ते तृतीया।

३. उपतप्तो रुग्णः। उपोपसृष्टः तप सन्तापे इति धातू रोजने वर्तते। तथा हि च्छन्दोगा आमनन्ति—तं चेदेतस्मिन्वयसि किञ्चिदुपतपेत्स ब्रूयात्इत्यादि

४. अचिकित्सितः। उपक्रमः स्यादुपधा चिकित्सारम्भविक्रमे इति विश्वः।

५. वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु इति षष्ठ्या अलुक्।

मिमाः प्रतिज्ञा अकारयत्—सुरां न पास्यामि, मांसं नाशिष्यामि, मैथुनं वर्जयिष्यामीति। एवमनुज्ञातः श्रीगान्धी पितृव्येणोपहृत-सहायको मात्रा कृतप्रास्थानिक[1]कौतुको भ्रात्रा दत्ताशीराङ्गलदेशं प्रति प्रास्थित। प्रस्थानकाले च स एकोनविंशतिवर्षोऽभूत्।

लन्दननगरे वसतिः

पञ्चचत्वारिंशदुत्तरनवशतोत्तरसहस्रतमे वत्सरे भाद्रपदे मासि श्रीगान्धी द्वाभ्यामपराभ्यां स्वदेशजाभ्यां सहाङ्गलदेश-राजधानीं लन्दनाख्यामवापत्। विक्टोरियापथिकाश्रमे च वस्तुमारभत। भरतवर्षीयः प्रत्नशिष्टाचारप्रिययोर्मातापित्रोरय-मात्मजः प्रतीच्यां सभ्यतां नावेत्। पथिकाश्रमस्था अस्य नेपथ्यं संलापं वर्तनं च नाभ्यरोचयन्नत्यर्थं च तमुपाहसन्। तैर्नित्यमुपहा-स्यतां नीतः श्रीगान्धी तदाश्रमत्यागमावश्यकमजानात्। अतः स स्वदेशजं कमपि सुहृदं कुतश्चित्कालादाङ्गलदेशे कृतवसतिं विद्युद्वार्तया-कारयत्। आगतः सुहृच्छ्रीगान्धिनं स्वदेशरीत्या क्लृप्तवेशं दृष्ट्वा परं विस्मयमयासीत्। सपदि च तं रिचमण्डाख्यां स्ववासभूमिमनैषीत्। तत्र स्वेनाध्युषिते चैकस्मिन्निकेतने तस्य वासमकल्पयत्।

कञ्चित्कालं श्रीगान्धी सुहृदोऽस्य सविधेऽत्यवाहयत्। स च सुहृत्सोदर्यमिव तमाचरत्। आङ्गलाचारमग्राहयत्। आङ्गलसंलाप-प्रकारमपि प्रादर्शयत्। यद्यच्च हितं पथ्यं चापश्यत्तत्तच्छ्रीगान्धिन-मुपादिशत्। इह देशे मांसाशनमावश्यकमिति च निरदिशत्। परं स्थिरनिश्चयं तन्मनो न प्रतीपयितुं प्राभवत्। यदि मांसं नाशिष्यसि तर्हि तन्वीयं ते तनूरधिकं तानवं प्राप्स्यति दौर्बल्यं च भूयो भविष्यतीति मित्रेणासकृत्प्रयुक्तोऽपि श्रीगान्धी व्यञ्जनाद्यपेतं शाकादि भुञ्जानोऽनाशितो[1]ऽपि मांसं नाश्नात्। प्रतिज्ञां विरोद्धुं

---

१. प्रस्थानकाले भवं प्रास्थानिकम्। कालाट्ठञ्। प्रस्थानशब्दोऽत्र प्रस्थानकाल उपचरितः। कौतुकानि मङ्गलानि। अत्र कोषः—

कौतुकं नर्मणीच्छायामुत्सुके कुतुके मुदि।
पारम्पर्यागतख्यातमङ्गलोद्वाहसूत्रयोः ॥

१. आङ्पूर्वादशेः कर्तरि क्तो निपातित आशितः कर्ता इत्यादात्तत्वं विदधता

नोत्सह इत्येव चोत्तरं प्रादात् ।

एकदा किल किमपि नाटकं प्रयोगतो[1] दिदृक्षुः श्रीगान्धिन एव सुहृत्तत्साहचर्यं कामयमानस्तमाकारयत् । ततस्तौ मिलितौ रङ्गं प्रति प्रास्थिषाताम् । संनिहिता भोजनवेलेति भुक्त्वैव गमनीयमिति कृतमती तावन्तिकस्थं महान्तमेकं हर्म्यप्रायं भोजनालयमवाप्य तत्र भोजनेच्छया व्यालम्बेताम् । स्वं स्वमासनमध्यासीनैः सभ्यैः शतशो जनैः परिगतः श्रीगान्धी स्वदेशजस्य मित्रस्य संनिकर्ष एवासनमग्रहीष्ट । परिवेष्टारश्चोच्चावचं भोज्यपेयादिकं परिवेष्टु[2]मारभन्त । परिवेषितं भोज्यं दृष्ट्वा जातशङ्कः स मित्रं सगद्गदं मन्दमन्दमिदमन्वयुङ्क्त—कस्य विकृतिरेष यूष इति । [3]तत्खलिवमामाचारविरोधिनीं पृच्छां श्रुत्वा सम्भ्रान्तमनः समजायत । अब्रवीच्च—सभ्यो बुभूषुर्भवान् किमिति सभ्यतानियमान्नानुवर्तते । मिलितायां परिषद्येवञ्जातीयको[4]ऽनुयोगः समाजस्थितिं भिनत्ति । तूष्णीं भुज्यतामिति । श्रीगान्धी मित्रस्येमामनुशिष्टिमनादृत्याराद् स्थितं परिवेष्टारं पर्यनुयुज्याजानात् पललसम्पृक्तो यूष इति । एतज्ज्ञात्वा स पादमूलमुपसर्पतो दिदङ्क्षतो दन्दशूकादिव ततो भोजनादुदविजत । स मातुरुपदेशस्य स्वस्य संविदाश्चास्मरत् । महच्चानुसमज्वरत्[5] । क्षणं च प्रतिपत्तिमूढोऽभवत् । तत ऊर्ध्वमा-

---

सूत्रकारेण । ण्यन्ताद्वाऽशेः कर्मणि क्तः । आशितो भोजितः । अत्र तु गौण्या वृत्त्या तृप्त इत्यर्थः ।

१. प्रयोगमधिकृत्येत्यर्थः । ल्यब्लोपे कर्मण्युपसंख्यानम् इत्योपसंख्यानिकी पञ्चमी । तस्यास्तसिरादेशः ।

२. परिपूर्वो विष्लृ व्याप्तौ इति धातुः परिवेषणे वर्तते । माठरकौण्डिन्यौ परिवेविषाते इति भाष्यप्रयोगात् ।

३. तदिति सर्वनाम मित्रं प्रत्यवमृशति ।

४. प्रकारवचने जातीयर् इति प्रकारवति जातीयर्प्रत्ययः ।

५. अनुसमज्वरत् अन्वतप्यतेत्यनर्थान्तरम् । तथा चौपनिषदी श्रुतिः—

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥

सनादुत्थाय च बहिरागमत् ।

यतो रिचमण्डतो लन्दने सप्ताहस्य सकृद् द्विर्वाऽऽगमः शक्यो-ऽभूदतो भिषजा श्रीप्राणजीवनेन प्रचोदितः श्रीगान्धी लन्दननगर्यां क्वचिद्गेहे कुटुम्बाङ्गतया स्थितिमकुरुत ।

अचिरेणैव च कालेन लन्दनवासेन यूनः श्रीगान्धिनो हृदयमयो-धातुरिवायस्कान्तशकलेन हारिण्या[1] पश्चिमया सभ्यतया समाकृष्टम् । सुहृत्प्रेरणया च फलितम् । आङ्गलाचारेष्वस्याभि-रुचिरुदैत् । क्रमेण च प्रचयमुपैत् । महानस्य तत्र पक्षपातो ऽभूत् । स आङ्गलमाकल्पम्[2], आङ्गले नृत्यगीते, आङ्गलानुद्धर्षान्, आङ्गलानाचारांश्च मनोज्ञा[3]न्यमन्यत । अतो नृत्यगीतादिष्वात्मानं विनेतुं स कमपि सभ्यतममाङ्गलमुपासीदत्[4] । स च तं नियोगतः प्रत्यहमुपादिक्षत् । एतावन्मात्रया विलासप्रवृत्त्या श्रीगान्धिनश्चेतः कदाचिदस्वास्थ्यमभजत् । मातुर्वचश्चिन्तयमानस्य तस्य मनसो वैयग्र्यमभवत् । तेन च नृत्यतोऽस्य स्खलनं गायतो वैस्वर्यं च समवर्तेताम् । परं निरन्तरं प्रयतमानेन मया सभ्यता पुराधिगम्यते[5] इत्याशंसा तमाश्वासयत् ।

सभ्येन मानवेन व्याख्यानकलाकोविदेन भाव्यमिति प्रत्ययितः श्रीगान्धि बेल् इति नामानं वाग्मिनं गुरुमभ्यगच्छत् । व्याख्यानकलां चाभ्यास्यत् । एतदभ्यासनिरतस्यास्यैकपदे मोहो नष्टः प्रबोधश्चो-न्मिषितः । स आत्मन्यचिन्तयत्—न मया यावज्जीवमाङ्गलदेशे वस्तव्यमस्ति । व्याख्यानपाटवमधिगत्यापि किमहं करिष्यामि ।

---

१. अवश्यं हरतीति हारिणी । चेतोहरेत्यर्थः । आवश्यके णिनिः ।

२. आकल्पो वेषः । आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम्—इत्यमरः ।

३. नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम् इति क्लीबं शिष्यते । एकवद्भावस्तु वैकल्पिकत्वान्न कृतः ।

४. उपपूर्वः सदिर्गुरोरभिगमे वर्तते । पाणिनिमुपसेदिवान् कौत्सः ।

५. यावत्पुरानिपातयोर्लट् इति पुराशब्द उपपदे वर्तमानसमीपे भविष्यति लट्प्रत्ययः ।

नर्तं नर्तं कथङ्कारं[1] सभ्यतां चाप्स्यामि। वीणादिवादित्रवादनं तु स्वदेशेऽपि शक्नोमि शिक्षितुम्। अहं च विद्यार्थी। अतोऽहमनन्यमना विद्यामुपाददीय[2] स्ववृत्तियोग्यत्वं च सम्पादयेयेत्येव साम्प्रतम्। सद्वृत्तमहिम्नैव मामयं लोकः सभ्यमाकलयेदिति कामयेय नो चेत्कृतमनया सभ्यतयेति।

इत्थं लप्रब्धबोधः श्रीमोहनदासः प्रतीच्यां सभ्यतामनात्मनीनां[3] निरचिनोत्। स एतामन्तःसारशून्यामविचारितरमणीयाममन्यत। मृगतृष्णिकाया इवास्या अनुसरणमपार्थकमजानात्[4]। इदानीं यावत् स मिथ्याबोधोपहतो मुधैव कालमक्षपयद् धनञ्चाव्ययत्। अधुनाधुनातन्यां सभ्यतायां नितान्तं विरक्तः स विक्रीय वादित्राणि, परिहृत्य नृत्यगीते, विहाय च सज्जां व्यवहाराध्ययने व्याप्रियत। दुःखशीलः[5] पुरातनो ब्रह्मचारीव स यमान् नियमांश्च सततं सेवमानः कालमनयत्। यत्र लन्दननगरे रूप्यकाणां[6] द्विशत्यापि वृत्तिर्न सुकरा तत्रैष पाञ्चाशता रूप्यकैरेवात्मनः समुचितां संविधामकल्पयत्। अधिश्रयणीं क्रीत्वा स स्वयं भोजनमपचत्। एवं दशाणका एव प्रात्यहिकस्तस्योत्सर्गोऽभवत्।

आङ्गलसभ्यतायां विरक्तस्य धर्मोन्मुखस्य विवेकप्रवणस्य श्रीगान्धिनः स्वान्तं[7] विचिकित्साभिराक्रान्तम्। स व्यमृशत् किमिन्द्रियतर्पणमेवेह मानवजन्मप्रयोजनम्। किं महीयान् कश्चिदुद्देशस्तस्य नास्ति। मनुष्य इति कोऽयमर्थः, कुतो जायते प्रेत्य च

---

१. अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् इति करोतेर्णमुल्।

२. अर्हे कृत्यतृचश्च इत्यर्हे कर्तरि लिङ्।

३. आत्मने हिताऽऽत्मनीना। सा न भवतीति। आत्मन्विश्वजनभोगोत्तरपदात्खः इति खः।

४. अपगतोऽर्थोऽस्येत्यपार्थकम्। शेषाद्विभाषा इति विभाषा कप्। पक्षेऽपार्थमिति भवति। विवादोऽपार्थ एवायं पार्थ एव धनुर्धरः इत्यत्र यथा।

५. दुःखं शीलयतीति। शीलिकामिभक्ष्याचरिभ्यो णः इति वक्तव्याण्णः।

६. आहतं रूपमस्येति रूप्यम्। आहतप्रशंसयोर्यप्। ततः संज्ञायां कन्।

७. स्वान्तं मनः। स्वान्तं हृन्मानसं मनः—इत्यमरः।

क्व याति। सभ्यतेतीयमपि कः पदार्थ इति। संशयोच्छेदायोपनिषदो दर्शनानि चाध्येतुकामोऽपि स नाशकदध्येतुम्।

एकदा श्रीगान्धी जोसिया ओल्डफील्ड इति नामानं भिषजमुपागच्छत्। स तं पर्यचिनोत् मित्रं चाकरोत्। ओल्डफील्डमहाशयस्य धर्मविषये वादानुवादे महत्यभिरुचिरासीत्। अतः स श्रीगान्धिनं हिन्दुधर्ममधिकृत्यानेकान्प्रश्नानपृच्छत्। परं नैष तान् यथेष्टं प्रतिवक्तुं प्राभवत्। एतावतैव श्रीगान्धी दभ्रमेवाहं स्वधर्ममन्तरेण वेदेति व्यक्तमजानात्। तेनात्यरिच्यतास्य मन्युः[1]। ओल्डफील्डमहाशयोऽनेकान् वारांस्तमेवं न्यगादीत्—ख्रिस्तमतं किमिति नोपाश्रयसे। श्रीमोहनदासस्त्वेवं प्रत्यवादीत्—यावदहं स्वधर्मं नाञ्जसा[2] विद्यां[3], यावच्चास्य महिम्नि परिगृहीतार्थो न स्यां, तावन्न सहे खिस्तमतमाश्रयितुम्।

श्रीगान्धी थियोसोफिस्टसम्प्रदायाचार्यया श्रीब्लवेत्स्कीति समाख्ययापि समगच्छत। अध्यगीष्ट चास्याः कृतीः। परं परितोषं नाप्नोत्। माञ्चेस्स्टरपुर्यां सोऽपरेणाङ्गलेन समसृज्यत[4]। सोऽप्यसद्धेतुभिर्हिन्दुधर्मं दूषयितुं प्रायतत। ख्रिस्तमतपरिग्रहे च तं प्रायुङ्क्त। प्रतिज्ञां चाकारयद् अहं ख्रिस्तधर्मग्रन्थमध्येष्य इति। श्रीगान्धी यथाप्रतिज्ञं बाइबिल् इत्याख्यं पुस्तकमध्येतुमारभत। परं तेनास्य शङ्कापनोदो नाभूत्।

एकस्मिन्नहनि प्रावेशिकीं परीक्षामुत्तीर्यागच्छन् श्रीगान्धी कमपि संस्तुतचरं स्वदेशजं[5] सुजनमदर्शत्। स तस्य चित्तोद्वेगवार्त्तामाकर्ण्यो-

---

१. मन्युः शोकः। मन्युः शोके क्रतौ क्रुधि ॥ इति कोषः।

२. अञ्जसेति याथार्थ्येऽव्ययम्।

३. वेत्तेर्लिङ् युत्तमैकवचने रूपम्।

४. सृज विसर्गे इति दैवादिकादकर्मकाद्धातोरात्मनेपदिनो लङि रूपम् संसर्गमापदित्यर्थः।

५. संपूर्वः ष्टुञ् स्तुतौ इति धातुः परिचयेऽर्थे वर्तते। संस्तुतः परिचितः। संस्तवः स्यात्परिचये इत्यमरश्च। पूर्वं संस्तुतः संस्तुतचरः। भूतपूर्वे चरट् इति चरट् प्रत्ययः।

पाक्षिपत्—श्रूयते धर्मप्रियस्य जनस्य यथा गीताभ्यासेन मनस्तुष्यति न तथा ग्रन्थान्तरानुशीलनेन । अतस्ता अपि सादरं पठ्यन्तामिति । एवमुक्तः श्रीमोहनदासोऽभ्यजानात्[1] तातोऽपि मम गीतां[2]स्व[3]धीती सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति श्लोकार्धमसकृदुदीरयिष्य[4]तीति । अतः सोऽप्युपनिषत्सारभूता गीताः परमादरेणाध्येतुमारभत । कालेनास्य चेतः समाधीयत ।

श्रीगान्धी लन्दननगरे तिस्रः समा व्यवहारशास्त्रमध्यैष्ट । प्रथममत्रभवान् तत्रत्यां प्रावेशिकीं परीक्षामुदतरत् । पश्चाद् इनरटेम्पेल् इत्याख्ये महाविद्यालये धर्मसंहिता अधीत्य स उत्तरवादिपरीक्षाञ्चोदतरत् । उत्तीर्णपरीक्षः प्राप्तोपाधिकश्च स स्वदेशं प्रत्यागमं संव्यधात् । संविधाय च प्रायात् ।

उत्तरवादिपरीक्षोत्तरणं, स्वदेशं प्रत्यागमनं

मुम्बापुर्यां यदा पोतादवातरत् तदा स परलोकान्तरितां मातरमश्रौषीत् । दारुणमेतं समाचारं निशम्य स वज्रताडित इवाभूत् । धर्मस्योपदेष्ट्रीं विनयस्य दात्रीं स्वस्य संवर्धयित्रीं प्रणयिनीं जननीमत्यन्तविलुप्तदर्शनां विदित्वा स शुचो वशमगात् । या मच्छिवं सततमनुध्यायन्ती मां चारित्र[5]मुपादिशत्, यस्या धर्मप्रवणताया उपयोगितामहं विदेशेऽन्वभूवम्, यस्याञ्च प्रोषितस्य मम श्रद्धा भक्तिश्चातिभूमिं गते, सा निधनं गतेति व्यदीर्यतास्य हृदयम् । अनिच्छन्नपि स पूर्वजस्य वचने स्थितो राजकोटं प्रत्ययात् ।

ज्यायान्भ्राता त्वेनं साक्षाद् राजकोटमनीत्वा पञ्चवटीमानयत् । अत्र समुद्रोल्लङ्घनेन प्रायश्चित्तिनः श्रीमोहनदासस्य परिशुद्धये

---

१. अभिपूर्वो जानातिः स्मरणेऽथ वर्तते ।

२. क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् इति कर्मणि सप्तमी ।

३. अधीतमनेनेति अधीती । इष्टादिभ्यश्चेति कर्तरीनिः ।

४. अभिज्ञावचने लृट् इत्यभ्यजानाद् इत्यभिज्ञावचन उपपदे उदीरयतेर्धातोर्भूते लृट् । यथा स्मरसि कृष्ण गोकुले वत्स्याम इत्यत्र ।

५. चरित्रमेव चारित्रम् । प्रज्ञादित्वात्स्वार्थेऽण् ।

पूर्वमेव सम्भारा अक्रियन्त। पुण्यप्रसन्नसलिलायां भागीरथ्यां कृताप्लावे[1] मन्त्रादिभिश्च पूतकाये श्रीमोहनदासे परःशता[2] विप्रा ज्ञातयश्चाभोज्यन्त। निर्वृत्ते शोधने स भ्रात्रा समं राजकोटमागात्। तत्र प्राप्तः शोकपरीतात्मा स लोकोत्तरं मातुश्चरितमनुचिन्तयन् द्वित्रान् दिवसान् विजनेऽनयत्। ततः स बुद्धावकरोत्—मातुरभावे जन्मभूरेव मातृबुद्ध्या शुश्रूषणीया, तेनैव चेतः समाधास्यत इति। एवं कृतसङ्कल्पः श्रीगान्धी स्वल्पेन समयेन विषादान्निरमुच्यत।

अतीते कस्मिंश्चित् काले श्रीगान्धी मुम्बापुरीं प्रत्यागमत्। तत्र च वासं परिकल्प्य विधिज्ञवृत्तिमुपाजीवत्। आदौ तु तस्य महती व्यापृतिर्नाभूत्। परं गच्छता कालेन तस्य व्यवहारपाण्डित्यं सर्वस्य विदितमभूत्। तेन नित्यं कार्यव्यग्रः स क्षणं[3] नालभत। प्रभूतश्चार्थमार्जयत्। परं नात्मना व्यस्मयत न च लोलुपतामयात्। वादानुवादेन समर्थयिष्यामीत्यभ्युपेतमपि व्यवहारपदमसत्प्रतिष्ठमेतदिति ज्ञात्वा सोऽजहात्।

एवं व्यापृतोऽपि श्रीगान्धी कुतश्चिद् विपश्चितो नित्यं हिन्दुशास्त्राण्यध्यगीष्ट पर्याप्तं व्युत्पत्तिं चालब्ध॥

इत्युपाध्यायश्रीचारुदेवशास्त्रिणः कृतौ श्रीगांधीचरिते

प्रथमः परिच्छेदः॥

---

१. कृताभिषेकः, कृतस्नानः। आप्लाव आप्लवः स्नानम् इत्यमरः। आङ्पूर्वः प्लवतिः स्नानेऽर्थे वर्तते। अत एव स्नातक आप्लुतो व्रती इति च सः।

२. शतात्परे परःशताः। पञ्चमी इति योगविभागात्समासः। राजदन्तादित्वात् शतशब्दस्य परनिपातः। पारस्करादित्वात्सुट्।

३. क्षणो व्यापारशून्यत्वम्। निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः इत्यमरः।

अथ द्वितीयः परिच्छेदः

दक्षिणाप्रीकाभूखण्डे श्रीगान्धिनः समुद्योगः

सप्तचत्वारिंशदुत्तरनवशतोत्तरसहस्रतमे वैक्रमेऽब्दे दक्षिणाप्रीका-भूखण्डे पञ्चदशलक्षप्राया[1] भरतवर्षीया न्यवसन्। एषां भूयांसस्तु नेटाल्-जनपदे वसतिमकुर्वन्। गौराङ्गाः[2] प्रजाः कृष्णाङ्गेभ्यो भरतवर्षीयेभ्योऽसूयवस्तान् कुत्सयन् विविधं चाक्लिष्णन्। एवं हि तत्र वृद्धिं गतो वर्णविद्वेषो यदाढ्याश्चानाढ्याश्च, बहुज्ञाश्चाज्ञाश्च, विविधविद्यासु विनेतार उपाध्यायाश्च, नैगमाः[3] सांयात्रिकाः[4] पोतादीनामधीशितारश्च सर्वे कर्मकरा इति सावज्ञमहूयन्त। परमार्थत एषां बहिष्कार एव तासामभिमत आसीत्। इत्थं कदर्थिता मा जीवन्तः[5] परावज्ञादूनचेतस्का इमे प्रत्यवस्थानैकतान-मनसोऽभूवन्[6]। परं नेतारमन्तरेण कार्यपदवीं नाबुधन्।

नेतुरागमः

भरतदेशीयस्य कस्यचिदिभ्यस्यापरेण केनचित् सह प्रवृत्तं प्रिटोरिया इत्यत्राधिकरणे विचार्यमाणं व्यवहारं समर्थयितुं श्रीमोहनदासः पञ्चाशदुत्तरनवशतोत्तर-

---

१. प्रायेण पञ्चदशलक्षमिति। सुप्सुपेति समासः।

२. गौरमङ्गं कलेवरं यासां ता गौराङ्गा गौराङ्ग्यश्च। अङ्गगात्रकण्ठेभ्यो वक्तव्यमिति वा ङीष्।

३. नागरा वणिज इत्यर्थः। नागरो वणिग् नैगमौ द्वौ—इत्यमरः। वणिक्पथः पुरं वेदो निगमाः—इति च सः। निगमे भवः—नैगमः।

४. वहित्रगामिनो वणिज इत्यर्थः। सांयात्रिकः पोतवणिक्—इत्यमरः। संयात्रा द्वीपान्तरगमनं प्रयोजनमस्येति सांयात्रिकः। संपूर्वस्य यातेर्द्वीपान्तरगमने वृत्तिरित्याहुः।

५. माङ्याक्रोशे इति वक्तव्याल्लटः शत्रादेशः। गर्हितजीविनः सन्त इत्यर्थः।

६. प्रत्यवस्थाने विरोधे एकतानमेकाग्रं मन एषां ते। एकतानोऽनन्यवृत्तिरेकाग्रैकायनावपि—इत्यमरः।

प्रीकाभखण्डमापद्यत । व्यवहारस्य कृते वर्षं तत्रावस्थानं च प्रत्यजानीत । अत्रत्यां दशां प्रथममजानन्स क्रमशस्तां सम्यक् पर्यचैषीत् । आश्चर्यं च महदागमत् । नेटाल् इत्यत्र ट्रांस्वाल् इत्यत्र च कृष्णाङ्गप्रद्वेषात् सोधिकृतैर्गौराङ्गैरतिमात्रं न्यक्कृतोऽभूत्[1] । आवसथेभ्यो बहिष्कृतः, चलद्भ्यो लोहपथसंचारिभ्यो वाष्पयानेभ्यो भ्रंशितः, ताडितः पादेन प्रहृतश्च । आप्रीकानिवासेन निर्विद्य[2] वर्षान्ते ततः प्रतिष्ठासुः स डर्बन् इत्यत्र गतो भरतवर्षीयजनतया[3] सुष्ठु संभावितः । तत्र पुर्यां स वृत्तपत्रेष्वपाठीत् व्यवस्थापिकायां सभायामुपन्यासः प्रस्तोष्यते येन स्वीकृतेन भरतभूमिजानां निर्वाचनादिकर्मसु संमतिदानेऽधिकारो व्यावर्तिष्यते । प्रस्तोष्यन्ते चैवञ्जातीयकान्युपन्यासान्तराणीति । एवंविधेषु प्रस्तावेष्वधिकृतानां कीदृशोऽनुबन्धः[4] कीदृशश्च तैर्भरतभूमिजानामर्थोपनिपात इति स आप्रच्छनाय समेताञ्जनान् सम्यगावेदयत् तद्विरोधाय च तान् प्राचोदयत् । एवमुपस्थितां विपदं श्रुत्वा सर्वे डरबनस्था भरतदेशीया भवानिह कञ्चित्कालमवतिष्ठतामाश्रवांश्च[5] नस्तथा नयतां यथा वयं शोकं तरेमेति सप्रश्रयं प्रार्थयन्त । परदुःखमसहिष्णुः करुणया द्रुतचेता महात्मा तद्वचनमनुरुन्धानस्तत्रैव वस्तुं निरचिनोत् ।

व्यवहारविच्छ्रीगान्धी प्रस्तुतस्य प्रथमं व्यवहारविरुद्धतामुपपादयितुं प्रायस्यत् । ततः प्रार्थनापत्रादिकं बहुजनसमर्थितं न्यबध्नात् । असकृदकृतार्थतां गतः सोऽन्ते सिद्धिमापत् ।

---

१. न्यक्कृतः—अधःकृतः, तिरस्कृत इत्यर्थः । न्यङ्नीचखर्वह्रस्वाः स्युः—इत्यमरः ।

२. निर्विण्णो भूत्वा इत्यर्थः ।

३. जनानां समूहो जनता । ग्रामजनबन्धुभ्यस्तल् । तलन्तं स्त्रियाम् ।

४. अनुबन्धोऽभिप्रायः । तथा च मानवे धर्मशास्त्रे प्रयोगः—

अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ।।

५. विधेयो विनयग्राही वचने स्थित आश्रवः—इत्यमरः ।

भरतभूमिजान् संहन्तुं श्रीगान्धी नेटाल्देशे इण्डियन् काङ्ग्रेस् इति समाजं प्राकल्पयत्। विदितवृत्तान्ताश्च ते यथा स्युस्तथा भरतवर्षीयमतमितिसंज्ञं साप्ताहिकं वृत्तपत्रमपि प्रावर्तयत्। शिक्षा-प्रणेत्रीं संसदं चाकरोत्।

कष्टश्रिता[1] अपकर्तारोऽप्युपकर्तव्या इति मते स्थितस्तत्रभवान् गान्धी पञ्चाशदुत्तरनवशतोत्तरसहस्रतमे संवत्सरे बूर्जातीयैरायोधने सेवकदलं निर्मायाऽऽङ्ग्लानां महत् साहायकं व्यधात्।

भयावहेऽस्मिन्नाहवेऽशनायापिपासे अवगणय्य स्वेच्छासेवका अनारतमसेवन्त। प्रत्यहं ते परिक्षताञ्शतशो योधान् सार्धत्रये क्रोशेऽवस्थितमातुरालयं स्कन्धेनावहन्। व्रणशोधनं पट्टिकावेष्टनं चाकुर्वन्।

एकस्मिन्नहनि सेनापतिर्बालेटः श्रीगान्धिनमुपेत्य ससम्भ्रममिदम-वोचत्-महाभाग यदि सद्यःक्षताः सैन्याः समराङ्गणादानाय्य क्वचि-न्निरुप्लवे प्रदेशे निधीयेरंस्तर्हि महदुपकृता भविष्याम इति। एतदा-कर्ण्य श्रीगान्धी तथैवाचर्यतामिति स्वानुगानाज्ञापयत्। आज्ञप्तास्ते-ऽग्निवर्षं वर्षत्सु तुमुलं संग्रामयमाणेषु[2] सैनिकेषु मृत्युं तृणाय मत्वा क्षतविक्षतानामुद्दिधीर्षया श्रीगान्धिनमनु समराङ्गणं प्रति प्राद्रवन्। एवं श्रीगान्धिनाधिष्ठितास्ते तत्र दिवसे यत्साहसिक्यं यं मतिविभवं यां कर्तव्यपरतां च प्रादर्शयंस्तदैतिह्यपत्रेषु कार्तस्वर[3]रसेन न्यस्ताक्षरं भविष्यति।

निष्ठिते बूर्समाघाते[4] श्रीगान्धीत्थमचिन्तयत्—सम्प्रति दक्षिणा-फ्रीकायां मेऽवस्थित्या नास्ति कश्चिदर्थः। स्वदेशोपकृतौ तु शक्य

१. कष्टं श्रिताः कष्टश्रिताः। द्वितीया श्रितातीतेत्यादिना समासः।
२. संग्राम युद्धे इति चौरादिकादनुदात्तेतो धातोः शानचि रूपम्।
३. कार्तस्वरं स्वर्णम्। रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् इति स्वर्णनामस्वमरः।
४. समाघातो युद्धम्। अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः इति युद्धनामस्वरः।

आत्मा व्यापारयितुम् । आफ्रीकास्थोऽहं यद्यपि विभवानि स्वदेशजान् शुश्रूषितुं तथापीहावस्थानेनार्थार्जनमेव मे परमं मनीषितं मा भूदिति मया स्वदेशाय गमनीयमिति ।

एवं सम्प्रधार्य श्रीगान्धी प्रयाणाय[1] समनह्यत । परं नैतल्लोकोऽन्वरुध्यत । निर्बध्यमान[2]स्त्वेवमन्वमन्यत—वर्षाभ्यन्तरे सत्यामपेक्षायां यदि भवान् दक्षिणाफ्रीकां प्रत्यावर्तितुमभ्युपैति तदा गन्तुमर्हतीति । एवमनुमतगमनस्य श्रीगान्धिन आप्रच्छनाय समेता नेटाल्वास्तव्या भरतभूमिजा अर्घ्यस्या[3]स्य महतीमर्हणामकुर्वन् । बह्वीर्महार्घाश्चोपदा[4] अस्मै व्यतरन् । चामीकराणि घटिकायन्त्राणि मणिमयान्यङ्गुलीयकानि महार्हाणि वस्त्वन्तराणि च सोपचारं प्रादिशन् । श्रीकस्तूरबाईमुद्दिश्य मुक्ताकलापमप्येकमुपाहरन् ।

यत्र प्रदोषे श्रीगान्धी प्रीतिदायानिमानाप्नोत् तां दोषां स उन्मत्त इवोन्निद्रमनयत् । इतश्चेतश्च पर्यटत् । इतिकर्तव्यतामूढश्चाभवत् । शतशो रूप्यकाणां प्राभृतस्यानङ्गीकारः कष्टः, अङ्गीकारस्तु कष्टतरः प्रत्यभात् ।

बहु विमृशतः श्रीगान्धिनो बुद्धिरभवत्—नाहमेतद्वस्तुजातं स्वपार्श्वे निधित्स इति । एवं सति श्रेष्ठिरुस्तमजिप्रभृतिष्वाभरणानि न्यस्य तानुद्दिश्य पत्रमेकं न्यबध्नात् । अन्येद्युः प्रगे पुत्रकलत्रादिभिः संमन्त्र्य भारस्य लघूकरणं च निरचिनोत् ।

व्युष्टायां रजन्यां पित्रानुयुक्ताः पुत्राः प्रत्यब्रुवन्—एभिराभरणैर्न नोऽस्ति कार्यम् । अतः सर्वोऽयं वस्तुसन्दोहः पराकरणीयः प्रत्यर्पणीयश्च । अथ भविष्यति किमिति स्वयं निर्मातुं न प्रभविष्याम इति । एतदाकर्ण्य पिता प्रासीदत्, अपृच्छच्च मातरमपि वः प्रबोधयिष्यध्वे

१. क्रियाग्रहणमपि कर्तव्यम् इति सम्प्रदानत्वाच्चतुर्थी ।
२. पुनः पुनरभ्यर्थ्यमान इत्यर्थः ।
३. मूल्ये पूजाविधावर्घः—इत्यमरः । अर्घमर्हतीत्यर्घ्यः । दण्डादित्वाद्यः ।
४. उपायनमुपग्राह्यमुपहारस्तथोपदा—इत्यमरः ।

न वेति। बाढं प्रबोधयिष्यामः। एतद्धि सुकरम्। नहि साऽऽभरणान्या-मुञ्चति। रिरक्षेच्चेदस्मदर्थमेव तानि रक्षितानि स्युः। परं नैतानि वयमपेक्षामह इति कुतः साऽग्रहं ग्रहीष्यतीति।

परं दुर्लभो दयितताया अनुनयोऽभूत्। पृष्टा सा प्रत्यवादीत्—त्वं नापेक्षेथाः, कुमारा अपि नापेक्षेरन्। किं तेन। पेलवधियो बाला यथा बोध्यन्ते तथा गृह्णन्ति। अहं यद्यपि नानुज्ञातास्म्येतानि धारयाणीति, वध्वस्तु धारयिष्यन्त्येव। कश्च तदद्धा[1] वेद यच्छ्वो भविता। प्रीतिदायानामेतेषां प्रत्यावर्तनं न जाघटीति। एव लपन्ती सा भृशमरोदीत्। परं कुमारा नेषदपि व्यचलन् किमङ्ग[2] धैर्यधनो मोहनः।

स प्रत्यभाषिष्ट यदा कुमारा दारान् परिग्रहीष्यन्ति तदालङ्करणसंविधानं विचारगोचरतां गमिष्यति। न चैतान् कौमारके परिणाययितुमिच्छामः। यूनां सतां त्वेषामस्मिन्विषये कामचारः। अन्यच्च। किमस्माभिराभरणवल्लभाः प्रसाधनप्रिया एषां कृते प्रार्थनीयाः कन्यकाः। निर्मित्सिष्यतेऽपि चेत्किञ्चिद् ध्रियेऽहमिति[3]।

साधु ब्रवीषि। अवैमि त्वाम्। स एव खल्वसि येन ममाप्यलङ्करणानि गात्रादवतारितानि। अहमाभरणानि बिभृयामिति नानुजानासि। स्नुषास्त्ववश्यमनुज्ञास्यसि। बालांस्त्वद्यत एव विरक्तांश्चिकीर्षसि। अवश्यं मयौपहारिकप्रत्यर्पणं[4] विरोद्धव्यम्। किं च। मम मौक्तिकसरे[5] कीदृशस्तवाधिकार इति प्रेयस्कामा श्रीकस्तूरबाईस्माह।

---

१. तत्त्वे त्वद्धाञ्जसा द्वयम्—इत्यमरः।

२. किंपुनरित्यर्थः।

क्षिप्रे च पुनरर्थे च संगमासूययोस्तथा।
हर्षे संबोधने चैव ह्यङ्गशब्दः प्रयुज्यते॥

३. धृङ् अवस्थाने इति धातोर्लट्।

४. उपहाराणां समूह औपहारिकम्। अचित्तहस्तिधेनोष्ठक्।

५. मुक्ता एव मौक्तिकम्। विनयादिभ्यष्टक् इति स्वार्थे ठक्। स्वार्थिक-

किमेष मत्सेवानिमित्तं त्वयालाभि स्वसेवानिमित्तं वेति श्रीगान्धी दृढमप्राक्षीत् ।

अस्तु तत्तथाऽन्यथा वा । किं त्वदीयायां सेवायां ममाङ्गभावो नास्ति । यन्मां रात्रिन्दिवं परिश्रमयसि सा सेवा न भवति किम् । यच्च मां रोदं रोदं परान् पामरान्गृहेऽरक्षः, मां च सेवामकारयस्तदकिञ्चित्करं किमित्युदीर्य सा वाचंयमाऽभूत् ।

श्रीगान्धी तु प्रथमत एवावश्यं मयाऽलङ्करणानि प्रत्यर्पणीयानीति कृतसंकल्प आसीत् । अतोऽरुन्तुदाः प्रियाया इमा गिरः श्रुत्वापि निश्चयं नाहारयत् । न्यासाधिकृतेषु चेमान्यलङ्करणानि न्यस्य पुत्रकलत्रादिभिः समेतो भरतवर्षं प्रति प्रायात् ।

स्वदेशं प्रत्यावृत्तिः, आप्रीकां प्रत्यागमश्च

स्वदेशं प्रत्यावृत्तः श्रीगान्धी कञ्चित्कालमितस्ततोऽभ्रमत । अष्टपञ्चाशदुत्तरनवशतोत्तरसहस्रतमे वत्सरे सहस्ये मासि कलिकातानगर्यां मिलितायां काङ्ग्रेसपर्षद्युपास्थित । मासमेकं च श्रीगोखलेमहोदयस्य सविधेऽवास्थित । अन्ततः पर्यटनाद्विरम्य यावन्मुम्बापुर्यामवस्थातुं निरचैषोत् तावदाप्रीकात इमां विद्युद्वार्तामवापत् —उपनिवेशमन्त्रीहायाति । अतस्त्वरितमागन्तव्यमिति । सत्यसङ्गरः श्रीगान्धी कार्यजातं संहृत्यावलम्बितं ततः प्रास्थित । यथासमयं डर्बन् इत्यत्र चागात् ।

आगतः श्रीगान्धी प्रतिनिधिमण्डलेनैकेन श्रीचेम्बरलेनमहोदया उपसर्पणीया इति प्रास्तावीत् । ततः स भवान् पौषकृष्णाष्टम्यां प्रिटोरिया इत्यत्र प्रापत् । अदर्शच्च ट्रांस्वाल्वासिनो बलवद्बाधितान् । परिणतिं भजति बूर्प्रधने प्रतिष्ठां गते चाङ्गले शासने ट्रांस्वाल् इत्यत्रापूर्वः परिवर्तः कश्चनाभूत्—भरतदेशजा नागरका[1] इति नागण्यन्त ।

क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपीति नपुंसकत्वम् ।

१. नगरात् कुत्सनप्रावीण्ययोः इति वुञ् । प्रवीणा नागरा इत्यर्थः ।

भूम्यादिधनक्रये च तेषां याथाकमी[1] नावर्तत। स्वास्थ्यस्य हेतोर्जल-वातयोर्दोषाशङ्कया चाङ्गलवसतेरुपकण्ठे वस्तुं च नान्वज्ञायन्तेति। विविधं व्यथिता विपज्जालमुत्प्रेक्षमाणाः प्रतीकारे चाप्रगल्भमानास्त-त्रत्या भरतभूमिजाः तत्सारथ्यमपेक्षमाणाः महात्मानं तत्र स्थाति प्रार्थयन्त। एवं सति परोपकृतिप्रियः श्रीगान्धी योहन्नसबर्गं इत्यत्र विधिज्ञवृत्तिमुपाश्रित्य न्यवसत्।

षष्ट्युत्तरनवशतोत्तरसहस्रतमे वत्सरे योहन्नसबर्ग इति नगरं महामार्याऽऽक्रान्तम्। तस्मिन्नवसरे श्रीगान्धिनाऽऽतुरालयः प्रवर्तितः। भरतदेशजाध्युषितेषु[2] प्रदेशेषु संमार्जनप्रोक्षाणदेरभावा-न्मलस्यावकरस्य दौर्गन्ध्यस्य चातिरेकं हेतुमाश्रित्य महामारी तत्र स्वं भीषणमात्मानमाधायाजृम्भत। नगरेऽधिकृता गौराङ्गाश्च तत्रावधानमददुः। परं श्रीगान्धी तत्सहायाश्च महता प्रयत्नेन विसृमरमातङ्कं[3] प्रशममनयन्।

फिनिक्साश्रम-प्रतिष्ठा

नगरसंराव[4]रहितेऽकृतकरामणीयकनिधाने कस्मिंश्चिद् प्रा॰ भरतवर्षीयैः संवसन्नहमभ्युदयनिःश्रेयसयोरनुगुणं[5] किमपि कर्म कुर्यामिति चिररात्रायोदकण्ठ श्रीमोहनः। अतो डर्बनाधिष्ठानस्य नातिदूरे कृषिप्रधानां वसतिमेकां प्राकल्पयत्। तत्र भरतभूमिजैराङ्गलैः कैश्चित्सुहृद्भिः सह वस्तुमारभत। ततो विप्रकृता[6] उच्चावचानि

---

१. यथाकामंभावः याथाकाम्यम्। स्त्रियां ङीषि याथाकामी।

२ उपान्वध्याङ्वसः इत्यधिपूर्वस्य वसतेरधिकरणस्य कर्मसंज्ञायां कर्मणि क्तः।

३. विसारिणम्। सृघस्यदो क्मरच्।

४. संरावः शब्दः। उपसर्गे रुवः इति घञ्।

५. नितरां श्रेयो निःश्रेयसम्। मोक्ष इत्यर्थः। अचतुरविचतुर—इत्यादिना निपातितम्।

६. विप्रकृतोऽपकृतः। पीडित इत्यर्थः। तस्मिन्विप्रकृताः काले तारकेण दिवौ-कसः इत्यत्र कुमारे विप्रकृता उपप्लुता इति मल्लिनाथः।

कारांल्लम्भिता[1] गौराङ्गनियोज्यतानिरक्ता[2] बहवो भरतखण्डजा एतमाश्रमं प्रापद्यन्त। स्वाधीनवृत्तयोऽपि केचित् श्रेयस्कामास्तत्र वसतिमरोचयन्।

आश्रमं प्रविविक्षुभिर्ये नियमा अनुवर्त्यास्तेऽत्र संक्षिप्य विन्यस्यन्ते। तद्यथा—

आश्रमस्थः सर्वो जनः प्रतिमासं पञ्चचत्वारिंशतो रूप्यकेभ्योऽतिरिक्तं न व्यययेत्। कृषिद्वारकश्च यो लाभः स्यात्स सर्वेषां सममभिष्यात्[3]। संविभागे वैषम्यं मा भूत्।

इह सर्वो जनोऽन्योन्यमात्मवत्पश्येत्। अयमभिजातः, अयं प्राकृत[4] इति भेदबुद्धिं परिहरेदिति।

अत्राश्रमे सर्वे नियतकालं प्रत्यहं पर्यश्राम्यन्। केचिद्भुवमकृषन्, अन्ये बीजान्यवपन्, इतरे केदारांल्लवित्वा शस्यसङ्ग्रहं चातपे शोषयित्वाऽऽश्रमे समभरन्। धूर्वहः[5] श्रीगान्धी स्वयमपि चतस्रो होराः क्षेत्रेषु प्रत्यहं पर्यश्रमत्। स्वानुगैः सर्वैः समेतस्तत्रभवान् ध्यानावस्थित उभे सन्ध्ये उपासिष्ट। कृतोपासनः सर्वैः समं सात्त्विकं सामान्यं च भोज्यमभुक्त। कञ्चित्कालं नियोगतोऽध्यगीष्ट। आश्रमस्थांश्च धर्ममन्वशिषत्। होराचतुष्टयमेव च नियमतोऽस्वाप्सीत्।

---

१. निकारो निकृष्टीकरणम्। निकारः स्यात्परिभवे धान्यस्योत्क्षेपणेऽपि च—इति धरणिः।

२. प्रैष्यभाव इत्यर्थः। नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः—इत्यमरः।

३. अभिरभागे इति भागवर्जितेऽर्थेऽभेः कर्मप्रवचनीयतान्यत्र तूपसर्गसंज्ञा। तेन भागार्थस्येह विवक्षितत्वादुपसर्गसंज्ञायामुपसर्गप्रादुर्भ्यामस्तिर्यच्परः इति षत्वम्।

४. नीच इत्यर्थः। विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः—इत्यमरः।

५. धुरन्धर इत्यर्थः। वहतीति वहः। पचाद्यच्। धुरो वहः धूर्वहः। धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धराः—इत्यमरः। अत्र तु गौण्या वृत्त्या नायक इत्यर्थः।

अकृतविद्याः प्रायेणापरिशीलितसाहित्या वृत्तपत्रेषु विरसवृत्तयो भरतवर्षीयाः प्रजा महात्मना प्रवर्तितं वार्तापत्रं नाद्रियन्त। तेन तत्रभवान् प्रथमाब्दान्ते त्रिंशत्सहस्रं रूप्यकानलाभं व्यषहत।

योहन्नसबर्ग इत्यत्रोत्तरवादिवृत्तिमुपजीवन् श्रीगान्धी प्रतिवर्षं पञ्चाशत्सहस्रं षष्टिसहस्रं वा रूप्यकानार्जयत्। इदानीमात्मानमुद्धर्तुकामः स भवान् दारिद्र्यं स्पृहयन्सर्वमेतं महान्तमायं विहायापरिग्रहो'ऽभूत्।

विंशतिं वर्षाणि भरतभूमिजानां श्रीगान्धिनानुशिष्टानां समुद्योगः प्रावर्तिष्ट। परं त्रिशष्ट्युत्तरनवशतोत्तरसहस्रतमात्संवत्सरादारभ्य सप्तत्युत्तरनवशतोत्तरसहस्रतमं संवत्सरं[2] यावदयं परं प्रपञ्चितो वेगितश्चाभूत्।

द्वाषष्ट्युत्तरनवशतोत्तरसहस्रतमे विक्रमाब्दे दक्षिणाफ्रीकाशासनाधिकृतैरपरं विधानं व्यरचि—दक्षिणाफ्रीकाभुवमधिवसद्भिः सर्वैर्भरतवर्षीयैराबालं स्वं नाम राजकीयपत्रेषु लेखनीयम्। स्वनामधेयविन्यासस्य सविधेऽङ्गुष्ठचिह्नमपि देयमिति। अस्य विधेरभिप्रेतं तु भरतवर्षीयाणां सङ्ख्या क्रमशो ह्रासमापद्येतेत्येवासीत्।

इदं विधानं सम्यग्विरोद्धुं श्रीगान्धी नेटाल् इत्यत्र महतीं सभामकारयत्। तत्र परःसहस्रान्समुपस्थितान् सभ्यान् संबोध्य भाववतीमोजस्विनीं च वाचमवादीद् यस्या अयं संक्षेपः—

'प्रियबान्धवाः। आत्मसंमानं गोपायितुं चरितोत्कर्षं चोपपादयितुं

---

१. निःस्व इत्यर्थः।

२. द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते इति कारिकायां ततोऽन्यत्रापि दृश्यते इति वचनप्रामाण्याद्यावद्योगे द्वितीया।

३. राज्ञ इदं राजकीयम्। राज्ञः क च इत्यनेन कोऽन्तादेशः। छप्रत्ययस्तु वृद्धत्वात्सिद्धः।

सत्याग्रहादृते[1] नास्ति साधनान्तरम् । कोऽयं सत्याग्रहो नाम पदार्थः । यतो युष्मासु मध्ये बहवः सत्याग्रहस्वरूपं न परिचिन्वन्त्यतस्तदिह समासतोऽनुशास्मि—

सत्याग्रह आत्मबले प्रतितिष्ठति । आत्मबलमिति विदितोऽयमर्थः । आत्मनो बलमात्मबलमिति हि प्रतीतिः । आत्मा सत्यश्चिद्रूपश्च । शरीरमसत्यमचेतनं च । अत आत्मबलमजय्यं[2] नित्यं च । शरीरस्य तु बलं महीयसा शक्त्यन्तरेण शस्त्रैः सैन्यैश्च विजेतुं ध्वंसयितुं वा पार्यते । सत्याग्रह एवंरूपस्यात्मबलस्य विजृम्भणप्रकारः । सत्याग्रही यद्यपि शत्रुं न कदर्थयति नतरां शातयति[3] तथापि हेलया शारीरं बलं पराभवति । अत्रत्या राज्याधिकारिणोऽस्माननभिजातान् पृथग्जनान् वा मन्यमाना नो निर्वासयितुमनसोऽहन्यहनि नूतनानि विधानानि विरचयन्ति । एतानि विधानान्यननुविधाय सत्याग्रहेण स्वं वीर्यं प्रख्यापनीयम्[4] । नूतनविधाननिर्मित्सेति रुजा राजपुरुषाणाम् । यदि वयं नैतानि विरोत्स्यामोऽपि तु विधेयतयानुवर्त्स्यामः[5] तदा वयमिह स्वावस्थानमत्यन्तं विलोप्स्यामः । अतः क्रूरा इमे राज्याधिकृताः स्पष्टमिदमावेदनीयाः—यावदच्छिन्नं नः शिरस्तावद्वयं नेमामवधीरणां सहिष्यामहे । अतो यद्येतद्विधानानविधायित्व-

---

१. सत्ये आग्रहोऽभिनिवेश इति पदार्थः । महात्मप्रवरेण श्रीगान्धिना त्वयं शब्दोऽर्थविशेषे परिभाषितः । इदं हि तत्रभवाननेन शब्देनाभिधित्सते—स्वपक्षः सत्यः परपक्षश्चासत्य इत्यवधार्य परेण क्रियमाणा बलात्कृतयो विरोद्धव्याः, बलीयसोऽपि तस्याज्ञा न मानयितव्याः । तेन निपात्यमान उग्रोऽपि दण्डः सहर्षं सोढव्यः । परं स न मनागपि विप्रकार्य इति ।

२. क्षय्यजय्यौ शक्यार्थे इति निपातितम् । जेतुं न शक्यत इत्यजय्यम् ।

३. शदेरगतौ तः इति शदेर्दकारस्य तकारादेशः । शातयति निषूदयति ।

४. णेर्विभाषा इत्यनेन कृत्यचः इति नित्यं प्राप्तम् णत्वं विकल्प्यते । तेन पक्षे प्रख्यापणीयमिति भवति । पक्षान्तरे प्रख्यापनीयम् इति ।

५. विधेयता विनयग्राहिता । विधेयो विनयग्राही वचने स्थित आश्रवः—इत्यमरः ।

मस्माकमिष्यते तर्ह्येतत्प्रथमं कर्तनीयम्। दक्षिणाफ्रीकाशासकैः प्रस्तुतान्येवञ्जातीयकानि विधानानि साम्राज्यसभयाभिनन्दितान्यपि नास्माभिरनुविधास्यन्ते। एवमननुविदधानान्नो यथेष्टं दण्डयत। वयं सर्वं सोढुं सज्जाः। कारायां यदि निक्षेप्स्यामहे तत्रैव स्वर्गबुद्ध्या सुखं वत्स्यामः। यदि शूलमारोपयिष्यामहे तर्हि यत्स्वर्गाधिरोहिणीति[1] सस्मितं सहर्षञ्चाधिरोक्ष्यामः। यौष्माकीणानि विधानान्यनाद्रियमाणा अपि वयं न युष्माकं लोमापि मापयिष्याम[2] इति। यदि भवन्तो मन्निर्दिष्टया दिशा कार्ये प्रवर्त्स्यन्ति तर्हि नियतो जय' इत्युक्त्वा व्यरमन्महात्मा।

एवमनुशिष्टाः सर्वे समुपस्थिता जना महात्मनो वशंवदतां[3] गता राजकीयेषु पत्रेषु स्वनामधेयस्याङ्कनमवादीधरन्। एवं कुर्वाणास्ते कारावासं प्राणव्ययं वा नाजीगणन्। अनेके स्त्रीपुंसाः[4] सुकुमाराः कुमाराश्च कारावासमलभन्त। एवं क्षुभिते सर्वस्मिन्देशे महात्माप्यभियुक्तः सन्कारावासं लम्भितः। अभियोगान्तरे[5] स एव स्पष्टमवादीत्—अत्रत्या भरतभूमिजा मयैवोपदिष्टाः सत्याग्रहम्। मद्वचने स्थिताः सर्व इमे राजकीयशासनमवधीरयन्ति। अतो यः कश्चिद्दण्डो मयि प्रणेष्यते तमहं मनःप्रसादेन सहिष्य इति।

शासितार इमं प्रजानामुद्योगं दुःखसहनशक्तिं च समीक्ष्य परं विस्मयमापन्। मासत्रयं यावत्त इदं विधानं न्यवर्तयन्। जेन्रल्[6]

---

१. निःश्रेणिस्त्वधिरोहिणी—इत्यमरः।

२. हिंसिष्यामः। मीञ् हिंसायाम् इति क्रैयादिकाद्धातोर्णिचि लृटि रूपम्।

३. प्रियवशे वदः खच् इति खच्। खचि मुमागमः।

४. स्त्रियः पुमांश्च। अचतुरविचतुरसुचतुर—इति निपातितो द्वन्द्वः।

५. अन्तरमवसरः।

अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये।
छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि॥

६. जेन्रल् इति सेनानीवचन आङ्गलभाषाविन्यासः।

स्मट्स् इतिनामा कश्चित्प्रख्यातोऽधिकारी महात्मानं संगत्येदमवोचत्—यदि भरतवर्षीयाः स्वेच्छयैव राजकीयेषु कार्यालयेषु संनिधाय स्वं स्वं नाम लेखयेयुस्तर्हि तत्कालं विधानमिदं निराकरिष्यत इति। सरलचेता महात्मा तदुक्तौ व्यश्वसीत्। तथाचरणे च स्वदेशीयान् प्रैरयत्। सर्वप्रथमं स्वं नाम लेखयितुं महात्मा राजकीयकार्यालयमयासीत्।

महात्मनस्ताडना

कश्चिदुद्यानाभिजनो[1] ऽसहनो मुहम्मदीयस्तदानीं सत्याग्रहव्रतमनुपालयन् राजभयादेव महात्मेदमाचिचरिषुरिति मन्यमानस्त्रिचतुरैः[2] सहायैरागत्य महात्मानं बलवदताडयत्। एवं प्रहृतः स निःसंज्ञोऽभूत्, पथि च निःसहं विपर्यस्तः। तस्मिन्काले मुखान्मूर्ध्नश्चास्यासृक् प्रावहत्। पथा संचरमाणाभ्यां[3] द्वाभ्यामाङ्ग्लाभ्यामनुक्रोशबुद्ध्यावेक्षितः। संनिकृष्टं जे-जे-डोक् इत्याख्यस्य ख्रिस्तप्रचारकस्य गृहं नीतश्च। डोक्महाशयस्य धर्मप्रियया पत्न्या सयत्नमुपचरितः। संज्ञां प्रत्यापद्य स रुधिरदिग्धाङ्गोऽपि कार्यालयं गन्तुमुन्मना अभूत्। वार्यमाणोऽपि तस्मा एव प्रदेशाया[4]त्वरत स्वं नाम लेखयित्वा च प्रत्यावर्तत।

एतमुदन्तं विदित्वाऽपरांश्च कांश्चित्तत्कर्मणि संनद्धानवगत्य महात्मनोऽनुगाः केचन तत्सकाशमित्वेत्थमवादिषुः—अद्यत्वे जागरूकेण[5] भवता भवितव्यमिति। एतन्निशम्य महात्मा प्रत्यवोचत्

---

१. सम्प्रति लोकेऽफगानिस्तान् इति प्रसिद्धस्य जनपदस्योद्यानमिति पुरातनं नामेति ऐतिह्यविदः।

२. त्रयो वा चत्वारो वा त्रिचतुराः। द्व्युपाभ्यां चतुरोऽजिष्यत इति डचोऽपवादोऽच्।

३. समस्तृतीयायुक्तात् इति तङ्।

४. क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति चतुर्थी। प्रदेशमधिगन्तुमित्यर्थः।

५. जागरूको जागरिता। जागरूकः इति जागर्तेरूकः।

कथं नैतत्स्यात्, तेऽपि ह्रीदं मे कलेवरं कयाचित्कलयाधीशते नाम। यद्यहं स्वदेशीयानां समक्षं संनिधानाद् बिभीयां, मयाऽवलम्बितं नेतृपदमुत्स्रष्टव्यम्। येषां परिचर्या मम व्रतं तेभ्यो भीत्वा तद्विषये जागृयां दूरतो वाऽवतिष्ठेय ततो मत्तो भीरुतर इह संसारे कः स्यात्। यः स्वदेशीयेभ्यस्ताडनां लभते स हि महाभागः। अन्यच्च। मदीये देशोपकरणे किञ्चिद्वैगुण्यं[1] वा ते पश्यन्ति, अत एव मां दण्डयितुमीहन्ते। इह किमन्याय्यम्। कथमहं तान् दूषयेयमिति।

प्रतिज्ञापालनावसरो यावत्समायाति तावदुच्चैरधिकारिणो गत्वा महात्मा सप्रश्रयं निवेदयति, जेन्रल् स्मट्स् इत्यस्य प्रतिश्रवं च स्मारयति। परं नैते तदवदधते। एवमवस्थिते सर्वे भरतवर्षीयाः सधनाश्चाधनाश्च विद्वांसश्चाऽविद्वांसश्च, स्त्रियश्च पुरुषाश्च, प्रगल्भवयसश्चाऽप्रगल्भवयसश्च[2] विधानं विरुन्धाना अङ्गुष्ठञ्चामुद्रयमाणाः कारासु निक्षिप्ताः। केचित् स्वाः प्रिया अवशं व्यरहयन्। अपरे जरतीर्मातॄर्व्यजहुः। इतरे ऽबोधाँल्लालनीयांस्तनूजान् समत्यजन्। सर्वेषां परस्परेण वियुज्यमानानां नेत्राभ्यामानन्दजं वारि प्रास्रवत्।

राजप्रतिज्ञाभङ्गः

ट्रांस्वाल् इत्यस्मिञ्जनपदे भरतवर्षीयाणामष्टसहस्र्याः[3] पञ्चसहस्री खल्वस्य विरोधस्य हेतोः कारावासयन्त्रणामन्वभूत्। परं कष्टानुभवो व्रतभङ्गाय नाकल्पत। अत्रान्तरे महात्मापि द्विद्वौ मासौ[4] कारागारे निक्षिप्तः।

---

१. वैगुण्यं वैकल्यम् असम्पूर्णता।

२. प्रगल्भवया युवा। तथा हि गुरुः प्रगल्भेऽपि वयस्यतोऽस्याः इत्यत्र कुमारे प्रगल्भं वय इत्यनेन यौवनमुक्तम्॥

३. अष्टौ सहस्राणि समाहृतानि इत्यष्टसहस्री। अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः इति स्त्रीत्वे द्विगोः इति ङीप्।

४. अत्यन्तसंयोगे द्वितीया।

संकुचितेषु त्रिष्वगारेषु पञ्चविंशत्या मनुष्यैः सह महात्मा कारायां कालमत्यवाहयत् निकृष्टं हेयं च भोज्यं

कारावासः

प्रसन्नमना अभुङ्क्त। कठोरं कारावासं लम्भितः स प्रत्यहं नव होराः पर्यश्राम्यत्। प्रथमे दिवस इतरैस्त्रिंशता भरतदेशीयैः सहैकस्य भूखण्डस्य समीकरण उत्खनने च नियुक्तः। तत्रोद्यानं चिकीर्षितमासीत्। इदं कार्यं[1]मपरिशीलितपूर्वी[2] स भूभागस्य पारुष्याददो दुष्करममन्यत। काराया इदं स्थानं सार्धसप्त[3] क्रोशाः[4]। रविरतितीक्ष्णमतपत्। अचिरेणैव कालेन सोऽक्लाम्यत्। परं झटिति पुनः कार्यमारभत। इत्थं कानिचिदहानि स इदमेव कर्माकार्षीत्। अत्रान्तरे कञ्चित्कालं मालाकारकृत्यमपि महात्मान्वतिष्ठत्। सरस्या उत्खननेऽपि व्यापार्यत। तत्र भुवमुदखनत्। मृदमुदचिनोत्। उच्चित्य च देशान्तरमवहत्। इदमपि न सुकरमासीत्। एवं तस्य मणिबन्धनं व्रणितमभूत्। परं स कर्मासक्तिं नाहासीत्। अस्यैवंविधस्य दिनकृत्यस्यावसाने प्रत्येकस्मा[5]दागारात् प्रस्रावभाजनस्य हस्ताभ्यामादाय बहिःप्रापणमपि कृत्यमासीत्। विजितमनोग्लानिर्महात्मप्रवरः श्रीगान्धीदं यथादेशमचारीत्। कदाचित् स विट्शरगस्य[6] संमार्जनमपि काराया अधिष्ठात्रादिष्टः

---

१. अत्रानुक्ते कर्मणि तद्धितयोगात् षष्ठी न भवति। कृद्योगे तस्या विहितत्वात्।

२. पूर्वं परिशीलितमनेनेति परिशीलितपूर्वी। स न भवतीति। सपूर्वाच्च इत्यनेन इनिः।

३. अर्धेन सह वर्तमाना सार्धाः। सार्धाश्च ते सप्त च।

४. तद्युक्तादध्वनः प्रथमासप्तम्यौ—इति प्रथमा। गवीधुमतः साङ्काश्यं चत्वारि योजनानि—इत्यत्र यथा।

५. नाव्ययीभावादतोऽम्त्वपञ्चम्याः इति पञ्चम्याः पर्युदस्तत्वादसत्यमादेशेऽसति च सुब्लुकि विभक्तिः श्रूयते।

६. अद्यत्वे पौराः प्रायेणोच्चारायारण्यं नाश्रयन्तेऽपि तु तदर्थासु शालासूच्चरन्ति। एतदर्था शालेह विट्शरणमुक्तम्। शश्छोऽटि इति च्छत्वस्य विकल्पितत्वादत्र तदभावः।

स्वयमकार्षीत्। तत्र कारायां निवसन्महात्मा फिनिक्सतो विद्युद्वार्ता-मध्यगमत्। यया स इदमबोधि—

मम धर्मदारा[1] इदानीमासन्नमरणाः। अतो मया तत्राह्लाय गन्तव्यमिति। त्वं धनदण्डं दत्त्वा जिगमिषसि न वेति काराधिष्ठात्रानुयुक्तो महात्मा दमस्य दानं तु नितान्तमसंभवि। औरसैः[2] संनिकृष्टैर्बन्धुभिश्च वियोगोऽपि सत्याग्रहेऽन्तर्भवतीति न्यगादीत्। एवमवस्थिते स प्रियान् दारानुद्दिश्य पत्रलेखनमयाचीत्। गौर्जर्या भाषया पत्रार्थ उपनिबन्धनीय इत्युक्ते सति तदपि न प्राहिणोत्[3]।

काराया मुक्तो महात्मा स्वपक्ष्यान् संग्रहीतुमाङ्गलदेशमगमत्।

आङ्गलदेशगमनम्

तत्र दक्षिणाफ्रीकास्थानां भरतवर्षीयाणां व्यसनौघ[4]-मप्रथयत्। शासकानां बलात्कारांश्चाबोधयत्। महात्मनो वर्णनया प्रयुक्ता आङ्गला भरतभूमिजानां पक्षमपुष्यन्। शासितृंश्च बलवदनिन्दन्। तेषां मध्ये बहवोऽमन्यन्ताऽसहायायां जाताविथ्थं बलात्कृतय आङ्गलानां मुखं शासनं च कलङ्कयन्तीति। अतस्तैः श्रीहोक्सनाधिष्ठिता समितिरेका व्यरचि। भरतवर्षीयाणा-मानुकूल्यं सम्पादयितुमेतया समित्या प्रशस्यः प्रयत्नोऽकारि।

षट्षष्टयुत्तरनवशतोत्तरसहस्रतमे संवत्सरे नेटाल्, ट्रांस्वाल्,

प्रचारपरिणामः

केपोपनिवेशः, ओरेञ्जस्वायत्तराष्ट्रम् इत्यादयश्चत्वार उपनिवेशाः संघटय्य दक्षिणाफ्रीकासंयुक्तराज्यम् इति व्यपदेशं प्रापिताः। प्रिटोरिया इत्यत्रास्य राज्यस्य विचारविभागः

---

१. धर्मस्य दाराः=धर्मदाराः। तादर्थ्ये षष्ठीसमासः। अश्वघास इतिवत्। धर्माचरणार्था दारा इत्यर्थः। अथ पुंभूम्नि दाराः इत्यमरात्पुंसि बहुत्व एवास्य प्रयोगः।

२. उरसोऽण्च इत्यण्। उरसा निर्मित औरसः।

३. हिनुमीना इति णत्वम्।

४. व्यसनं दुःखम्। व्यसनं विपदि भ्रंशे दोषे कामजकोपजे—इत्यमरः।

प्रतिष्ठापितोऽभूत्। तदानीं साम्राज्याधिकृता एतन्नूतनराज्याधिकृतेभ्य[1] इमं परामर्शं समदिशन्- नामलेखनविधानं निराक्रियताम्[2]। जातिविशेषाश्रयिण्यो यन्त्रणा अपनीयन्ताम्। भरतदेशीयेषु सद्व्यवह्रियताम्। आङ्गलसमाजस्यार्थजातं साधयितुं येऽलं स्युस्तेषां प्रतिवर्षं भरतवर्षादागन्तुकानां संख्या च नियम्यताम्। एवमधिवेलं[3] स्थितेषु नगरेषु वसतो जनान् निर्वास्य योऽनुनयो भविता सोऽस्माभिर्नानुमंस्यते। तद्वास्तव्यानबाधित्वा जातेर्वर्णस्य च भेदमनाकृत्याङ्गलानां भरतवर्षीयाणां चाधिकाराः समीक्रियन्ताम् इति।

गोखलेमहाभागस्यागमः

आङ्गलदेशात्परावृत्य श्रीगान्धी गोखलेमहाशयमाफ्रीकामागत्य तत्रत्यवृत्तान्तसाक्षात्करणे प्रायुङ्क्त। आतुरोऽपि महामतिर्गोखलेः सुहृदः श्रीगान्धिनोऽभ्यर्थनां प्रत्यादेष्टुं नाशकत्। अभ्यागतः स सर्वैर्भरतवर्षीयैराङ्गलैश्च समं सभाजितः[5]। संयुक्तराज्याधिकारिभिः स राजवत्पुरस्कृतः। प्रतिज्ञातं च तैर्वयं विधानान्तरपरिवृत्त्या सहैव पञ्चचत्वारिंशद्रूप्यकात्मकं करमपि प्रत्यादेक्ष्याम इति। एवमनाकुलतां सम्पाद्य गोखलेमहाशय आङ्गलदेशं प्रातिष्ठत।

पुनः सत्याग्रहग्रहः

सप्तषष्ट्युत्तरनवशतोत्तरसहस्रतमे संवत्सरे प्रिटोरियाव्यवहारमण्डपे कस्यचिद् भरतभूमिजस्याङ्गलस्य च

---

१. क्रियाग्रहणमपि कर्तव्यमिति सम्प्रदानत्वाच्चतुर्थी।

२. प्रत्याख्यायताम्। प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः—इत्यमरः।

३. वेलायामित्यर्थः। विभक्त्यर्थेऽव्ययीभावः।

४. वसेस्तव्यत्कर्तरि णिच्च इति कर्तरि तव्यत्प्रययो णिच्च। वसतीति वास्तव्यः।

५. अथ द्वे आनन्दनसभाजने आप्रच्छनम्—इत्यमरः। सभाजित आलिङ्गनकुशलप्रश्नादिनानन्दितः।

६. राजानमर्हतीति राजवत्। तदर्हम् इति वतिः।

व्यवहारो निर्णय आसीत्। तत्र न्यायाध्यक्षा[1] अधिकारिभिः परवन्तो भरतवर्षीयाणां विवाहोऽवैध इति व्यवातिष्ठिपन्। इमां व्यवस्थामाश्रित्याधिकारिणः प्रस्तावमेकं प्रास्तुवन्। येन स्वीकृतेन भरतवर्षीयाणां विवाहोऽवैध इति प्रेते मूलपुरुषे तदपत्यं पित्र्यमृक्थं नार्हिष्यति। तच्च रिक्थं राजसात्[2] करिष्यत इति नियमः प्रवर्तिष्यते।

एतं प्रस्तावमाकर्ण्य भरतखण्डजा अवष्टब्धा विवृद्धमन्यवः समजायन्त। विधिना परिणीताः कुलाङ्गना अनेन राजनियमेन कुलटात्वं गमिताः, तदपत्यानि च जारजत्वमित्यसीदंस्तासां हृदयान्यज्वलंश्च गात्राणि। सर्वत्र जनपदे व्याप्तसर्वदिक्कः[3] प्लोष इव समजनि। यद्यपि महात्मना विधानस्यास्य प्रतिभयाः[4] परिणतीः स्मारिता अधिकारिणस्तथापि ते तदनुशिष्टिमनादृत्ययैकोनसप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे तं प्रस्तावमभ्युपागमन्।

संयुक्तराज्याधिकृतानुपसंगम्य तान् बह्वभ्यर्थ्य च महात्मा यतो न किञ्चित्तुष्टिकरं प्रतिवचो लभतेऽतः सर्वस्मिन्देशे सत्याग्रहप्रारम्भमुद्घोषयति।

तदनुसारेण तदानीन्तन्यस्तत्रत्याः स्त्रियो निश्चितिमेतामध्यगमन्—यदि काचिल्ललना देशगौरवं रक्षितुं कुलस्थितिं च समर्थयितुं कुटुम्बेन सहैव कारां न प्रवेक्ष्यति प्रवेष्टुं वा न संनत्स्यति सा भरतवर्षीया स्त्रीति न गणयिष्यते, जातेश्च बहिष्करिष्यते। अस्मिन्सङ्कटेऽस्माभिः स्वं कृत्यं कृत्वाऽऽत्मा कृतार्थनीय इति।

---

१. आधिकरणिकेऽर्थे न्यायाधीश इति केषाञ्चित्प्रयोगो भ्रमनिबन्धनः।
२. तदधीनवचने इति साति:। राजाधीनमित्यर्थः।
३. व्याप्ताः सर्वा दिशोऽनेन सः।
४. प्रतिगतं भयमस्मिन्निति प्रतिभयम् भीषणम्। प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः इति समासः।

पुरुषेभ्यः प्रागेव स्त्रीभिरुत्साहः प्रादर्शि। श्रीगान्धिसहधर्मिण्याऽधिष्ठिताभि[1]स्ताभिः सत्याग्रहिनारीसङ्घः प्रकल्पितः। योहन्नसबर्गस्त्रीभिरपि नेटाल्वासिनीनामनुकुर्वतीभिस्तादृशः संघः संघटितः।

विजयपताकां दोधूयमानाः शतशो जामयो ग्रामाणामन्तरतो गत्वा ट्रांस्वाल् इत्यत्र प्राप्नुवन्। तत्र सानन्दं सस्मितं भ्रूविकारमन्तरेण च ता आत्मानं रक्षि[2]वर्गैरग्राहयन्। आसां काश्चनान्तर्वत्न्यः[3], काश्चन स्तनन्धया[4]न्धापयन्त्य[5] आसन्। भरतदेशललामभूतानां रमणीनामेतत्साहसिक्यं सहिष्णुत्वमात्मोपहारश्चावलोक्य परममद्भुतममन्यन्ताङ्गलाः।

गोखलेमहाशयाय यत्संयुक्तराज्याधिकृतैः प्रत्यश्रावि तन्नाद्याप्यकारि। पञ्चचत्वारिंशद्रूप्यकात्मककरात् केवलं स्त्रिय एव विप्रमोक्षमलभन्त। ताभिरपि करस्य स्थाने प्रतिवर्षं प्रमाणपत्रमादातव्यमिति व्यधीयत। इत्थमसत्यसन्धांस्तानुपलभ्य शमप्रधानः श्रीगान्धी अधिकृतान्पुनरावेदयत्। परं ते किमपि नाविदुस्तूष्णीं चास्थुः।

सत्याग्रहिनारीसङ्घेन प्रयुक्ता भरतदेशजा भरण्यभुजः[6] शिल्पालयेषु स्वव्यापृतिमजहुः। तथा सति शिल्पालयाधीशास्तान् भृशमतर्ज-

---

१. नीताभिरनुशिष्टाभिर्वा।

२. ण्यन्तस्य ग्राहेर्धातोर्द्विकर्मकत्वं केचित्प्रतिपन्नाः केचिन्न। उभयथा हि प्रयोगा दृश्यन्ते। अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक—इति कुमारे। उपाध्यायेन त्वमासनं प्रतिग्राहितः—इति विक्रमोर्वशीये। रघौ तु द्विकर्मकत्वप्रतिपद्यमानेन कविना धातुरयं प्रयुक्तः—अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् इत्यत्र।

३. गर्भिण्य इत्यर्थः। आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी—इत्यमरः।

४. स्तनं धयतीति। शिशुरित्यर्थः। नासिकास्तनयोर्ध्माधेटोः इति खश्।

५. धेट् पाने इति धातोर्णिचि शतरि रूपम्।

६. भरण्यभुजः कर्मकराः। भरण्यभुक्कर्मकरः—इत्यमरः। भरण्यं वेतनं भुङ्क्ते इति।

यन्त विविधश्चाभीषयन्त। परं यदा ते विभीषिका अवधीयं स्वस्थ्यं प्रादर्शयंस्तदा ते सभामकारयन् यत्र महात्मानमपि न्यमन्त्रयन्त। तत्र सभायां महात्मनाऽऽङ्ग्लसमाजस्य पुरतो वास्तवं कार्यनिवृत्तिकारणं विवृतम्। इहत्या अधिकारिणो महामतये गोखलेमहाशयाय संगीर्यापि करं नापनुदन्तीति। त इदं निशम्य चित्रीयमाणा[1] अस्य वचसः पारमार्थिकत्वमुपलब्धुं प्रायतन्त। तै पृष्टो जेन्रल् स्मट्स् इत्याख्योऽधिकृतस्त्वेतमर्थमत्यन्तमपालपत्। परं फिशर्नामा कश्चिदुच्चैःपदस्थ उक्तमनृतं हिनस्तीति, समूलो वा एष परिशुष्यति योऽनृतमभिवदतीत्यलीकाद्बिभ्यद् अनाशङ्कमान इदमवादीत्—मत्समक्षमेव जेन्रल् स्मट्स् इत्यनेन गोखलेमहाशयाय करापनोदः प्रत्यज्ञायीति। एतत्सर्वं ज्ञात्वापि ते शिल्पालयाधीशा अस्मिन् विषये माध्यस्थ्य[2]मभजन्त। श्रमिणश्चानेकैरुपायैरनारतमबाधन्त। एतत्समीक्ष्य महात्मा सर्वान् श्रमिणः फिनिक्साश्रमं प्रति गमनमाज्ञापयत्। एवमाज्ञप्तास्ते तमाश्रमं प्रत्यपद्यन्त। अनेनाधुनातनः सत्याग्रहोऽभूतपूर्वां भीषणतां प्रापत्। यदा पुरुषाः स्त्रियो बालाश्च विधानमतिक्रमितुं संनह्यास्माद् आश्रमान्निरक्रामंस्तदा तीर्थे यियासूनां यात्रिकाणां कश्चिन्महान् सार्थ[3] इवालोक्यत। सर्वो लोक[4] इदं धर्म्यमायोधनमित्यमन्यत। तदात्वे तैर्गीयमानं—वीराः! अवगणय्य सुखदुःखे कर्तव्ये कर्मणि प्रसिता भवतेत्याशयं गीतं श्रोतृणां मनांस्यावर्जयत्। अस्य सङ्घस्य प्रधाननायको रुस्तमजिरितिसंज्ञः कश्चित् पारसीक आसीत्। प्राक्तने सत्याग्रहावसरे पिता[5]पुत्रयोर्मध्ये विधानातिक्रमेण कतरः प्रथमं कारा-

---

१. विस्मयमाना इत्यर्थः। नमोवरिवश्चित्रङः क्यङ्।

२. ताटस्थ्यम्। अनास्था इत्यर्थः। तथा च कुमारे प्रयोगः—
अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे। इति।

३. सङ्घ इत्यर्थः। अयं प्राणिनामेव संघे वर्तते। संघसार्थौ तु जन्तुभिः— इत्यमरः।

४. जन इत्यर्थः। लोकस्तु भुवने जने— इत्यमरः।

५. आनङ् ऋतो द्वन्द्वे इत्यानङ्।

माप्नुयादिति विषये वैमत्यमासीत्। तत्पुत्रः सोराबजिरित्थं पितरं समबूबुधत् —तात ! भवान् स्थविरः, अतो गृहेऽवस्थाय तत्सम्बन्धीनि कार्याण्यवेक्षताम् । इदानीमहं सत्याग्रहमास्थास्यामीति । रुस्तमजिरेवं प्रत्यभाषत प्रियतनूज ! अभिनववयास्त्वं सुखमेव सर्वदाभुक्थाः[1], दुःखं न समवेदीः[2], अतो गृह एवावस्थायात्रत्यकार्यजातं पर्यवेक्षस्व। अहं सत्याग्रहमास्थास्यामीति। नैकोऽपि गृहेऽवस्थानमभ्युपागात्। अतस्तावुभावपि सत्याग्रहयुद्धे संयत्तौ[3]बभूताम्।

अपरोऽपि रुचिकरो व्यतिकरो[4]ऽस्मिन्सङ्घर्षे समजनि।

अयमेव रुस्तमजिः श्रीमर्दूम इतिनामानं प्रवयसं द्रष्टुमुपागमत्। तदा श्रीमर्दूमस्य वचः श्रुत्वा रुस्तमजिररोदीत्। श्रीमर्दूमेनोक्तम्—प्रिय मित्र ! यद्यहं तथोल्लाघः[5] स्यां यथा शय्याया उत्तिष्ठेयन्तर्ह्यहमपि सत्याग्रहयुद्धे व्याप्रियेयेति !

फिनिक्साश्रमस्थैरस्मिन्युद्धे महत्साहायकमकारि। कृच्छ्राणि सोढानि। अनिद्रमनिशमनेकस्मिन् संविधाने प्रयत्तम्। विक्टोरिया मण्डले यदा कार्यनिवृत्तिरभूत् तदा शतशः श्रमिण आश्रमं शरणं प्रापद्यन्त। तेषां सर्वेषां भोज्यपेयादेरुपकल्पनमपि नेषत्करमासीत्। श्रमिणामधीशैराश्रमवासिन आक्रम्येरन्निति भीरप्याविरासीत्। परमाश्रमस्था एवं दुःखं निर्वहन्तोऽपि मनागपि नाव्यथन्त।

यदाश्रमस्थाः सर्वे बन्दीकृत्य कारां प्रवेशितास्तदा योहन्नसबर्गी-

---

१. भुजोऽनवने इत्यात्मनेपदम्। लुङि मध्यमैकवचने रूपम्।

२. संपूर्वाद् वेत्तेर्लुङि रूपम्। विदिप्रच्छिस्वरतीनामुपसंख्यानम् इत्यनेनात्मनेपदं न भवति। तत्राकर्मकात् इत्यस्यानुवृत्तेः।

३. संयत्तौ संनद्धौ।

४. व्यापार इत्यर्थः। व्यापारे मुदि सम्बन्धे योगे व्यतिकर इति शब्दार्णवः इति घनश्यामः।

५. निरामयः। वार्तो निरामयः कल्य उल्लाघो निर्गतो गदात्—इत्यमरः। अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः इति निपातितम्।

याणामुत्साहो न[1] वपुषि प्राभवत्[1]। स्त्रियोऽपि
अभिव्यापिका नाम कारावासमभिलाषुका[2] अभूवन्। थाम्बीनाय-
कार्यनिवृत्तिः कस्य सर्वः पोष्यवर्गोऽस्मा आरम्भायोदयुङ्क्त।
एतद्वर्गीयः स्त्रियः शिशून् क्रोडीकृत्य गृहान्निर्गत्या-
न्याभिः स्त्रीभिः संगत्य सर्वगतायै कार्यनिवृत्तये श्रमिणो जनान्
प्रचोदयन्। ताः सर्वाः समवेत्य न्यूकैसल् (अभिनवसौधम्) इतिना-
मानं संवसथं संगत्य तत्रत्यश्रमिणां सहधर्मिणीः सम्यगनुशिष्य
श्रमिणः कार्यविसर्गं प्रति प्रैरयन्। असूर्यम्पश्या[3] अवगुण्ठितवदना याः
कुलाङ्गनाः सोपबर्हां[4] शय्यामन्तरेण स्वापं नापन्, ता विषह्य क्लान्तिं
विजित्य लज्जां सर्वेषां साम्मुख्यमादधुः। ताभिः प्रयुक्ताः श्रमिणः[5]
कार्यनिवृत्तिं प्रतिपन्नाः। इतरत्रापि सर्वत्र खनिषु कार्यविसर्गे प्रवृत्ते
प्रणेतृमण्डलादेशानुसारेण[6] कर्मकराः खनीस्त्यक्त्वा अभिनवसौधे संनि-
पतिताः। तदात्वे स ग्रामः तीर्थ इवाभासत। यत्र संख्यातिगा
यात्रिणो जीवितसाफल्यं समीहमानाः प्रत्यहं परापतन्। तेषु शतशः
स्त्रियः पृथुकानुत्सङ्गे निधायाध्वानमगच्छन्। स्त्रियो वा पुरुषा वा
सर्वे स्वं स्वमुपकरणं शिरसाऽबिभरुः।[7] कश्चित्तत्राह्नि संन्यधीयत,
कश्चिन्निशि। यत्किमपि भोज्यं तेभ्यस्तदानीं प्रणेतृभिः प्रत्तं[8] तेनैव

---

१. तनौ नामात् इत्यर्थः। गुरुः प्रहर्षः प्रबभूव नात्मनि इति रघौ।

२ अभिलषणशीला इत्यर्थः। लषपतपद—इत्यादिना उकञ्। अत एव न लोकाव्ययेति षष्ठीनिषेधे कारावासम् इति द्वितीयान्तम्।

३. असूर्यललाटयोर्दृशितपोः इति खश्।

४. सोपधानामित्यर्थः। उपधानं तूपबर्हः—इत्यमरः।

५. शमित्यष्टाभ्यो घिणुन्। श्रमितुं शीलमेषां ते।

६. प्रणेताऽधिष्ठाता, निर्वाहयिता, व्यवस्थापकः। एतस्मिन्नर्थे उदीच्येषु क्वचित्प्रबन्द्धृशब्दप्रयोगो दृश्यते। कविभिस्त्वेतस्मिन्नर्थेऽप्रयुक्तत्वान्नाय-मादरणीयः।

७ सदप्यधिकरणत्वमविवक्षितम्। करणत्वं तु विवक्षितम्। विवक्षाधीनानि कारकाणि। धातुमत्तां शिखरैर्बिभर्ति इत्यत्र यथा।

८. अच उपसर्गात्तः इति तकारादेशः। दत्तमित्यर्थः।

तेऽतुषन्। सर्वे प्रसन्नवदना अवालोक्यन्त। भुवि तृणशयनेऽशेरत। इमे तत्र खनिवासहानेनावाङ्मनसगोचरं[1] कष्टमन्वभूवन्।

उद्देशपूर्तिः

अभिनवसौधम् इत्यत्र मनुष्याणां त्रिसहस्र्यै पर्याप्ते प्रदेशे दशसहस्रीसंनिवेशः कुतः संभवो। यदि च कालान्तरं तत्रैवोष्येत तर्हि कस्यचिद् भयदस्यातङ्कस्य समुत्पादः स्यादिति महती संशीतिरिति ततः प्रस्थानमेव श्रेयसेऽभिप्रेतसिद्धये चेति मन्यमाना नेतारः कर्मणो विरतान् कर्मकरान् ट्रांस्वाल्मर्यादातिक्रमेण कारावाप्तये प्राणुदन्। एतां निश्चितिमनुसृत्य महात्मा पञ्चविंशतिं कर्मकरान् सहादाय चार्लसपुरं प्रति प्रायात्। ततः स ग्रामोऽदूरपञ्चविंशाः[2] क्रोशाः येऽध्वानं गन्तुमीशास्ते पद्भ्यामगच्छन्। इतरे विशेषतः स्त्रियो बालाश्च लोहपथसंचारीणि बाष्पयानान्यारोहन्। सर्वेषां सकाशे द्वैयह्निकं[3] भोज्यमासीत्। चार्लसपुरं प्राप्तास्तेषां मध्येऽध्यर्धशतं[4] पुरुषा राजपुरुषेणैकेनागत्य जिघृक्षिताः। परमिमे चार्लसपुरं यावन्मयैव सह यान्तु प्राप्ते च तस्मिन्यथादेशं करिष्यत इति महात्मनः परामर्शं स्वीकृत्य तेन तान् तस्मिन्समर्प्य न्यवर्ति। तत्र ग्रामटिकायां जनसहस्रवास्तव्यायां महान्तमेतं जननिवहं दृष्ट्वा गौराङ्गाः परं व्यस्मयन्त। तत्रैव च त उक्तपूर्वाः पुरुषा रक्षिभिरग्रहीषत[5]। अवशिष्टाः कञ्चित्कालं

---

१. अचतुरविचतुरसुचतुर—इत्यादिना निपातितो द्वन्द्वः। वाक् च मनश्च इति वाङ्मनसे। वाङ्मनसयोरगोचरमविषयमित्यर्थः।

२. संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये इति बहुव्रीहिः। अदूराः पञ्चविंशतेरिति विग्रहः। बहुव्रीहौ संख्येये डजबहुगणात्—इति डच् समासान्तः।

३. द्वे अहनी भावि द्वैयह्निकम्। तमधीष्टो भृतो भूतो भावि इति भाविन्यर्थे कालाट्ठञ्, इति ठञ्। तद्धितार्थे द्विगुः। राजाहःसखिभ्यष्टच् इति टचसमासान्तः। टचि अह्नोऽह्न एतेभ्यः इत्यह्नादेशः।

४. अध्यारूढमर्धं यस्मिंस्तत्। प्रादिभ्यो धातुजस्य—इत्युत्तरपदलोपः। अध्यर्धं च तत् शतं च इति कर्मधारयः।

५. ग्रहेः कर्मणि लुङि रूपम्।

तत्रावातिष्ठन्त। तदन्तराले सहस्रपञ्चकप्रायमिताः कर्मकराः समवायन्। परं तत्रापि चिरं वासो नोचित इति ततः प्रयाय ट्रांस्वाल् इति प्रविश्यात्मग्रहणं साध्यमिति निरचैषुर्नेतारः। इदञ्चोदघोषयन्—विदितमस्तु राज्याधिकारिणां यद्वयं बन्धनमात्मनः कामयमानाः ट्रांस्वाल् इति राष्ट्रं प्रविशामः। यावत्पञ्चचत्वारिंशद्रूप्याकात्मकः करो नापनेष्यते तावद्वयं सततमटनं करिष्यामः। अन्ते च फिनिक्स इत्यत्र गत्वा वत्स्याम इति।

एवं निश्चयं प्रथयित्वा महात्मानं पुरोधाय त्रिसहस्रातिरिक्ता जनास्ततः प्रास्थिषत। यदा ते स्टेण्डर्टन् इत्यभिधानमधिष्ठान[1]मापंस्तदा महात्मा राजपुरुषैरग्राहि। श्रीपोलकमहोदयस्तदानीम प्रोकावासिनां भरतदेशजानां हिताय भरतवर्षं यियासुरिदं दृष्ट्वा कर्मकराणां प्रयाणादिकमध्यतिष्ठत्। अभियुक्तो महात्मा डण्डीव्यवहारमण्डपे भौमवासरे समुपातिष्ठत्। प्राड्विवाकस्य समक्षं यत्तेनावाचि तत्संक्षिप्येहोपन्यस्यते—अहमभियोगयाथार्थ्यमभ्युपैमि। अहमिहत्यः प्रतिष्ठितो व्यवहारोपजीवीति मत्तो नान्योऽस्मिन्कर्मणि प्रष्टव्यः। अहमेव सत्याग्रहिसङ्घं ट्रांस्वाल्सीमाविक्रमणे प्रैरयम्। कर्मकरा अपि वयमिवान्यदाऽऽपद्येरन्[2]नित्याशङ्क्यास्माभिः सर्वैः संभूय विपत्प्रतीकारः करणीय इति कर्मकरानहमितरैः समयोजयम्। अनेन कार्यविरमेण गौराङ्गाणामाकराधीशानां भवित्रीं क्षतिमहं साधु वेद्मि परं भरतभूमिजानां कर्मकाराणां हितोपदेशोऽपि मम धर्म इति मे मतिः। इदानीं यावन्मया स धर्मोऽनुपालितः। स्वदेशजान्प्रयानहमिदमेवोपदिदिक्षामि—यावदयं करो नापनुद्यते तावत्खनीस्त्यक्त्वा कार्यालयांश्च विहाय भैक्षं[3] चरत। श्रद्दधेऽस्य नैष्ठुर्यस्येदृशीनां

१. अधिष्ठानं पुरम्। अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि—इत्यमरः।

२. आपद्गताः स्युरित्यर्थः। तथा च श्रीरामायणे प्रयोगः—

अर्थधर्मौ परित्यज्य यः काममनुवर्तते।
एवमापद्यते क्षिप्रं राजा दशरथो यथा॥

३. भिक्षैव तत्समूहो वा। चरतिरन्नार्जनपूर्वके चरणे वर्तते।

बलात्कृतीनां च कष्टसहनादृते न परिणतिर्भविष्यतीति ।

एवमभियुक्तो महात्मा सपादवत्सरं कारावासं प्रापितः ।

पोलकमहाशयेन सम्यङ् नीताः कर्मकरा बेल्फोर्नामकं नगरमध्यगच्छन् । तत्र त्रीणि बाष्पयानानि तान् नेटाल् इत्यभिधं प्रदेशं नेतुं सज्जान्यासन् । सर्वे कर्मकरा आसिद्धाः[1] सन्तो बाष्पयानान्यारोप्य चार्लसपुरमित्याख्यं ग्रामं नीताः । प्रथममगृहीतः पोलकमहाशयोऽपि तत्र प्रगृहीतः । तत्र चाष्टौ होराः[2] किमप्यप्राश्य ते बलादयाप्यन्त । तृषाशुष्यत्कण्ठास्ते तं कालं कथं कथमप्यनैषुः । तदनु ते बाष्पयानान्यारोप्य ततोऽनीयन्त । यानविरामस्थाने स्वल्पमेव कालं यानानि व्यरमन्[3] । शस्त्रभृतः प्रहरिणस्तत्र जागरूका आसन् । तत्र शतशः स्त्रियस्तान्द्रष्टुमुपागमन् । पर्यश्रुनयनास्तास्तानेवमुपादिक्षन्—स्वकृत्यमवधीयताम्, अस्मत्कृते न काचिच्चिन्ता क्रियतामिति । बाष्पयानैरूढा द्विसहस्रं कर्मकरा यावन्नेटाल् इत्यत्र प्राप्तास्तावदभियुक्तास्सन्तः कारां प्रवेशिताः । एवं कारावासप्राप्तिरूपं कार्यं निवृत्तिप्रयोजनं सिद्धम् ।

यदा द्विसहस्रस्य वीराणां कारासु निक्षेपस्योदन्तः सर्वत्र दक्षिणाविजयः प्रीकास्थनगरेषु भरतवर्षे आङ्ग्लदेशे चाप्रथत, तदा डर्बनादिमहानगरेषु राज्याधिकारिणो बलवदगर्ह्यन्त । भरतवर्षमपि नितान्त संक्षुभितमभूत् । तदानीन्तनं सम्राट्प्रतिनिधिं श्रीहार्डिञ्जमहानुभावमुपेत्य प्रतिष्ठिता भरतवर्षीया आप्रीकाधिकारिणां भरतभूमिजान्प्रति क्रूराचारानन्याय्यव्यवहारांश्च

१. संयता इत्यर्थः । आङ्पूर्वः सेधतिर्बन्धनेऽर्थे वर्तते । परं तिङि प्रयोगस्तु न दृष्टः ।

२. द्वितीयान्तं पदम् । अनुक्ते कर्मणि द्वितीया । लकारस्तु प्रयोज्यकर्मणि । प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः इति ह्युक्तम् ।

३. व्याङ्परिभ्यो रमः इति परस्मैपदम् ।

सुष्ठूपावर्णयन्नयाचंश्च तत्प्रतिक्रियाम्। एवं प्रबोधितो लार्डमहोदय एकदा मद्रासपुर्यां भाषमाणो यथावद्[1] एतद्देशजानां मतमपुष्णात्। एवं हि तत्र भवानवादीत्—अद्यत्व आप्रीकाराज्याधिकृताः प्रोषितान्भरतवर्षीयानदयमन्याय्यमाचरन्ति[2]। प्रोषितैर्भरतदेशजैरन्याय्यान् विपद आहर्तॄन् विधीन् विरोद्धुं य उपाय आस्थितस्तत्राद्य यावदुदासीना अपि वयमवस्थितेर्भयङ्करत्वान्नोदासितुमर्हामः। आप्रीकाधिकृतांश्चोच्चकैरावेदयामः—नितान्तमन्याय्या वो वृत्तिर्भरतवर्षीयेष्विति।

प्रोषितैर्भरतभूमिजैः केवलमन्यायप्रतिरुरुत्सयैव भावि दुःखौघं विद्वद्भिरेव[3] सत्याग्रहव्रतमचारि कारावासश्चालाभि। अतो नैकोऽपि तेषामेनस्वीति वक्तुं शक्यम्। वयं तेषामिममुद्देशं समर्थयामः न केवलं भरतवर्षीया इमां तेषां प्रवृत्तिं प्रशंसन्ति, अपि तु न्यायप्रियाणां वैदेशिकानामपि हृदयानि द्रुतानि समदुःखभाञ्जि भवन्ति।

इदानीन्तु तत्रत्यावस्थितिरतिमात्रं शोच्या समजनि। भरतवर्षीयास्तथाऽसद्व्यवह्रियन्ते यथा कस्यचनापि शिष्टस्य शासितुः सह्यं न भवति। वयमेतमन्यायमवसितमिच्छामः। दृढं च प्रतीमो यदाप्रीकाराज्याधिकृता एतद्देशजेषु न्यायेन वर्तितुं न पारयन्ते। ते हि साम्राज्याधिकृतान् भरतवर्षराज्याधिकृतांश्चासकृदन्याय्यविधिपरिहारं श्रद्धापितवन्तः। असत्यया सन्धया स्वं[4] मतिसंहितवन्तश्च[5]।

---

१. अर्हार्थे वतिः। यथार्हमित्यर्थः।

२. व्यवहारार्थ आङ्पूर्वश्चरतिरकर्मकः सकर्मकश्च। उभयथा हि प्रयोगा दृश्यन्ते। अकर्मको यथा—प्राप्ते तु षोडशे वर्षे पुत्रे मित्रवदाचरेत् इत्यत्र। सकर्मको यथा—पुत्रमिवाचरति पुत्रीयति च्छात्रम्।

३. विद्वद्भिरित्यर्थः। विदेः शतुर्वसुः इति शतुर्वसुरादेशो वा।

४. आत्मानमित्यर्थः। स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने—इत्यमरः।

५. वञ्चितवन्तः, विप्रलब्धवन्त इत्यर्थः। अतिसंपूर्वो दधातिर्वञ्चनेऽर्थे वर्तते। य आत्मानमतिसन्धत्ते स परस्मै स्यात्कथं हितः इति तन्त्रवार्तिके। परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः इति च शाकुन्तले।

अतः प्रयतिष्यामहे यथा भरतभूमिजानावस्थितिं परमार्थत उपलब्धुं काचित्समितिर्नियुज्येतेति। एतस्याः समितेः सर्वं साक्षात्कृत्य यथा वस्तुविवरणं करिष्यन्ति तथा साम्राज्याधिकृताः संयुक्तराज्याधिकृतान् भरतवर्षीयान्प्रति न्याय्यं व्यवहारमादेक्ष्यन्ति। तच्च पश्चान्निर्दिष्टैरवश्य[1]करणीयतामापत्स्यत इति ध्रुवम्।

आङ्गलदेशेऽपि लार्ड्[2]एम्थिलमहोदयस्य प्रयासैः सत्याग्रहिणां कष्टवृत्तान्तः सर्वत्र प्रचरितोऽभूत्। अचिरेणैव कालेन साम्राज्यसभया संयुक्तराज्याधिकारिण आदिष्टा भरतवर्षीयाणामवस्थितिं परिचेतुं चैका समितिर्नियुज्यतामिति। तथादिष्टास्ते सालोमनकमीशन् इतिनाम्नीं समितिमरर[3]चन्। कालेनैतया समित्या यथावदुपलभ्य सर्वमविकलं संयुक्तराज्याधिकृता आवेदिताः। इत्थमावेदितास्ते भरतवर्षीयाणामभीष्टं विधानविशेषनिरसनमभ्युपायन्। एवं सत्यचिरेण पञ्चचत्वारिंशद्रूप्यकात्मकः करोऽपाकृतः। प्रविविक्षूणां भरतवर्षीयाणां विषये जातिभेदनिमित्तको व्यवहारभेदोऽस्तं गमितः। हिन्दूनां मुहम्मदीयानां चोद्वाहा वैधा इति व्यवसिताः। भरतखण्डजानां रिक्थं तदपत्यान्यर्हन्तीति विनिश्चितम्। केपोपनिवेश इत्यत्र प्रवेशोऽभ्यनुज्ञातः। नामलेखनविधिरपहस्तितः[4]। स्त्रीभिः प्रमाणपत्रस्याधिगमोऽप्यनपेक्ष इत्यभ्युपेतम्। परिशिष्टानां कासाञ्चिदहितानां व्यवस्थितीनां विषये जेन्रल् स्मट्स् इत्यनेन महात्मने प्रतिश्रुतमर्वाग्[5] बहोः कालात्ताः प्रतिविधास्यन्त इति।

---

१. लुम्पेदवश्यमः कृत्ये इति मकारलोपः।

२. लार्ड् इति प्रभुशब्देन समानर्थक आङ्गलभाषाविन्यासः।

३. रच प्रतियत्ने इति धातोश्चौरादिकाददन्ताल्लुङि रूपम्।

४. अपहस्तितो निराकृतः। अयं ममापहस्तितलज्जो व्यवसायः इति विक्रमोर्वशीये। अपसारणार्थो हस्तोऽपहस्तः। ततः तत्करोति तदाचष्टे इति णिचि निष्ठायां रूपम्।

५. अर्वाग् इत्यत्र प्रागर्थे प्रयुक्तम्। अर्वाक् संवत्सरात्स्वामी हरेत परतो नृपः इत्यत्र याज्ञवल्क्यस्मृतौ यथा।

एवं संशितव्रतैः[1] सत्याभिनिविष्टैश्चरिततिग्मतपोभिर्महात्मनाऽधिष्ठितैर्भरतभूमिजैर्जितम्। एवं हि वैधसी प्रीति[2]राप्यते।

मातृभूमिं प्रति गमनोद्यमः

एतां सुव्यवस्थितिमवलोक्यानन्दिषुर्भरतभूमिजाः प्रजाः। महात्मन उपकीर्तिं स्मारं स्मारमनंसिषुर्जनाः। कोटिशो धन्यवादांश्चावादिषुः। वृद्धास्तमाशिषाऽऽशासिषत। महात्मा त्वत्रावसितकृत्योऽहम्, मदीयामिह स्थितिमिदानीं नापेक्षन्ते भरतवर्षीयाः, अतो मया भारतं वर्षं गमनीयम्, तत्र भरतदेशस्थानां परिचर्ययात्मनश्चारितार्थ्यमभीप्सनीयमिति विनिश्चित्य भारतभुवं प्रति प्रस्थातुमुदयुङ्क्त। इमां वार्तामाकर्ण्य सर्वे भरतदेशजा उदविजन्त। आपन्नार्तेः शमयितारं विषमस्थस्य जनस्याभ्युपपत्तारं[3] परस्य कारणादनेकस्य व्यलीकस्य[4] सोढारं नेतारं ततः प्रतिष्ठासुं निशम्य तेन विरह्यमाणाः परं दुःखममंसत। तस्मिन्काले महात्मा डर्बननगर आसीत्। तत्रत्यैर्जनैः स स्वोत्साहस्यानुरक्तेश्च सदृशमभिनन्दित आपृष्टश्च। ततः स भवान् योहन्नसबर्गमागात्। तत्रत्यैर्भरतदेशीयैराङ्गलैश्च सहस्रशः संभूय महती परिषत् कृता, अभिनन्दनपत्रेण च तत्र महात्मा यथेष्टं पुरस्कृतः। अर्थ्याभिः[5] स्तुतिभिरभिष्टुतश्च। अत्रैव महात्मानं प्रहृतपूर्वी उद्यानाभिजन उत्थाय महात्मनश्चरणयोर्न्यपतद्, अपराधक्षमाश्चायाचिष्ट।

---

१. राद्धव्रतैः। तीर्णप्रतिज्ञैरित्यर्थः। संपूर्वात् श्यतेः क्तिनि रूपम्।
२. प्रीतिरानन्दः। मुत्प्रीतिः प्रमदो हर्षप्रमोदामोदसंमदाः—इत्यमरः।
३. आपद्गतस्यानुग्रहीतारमित्यर्थः। अभ्युपपत्तिरनुग्रहः—इत्यमरः।
४. व्यलीकं दुःखम्। दुःखे वैलक्ष्ये व्यलीकमप्रियाकार्यवस्तुनोः—इति वैजयन्ती।
५. अर्थादनपेताभिः। अर्थयुक्ताभिरित्यर्थः। धर्मपथ्यर्थन्यायादनपेते इति यत्।

वाचितेऽभिनन्दनपत्रे महात्मा स्वासनादुत्थाय यदब्रवीत्तत्संहृत्येहोपन्यस्यते—अत्र मम च मम वध्वाश्चोपकृतयोऽतिस्तुता:[1]। अत्र विषय इयं नो धर्मदेशना—यत्र वयं स्तूयामहे तत उत्थायान्यत्र गन्तव्यम्, गमनासम्भवे सति कर्णौ पिधातव्यौ, तदसंभवे च सा स्तुतिः सर्वत्र जगति विभवति परमात्मनि समर्पणीयेति। अहमाशास इमां नः स्तुतिं परमात्मनि समर्पयितुं प्रभवेयमिति।

योहन्नसबर्ग इतीदं नगरं मम नाविदितचरम्। अत्रैवाहं तानि मित्राणि पश्यामि यैरत्रत्यविवादेषु मम साह्यं कृतम्। अत्रैव द्वाषष्ट्युत्तरनवशतोत्तरसहस्रमिते वत्सरे सत्याग्रहपरिग्रहोऽभूत्। अत्रैव चाहं श्रीडोक्‌महाशयस्य मैत्र्या कृती समजनिषि[2]। धर्मप्रियया तत्पत्न्या चोज्जिहानजीवितोऽहं विविधैरुपचारैः पुनरसून् प्रापितः। सर्वेषां स्थानानां योहन्नसबर्गस्यैव स्मृतिर्नः प्रियतमा भविष्यति। भरतवर्षं वर्जयित्वा दक्षिणाफ्रीकैव मम, मम कुटुम्बस्य च प्रेष्ठो देशो भविष्यति। यद्यप्यत्र मयोच्चावचानि कष्टानि सोढानि तथाप्यत्रैव मया चिरं साहाय्यकृतः सुहृदो लब्धाः। इहैव भरतवर्षीयाणां हिताकाङ्क्षिणी होक्सनसमितिरात्मानमलभत। अत्रैव बेलिअम्मा इतिनाम्नी तरुणी सत्याग्रहयुधि स्वप्राणानुपाहरत्। मुग्धा सा नाजानीत कीदृशी मे धृतिरिति। न चावेत् तया समाजस्य को लाभ इति। स्वदेशजानां कृते उत्साहातिरेक एव तस्याः काराप्रवेशे हेतुः। कारायाः प्रत्यावृत्तिकाले तस्याः काय एवं विकलोऽभूत्, यथा सा न चिराय प्राणीत्। योहन्नसबर्ग एव नागप्राणो नारायणश्चेमौ विंशतिवर्षदेश्यौ युवानौ प्राणानमुञ्चताम्। परं मम भार्याऽहञ्च भाग्यविपर्ययादध्रियावहि[3]।

---

१. अतिरतिक्रमणे इति कर्मप्रवचनीयत्वे उपसर्गात्सुनोतिसुवति—इत्यादिना षत्वं न भवति।

२. कृतमनेनेति कृती। इष्टादिभ्यश्च इतीनिः। कृतार्थ इत्यर्थः। यस्य वीर्येण कृतिनो वयं च भुवनानि च इत्यत्र यथा।

३. धृङ् अवस्थाने इति तौदादिकाद् धातोर्लङि रूपम्।

मम भार्य्यया मया च समेषां समक्षं कार्यमनुष्ठितमेभिश्च परोक्षम्। अतः प्रशस्या यदि केचिद् भवन्ति तर्ह्यम एव भवन्ति।

एषु मध्य एको हरवंतसिहनामा पञ्चसप्ततिवर्षः प्रवीर आसीत्। तमेकदाहं कारागारेऽदर्शम्। कस्मादिहागतो भवान्, इह कारासम्बन्धिनं श्रमं कुर्वन्नूनं मरिष्यतीति मया पर्यनुयुक्तः स प्रत्यवोचत्—मा भवान् मामबुधं मंस्त। अहमवैमि येन कारणेन भवन्तो राज्याधिकृतैर्विवदन्ते। यद्यपि भवता पञ्चचत्वारिंशद्रूप्यकात्मकः करो न देयस्तथापीतरैर्भरतदेशजैर्यथाभिसन्धि[1] कैङ्कर्य्यं[2] कृतवद्भिस्त्ववश्यदेय इति तदपाकृतये यदि स्वान् प्राणान् नोपहरेयं ततः किमु प्रियतरं यदर्थमुपहरेयमिति। अस्य वीरस्य दिष्टान्तो[3] डर्बनकारायां वृत्तः।

यद्यद्य दशापरिवर्त्तः कश्चिद् दृश्यतेऽयं सत्याग्रहजनित इति मन्ये।

स्ववचसां विरतिं वितन्वानोऽहं भवद्भिर्विप्रयोगं ध्यायन् नितान्तं विषीदामि। यद्यप्यसह्या ममैषा विरहवेदना[4] तथाप्यवार्यया कयापि शक्त्या प्रयुक्तोऽहं भारतं वर्षं जिगमिषामि। आफ्रीकादेश एव मया सर्वोत्कृष्ट आयुषो भागो यापितः। आफ्रीकादेशमहं सम्यक् परिचिनोमि। जन्मभुवमपि भरतवर्षं न तथा संस्तौमि[5]। तथापि लब्धावसरोऽहं तत्रैव यामि। यूयं भगवतीश्वरे विश्वस्य स्वं स्वं धर्मं पालयतेति मे हृदयाभिलाष इति॥

इत्युपाध्यायश्रीचारुदेवशास्त्रिणः कृतौ श्रीगान्धिचरिते
द्वितीयः परिच्छेदः॥

---

१. अभिसन्धिर्निश्चयः। कार्यान्तरसापेक्षः पणो वा। यथा—अथावश्यमेव माधवसेनः पूज्येन मोचयितव्यः श्रूयतामभिसन्धिः इत्यत्र मालविकाग्निमित्रे।

२. किङ्करस्य भावः कर्म वा कैङ्कर्यम्। दास्यमित्यर्थः। ब्राह्मणादित्वात् ष्यञ्।

३. निधनमित्यर्थः। स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः-इत्यमरः।

४. विद चेतनाख्याननिवासेषु इति चौरादिकाद् धातोर्ण्यासश्रन्थो युच् इति युच्। ततष्टाप्।

५. परिचिनोमि। संस्तवः स्यात्परिचयः—इत्यमरः।

अथ तृतीयः परिच्छेदः ।

द्वासप्तत्युत्तरनवशतोत्तरसहस्रतमे वैक्रमे वत्सरे श्रीगान्धी मुम्बापुर्यां पोतादवतरत् । हिन्दवो मुहम्मदीयाः
स्वागतम् पारसीकाः कृश्चीना आङ्गलाश्चहमहमिकया[1] तस्मै प्रीतिपुरःसरं स्वागतं व्याहरन् । तदानीं नूतनवर्षो[2]पक्रम इति राजमन्त्रिणस्तस्मै भरतवर्ष[3]राज्यम् इतिनामिकां कीर्तिमुद्रां व्यतरन्[4] । मुम्बायां यदा तत्रभवान् श्रीगोखलेमहोदयं द्रष्टुमुपागमत् तदा श्रीगोखलेर्हितं मितं चेदमुपादिक्षत्—प्रियमित्र ! कञ्चित्कालमस्य देशस्याधुनातनी दशोपलम्भनीया पश्चाद् देशहिते कर्मणि व्यापारणीयमिति । एवं सख्या बोधितो महात्मा स्वदेशदशावलोकाय काश्चन प्रख्याता नगरीरभ्रमीत्[5] । चैत्रे मासि तत्रभवान् मद्रापुरीमगमत् । तत्र च ऋद्धिमता महीयसा जनकायेनाभिनन्दितः । तत्रावसरे तेनोदीरितानां वचसामयं संक्षेपः –

---

१. अहमहमिका तु सा स्यात्परस्परं यो भवत्यहङ्कारः—इत्यमरः । अहमहं शब्दोऽस्त्यत्र । वीप्सायां द्वित्वम् । व्रीह्यादित्वाट्ठन् । अहमहमिकया प्रणामलालसानाम् इति कादम्बर्याम् ।

२. अत्र वर्षशब्देन खिृस्तवर्षमभिप्रेतम् ।

३. कैसरे-हिन्द इति हि तत्र पारसीकभाषाविन्यासोऽभूत् ।

४. विपूर्वस्तरतिर्दानेऽर्थे वर्तते । तथा चामरः—विश्राणनं वितरणं स्पर्शनं प्रतिपादनमिति दाननामसु वितरणमिति पपाठ । वितरतिकर्मणाभिप्रेतस्य सम्प्रदानसंज्ञा केषाञ्चिन्मताऽपरेषां न । उभयथा हि प्रयोगा दृश्यन्ते—भगवान्मरीचस्ते दर्शनं वितरति—इति शाकुन्तले । वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे—इत्युत्तरे रामचरिते ।

५. भौवादिकाद्भ्रमेलुंङि रूपम् । दिवादेस्तु अभ्रमद् इति भवति ।

यदुक्तं भवद्भिर्मयैव जागर्ति[1]रेषाऽऽफ्रीकास्थानां भरतवर्षीयाणां कृतेति तदसत्। नाहमेतदभ्युपैमि। यत्सत्यं तत्रत्यैः प्रगुणप्रकृतिभिरत्यर्थं विश्वसनशीलैः सुजनैरहं स्वकर्तव्यं बोधितः। तेषामात्मोत्सर्गेण चित्रेण भगवदनुरागेण चाहं सङ्कल्पितेऽर्थे स्थैर्याय नोदितः। नाहं कश्चिन्नेताऽभूवम्। परं दैवदुर्विपाकान्मम भार्याऽहं च कर्मजन्ययशश्चिचीषां शमयितुमक्षममाणौ तेषां पुरः स्थितौ। तस्यैतस्य मम कर्मण ईदृशे स्तवे भवतां सौजन्यमेव कारणम्। परगुणपरमाणून्पर्वतीकृत्य नन्दन्तीति हि सतां प्रकृतिरिति।

सत्याग्रहाश्रम-प्रतिष्ठा।

मासत्रयं यावद् भरतभुवि भ्रमित्वा तदानीन्तनं वृत्तान्तं साक्षात्कृत्य महात्माऽमदाबाद इति नगरं प्रति न्यवर्तत। तत्र शबरवतीतिनाम्न्यास्तटिन्याः[2] स्तीरे फिनिक्साश्रमानुकारिणं सत्याग्रहाश्रमं प्रत्यतिष्ठिपत्[3]। आश्रमं प्रतिष्ठापयमानो महात्मैवं तत्प्रयोजनमन्वाचष्ट—यावद्वयं धार्मिका न भवामस्तावत्किमपि कर्तुं नाऽलं स्मः। धर्म्यं जीवनं च बाह्यैः कैश्चित्साधनैर्नाप्यते। हृदये हि धर्मस्य वसतिः[4]। यदि संसारे साफल्यमिष्यते तर्हि धर्मः प्रचेतव्यः। अयमाश्रमो धर्मप्रचये समुचितं साहायकं करिष्यति, भूयसा तु सेवाधर्ममुपदेक्ष्यतीति।

आश्रमवैशिष्ट्यम्

अत्र महात्मना कानिचिद् व्रतानि विहितानि तानि हि न केवलं प्रतिषेधस्वरूपाण्यपि तु विधिप्रतिषेधोभयात्मकानि। नवसंख्यानि तानीमानि भवन्ति।

---

१. जाग्रोऽविचिण्णल्ङित्सु इति गुणः क्तिनि प्रतिषेधविषये। तेन जागृतिरिति केषांचित्प्रयोगः प्रामादिकः।

२. नद्या इत्यर्थः। अथ नदी सरित्। तरङ्गिणी शैवलिनी तटिनी ह्रदिनी—इत्यमरः।

३. प्रत्युपसृष्टात्तिष्ठतेर्णिचि लुङि रूपम्।

४. वस निवास इति धातोरौणादिकोऽतिप्रत्ययः। वास इत्यर्थः। वसतिः स्यात् स्त्रियां वासे यामिन्यां च निकेतने—इति मेदिनी।

१. सत्यव्रतम्। सामान्यतोऽसत्यस्यानुक्तिरेव न पर्याप्नोति। सत्यं परिशीलयता जनेनेदमध्यवधेयं यदुद्देशहितायापि न कश्चिदतिसन्धेयः। स्यान्नाम सत्यव्रतपालनाय प्रह्लादेनेव पितुः सुधन्वनेव वा मातुर्वचः कदाचिन्नाङ्गीकरणीयं भवेदिति।

२. अहिंसाव्रतम्। अहिंसाव्रतपूर्तये प्राणिमात्रस्यानुपघात एव न पर्याप्नोति। अन्याय्यवृत्तीनपि न हिंस्यात्। तेभ्यो मा क्रुधत्, अपि तु तेषु स्निह्येत्। मातापित्रो राज्ञोऽन्यस्य वा कस्यचिदन्याय्यमाचरणं प्रतिरोद्धुमुपायस्त्ववश्यमास्थेयः, परमन्याय्याचारो न मनागपि विप्रकार्यः। अन्याय्याचारं प्रेम्णा जयेत्। यावदत्याचारो[1] न विजीयते तावत्सर्वं सहेत। वधदण्डमपि ग्रहीतुमुद्युञ्जीत।

३. ब्रह्मचर्यव्रतम्। ऋतेऽस्माद्व्रतात्पूर्वयोर्द्वयोः पालनमप्यसंभवि। एतद्व्रतमनुपालयताऽनृज्व्या दृष्ट्या परकलत्रं नेक्षणीयमित्येव न पर्याप्नोति। इन्द्रियविक्रियां तथा नियच्छेद् यथा सङ्कल्पेऽपि न सा संभवेत्। पाणिगृहीत्यामपि[2] कामवृत्तिं विहाय मित्र इव वर्तेत।

४. रसनेन्द्रियवशीकारव्रतम्। अनियम्य रसनां सद्व्रतान्तराणामपि परिग्रहो दुर्लभः। एतद्व्रतमनुपालयता दृढमवधारणीयं शरीरस्थितिरेव भोजनेनार्थ[3] इति। शुद्धमदुष्टञ्च भुञ्जीत। इन्द्रियविकृतिकारकं राजसं तामसं च भोज्यं परिहर्तुं प्रयतेत।

५. अस्तेयव्रतम्। परपरिग्रहामोष एवास्तेयं न, अपि तु यदि वयं किञ्चिदनपेक्षितमुपाददमहे तदपि स्तेयं भवति। सर्वेषां नः कृते

---

१. आचारमतिक्रान्तोऽत्याचारः पुरुषः। अत्यादयः क्रान्ताद्यर्थे द्वितीया इति प्रादिसमासः।

२. भार्यायामित्यर्थः। पाणिगृहीतोऽस्याः। पाणिगृहीती भार्यायाम् इति वार्तिकेन ङीष्।

३. अर्थः प्रयोजनम्। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु—इत्यमरः।

तावन्मात्रं जगति संविधीयते विधात्रा यावन्मात्रं नितान्तमपेक्षामहे।

६. अपरिग्रह[1]व्रतम्। निःस्वत्वं वस्तुजातस्यानङ्गीकार एव वाऽपरिग्रहो न भवति। शरीरस्थित्यर्थमनपेक्षितस्य वस्तुनः परिहारोऽप्यपरिहार्यः। रुच्यर्थं[2] न किञ्चिद्धारयेत्।

७. स्वदेशवस्तुप्रयोगव्रतम्। अहिंसाव्रतेन मानवेन विदेशविनिर्मिताः पदार्था यन्त्रनिर्मिताश्चाप्रयोज्याः। यन्त्राधीशा स्वार्थसिद्धये कर्मकरान्बाधन्ते। रुज्यन्ते च यन्त्रेषु कर्मकराः। यन्त्रनिर्मितेषु वस्तुषु निकृष्टवस्त्वन्तरसंसृष्टिरपि बह्वी भवति। यन्त्रनिर्मितवस्तूनां भूम्ना विनियोगोऽपि बहुलो भवति। तेनास्तेयापरिग्रहयोर्व्रं तयोरनुष्ठानमप्यशक्यतामापद्यते। विदेशवस्तुविनियोगेन प्रसाधने[3] रुचिरुदेति परिकर्म[4]रसिकत्वं चोपजायते। तेन ब्रह्मचर्यव्रतं हिंस्यते। स्वदेशवस्तुविनियोगेन न किञ्चन हार्यते। भरतवर्षीयं धनं भारते वर्ष एवावतिष्ठते, देशान्तरं न संक्रामति। दुर्गताः क्षुधावसन्नास्तपस्विनशिल्पिनश्च भुक्तिं लभन्ते।

८. निर्भीकताव्रतम्। नहि भीरुः सन् सत्यव्रतं पालयितुं पारयति। तेनेतदाश्रमस्थैर्निर्भीकताव्रतं चरितव्यम्। राज्ञो वा, चोराद्वा, बान्धवाद्वा, मित्राद्वा, हिंस्रा[5]च्छ्वापदाद्वा[6], मृत्योरपि वा न तैर्भेतव्यम्। तेरात्माऽऽत्मबलेनैव रक्षणीयः।

---

१. परिग्रहो मूलधनम्। पत्नीपरिजनादानमूलशापाः परिग्रहाः—इत्यमरः।

२. रुचिर्दीप्तिः शोभेत्यनर्थान्तरम्।

३. अलङ्काररचनादिकृतशोभायामित्यर्थः। आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम्—इत्यमरः।

४. उद्वर्तनादि। परिकर्माङ्गसंस्कारः—इत्यमरः।

५. हिंस्रो हिंसनशीलः। घातुक इति यावत्। नमिकम्पिस्म्यजसकमहिंसदीपो रः इति ताच्छीलिको रप्रत्ययः।

६. श्वापदो वन्यः पशुः। शुनो दंतदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः।

६. स्पृश्यत्वभावनाव्रतम्। चर्मकारादयोऽन्त्यजा अस्पृश्या इति रूढिः। इदं हि हिन्दुजातेर्महद् दूषणम्। सर्वे मानवा विश्वसृजः प्रजाः। कश्चिदेकां वृत्तिमुपजीवति, कश्चिदन्याम्। तत्तद्वृत्तयः सर्वे तेऽपेक्ष्यन्ते। वृत्तिविशेषवशात्तर्हि कश्चित् स्पर्शानर्हो न भवति। तेनैतदाश्रमस्थैरन्योन्यस्मिन्[1] समं व्यवहरणीयमिति।

इमानि व्रतानि विशेषतोऽध्यापकवर्गसमुन्नतये प्रकल्पितानि। अध्येतॄणां विषये याऽऽश्रमव्यवस्थितिः सेदानीमुच्यते। आ चतुर्थ-द्वर्षात्प्रवेष्टुमर्हैश्छात्रैरत्राध्ययनं परिसमापयितुं दश वर्षाण्युष्यते। बालाः पितृभ्यो बन्धुभ्यश्च पृथक् क्रियन्ते। पितरस्तेषु स्वाधिकारं विजहति। बालाः कदाचिदपि तान्द्रष्टुं नोपगच्छन्ति। ते साधारणानि वासांसि वसते[2], निरामिषं साधारणञ्च भोज्यं भुञ्जते। रूढ्यनुसारतस्तत्र च्छात्राणामनध्यायदिवसा न सन्ति परं प्रतिसप्ताहमध्यर्ध-दिवसं विश्रान्ताध्ययनास्त उत्पादिकां कामपि कृत्यां[3] कुर्वन्ति। प्रतिवर्षं मासत्रयं ते भरतवर्षे पादचारेण विचरन्ति। सर्वैश्छात्रैर्हिन्दीभाषा द्राविडभाषाश्चावश्यं शिक्षणीयाः। आङ्गलभाषाऽपि गुणीभूता तैर्बोद्धव्याः। नागर्यादयस्तेलङ्गान्ताः पञ्च लिपयोऽपि यथावद् ग्रहणीयाः। ते तत्र स्वभाषयेतिहासं, भूगोलं, गणितम्, अर्थ-शास्त्रं संस्कृतञ्चाध्याप्यन्ते। कृषिं कर्तनं वानञ्चापि शिक्ष्यन्ते। पर्यवसितेऽध्ययने तेऽध्यापका इव निर्वोढुमिच्छन्ति चेत् कामं तथा कुर्युः, नोचेदाश्रमं विजह्युः। विद्या च सर्वा निःशुल्कमेव वितीर्यते। धर्म-विषयेऽत्र कापि यन्त्रणा नास्ति। सर्वे आश्रमस्थाः कुलक्रमादागतं धर्मं यथेष्टमनुतिष्ठन्ति। अत्र प्रातः सायञ्चेश्वरोपासा[4] क्रियते, परं यस्य

---

१. वैषयिकी सप्तमी। वर्तनेऽर्थे व्यवहरतिरकर्मकः। यथा—कथं कार्य-विनिमयेन व्यवहरति मय्यनात्मज्ञः इत्यत्र मालविकाग्निमित्रे।

२. वस आच्छादने इति धातोरादादिकाल्लटि रूपम्।

३. कृत्या क्रिया। कृञः श च इति क्यप्। मन्दायन्ते न खलु सुहृदामभ्युपे-तार्थकृत्याः इति मेघदूते।

४. गुरोश्च हलः इत्यप्रत्ययः। उपासा उपासनं वरिवस्या।

यो विधिरभिमतः स तेनैवोपासीतेत्यभ्यनुज्ञायते । एवमनितरसाधारणोऽयमाश्रमो देशाभ्युत्थान[1] उपकरणीभावं गमिष्यतीति को नाम संदिग्धे ।

लोकव्यवहार-प्रवृत्तिः

कञ्चित्कालं महात्मा स्वस्मिन्नाश्रम एव न्यवात्सीत् तत्रत्यं कार्यजातं चावैक्षत । कादाचित्कतयैव स्थानान्तरमगमत् । कमपि समाजं नागच्छत् । कस्मिन्नपि विश्वजनीने[2] कर्मणि न प्रावृतत् । एवं सति भरतवर्षीयेषु राजकार्येष्वशक्तो वा राजभीतो वा महात्मेति केचिदतर्कयन् । अस्पृश्यताया निवर्तकानां विधवापुनरुद्वाहादेश्च प्रवर्तकानां वंशोधकानां कक्षां नातिक्रामतीति च बुद्धिमकुर्वन् ।

एवं गच्छति काले शिवपुर्यां वाराणस्यां हिन्दुविश्वविद्यालयप्रतिष्ठापनकृतोद्योगः पण्डितः श्रीमदनमोहनो मालवीयो द्वासप्तत्युत्तरनवशतोत्तरसहस्रमिते संवत्सरे माघप्रतिपदायां राजप्रतिनिधिना लार्ड् हार्डिञ्जमहोदयेन तदाधारशिलां प्रतिष्ठापयितुं संभारानकार्षीत् । पुण्येऽस्मिन्नवसरे संनिधातुमनेके राजानो मूर्धाभिषिक्ता उच्चैःपदाधिकृता इभ्याश्च यतस्ततः परापतन् । कथानायको महात्माऽपि तत्र संन्यधीयत । तत्र प्रथमेऽहनि मिथिलाधिपेनाधिष्ठितायां सभायां वदतां वराः केचिदेतद्देशमुखरा[3] मञ्जुवाचा स्वं स्वमभिधेयमभ्यधुः । अपरेद्युर्विद्यालयाधिकृतैरुपदिशतु नो भवानिति विज्ञप्तो महात्मा यां सत्यां पथ्यां च वाचं प्रव्यक्तमत्रस्तश्चावोचत् तां निशम्य भरतदेशीयानां संशयाश्छिन्नाः अवेदिषुश्च ते भरतवर्षोद्धार औत्कट्यमस्याभिलाषस्य । एवं हि तत्रभवान् व्याख्यातुमुपाक्रमत—

---

१. देशसमुन्नतिरित्यर्थः ।

२. विश्वस्मै जनाय हितं विश्वजनीनम् । आत्मन्विश्वजनभोगोत्तरपदात्खः ।

३. मुखमस्यास्तीति मुखरः । खमुख—इनि रः । नायक इत्यर्थः । तथा च प्रयोगः—यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते इति ।

अयि श्रोतृमहाभागाः ! श्रीमत्या वासन्तीदेव्या अनर्गलं भाषणं श्रुत्वा विश्वविद्याययोऽयं समुन्नतेः परां काष्ठामधिगमिष्यतीति न प्रत्येतव्यम् । इह लब्धप्रवेशाः प्रविविक्षवो वा विद्यार्थिनो विदाङ्कुर्वन्तु, यस्याध्यात्मिकस्य जीवनस्य कारणादयं नो देशः प्रख्यातिं गतस्तद्वाचोपदेष्टुं न शक्यते । यमर्थं भरतवर्षेण भूमण्डलाय संदेक्ष्यमाणं प्रत्येमि स वाचा संदेष्टुं न पार्यत इति । अवसितं वक्तृत्वप्रयोजनमिति मन्ये । साम्मनस्याय[1] सौमनस्याय[2] चेदानीं यत्नो विधेयः । यदि हीयमानं हिन्दूनामव्याजसारल्यं रक्षणीयन्तर्ह्याचारविचारयोरैक्यं सम्पादनीयम् । तदिदमुपोद्घातमात्रम् । इदं तु विवक्षामि —इह भव्यायां[3] भुवि पवित्रायामस्यां पुरि स्वदेशजानां पुरस्तादवस्थाय देशान्तरीयवाक्प्रयोगो ह्रेपण इति मां प्रतिभाति । यैरत्र व्याख्यातृभिराङ्गली वाक् प्रायोजि तेषामभिप्रेतं कियद्भिर्जनैरबोधीति यदि परिक्षेय तर्हि स्वल्पा एवाभुत्सतेत्युपलप्स्यते । मुम्बापुर्यामतीते काङ्ग्रेसोपवेशनेऽहमुपातिष्ठम् । तत्र महति जनसंनिपाते हिन्दीभाषयैव क्रियमाणानि व्याख्यानानि तच्चेतसि पदमलप्सत नेतराणीति श्रद्धातुमर्हन्ति भवन्तः । इदञ्च मुम्बापुरीमधिकृत्य ब्रवीमि यत्र लोको हिन्दी न भाषते, न वाराणसीं यत्र सर्वे हिन्दीमेव भाषन्ते । श्रद्दधेऽत्र विद्यालये देशभाषयैवोपदेशो यतिष्यन्तेऽधिष्ठातार इति ।

इदं चात्र चिन्त्यम् । काङ्ग्रेस इति सदसा स्वराज्यप्राप्तिः प्रतिज्ञाता । अखिलभरतवर्षीयकाङ्ग्रेससंसद् मुस्लिमलीग् इत्याख्या परिषच्च स्वं स्वं कृत्यं कुर्वाणे भरतभूमिजानां कार्यपदवीमुपदेक्ष्यतः । परमिदमनावेद्य न मे परितोषो यद्वार्तापत्रेषु लेखैर्न किमपि कार्यम् ।

---

१. संगतं मनोऽस्येति संमनाः । मात्रा भवतु संमनाः इति श्रुतेः । संमनसो भावः साम्मनस्यम् । समो मतिमनसोः इति गणसूत्रेण ष्यञ् ।
२. सुमनसो भावः सौमनस्यम् । प्रसादप्रवणता हितकाम्या वा ।
३. भवितुमर्हतीति भव्या कल्याणी । भव्यगेय—इत्यादिना कर्तरि यत् ।
४. बुध अवगमने इति धातोर्दैवादिकाल्लुङि रूपम् ।

न हि तैः स्वराज्यावाप्तिः शक्या कारयितुम्। अस्माकं चरितान्येव स्वराज्ये नोऽधिकुर्युः।

इदमपरमवधेयम्। ह्यः सभापतिना नरेशेनैकेन भरतवर्षस्य दारिद्र्यमुपवर्णितम्। इतरैरपि कैश्चित्स्वभणितिभिस्तदुपवर्णनाऽनुमोदिता। परं यस्मिन्नुज्ज्वले श्रीमति मण्डपे राजप्रतिनिधिनाऽधारशिला प्रतिष्ठापिता, तत्र भवद्भिः किमदर्शि। यदि पेरेस[1]रत्नकराणामग्र्यो[2]ऽपि कश्चित्तत्राभविष्यन्नूनं रत्नभाभि[3]स्तस्य चक्षुःप्रतिघातोऽभविष्यत्। हीरकमौक्तिकादिप्रचयं वहत इमानीश्वरान्महेश्वरांश्च दृष्ट्वा भरतवर्षीयाणां कोटिशो जनानां दशां च मनसि कृत्वा इदमेवैनानभिधित्सामि—भ्रातरः! यावल्लक्षशोऽकिञ्चनेभ्यः[4] स्वदेशजेभ्य इमानि हीरकमौक्तिकादीनि स्वस्माच्छरीरादवरोपयितुं नोद्युञ्जते भवन्तस्तावदस्य देशस्याभ्युत्थानमसंभवि। लार्डहार्डिञ्जमहोदयः सम्राट् श्रीजार्जः पञ्चमो वा नेच्छति राजभक्तिप्रदर्शनाय वयं त्रिचतुरा रत्नमञ्जूषा विरिच्यापादचूलं रत्नानि प्रणिधाय तेषां सन्निधौ समुपतिष्ठेमेति।

इदमपीह विवेच्यम्। इदं हि नः सर्वान् द्वित्रान् दिवसान् उदवेजयत्—श्रीमतो राजप्रतिनिधेरेभिः पथिभिर्यानावसरे सर्वे जनाः पर्याकुला आसन्। स्थाने स्थानेऽपसर्पा[5] न्ययुज्यन्त। साधुवाः

---

१. इदं फ्रांसदेशस्य राजधान्या नाम।

२. अग्र्यो मूर्धन्यः। श्रेष्ठ इति यावत्। अग्राद्यत् इति छन्दसि विहितत्वादस्य श्रुतिविषयत्वमेव स्यात्। परं नैतदस्ति। छन्दोवत्कवयः कुर्वन्ति इति हि स्माह भगवान्भाष्यकारः। दृश्यन्ते च कवीनां प्रयोगाः—तदङ्गमग्र्यं मघवन्महाक्रतोरमुं तुरङ्गं प्रतिमोक्तुमर्हसि इति। उपेयुषः स्वामपि मूर्तिमग्र्याम् इति च।

३. भासते क्विपि भाः इति निष्पद्यते। भिसि रुत्वयत्वे। ततो यकारलोपः।

४. नास्ति किञ्चनास्येति। मयूरव्यंसकादिः।

५. चारा इत्यर्थः। यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः चारश्च गूढपुरुषश्च—इत्यमरः।

प्रहरिणश्चाजागरुः। इदं सर्वमवलोक्याहं चकितोऽभूवम्। असकृन्मे मनसि प्रश्नोऽयमुदगात्—किमित्यस्मास्वेवमनाश्वास[1] इति। एवं सततं मरणमाशङ्कमानस्य लार्डहार्डिञ्जमहोदयस्य जीवितोत्सर्ग एव वरं न पुनर्जीवितम्। परं प्रभविष्णोः सम्राजः प्रतिनिधिना तेन मरणमपि दुर्लभम्। स्यादेतत्स उच्छ्वसनमात्रं बहु मन्यत इति। अपसर्पैरस्माकमनुसारः किंहेतुक इतीदानीं विमृश्यम्। क्रुध्यद्भिर्गर्जद्भिः पाणिपादं ताडयद्भिरन्यद् वा किमपि कुर्वद्भिरस्माभिः स्मरणीयं राज्यविप्लवकरो जनवर्ग उन्मादवेगजन्य इति। एतद्वर्गीयाणां स्वदेशवात्सल्यमनुमोदे। यदिमे स्वदेशानुरागपरवशा मृत्युमपि न गणयन्ति तदहमाद्रिये। परं निवेदये नैतया विकृतयाऽराजकतया वो हृदि पदं करणीयम्। शासितृमहोदयेभ्यो विवक्षितोऽर्थो विस्पष्टं निर्वक्तव्यः। परं यदि ते तन्न रोचयेयुस्तदर्थं यं दण्डं निपातयेयुस्स सहर्षं सोढव्य इति। अहं कामये राज्ञां प्रजानां च परस्परमप्रत्ययो[2]ऽपेयादिति।

पौरुषेणैव कदाचित्स्वराज्यमधिगंस्यते[3], न जातु प्रतिग्रहेण भिक्षया वा। आङ्गलसाम्राज्येतिवृत्तमालोच्यताम्। स्वातन्त्र्यप्रियमप्याङ्गलसाम्राज्यं स्वातन्त्र्येऽनुत्तिष्ठमानेभ्यो[4] न स्वातन्त्र्यं दित्सतीति।

त्रिसप्तत्युत्तरनवशतोत्तरसहस्रतमे संवत्सरे स्वराज्यप्राप्त्यर्थो महान् प्रयत्नः प्रावर्तत। यत्र तत्र स्वराज्यसमितयः प्रतिष्ठामलभन्त। हृदयग्राहीणि व्याख्यानान्यक्रियन्त। नेतारः स्वं स्वं समुत्साहं व्यजृम्भयन्त।

स्वराज्यार्थः समुद्योगः

१. अविश्वास इत्यर्थः। विस्रम्भाभाव इति यावत्।

२. अप्रत्ययोऽविश्वासः। प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु—इत्यमरः।

३. प्राप्यत इत्यर्थः। गमेरिट् परस्मैपदेषु इति परस्मैपदेष्विड्विधानात्तदभावेन।

४. अनुद्युञ्जानेभ्य इत्यर्थः। पुरुषकारविरहितेभ्य इति यावत्। उदोऽनूर्ध्वकर्मणि इत्यात्मनेपदम्।

अत्रार्थे प्रयस्यन्तीं श्रीवासन्तीं देवीं लोकेऽभ्यर्हणीयतां गच्छन्तीं विलोक्य शासितारः संभ्रमं[1] संमोहं चापद्यन्त। संभ्रान्ताः संरब्धाश्च[2] त इमां झटिति कारां प्रावेशयन्। बन्दीकृतामेतां श्रुत्वाऽक्षुभन् भरतखण्डजाः प्रजाः। अवृधच्च स्वराज्याभियोगः[3]। एवमवस्थिते साम्राज्याधिकृता भरतवर्षराज्याधिकृताश्च मिथः परामृशन् भरतवर्षीयाः स्वदेशं शासितुं विभवन्ति न वेति। भरतवर्षमन्त्रो श्रीमाण्टेगूमहाशयोऽचिरेण भरतभुवमलङ्करिष्यतीति प्रवृत्तिरश्रूयत।

श्रीगान्धिमहाभागेनैतद्देशीयाः स्वराज्यार्हा इत्युपपादयितुमनारतं व्यवसितम्। पत्तनानि ग्रामांश्च गामं गामं स्वराज्यसन्देशं च वाचं वाचं स महात्मा विश्रमं नालब्ध। प्रार्थनापत्रञ्चैकं प्राकाशयद् यस्यायमाशयः—वयं काङ्ग्रेसस्वराज्यविधानं सम्यग् बोधामः। काङ्ग्रेसोपन्यस्तस्य स्वराज्यस्य संस्थापनाऽऽवश्यकीति नो मतिः। यावच्च वयं स्वराज्यं न विन्दामहे, तावदाङ्ग्लशासनेन कुतो नस्तोषः। अतस्तान् संशोधनविषयानुपन्यासान् साधु समीक्ष्य स्वीकृत्य च सफलीक्रियन्तां नो मनोरथा इति। कोटिशो जनैः श्रीगान्धिप्रयुक्तेरेषु प्रार्थनापत्रेषु स्वहस्तो दत्तः। राज्यतन्त्राधिकृता महात्मन इदं कर्म नारोचयन्। उद्घोषितं च तदानीं महात्मना—एतानि पत्राणि वण्टयन्तस्तत्र[4] स्वहस्तं वा ददतो जना राजविद्रोहिण इति कृत्वा कारावासमर्हन्तीत्यध्यवस्यन्ति[5] चेच्छासितारस्तर्हि यथेष्टमाचरन्तु।

---

१. संभ्रमः साध्वसम्। संभ्रमः साध्वसेऽपि स्यात् इति विश्वः। तथा च किरातार्जुनीये प्रयोगः—मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः इति।

२. संरब्धाः कुपिताः।

३. अभियोग उद्योगः। तथा च दशकुमारचरिते प्रयोगः—अर्थपतिर्व्यवहर्तुं मर्थगौरवादभियोक्ष्यते इति।

४. वट विभाजने लज प्रकाशने। वटि लजि इत्येके इत्येकीयं मतमाश्रित्य प्रयोगः।

५. निश्चिन्वन्ति। अध्यवपूर्वः स्यतिर्निश्चयेऽर्थेऽपि वर्तते। तथा चोत्तररामचरिते प्रयोगः—कथमिदानीं दुर्जनवचनादेवमध्यवसितं देवेन इति।

अयन्त्वारम्भो विहन्तु[1] न शक्ष्यत इति ।

यदा भरतवर्षमन्त्री भरतभुवमागात् तदा सर्वाणि पत्राणि समाहृत्य तत्सकाशे संन्यधाप्यन्त। तानि दृष्ट्वा मन्त्रिमहोदयो ऽजानात् स्वराज्यस्य[2] कियदुत्कण्ठन्ते भरतदेशजा इति ।

चतुःसप्तत्युत्तरनवशतोत्तरसहस्रतमे संवत्सरे लार्ड् चेम्सफोर्डमहोदयो देहलीराजधान्यां महतीमेकां सभामकारयत्। अत्र सभायां बहवो मुखराः सामन्ता इभ्याश्च न्यमन्त्र्यन्त। कथानायको महात्माऽपि निमन्त्रितस्तत्र समायात्।

देहलीयुद्ध-संमन्त्रणसमाजः

शर्मण्यदेशमायुध्यमानस्याङ्गलदेशस्य कया विधया भरतभुवा धनैर्वा जनैर्वोपकरणीयमिति विचारस्तत्र प्रास्तूयत। तत्र प्रथमेऽहनि क्रियमाणानुपन्यासान्महात्मा बलवद् व्यरुणत् । यतोऽत्राहंतामग्रेसरो लोकमान्यस्तिलको नाकारितोऽतो नेयं राष्ट्रसभेत्युक्त्वोत्थाय प्रायात् । तं प्रयान्तं दृष्टवतां सभास्ताराणां[3] चेतांसि परिप्लवानि[4] समजायन्त। लार्डमहोदयोऽपीतरेऽपि तस्यानुकुर्युरिति भीतिमापत्। पराह्णे स महात्मानमाकारयत्। वस्तुस्थितिं चानुबोध्यासान्त्वयत्। द्वितीयेऽहनि महात्मा सभायामासीदत्। तत्र च वल्लभया हैन्दव्या वाण्या विचित्राणि गाम्भीर्यवन्ति सारवन्ति च वचांस्यवोचद् येषामयं संक्षेपः—भरतवर्षशासनपद्धतौ भरतवर्षीयाणामिष्टं तदपेक्षितं वा संशोधनं करिष्यत इति लार्डचेम्सफोर्डमहोदयो नः प्रत्याययति। साम्राज्यस्य कृते समञ्जसं साहायकं च याचते।

---

१. उपरोद्धुमित्यर्थः। विपूर्वो हन्तिरुपरोधने वर्तते। उदन्वदाकाशमहीधरेषु गतिर्विजघ्ने नहि तद्रथस्य इति रघौ।

२. अधीगर्थदयेशां कर्मणि इति कर्मणि शेषे षष्ठी। कठिधातुरुत्कण्ठापूर्वके स्मरणे वर्तते।

३. सभासदामित्यर्थः। सभासदः सभास्तारा सभ्याः सामाजिकाश्च ते—इत्यमरः।

४. तरलानीत्यर्थः। चञ्चलं तरलं चैव पारिप्लवपरिप्लवे—इत्यमरः।

अतोऽहं संमन्वेऽस्यामापदि सर्वैरस्माभिः साम्राज्यस्यावदातेन चेतसा प्रकाशेन च विधिना साहाय्यं करणीयमिति। यतः प्रत्यासन्ने भविष्यति काल उपनिवेशान्तरवासिन इव वयमपि साम्राज्येऽन्तः स्वराज्यभाजो भवितुमाशास्महे। प्रतिज्ञातञ्च लार्डमहोदयेन करिष्यमाणानि संशोधनानि लोककाङ्ग्रेसयोरभिमतानुवन्यासानन्वायत्तानीति। यद्येवं प्रत्येतु लार्ड् महोदयः कृतवेदितायाः कारणाद् विश्रुतमिदं वर्षं साम्राज्याय साह्यदाने नावहास्यत इति। अहं वेद्मि भारते वर्ष ईदृशा बहवः सन्ति ये भरतवर्षोद्देशपूर्तये क्रियमाणं स्वार्थहानं न बहु मन्यन्ते मन्यन्ते च यत्र साम्राज्येऽन्तः स्थित्वा वयमाशावधिमधिगन्तुमिच्छामस्तदर्थं सत्यामपेक्षायामात्मोपहरणीय इति। इदन्तर्ह्यर्थादापद्यते भाविन्या विपदः साम्राज्यं परित्रातुं यदि वयं सर्वात्मना प्रवर्तेमहि तदा त्वरितं स्वोद्देशमभिवत्स्यामि इति। अयं न उत्सर्गः प्रत्याशां जनयति। सा च स्वराज्यावाप्तिः। मयेदमवश्यवाच्यमनया प्रत्याशयैव प्रयुक्तोऽहं साम्राज्यस्य साहाय्यं कर्तुमुद्यच्छे इति।

सरलचेता महात्मा कापट्यमसंदिहानो लार्डचेम्सफोर्डमहोदयस्य वचसि व्यश्वसीत्। जिह्मनीतेरुद्विजमानोऽनृतं परिहरमाणोऽयं महाभागः स्वहृदयानुमानेन तमपश्यत्। बहवो भरतवर्षजा महात्मन इमां कृतिं नारोचयन्। लोकस्याभ्यर्चितस्तिलकोऽपि महात्मानमुद्दिश्य पत्र-

युद्धसाह्यम्

१. विश्रुतं प्रख्यातम्। विपूर्वः श्रृणोतिः प्रसिद्धौ वर्तते। तथा च प्रयोगः— वरमेकः कुलालम्बी यत्र विश्रूयते पिता इति।
२. उपक्रमिष्याम इत्यर्थः। वृद्भ्यः स्यसनोः इति वा परस्मैपदम्। न वृद्भ्यश्चतुर्भ्यः इतीण्निषेधः। अभिरभागे इति कर्मप्रवचनीयत्वे तद्योगे द्वितीया।
३. समुदाङ्भ्यो यमोऽग्रन्थे इत्यात्मनेपदम्। उद्युञ्ज इत्यर्थः।
४. ताच्छील्यवयोवचनशक्तिषु चानश् इति ताच्छील्ये द्योत्ये कर्तरि चानश्।

मेकमलेखीद् यत्रैतमर्थं न्यभान्त्सीत्[1]—यदि भवान् स्वराज्येप्सया शासितॄणां साहाय्यं चिकीर्षति तर्ह्ययमर्थः पत्रमारोप्य व्यवस्थापनीयः। इमां च संविदं[2] ते कारयितव्याः—ये सैनिका इतो देशाद्योत्स्यन्ते त आङ्ग्लसैनिकाधिकारानाप्स्यन्तीति। तदाहमपि भवतः साह्यं करिष्यामि। महाराष्ट्रादेव केवलाल्लक्षशः सैन्यानुपकल्पयिष्यामि। नोचेत् प्रतिसैन्यं सप्तदश रूप्यकानर्थदण्डं दास्यामीति। इदमधिगम्य महात्मा ऽवोचत्—शासितृष्वैकान्त्येनाविश्वासो नोपपन्न इति मे मतम्। कामं ते युद्धे परिनिष्ठिते प्रतिश्रवं न पालयेयुः। किं तेन। आत्मनः पातित्यमेव ते साधयिष्यन्ति। नास्मदर्थो हिंसिष्यते। स्वधर्मस्तु चरितो भविष्यतीति।

एवं सुविचिन्त्य महात्मा समाचारपत्रेषु सर्वजनप्रयुक्तये प्रबन्धमेकं प्राचकाशत्। तत्र चैतमर्थं न्यबध्नात्—अद्य भारतं वर्षं स्वस्य ब्रिटिशसाम्राज्यभागित्वमुपपादयितुमुन्मनः। परमिदमौन्मनस्यं वाचैव न व्यञ्जनीयमपि त्वात्मोत्सर्गेण प्रसाध्यम्। ब्रिटिशसाम्राज्योदयास्तमययोरायतेते भरतवर्षस्येष्टानिष्टे। यदीदं साम्राज्यं प्रणश्येत्[3], भरतवर्षीयाणामुत्सर्पिण्य आशा अपि भज्येरन्। अस्यां वेलायामेतद्देशप्रसूतैः स्वस्य युद्धवैशारद्यं विज्ञाप्यम्। यदि भरतभूमिजानां सैनिकानां साहायकेन साम्राज्याधिकृताः शर्मण्यदेशं पराजित्य विजयिनस्स्युस्तदोपपत्तिमतीं नः प्रतिज्ञामुपेक्षितुं न प्रगल्भिष्यन्ते। अस्य चात्मबलेः प्रतिफलमवश्यं लप्स्यन्ते भरतवर्षवास्तव्या इति। एतं प्रबन्धं प्रकाश्य महात्मा खेडां नाम मण्डलमयासीत्। तत्रस्थान्स्वानुरक्ताञ्जनान्युद्धकर्मणि व्याप्रियध्वमित्युपादिशच्च। स्वस्य तनूजस्य श्रीदेविदासस्य[4] च नामधेयं सैन्यनामावलिपत्र[5]

१. बन्ध बन्धने इति धातोर्लुङ् प्रथमैकवचने रूपम्।
२. संविदं प्रतिज्ञाम्। संविदागूः प्रतिज्ञानम्—इत्यमरः।
३. उपसर्गादसमासेऽपि णोपदेशस्य इति णत्वम्।
४. ङ्यापोः संज्ञाच्छन्दसोर्बहुलम् इति ह्रस्वः।
५. सेनां समवैति सैन्यः सैनिकश्च। सेनाया वा इति ण्यः, पक्षे ठक्।

आरोपयत् । एवं हि तत्रभवत उपदेशेन फलितं यत् त्र्यहेणैव खेडायां पञ्चपञ्चाशदुत्तरत्रिशतोत्तरत्रिसहस्रसंख्यका[1] जना अस्त्राण्यगृह्णन्।

संगृहीतविपुलसामग्रीका वीतभया लार्डचेम्सफोर्डादयो[2] द्विषत्कपटप्रबन्धनियमनच्छलेन नीतिविदां दमनमभिप्रयन्तो भरतवर्षरक्षेत्याख्यं विधानं व्यदधुः। इदं विधानमा शर्म्मण्ययुद्धपरिणतेः प्रवर्तिष्यते। परिणते च तस्मिन् तन्निरासः करिष्यत इति च प्राख्यायन्। एतच्चाश्रित्य शतशो जनान् राजद्रोहिण इत्यभियुज्य कारासु न्यक्षिपन्। कः केनागसा गृहीत इति न कोऽप्यजानात्। सर्वत्र देशे हा हेत्युच्चैराक्रोश उदचरत्। महात्मा तु युद्धान्त आसां बलात्कृतीनामन्तो भविष्यतीत्याशंसमानोऽवसरं प्रत्यपालयत्।

भरतवर्षरक्षाविधानम्

कालेनावसितमायोधनं जितञ्चाङ्गलैः। विजयं निमित्तीकृत्योपकर्तृभ्यो भरतदेशजेभ्य उपदा काचित्प्रकल्पनीयेति राजकर्मणि व्यापृता अचिन्तयन्। एवं चिन्तयमानास्त उपायमेकमुपालप्सत। ते प्राड्विवाकश्रीरोलट्महोदयेनाध्यासितां समितिमेकां न्ययुञ्जत। एतद्देशावस्थितिमुपलब्धुं प्रयतमानयानया समित्या सर्वत्र राजविद्रोह एवोन्नीतः। तदुन्नयं हेतूकृत्य राजविद्रोहशमनाय लार्डचेम्सफोर्डमहाशयस्त्वरितमुपन्यासद्वयं प्रास्तुवीत। अस्य च रोलट्विधानमिति नामाकरोत्। प्रथमस्योपन्यासस्यायमाशयः – सभया सम्मन्त्र्य राजप्रतिनिधिर्यदाभिलषेत् तदा स्थानं कालञ्चापरीक्ष्यैव मण्डलं शासतामधिकारिणां भरतवर्षरक्षाविधानेनैव प्रवर्तनमभ्यनुज्ञातुमीष्टे। द्वितीयस्तूपन्यासोऽतितरां भयावहः। तस्यायमाशयः—

रोलट्विधानम्

---

१. आपोऽन्यतरस्याम् इत्यावन्तस्य कपि ह्रस्वो वा। तेन पक्षे सहस्रसंख्याका इत्यपि भवति।

२. अत्र द्विषन्तः शर्मण्यदेशोद्भवा आङ्गलैः स्पर्धमाना अभिप्रेताः।

१—यदि कश्चित् प्रजाप्रकोपकरं लेख्यं धारयन्नुपलभ्येत तद्धारणकारणं च निर्वक्तुं न क्षमेत तर्हि स वर्षद्वयं निष्ठुरं कारानिरोधं सहेत।

२—यदि राजमन्त्रिणो महापातकीति दण्डितपूर्वं पुरुषं राजद्रोहीत्याशङ्केरंस्तदा तदुक्तं नावधास्यते। स चाविलम्बितं ग्रहीष्यते।

३—यदि केचन राजद्रोहेण हेतुना दण्डितं जनं स्वैरमुपसर्पन्ति तमुपतिष्ठन्ते[1] च तर्हि तेऽपि दुष्कृतिन इति दण्ड्या भवेयुरिति।

सभासदां विरोधमविगणय्य लार्डमहोदय इदमुपन्यासद्वयं विधानतामनयत्। इदं च[2] विधानतामापन्नं क्षुभितं च भारतं वर्षम्। सर्वत्र कलिकातामुम्बापुर्यादिषु प्रख्यातेषु नगरेषु विधानमेतद्विरोद्धुं बृहत्यः सभा अक्रियन्त। सर्वे नेतार ऐकमत्येनेदमवादिषुः—अनेन विधानेन भरतविषयवर्तिनां स्वाच्छन्द्यस्य साधारणस्य स्वातन्त्र्यस्यापि च समुत्सादो भविष्यतीति। विद्युत्प्रेरितवार्तापत्राणीतस्ततः संनिपतितानि, परमाग्रहग्रहिले लार्डचेम्सफोर्डमहाशये तानि न कमपि गुणमावहन्।

एवं सत्युपेयप्रतिपत्त्यर्थमुपायान्तरमपश्यन्महात्मा स्वानुभूतममोघमस्त्रं सत्याग्रहमास्थातुं निरचिनोत्, अघोषयच्च यदि रोलट्विधानं न निरसिष्यते विधानान्तराण्यपि वयं व्यतिक्रमिष्यामः। प्रकाशं वा भङ्क्ष्याम इति।

सत्याग्रहग्रहः

तत ऊर्ध्वं पञ्चसप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे फाल्गुने मासि बहुले[3] चतुर्दश्यां श्रीगान्धी, प्रतीक्ष्यः[4] पटेलः, धृतदेहेव शारदा श्रीमती

---

१. उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम् इति मित्रकरणेऽर्थे तङ्।

२. झटित्यनन्तरमापततो व्यतिकरद्वयस्य द्योतने चकारद्वयप्रयोगः। तथा च रघुवंशे प्रयोगः—ते च प्रापुरुदन्वन्तं बुबुधे चादिपूरुषः इति।

३. बहुलः कृष्णपक्षः। बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग मोक्ष्यति इति कुमारे।

४. पूज्य इत्यर्थः। पूज्यः प्रतीक्ष्यः—इत्यमरः।

सरोजिनी नायिका, धनद इवापरः श्रीयुतो यमुनादासश्च स्वहस्तपरिचिह्नितं पत्रमेकं प्राचीचरन् यत्रैतमर्थमलेखिषुः—रोलट्विधानमितीदं स्वाधीनतां न्यायं चात्यन्तं विरुणद्धि। इदं हि प्रजानां जन्मतो लब्धानधिकारानाच्छिनत्तीति नो मतम्। अतो वयं प्रतिजानीमहे यदि रोलट्-विधानं प्रवर्तिष्यते नादः[1] कर्हिचिदनुवर्तितास्महे। अन्यान्यपि राजकीयविधानान्युल्लङ्घिष्यामहे। एवं सत्यपि सत्यमेवानुपधि[2] समाचरिष्यामः। कस्य चिज्जीवितेन धनेन वा न नोऽर्थ इति च संगिरामह[3] इति।

प्रचरिते चास्मिन्नर्थे सर्वत्र भारते वर्षे महान् क्षोभः समवर्तत।[4] यत्र तत्र सत्याग्रहसमितयो व्यरचिषत। दर्पाध्मात ऐश्वर्य्यमत्तो लार्डचेम्सफोर्डमहोदयो लोकमतमवधोरयतीति धर्षणेयं न सोढव्येति महात्मा मुद्रणयन्त्रविधानमभनक्। अधिकरणेऽनिवेद्यैव वार्तापत्रं प्रावर्तयत्। ततो निषिद्धानि कानिचित्स्वानि पुस्तकानि प्राकाशयत् प्राचारयच्च। तदैव चैत्रे मासि सितषष्ठ्यां सर्वत्र देशे विधानं प्रत्यमर्षः शोकश्च प्रकटयेयातामित्युदघोषयत्। तत्रामर्षादेः प्रकटनस्येमं क्रममपि निरदिशत्—चैत्रे मासि सितषष्ट्यां सर्वे जना जनश्रेणयश्च सर्वमाह्निकं कार्यं निवर्त्योपवसेयुः। अघस्य[5] हर्त्रे भगवते विधात्रे[6] स्वं दुःखं निवेदयेयुः, सम्प्रदायानुसारतो यथेष्टमुपासीरंश्च। एवं चायं सत्याग्रहदिवस इति ख्यापयितुं सर्वत्र कर्मनिवृत्तिः करणीयेति।

देहलीस्था जना यदृच्छया चैत्रे कृष्णत्रयोदश्यां महात्मन इममा-

---

१. नैतदित्यर्थः।

२. अव्याजम् इत्यर्थः। कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे—इत्यमरः।

३. समः प्रतिज्ञाने इत्यात्मनेपदम्। प्रतिजानीमह इत्यर्थः।

४. संपूर्वो वृतु वर्तने इति धातुरुत्पत्त्यर्थे रूढः। तथा च भगवति वेदे प्रयोगः—हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् इत्यादि।

५. अघं दुःखमित्यनर्थान्तिरम्। अंहोदुःखव्यसनेष्वघम्—इत्यमरः।

६. क्रियाग्रहणमपि कर्तव्यमिति सम्प्रदानसंज्ञायां चतुर्थी।

देशमन्वतिष्ठन्। स्थाने स्थाने समवेताः सहस्रशो जना औद्धत्यस्य स्वैरितायाश्च[1] हेतोः शासितृननिन्दन्। सर्वत्र तत्पत्तनस्थेषु महान्-परितोष आसीत्। तस्य महतोऽपरितोषस्याभिव्यक्तिमसहमाना रक्षिणोऽकलहायन्त बहूंश्चानेनसो[2] जनाँल्लोहसुषिभिरघातयन्। एतन्निशम्य क्रोधाविष्टाँल्लोकान् शमयितुं महात्मा देहलीं प्रति प्रस्थितः, परं तामप्राप्त एव गृहीतः, मुम्बापुरीं प्रति निर्वर्तितश्च।

पञ्चनदवैशसम्[3] महात्मन आसेधं पञ्चनदीया यावन्निशाम्यन्ति तावन्नितरां क्षुभ्यन्ति क्रुध्यन्ति च। कोपावेशं नियन्तुमक्षमाः केचिदयतचेतस उद्दामं समाचरन्ति, तुमुलं च कुर्वन्ति। अमृतसरसि कतिपयानि केतनानि विलुण्ठितानि। कतिपयानि च भस्मसात्कृतानि। चैत्रे मासि शुक्लैकादश्यां सेनानीर्डायरः सैनिकैः समागत्य नगरमध्यास्त। सर्वत्रोपशमः समजनि। वैशाखसङ्क्रान्तिमुद्भवेनाभिनन्दन्ति हिन्दवः। तन्निर्वृत्तये च चैत्रत्रयोदश्यां जह्लोद्यानम् इत्याख्ये प्रकाशेऽवकाशे सम्मिलनं निरचिन्वन्। संनिपतिता जनाः सर्वे निरुपप्लवा निरायुधाश्चासन्। तेषु बहवः स्त्रियो बालाश्चाभूवन्। अतीतायां निशायां सेनापतिः सर्वजनीनाः[4] सभाः प्रत्यषेधत्। परं न कोऽप्यवेदीत्प्रतिषेधम्। सेनापतिस्तु यन्त्रगुलिकाप्रक्षेपणीरादाय जह्लोद्यानमागात्। प्रबोधनमन्तरेणैव च निरायुधेषु तेष्वाग्नेयचूर्णप्रक्षेपं प्रारभत। अयश्चाग्निविसर्ग आ चूर्णपरिसमाप्तेर्दशकला यावत् प्रावर्तत। यतोऽयं प्रदेशः प्रांशुभिर्गृहभित्तिभिः परिक्षिप्तो[5]ऽस्तीत्यतो न कश्चित् पलायनेन प्राणान्

१. स्वेन ईरितुं शीलमस्येति स्वैरी। स्वादीरेरिणोः इति वृद्धिरेकादेशः। तस्य भावः स्वैरिता।

२. अविद्यमानमेनः पापमेषां ते, तान्। अनागस इत्यर्थः।

३. विशसति हिनस्तीति विशसः घातुकः। तस्य कर्म वैशसम्।

४. सर्वजनेभ्यो हिताः। सर्वजनाट्ठञ् खश्च इति खः। पक्षे सार्वजनिकमिति भवति।

५. परिवेष्टितः। वृत इति यावत्।

परित्रातुमशकत् । पञ्चशतं षट्शतं वा तत्र प्राणैर्वियुक्ताः । एतदतिरिक्तसङ्ख्याश्च क्षताः । परासून् क्षतविक्षतांश्चावेक्षितुं न तत्र कश्चनासीत् । एतत्कदनं[1] निमित्तीकृत्य समरोचितं सर्वेषां व्यथयितृ शासनं प्रावर्त्यत । आकाशयानेभ्योऽशस्त्रेषु मनुजेष्वाग्नेयास्त्राणि प्राक्षिप्यन्त। अभ्यर्हिता नागरा अधिकरणान्यकृष्यन्त, कशयाऽभ्यहन्यन्त, जानुभ्यां विसर्पणं च बलादकार्यन्त। एवं त उद्वेगकरीर्निकृतीरग्राहयिषत। उन्मादावेशाभिभूता इवाङ्गलाः शासितारोऽचेष्टन्त ।

एतत्प्रमापणमधिकृत्य महात्मा स्वस्मिन्वार्तापत्रे तरुणभरतवर्षमित्याख्येऽलेखीत्—अस्माभिर्न केवलं सहस्रस्य स्त्रीपुंसानामपि तु संख्यातिगानां विशसनं समचित्ततया भावयितुं योग्यैर्भाव्यम् । एवमेव वयं तत्पदमधिष्ठास्यामो यन्नापरैरतिशेष्यते । अत आशंसे सर्वेऽत्र व्यापृता हृदये धैर्यमाधास्यन्ति न त्वात्मानमवसादयिष्यन्ति, उद्बध्य व्यापादनमपि सामान्यं जीवनव्यतिकरं गणयिष्यन्तीति ।

कतिचिन्मासान् प्रदेशान्तरस्थाः प्रवृत्तिनिरोधस्य हेतोः पञ्चनदवैशसं नावेदिषुः परं यदाऽवेदिषुस्तदा वज्रताडिता इव समिद्धमन्यवः समजायन्त । एतद् दृष्ट्वाऽऽङ्गला अपि जाताशङ्का अमृतसरसीयेषु[3] वृत्तेषु विषये तत्त्वोपलब्धये हण्टरमहाशयेनाध्यासितां समितिमेकामकल्पयन् । काङ्ग्रेसेनापि तादृशमेव समित्यन्तरं तथ्यानुसन्धानायाघटि । यद्यप्येतस्य समुत्सादनस्य कर्तॄणां यथोचितं निग्रहो राज्यहित आसीदिति व्यक्तम् । परं क्षमावान् श्रीगान्धी नैतावदपि प्रार्थयत। अधिक्षिपन्नपि स तेषु तैक्ष्ण्यं नाभजत, वैरशुद्धिञ्च[4] नायाचत। न

१. कदनं व्यापादनम् । तथा चोत्तरे रामचरिते प्रयोगः—तत्किं निजे परिजने कदनं करोषि इति ।

२. इदं स्वकर्मकं परकर्तृकं च बोध्यम् ।

३. अमृतस्य सरः अमृतसरः । अनोश्मायस्सरसां जातिसंज्ञयोः इति संज्ञायां समासान्ते टचि सत्यमृतसरसमिति भवति । तत्र भवेषु अमृतसरसीयेषु ।

४. वैरनिर्यातनमित्यर्थः ।

ह्यु न्मत्ते कश्चिद् दुर्मनायते। परं स तत्रावरोध्यो यत्र हिंसितुं न प्रभवेत्। अतः श्रीगान्धी डायरस्य प्रत्याह्वानमेवैच्छत्[1]। डायरः स्वस्मात्पदादवरोपित इति सत्यम्। परमंशदानैः समाहृतेन धनेन परितोषित इत्यपि सत्यम्।

खलीफत्वप्रकोपः यूरोपसम्परायेण[2] भरतवर्षीया मुहम्मदीया महति कर्तव्यसङ्कटे निपतिताः। एकतस्तेषां भुवः परिवृढे[3] श्रीजार्जे सम्राज्यनुरागः, अपरतश्चाग्रण्यां गुरौ रोमाधीशे भक्तिः। यदाऽऽङ्गला रोमाधीशस्य राष्ट्रं नावस्कन्त्स्याम इति समविद्रत[4] तदा मुहम्मदीयास्तेषां साहाय्यं प्रत्यजानत। तुरुष्का यूरोपान्तर्वर्तिनि तुरुष्कस्थान एव यथापुरं तिष्ठेयुः, न केवलम् इस्लामतीर्थस्थानानि यथापुरं रोमाधीशेऽधि[5] स्युरपि तु मुहम्मदीयकोविदकृतमर्यादापरिच्छेदोऽरबदेशो, मेसोपोतामिया, सीरिया, पालिस्तीनेत्याख्याः प्रदेशाश्चेति भरतवर्षस्था मुहम्मदानुगाः प्रार्थयन्त। इदञ्च महामन्त्री लार्डजार्जो राजप्रतिनिधिश्च दृढमाशृणुताम्[6]। परं यदा युद्धोपरमः समजनि तदा सर्वाः सन्धाः[7]

---

१. आङ्गलदेशाद् भरतभुवं प्रति प्रेषित आङ्गलदेशं प्रत्याहूयतां डायर इत्येवैच्छन्महात्मा।

२. सम्परायो युद्धम्। युद्धायत्योः सम्परायः—इत्यमरः।

३. परिवृढोऽधिपः। अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः—इत्यमरः।

४. प्रत्यजानतेत्यर्थः। विदिप्रच्छिस्वरतीनामुपसंख्यानम् इत्यात्मनेपदम्। वेत्तेर्विभाषा इति रुडागमविकल्पः।

५. कर्मप्रवचनीयेनाधिना योगेऽत्र सप्तमी। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी।

६. प्रत्यजानातामित्यर्थः। आङ्पूर्वः शृणोतिः प्रतिज्ञाने वर्तते। तथा च याज्ञवल्क्यस्मृतौ प्रयोगः—साध्ये कुर्याद्यथाश्रुतम् इति। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता इति सूत्रमप्यत्रार्थे लिङ्गम्।

७. प्रतिज्ञा इत्यर्थः। सन्धा प्रतिज्ञा मर्यादा—इत्यमरः।

प्रस्मृता:[1]। यदा च रोमाधीशेन सह करिष्यमाणाः सन्धिसमयाः[2] अप्रथन्त, एतद्देशजा मुहम्मदीया अप्रथन्त। अपरितुष्टाश्च ते खलीपत्वसमितिरित्याख्यां सृष्टिमसृजन्। पञ्चसप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे मार्गशीर्षे कृष्णषष्ठ्यामखिलभरतवर्षीयखलीपत्वसभाया उपवेशनं देहल्यामभूत्। श्रीगान्धी तदध्यतिष्टत्। अव्याहतज्योतिषा प्रातिभेन[3] चक्षुषा सोऽपश्यत्—अयं मौहम्मदीयः प्रकोपो भरतवर्षाधिवासिनामैक्यसम्पादने साधनतां व्रजेदिति। इह भिन्नजातीयानां जनानां संघटनं नितान्तं दुर्घटमासीत्। हिन्दूनां मुहम्मदीयानां च परस्परं वैमनस्येन च्छिद्रेण नित्यमवकाशमलभन्ताङ्गलाः। एषां साम्मत्यस्य समानसरणेरनुसरणस्य च संभव एव नास्तीति ते दृढं व्यश्वसन्। तस्माद्यदा महात्मा हिन्दूनां मुहम्मदीयानां चोद्देशाभिन्नतामुदघोषयत् तदा ते ससाध्वसमबुध्यन्त। नीतिविदां वर उदारधीः श्रीगान्धी हिन्दुप्रभृतीन् मुहम्मदीयानां पक्षपोषायेत्थं प्रैरयत्—अयि हिन्दवः पारसीकाः, खिस्तीया अपरे च। यदि वयमेकजातिरिव जिजीविषामस्तर्हि य एकस्य वर्गस्यार्थः स सर्वेषामितरेषां भवेदितीष्यतेतमाम्। अर्थविशेषस्य न्याय्यत्वमेव तत्र निश्चेयं भवति नापरं किञ्चित्। अमृतसरसि हिन्दुभिः समं मुहम्मदीया अप्यदयं विशस्ताः। इदानीमुभयैस्तैरनभिसन्धिः सन्धिः करणीयोऽस्तीति। मुहम्मदीयाश्च सर्वप्रथममस्मिन् सम्मिलने प्राख्यापयन् न वयं शासितृभिः सहोद्योक्ष्यामहेऽस्माकमभियोगाश्चेन्न स्वीक्रियेरन्निति। एतच्च महात्माऽन्वमोदत।

राजमन्त्रिणो भविष्यन्तमपायमपश्यन्। विलम्बितैर्वितरणैश्च स्वस्याः प्रयुक्तपूर्वाया नीतेः परिणतीर्निवर्तयितुं प्रायतत। ते

१. विस्मृता इत्यर्थः। प्रोपसृष्टः स्मरतिर्विस्मरणवृत्तिः। रूढियोगापहारिणीति रूढिरत्राश्रीयते। यौगिकार्थो नोपादीयते।

२. संविद इत्यर्थः। समयाः शपथाचारकालसिद्धान्तसंविद —इत्यमरः।

३. प्रतिभैव प्रातिभम्। व्यस्तरूपकम्। प्रतिभारूपेण चक्षुषेत्यर्थः। प्रज्ञादित्वात्स्वार्थेऽण्। प्रातिभादयः प्रज्ञादिषु इति काव्यालङ्कारसूत्रवृत्तौ वामनः।

माण्टेगूचेम्सफोर्डविवरणश्रितं संशोधनविधानमेकं व्यदधुः। अनेन भरतवर्षीया मध्यवर्तिनि शासने प्रादेशिके च भूयःप्रभावभाजोऽक्रियन्त। राजाधिराजः श्रीजार्जः पञ्चम एतद् विधानं पौषे मासि कृष्णसप्तम्यामुद्घोषणयाभ्यनन्दत्। राजकीयाज्ञातिक्रमा मृष्यन्ताम्, सर्वे चापराधिनः क्षम्यन्तामिति तत्रभवान् स्वप्रतिनिधिं व्यजिज्ञपत्। प्रतिद्वन्द्विषु श्रद्दधानः श्रीगान्धीदं संशोधनविधानं व्यनक्त्याङ्गलदेशो भरतदेशे साधीयो[1] वर्तिष्यत इति मन्वानः सर्वांस्तदनुमननाय प्रायोजयत्।

परमचिराद् भ्रमोत्थाः श्रीगान्धिन आशा इति व्यक्तमभूत्। राजाधिराजं प्रतिनिदधच्छ्रीचेम्सफोर्डमहाशयो न तदनुग्रहप्रवर्तनामबाधात्। संयतेषु विसर्जयितव्येषु कारागृहद्वाराणि वधार्थमेव व्यवृणोत्।

अनुपदमेव षट्सप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे वैशाखे शुक्लपञ्चदश्यां रोमाधीश आहितानामभिसन्धीनां वार्ता भरतभुवमागात्। राजप्रतिनिधिश्चामोभिरभिसन्धिभिर्मुहम्मदीया मनोहता[2] भविष्यन्तीत्यभ्युपागमत् परं तानप्रतिविधेयस्य विधेयता श्रेयसीत्युपादिक्षत्। ततोऽनन्तरमापतताऽमृतसरोविशसनविवरणप्रकाशनेन नैत आङ्गला न्यायमाद्रियन्त इति सुष्ठूपपादितम्।

ज्येष्ठे मास्यसिततृतीयायां खलोपत्वसदस्या मुम्बापुर्यां समगच्छन्त। श्रीगान्धिप्रतिपादितस्यासहोद्योगस्य परिग्रहश्च प्रत्यपद्यन्त। इयं तेषां प्रतिपत्तिः[3] प्रयागस्थे ज्येष्ठमासि भवे मुसलिमसंमिलन ऐकमत्येनोपोद्बलिता॥

इत्युपाध्यायश्रीचारुदेवशास्त्रिणः कृतौ श्रीगान्धिचरिते
तृतीयः परिच्छेदः॥

---

१. इति क्रियाविशेषणम्।
२. कृतमनोभङ्गा इत्यर्थः। मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः—इत्यमरः।
३. प्रतिपत्तिः स्वीकृतिरित्यनर्थान्तरम्।

देववाणी-परिषद्वार्ता

(१) ५-५-१९८७ तारिकायां सुख्यात: संस्कृतकवि: किञ्च इलाहाबाद-विश्वविद्यालय-संस्कृतप्रवाचक: डा० राजेन्द्र मिश्र: इण्डोनेशियाराष्ट्रस्य बाली-द्वीपस्थे उदयनविश्वविद्यालये अभ्यागताचार्यतां कर्तुं, जकार्तां प्रति प्रातिष्ठत। देववाणी-परिषदा समायोजिते सौप्रस्थानिकसमारोहे तेनोक्तं यद् वर्षद्वयं यावत् स संस्कृतसाहित्यवैभवेन तत्रत्यजनान् परिचाययिष्यति। तेन इण्डोनियादेशस्य भाषायां संस्कृतशब्दानां बाहुल्यमवलम्ब्यापि भाषितम्। परिषन्महासचिवेन डा० रमाकान्तशुक्लेन डा० मिश्रस्य संस्कृतसेवा अवलम्ब्याभिभाषितम्।

(२) ४-६-१९८७ तारिकायां **देववाणी-परिषदस्तत्त्वावधाने हवाई-विश्वविद्यालयस्य भारतीयधर्मविभागाचार्येण प्रो०ली०ए० सीगल-महाभागेन 'संस्कृतग्रन्थेषु इन्द्रजालविद्या'** इति विषयमवलम्ब्य भाषितम्। अस्यां विचारगोष्ठ्यां डा० गोविन्द प्रसाद उपाध्याय-डा० सुरेन्द्रनारायणत्रिपाठि-डा० गोविन्दचातक-डा० रामसुरेश पाण्डेय-इन्द्रजाल-मायाविशेषज्ञ प्रो० शंकर-महाभागै: स्व विचारा: प्रस्तुता:। परिषन्महासचिवेन डा० रमाकान्त शुक्लेन संस्कृतग्रन्थेषु समायाता: मायाविषयकसन्दर्भा मुख्यातिथये सुलभीकृता:। प्रो० शंकरमहाभागेन केचन ऐन्द्रजालिका: प्रयोगा अपि प्रदर्शिता:।

संस्कृत-जगद्वार्ता

(१) १६-४-१९८७ तारिकायां मेरठविश्वविद्यालय-संस्कृतप्राध्यापक-परिषदा हापुडस्थे सरस्वतीस्नातकोत्तरमहाविद्यालये आचार्य रामनाथ 'सुमन'-महाभागस्य संस्कृतसेवा उपलक्ष्य तस्मै अभिनन्दनपत्रं समुपाहृतम्।

(२) १८-४-८७ तारिकायां दिल्ल्यां स्व०श्रीचारुदेवशास्त्रिणां 'क्रिया-दिवसे' देशस्य नैकै: संस्कृत-विद्वद्भि: तेभ्य: श्रद्धाञ्जलय: प्रदत्ता:।

(३) २—४-५-१९८७ ई० तारिकासु जयपुरे राजस्थान-संस्कृत-संसदा अखिलभारतीय-संस्कृत-शिक्षा-सम्मेलनस्य तृतीयमधिवेशनं समायोजितम्। अस्योद्घाटनं भारतस्योपराष्ट्रपतिभि: श्रीरामस्वामी वेंकटरमणमहाभागै: कृतम्।

(४) ११-७-१९८७ तारिकायां मध्यप्रदेश-संस्कृत-अकादेम्या सागर-विश्वविद्यालयपरिसरस्थ-साहित्यभवने 'साम्प्रतिकी' काव्य-सन्ध्या समायोजिता यस्यां प्रदेशे राष्ट्रे च विश्रुतयशस: श्रुतलोका एकादश संस्कृतकवय: स्वरचना: प्रस्तुतवन्त:।

— रमा शुक्ला

(५) ११-७-१९८७ तारिकायां 'मेलुकोटे' इत्यत्र संस्कृत-संशोधन-संसदस्तत्त्वावधाने श्री टी० आर० सतीशचन्द्र, आइ० ए० एस०-महाभागेन विशिष्टाद्वैतकोश-केनोपनिषदो: समुन्मीलनं कृतम्।

अर्वाचीनसंस्कृतस्य ग्राहशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्ययः [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते । किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात् । ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** Arvacheenasanskritam/*Arvācīnasaṃskṛtam*)इत्यंकितेन बैंकड्राफ्टेन घनादेशेन (M. O.) वा निम्नलिखिते संकेते प्रेषयितुं प्राथ्यन्ते :

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन देववाणी प्रिंटर्स उत्तम नगर, नयी दिल्ली-११००५९ इति मुद्रणालये मुद्रापयित्वा '६ वाणी,-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (९/३) प्रधानसम्पादकः डा० रमाकान्त शुक्लः । प्रकाशनतिथिः १५-७-१९८७

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ३०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा०रामकिशोर मिश्रः)	रु० १२.००
२९	लक्ष्मीशतकम्, (डा० वरदराजकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाषः : ५५३४६९

अर्वाचीनसंस्कृतम्

(नवमवर्षे चतुर्थोऽङ्कः)

१५ अक्टूबर १९८७

सम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

आर ६ वाणी-विहारः, नयी दिल्ली-११००५९

अर्वाचीनसंस्कृतम् (९/४)

(R. N. 34554/79)

(१५ अक्टूबर १९८७ ई०)

विषय-सूचि:

विषयः		लेखकः	पृष्ठांकः
१.	सम्पादकीयम्	सम्पादकः	२०५
२.	श्रीगान्धिचरितम् (४–६ परिच्छेदाः)	स्व० प्रो० चारुदेवशास्त्री	२०६
३.	मेघप्रबोधनम् (क्रूरहृदय मेघ !)	डा० रमाकान्त शुक्लः, नव दिल्ली	२८५
४.	हिमगिरे !	श्री देवदत्त भट्टिः मालेरकोटला (पञ्जाब)	२८७
५.	मातरमाहुः	,, ,, ,,	२८९
६.	देववाणी-परिषद्वार्ता	रमा शुक्ला	२९०
७.	संस्कृत-जगद्वार्ता	,,	२९०-२९४

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली।

२. प्रकाशनकालावधिः—त्रैमासिकम्।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९।

डा०रमाकान्त शुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

१५-१०-१९८७

—डा० रमाकान्त शुक्लः

प्रकाशकः, सम्पादकः

सम्पादकीयम्

अथ पाठकानां करकमलेषूपायनीक्रियते 'अर्वाचीनसंस्कृत'स्य नवम-वर्षीयश्चतुर्थोऽङ्कः ।

अस्मिन्नङ्के श्रीचारुदेवशास्त्रिमहाभागैः प्रणीतस्य 'श्रीगान्धिचरितस्य' अवशिष्टांशः प्रकाश्यते ।

अर्वाचीनसंस्कृतस्य पक्षतोऽहं स्व० चारुदेवशास्त्रिणां तनयेभ्यो डा० सत्यव्रतशास्त्रिमहाभागेभ्यो धन्यवादान् व्याहरामि यैरत्र 'श्रीगान्धिचरितस्य' प्रकाशनार्थं स्वीकृतिर्दत्ता ।

अनेनाङ्केन अर्वाचीनसंस्कृतं नववर्षाणि पूरयते ।

विदुषामाश्रवः

(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

१५. १०. १९८७ ई०

आर ६ वाणी-विहारः
नयी दिल्ली-११००५९

अथ चतुर्थः परिच्छेदः ।

वस्तुस्थितिं पर्यालोच्य श्रीगान्धी वाराणस्यां राज्यतन्त्राधिकृतैर-सहकारिताऽऽस्थातव्या न वेति नेतृभिः सह परामृशत। असहकारिता असहकारितैव साध्यसिद्धौ साधनमिति सर्वे साक्षाद कुर्वन्, तत्स्वरूपं च सम्यगलक्षयन्। प्रास्तुवंश्च भाद्रपदे मासि कलिकातायामसहकारितोपन्यासं परीक्षितुं विशिष्टेन काङ्ग्रेसो-पवेशनेन भवितव्यमिति।

सप्तसप्तत्युत्तरनवशतोत्तरसहस्रतमे संवत्सरे शुचौ[1] मासे महात्मा ऽधिके श्रावणे मासि द्वितीयस्मिन्नहन्यसहकारिता प्रारप्स्यत इत्युद-घोषयत्। प्राप्ते च तस्मिन् दिवसे राजप्रतिनिधिमुद्दिश्य प्रेषितेन पत्रेण तावत्स्वस्यासहकारित्वमसाधयत्। यमर्थं तत्रभवान् पत्रे न्यब-ध्नात्स संक्षिप्येहोपन्यस्यते—दक्षिणाफ्रीकायां मत्कृतस्य लोकहितस्य कर्मणः कृते भवतः पूर्वाधिकारिणा प्रतिपादितां[2] स्वर्णमयीं कीर्तिमुद्रां[3], जुलुजातीयविद्रोहावसरे भरतवर्षीयस्वेच्छासेवकदलमधितिष्ठतो मम व्यवसायस्य प्रतिफलमिति वितीर्णामपरां सौवर्णमुद्रां बूर्युद्धकाले च भरतदेशीयस्वेच्छासेवकशिबिकावाहदलस्योपाध्यक्षतामापन्नस्य मे व्यापारस्य कारणात् प्रत्तामन्यां महारजतमुद्रामहमतिदूनेन[4] मनसा-ऽत्रभवति प्रत्यर्पयामि। यद्यपि ममाभीष्टा इमे पुरस्कारास्तथापि पञ्चनदविशसनेन व्यथिता हिन्दवः, धर्मधर्षणया च न्यक्कृता

---

१. शुचिस्त्वयमाषाढे —इत्यमरः।

२. वितीर्णामित्यर्थः। विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्—इत्यमरः।

३. अस्मिन्नर्थे पदकमिति केषाञ्चित्प्रयोगः प्रामादिकः। पदकं पादक्रमे पदव्यां कण्ठाभरणे पदपाठाभिज्ञे निष्के च दृश्यते। अतोऽर्थान्तरं तु न क्वचिद्दृष्टम्।

४. चामीकरं जातरूपं महारजतकाञ्चने इति स्वर्णनामस्वमरः।

मुहम्मदीया इति कुतोऽहं तानार्ं येय।

लार्डजार्जप्रतिज्ञाभङ्गेनायं मे विश्वासो दाढर्यं गतो ब्रिटिश-शासननियुक्तैः खलीपत्वम् इत्येतदधिकृत्य विवेकविश्रान्त[1]मन्याय्यं च व्यवहृतमिति। भरतवर्षशासनाधिकृतैश्च यो लार्डजार्जमतपोषः स क्षते क्षारप्रक्षेपान्न विशिष्यते। अतो नाहमेवमन्यायप्रियेष्वेषु विश्वसितुं सप्रश्रयो[2] वा भवितुं क्षमे। प्रकृतिपुरुषाणामपराधविषये भवता यन्माध्यस्थ्यं प्रादर्शि, माण्टेगूमहाशयेन च सर्-माइकेल् ओड्वायर् इत्येतं भोगपतिं दोषान्मोचयित्वा यदात्मनोऽसत्यकामत्वं प्राकाशि, साम्राज्याधिकृतैश्च लोमहर्षणं पञ्चनदविशसनमुपेक्ष्य यदात्मनोऽज्ञत्वमज्ञापि तत् सर्वमालोच्य ब्रिटिशसाम्राज्यस्यायतौ मेऽतिमात्रमप्रत्ययं चेतः। अतोऽहं वर्तमानाच्छासनतन्त्रादात्मानं पृथक् करोमि। अद्य यावदनेन सहोदयुक्षि, नातः परं सहोद्योक्तुं क्षमिष्ये। भरतवर्षीयैरिदानीमेते राजमन्त्रिणः स्वपीडाहेतून्नावेदनीयाः। यतोऽन्यायप्रियेभ्य एभ्यो न्याययाचनमस्माकं बालिश्यं प्रमाणयेत्।

यावदहं लोकं स्वमतस्थं कृत्वाऽसहकारितानीतिमनुसरिष्यामि तावदहं तथाचरणान्न विरंस्यामि यथा भवान्न्याय्यात्पथो न विचलेद्राजधर्मं च साध्वाचरेत्। अद्याप्यहमाशासेऽचिरादेव भवाञ्जननायकैः संगत्य परामृश्य च प्रजाः परितोषयितुमुपायं चिन्तयिष्यतीति।

भाद्रपदमासोपक्रम एव कलिकातायां नगर्यां विशिष्टं काङ्ग्रेसोपवेशनमभूत्। तत्र संनिहिता नेतारस्त्र्यहमसहकारिताविषये हेतुवादानवादिषुः। भूयोभिर्महात्मनः पक्षः समर्थितः। स एव च सर्वैः स्वीकृतः। उपन्यासं प्रस्तुवता महात्मना यदुक्तं तस्यायं संक्षेपः—भरतराज्यतन्त्राधिकृतैः साम्राज्य-

विशिष्टे काङ्ग्रेसोपवेशनेऽसहकारितास्वीकृतिः।

1. विवेकः विश्रान्तो यस्मिन्कर्मणि तद्यथा तथा। विवेकविविक्तमित्यर्थः।
2. विनयप्रश्रयौ समौ – इत्यमरः।

नियुक्तैश्च द्वयैः खलीपत्वविषये यदचारि तेनातिमात्रमदूयन्त मुहम्मदीयाः। लार्डजार्जमहोदयेनापि युद्धावसरे कृतः संगरो न पालितः। एवमवस्थिते विपत्प्राप्तेभ्यो मुहम्मदीयेभ्यः सर्वेणाविरुद्धेन विधिना साह्यदानं नो भरतखण्डजानां परमं कृत्यम्।

इदञ्च भवन्तो जानते यैराधिकारिकैः पञ्चनदीयेष्वतिनृशंसमाचरितं तेऽदण्डयित्वैव दोषान्मुक्ताः, कदर्थितान् प्रत्यनुकम्पापिशुनं[1] वचोऽपि नोदीरितम्। आधिकारिकाणां पुनरयं कदाचारः[2] परिष्टुतः[3]। आत्ममानगुप्तये बलात्कृतीनामीदृशीनां विकर्मणां च व्यावृत्तये स्वराज्यावाप्तिरत्यन्तमावश्यकी। तच्च स्वराज्यमसहोद्योगेनैवाप्यम्। असहोद्योगश्च निरुपप्लवो भविष्यति।

येऽद्य यावज्जनतायाः प्रातिनिध्यमाचरन्ति तैरेवेह कर्मण्यग्रेसरैर्भाव्यम्। इदं च विदितं सर्वेषां राज्यतन्त्राधिकृताः केभ्यश्चिद् भरतभूमिजेभ्यो विरुदवितरणेन, प्रतिष्ठालम्भनेन, विद्यालयानां च स्वायत्तीकारेण, व्यवस्थापिकाभिः सभाभिरधिकरणैश्च कार्यनिर्वाहणेन च स्वबलमुपचिन्वन्तीति। अत इदमुपदिशति काङ्ग्रेससमाजः—

१—भरतवर्षवास्तव्या राजदत्तबिरुदानवेतनानि चास्पदानि बिसृजेयुः। प्रान्ताधिष्ठातृसमाजस्य नगरपालिकायाश्च सभ्यपदमुत्सृजेयुः।

२—राज्याश्रितेषु गौरवापेक्षया[4] क्रियमाणानुद्धर्षान्न[5] संविभजेयुः।

---

१. अनुकम्पायाः सूचकमित्यर्थः। पिशुनौ खलसूचकौ—इत्यमरः।

२. कुत्सित आचारः कदाचारः। कुपूयाचरणमित्यर्थः। कोः कत्तत्पुरुषेऽचि इति कोः कदादेशः।

३. परिनिविभ्यः सेवसितसय० इति षत्वम्।

४. गौरवमादरः। प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु—इति कुमारे।

५. उत्सवान्। अथ क्षण उद्धर्षो मह उद्धव उत्सवः—इत्यमरः।

३—राजप्रवर्तितेषु तन्निघ्नेषु[1] वा विद्यालयेषु स्वसन्तत्या विद्यास्रा उपादानं विरमय्येयुः। स्वतन्त्रा विद्याशालाश्च संस्थापयेयुः।

४. अर्थिप्रत्यर्थिपक्षसमर्थका धर्माधिकरणानि विजह्युः। विवादपदनिर्णयाय च पञ्चायतनानि[2] कुर्युः।

५ एतद्देशजाः सेनामध्य आरोहेण कायस्थत्वस्वीकारेण वा न राज्यतन्त्रस्योपकुर्युः।

६—नूतनसंशोधनानुसारेणोद्घाटयिष्यमाणानां व्यवस्थापिकानां सभानां सभ्यपदं न कश्चिदाकाङ्क्षेत्। यः कश्चिदाकाङ्क्षेन्न तस्मै सम्मतिं दद्युः।

७—विदेशजं सर्वं वस्तुजातं विनियोगबाह्यं क्रियताम्। स्वदेश एव वस्तूनि निर्मीयन्तां प्रचार्यन्ताञ्चेति।

यस्मादात्मोत्सर्गादात्मसंयमाच्चर्ते केऽपि देशजनाः परमार्थसमुन्नतिं[3]मधिगन्तुं नेशतेऽतस्तदवाप्तयेऽसहोद्योगनयः प्रवर्त्यते।

असहोद्योगप्रस्तावस्य काङ्ग्रेससदसा स्वीकृतिरेव न नः समीहितसिद्धयेऽलम्। असहोद्योगरीतिमनुवर्तमाना एव वयं स्वोद्देशमाप्स्यामः। स्वराज्याधिगमकमुपायान्तरमप्यस्ति युद्धाख्यम्। परं तत्राक्षमा वयम्। अतोऽसहोद्योग एवैक उपेयप्रतिपत्त्यर्थ उपायः। बुद्धिमत्तया न हीयते देशान्तरादित्यर्हत्ययं देशः स्वराज्यम्। परं परार्थ[4] आत्मोत्सर्गोऽस्य न विदित इति स वेदितव्यः। यदि सर्वा जनता देशश्रेयःसिद्धये सर्वस्वमुपहर्तुमना भविष्यति श्रद्धापये वोऽवश्यं स्वराज्यमधिगतं भविष्यतीति।

एवमसहकारितोपन्यास उरसिकृते[5] सति महात्मा जनप्रेरणेच्छया

---

१. तत्तन्त्रेष्वित्यर्थः। अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ—इत्यमरः।

२. पञ्चानां (मुख्यपुरुषाणाम् इति गम्यते) आयतनानि स्थानानि।

३. सत्यसमुन्नतिमित्यर्थः। न तु तदाभासम्।

४. परस्मा अयं परार्थः। चतुर्थी तदर्थार्थ० इति समासः। अर्थेन समासो विशेष्यलिङ्गता चेति वक्तव्यम् इति पुंस्त्वम्।

५. अङ्गीकृते सतीत्यर्थः। अनत्याधान उरसिमनसी इत्यनत्याधानेऽर्थे गतिसंज्ञाविधिः। अनत्याधानेनात्राभ्युपगमो गृह्यते।

असहकारितानीत्यनुसरणम्

जनपदं पर्याटीत्। अचिरेण लोको महात्मानमन्वकरोत्। शतश आधिकरणिकास्त्यागपत्राण्यदुः। सहस्रशश्छात्रा महाविद्यालयान् व्यजहुः। अधिकरणानि परिहृतानि, विद्याशालाश्च रिक्ताः। पण्डितश्रीमोतिलालप्रभृतयोऽनेके व्यवहारविदां वरिष्ठाः स्ववृत्ति विहाय देशहिते कर्मणि व्याप्रियन्त। पञ्चनदे प्रदेशे श्रीलाजपतरायेण तथाऽऽरम्भि[1] यथाऽभूतपूर्वा विनिद्रता समुदपादि[2]।

एतद् दृष्ट्वोद्वेजिता राजमन्त्रिणः कार्तिके मासीदमुदघोषयन्—असहकारितानीतेः प्रवर्तकाः प्रमाथं नोपदिष्टवन्त इत्यद्य यावन्न गृहीताः। सम्प्रति तु यः कश्चिन्मर्यादामतिक्रामेत्, यस्य वा वचांसि प्रकृतिकोपं जनयेयुः, प्रकारान्तरेण वा यो बलात्कारं प्रेरयेत्स ग्रहीतव्य इत्याज्ञप्तमिति।

मर्यादाया अतिक्रमस्त्वभूत् परं राजमन्त्रिभिर्न तु लोकैः। असहोद्योगिनोऽनुदिनं प्राचीयन्त। तेनाधिकृता उद्विजितुमारभन्त व्यश्वसंश्च नागपुरे भाविनि काङ्ग्रेसोपवेशनेऽसहोद्योगनीतिः प्रत्यादेक्ष्यत[3] इति।

नागपुरे काङ्ग्रेसोपवेशनम्। असहोद्योगनयाभिनन्दनञ्च

सप्तसप्तत्युत्तरनवशतोत्तरसहस्रतमे संवत्सरे पौषे मासि नागपुरे काङ्ग्रेससदस्याः समामिलन्। यतः श्रीचित्तरञ्जनादयः कलिकातायां महात्मनः प्रस्तावं व्यरुन्धन्नतोऽत्रापि ते विरोत्स्यन्तीति केचिदाशङ्कन्त। परमेष महिमा श्रीगान्धिनो यच्छ्रीचित्तरञ्जनदासः स्वयमुत्थायोर्जिताश्रयेण[4] वचसा-

---

१. रभ राभस्ये इत्यस्मात्कर्मणि लुङ्। रभेरशब्लिटोः इति नुम्।
२. पद्यतेः कर्तरि लुङ्। चिण् ते पदः इति कर्तरि चिण्। चिणो लुक्।
३. निराकरिष्यत इत्यर्थः। प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः— इत्यमरः।
४. ऊर्जित उदार आश्रयोऽर्थो यस्य तेन।

ऽसहोद्योगनीतिमपुषत् । एवं सति भाद्रपदे मासि विशिष्ट उपवेशने निश्चितोऽर्थ इह पुनरनुमोदितः ।

नैयता काङ्ग्रेससदस्याः पर्यतुष्यन् । अखिलभरतवर्षीयकाङ्ग्रेससदसो भरतभूमिजैः प्रशान्तैर्न्याय्यैश्चोपायैः स्वराज्यस्यावाप्तिरुद्देश इति च व्यवास्यन्[2] । श्रीगान्धिनोऽभिमतं निःसाहसत्वमवाष्टभ्नन् । अविरतोद्योगाय सर्वाणि जात्यङ्गानि संघटनीयानीति बहवोऽजीगणन् । काङ्ग्रेससदसः स्वरूपे च केचित् परिवर्ताः कृताः, येनेयं सर्वेषामेतद्देशजानां प्रतिनिधिभूता संस्था संवृत्ता ।

काङ्ग्रेसेन नायमर्थो गोपायित इत्थम्भूतोऽसहोद्योग आद्यमेव साधनम्, कालान्तरे सम्पूर्णोऽसहोद्योगः क्रियेत कराप्रदानमप्यसहोद्योगेऽन्तर्भाव्येतेति । तादृशोऽसहोद्योगः शक्यक्रियः स्यादितीदानीं विदेशवस्तूनां विनियोगबहिष्कारः प्रबलीक्रियताम् । कर्तनं वानं च प्रवर्ध्यताम् । विद्यार्थिनस्तत्पितरश्च धर्माधिकरणिकाश्च प्रेर्यन्तां भूयसेऽसहोद्योगायेति च निश्चितम् । ये काङ्ग्रेसनिर्दिष्टां सरणीं नानुसरिष्यन्ति ते प्रजासम्बन्धिषु कर्मस्वधिकाराच्चयावयिष्यन्त इति च व्यवस्थापितम् ।

काङ्ग्रेसव्यवस्था राज्येऽन्ता[3] राज्यान्तरप्रतिष्ठापनस्य, ब्रिटिशशासनप्रतिद्वन्द्विभरतवर्षीयशासनप्रवर्तनस्य वा प्रतिरोधः द्योतिका इत्याङ्गलदेशो नेमा अनुग्रहीतुमशकत् । अवश्यं तेनात्र किञ्चित् प्रतिपत्तव्यमासीत्[4] । राजमन्त्रिणोऽपि प्रयोद्धुं सन्धये संवदितुं वा प्राभवन् । सन्धिसंवादैरापोषः

---

१. इति शेषे षष्ठी ।

२. व्यवपूर्वः स्यतिर्निश्चये वर्तते । तथा च शाकुन्तले प्रयोगः—इदमुपनतमेवं रूपमक्लिष्टकान्ति प्रथमपरिगृहीतं स्यान्न वेति व्यवस्यन् इति ।

३. रो रि ढ्लोपे पूर्वस्य दीर्घोऽणः ।

४. करणीयमित्यर्थः । न जाने किं तातः प्रतिपत्स्यत इति इति शाकुन्तले । भवत्यनिष्टादपि नाम दुःसहान्मनस्विनीनां प्रतिपत्तिरीदृशी इति कुमारे । प्रतिपत्तिस्तु गौरवे प्राप्तौ प्रवृत्तौ प्रागल्भ्ये—इति केशवः ।

सुप्राप आसीत्। परमव्यभिचरितां विदेशान्वयिनीं राजनीतिं व्यवहरमाणास्ते सन्धये संवदितुं मनागपि नायतन्त। बलात्कारः प्रकृतः[1]। सायुधैर्नगरपालैर्जनबाधने व्यपदेशा[2] गवेषिताः[3] प्राप्ताश्च।

श्रीगान्धिना काङ्ग्रेससमाजेन चासहोद्योगो निरुपद्रवो भविष्यतीति विहितेऽपि[4] क्वचित्क्वचित्केचित्कांश्चिदुपाद्रवन्[5]। एतेषामुपद्रवकारिणामसहोद्योगे न कश्चिद् व्यापार इत्यवितथम्। परं तत्र बाधा वृत्ता अवर्तन्त चेत्यपि नानृतम्। प्रयागे भूम्यधिवासिनां भूस्वामिषु व्युत्थानान्यासन्[6]। रक्षापुरुषा मध्येऽपतन्। तदपरिहार्यम्। तेन नृहत्याऽभूत्। ततोऽनन्तरमुदासीनभिक्षुभ्यो देवतायतनान्याच्छेत्तुं शिष्ये[7]ष्वकालिदलानि[8] महात्मनोऽसहोद्योगनीतिमनुसर्तुमुपाक्रमन्त। एतदारम्भस्य[9] फलन्त्विदमभूद्यत् सप्तसप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे माघे मासि शिष्याणां द्विशती विशस्ता। नहि कश्चनामन्यतात्र कर्मसु श्रीगान्धिनस्तदनुगानां वा प्रष्टव्यता समस्तीति। परं राजमन्त्रिण इयं सुवेलेत्याकलयन्। फाल्गुने मासि प्रतिरोधः प्रारभ्यत। गच्छद्भिर्मासैरयमुत्तरोत्तरं पीडाकरोऽभवत्। शौण्डिका[10]

---

१. कर्तुमारब्धः। आदिकर्मणि क्तः कर्तरि च इति चकारानुकृष्टे कर्मणि क्तः।

२. व्यपदेशो व्याजः।

३. अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम्—इत्यमरः।

४. प्रदिष्टेऽपीत्यर्थः। विधानमत्रानुशासनम्।

५. अभ्ययुञ्जत। अबाधन्तेत्यर्थः। तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचरः—इति रघौ।

६. व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च—इत्यमरः।

७. गुरोर्नानकस्यानुगाः शिष्या इत्याख्यया प्रथन्ते।

८. शिष्याणां केचनैतदाख्यां गताः।

९. आरभ्यत इत्यारम्भः कर्म। फलानुमेयाः प्रारम्भा इति रघौ।

१०. शौण्डिको मण्डहारकः—इत्यमरः। शुण्डा सुरा पण्यमस्य। तदस्य पण्यम् इति ठक्।

जनावेशाद्रक्षणीया इत्यधिकृताः स्वं माध्यस्थ्यं न्याय्यं प्रत्यापादयन्। यूरोपखण्डसभ्यतायाः कादम्बर्या[1]श्चेदं साहचर्यं न नूनमभूतपूर्वम्। असहोद्योगोपकारिणः स्वेच्छासैनिकव्यूहा व्यघटचन्त। प्रकृतिक्षोभकरीः सभाः प्रतिबेद्धुं विधानं व्यधीयत। केषुचित्प्रदेशेष्वसहोद्योगवारणाय रक्षापुरुषाणां स्वेच्छानुवर्तित्वमन्वज्ञायत। सहस्रशो भरतविषयाधिवासिनो न्यरुध्यन्त। अर्हतामग्रेसराः[2] केचित्समासतः परीक्ष्य कारासु न्यक्षिप्यन्त पशुवच्चाचर्यन्त।

महात्मनो विभवः

अष्टासप्तत्युत्तरनवशतोत्तरसहस्रतमे संवत्सरे श्रीगान्धिनो विभवः परां कोटिमध्यास्त। महती ह्यस्य नीतौ विश्वसनीयता। अपरिच्छिन्नमैश्वर्यमप्यस्मिन्नाधीयत। जनास्तमृषिमिवाभ्यपूजयन्। तं कृष्णत्वमध्यारोपयन्ति चित्राणि निरमीयन्त। पौषमासारम्भे चाखिलभरतवर्षीयकाङ्ग्रेसंसत् स्वाधिकारांस्तस्मिन्न्यक्षिपत्। उत्तराधिकारिनियुक्तौ च तमध्यकरोत्। एवं भरतवर्षविषयको नीतिक्रमो नितान्तं तमन्वायत्तः। सार्वत्रिकी तस्यार्हणा नाहोपुरुषिकां[3] जनयति। न केवलमनर्होऽहमस्या इति स दूयतेऽपि त्वेषा मम विनयस्य नानुकूलेति स तप्यते। श्रीगान्धी खल्वनन्यसाधारणः पुण्यजनः। यतः स सन्दर्शनानि[4] न पश्यति, श्रुतिप्रकाशश्चास्य नास्ति। अहममानुष्या शक्त्याऽनुशिष्टोऽस्मीति नात्मानं श्रद्धापयितुं यतते न चेतरान्। अवदातं ह्यस्य निष्कापटचम्। प्रशान्तमभ्रुकुटिमच्च नित्यमस्य

---

१. कादम्बरी सुरा।

सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा।
गन्धोत्तमाप्रसन्नेराकादम्बर्यः परिस्रुता ॥ इत्यमरः।

२. प्रशस्तानाम्। अर्हः प्रशंसायाम् इति शतृप्रत्ययः।

३. आहोपुरुषिका दर्पाद्या स्यात्संभावनात्मनि—इत्यमरः। अहोपुरुषस्य भावः। मनोज्ञादित्वाद्वुञ्।

४. संदर्शनं मानसमिष्टदेवतासम्प्रयोगादि।

ललाटपट्टम्। उत्सेकविविक्तं चास्य हृदयम्। एषो ह्यात्मनो मानुष्यं प्रतिपद्यते नर्षित्वम्। लोको मामृषिरिति व्यपदिशेदित्यपि स नेच्छति। इदं ह्यत्रभवान् स्वमधिकृत्यालेखीत्—

अहं दैवतं[1] प्रार्थये यथा सर्वो भक्तिमान् हिन्दुः प्रार्थयते। प्रत्येमि सर्वे वयं भगवतः सन्देशहरा भवितुमर्हामः। वैधस्या इच्छाया विशेषप्रकाशो मे नास्ति। दृढं विश्वसिमि प्रत्यहं सर्वस्यंशोन्मेषोऽस्ति। परं वयमल्यां[2] मूकां वाचं[2] प्रति कर्णौ पिदध्मः। अहं भरतवर्षस्य मनुष्यलोकस्य च क्षुद्रः परिचरोऽस्मीत्येव ममाभिमानः। सम्प्रदायप्रवर्तने न मेऽभिलाषः। न मया कश्चिदनुपलब्धपूर्वो भूतार्थ उपलब्धः। यथाहं सत्यं जानामि तथैवाचरितुं व्याकर्तुं च यते। प्रत्नाः केचित्तत्त्वार्था अप्रत्नेन विधिना मया विशकलिता इत्यवश्यमभिमन्य इति।

अष्टासप्तत्युत्तरनवशतोत्तरसहस्रतमे संवत्सरेऽसहोद्योगस्त्वरितं प्रावर्धत। गच्छता कालेनोत्तरोत्तरं प्राचीयत।

असहोद्योगोद्भेदः मुहम्मदीयाः प्रागलभन्त। कराचीनगर आषाढे मासि शुक्लतृतीयायां भृगुवासरेऽखिलभरतवर्षीया खलीपत्वपरिषन्मिलिता। तत्र मुसलिमाभियोगाननूद्योद्घोषितं मा कश्चिन्मुहम्मदीय आङ्ग्लध्वजिन्यां सैनिकपदमापदन्यान्वा प्रचूचुददिति। तत्र पारिषद्याः प्रजासत्ताकं राज्यं प्रतिष्ठापयिष्यामः, वार्षिके च काङ्ग्रेसोपवेशने सत्याग्रहं समर्थयिष्यामोऽधिकृताश्चेदङ्गेरानायकेषु विपक्षवृत्तिं न विपरिणमयिष्यन्तीति संतर्जन्तः प्राख्यापयन्। ततोऽल्पात्कालादूर्ध्वं नभसि[3] मासि कृष्णाष्टम्यां काङ्ग्रेसकार्यनिष्पादिका सभा मुम्बापुर्यां मिलिता। तत्र भरतभुवमागामिनो युव-

१. देवतैव दैवतम् प्रज्ञाद्यण्। दैवतानि पुंसि वा इत्यमराद् विकल्पितमस्य क्लीबत्वम्।

२-२ संज्ञानम्। अन्तःकरणप्रवृत्तिरित्यर्थः। अस्ति हृदिस्थोऽनुच्चरितः कश्चिच्छब्दो यः सत्कर्मणि प्रवर्तिष्यमाणं पुरुषमभ्यनुजानातीव विपर्यये च प्रतिषेधतीवेत्यद्यत्वे लोके व्यवहारः तदनुपातीह प्रयोगः।

३. श्रावणे। नभः खं श्रावणो नभाः—इत्यमरः।

राजस्यागमो नोत्सवैरभिनन्दनीयः, राजनियुक्तैश्च क्रियमाणा उद्धवा[1] न संविभजनीयाः, सर्वस्य च वैदेशिकस्य वस्तुनो विनियोगबहिष्कार इषे कृष्णचतुर्दश्याः प्राक् फलेग्रहिः[2] करणीय इति च निश्चितम्।

खलीपत्वनायकावलिभ्रातरौ खलीपत्वसंमिलने सत्याग्रहपक्षमपश्यतामित्यगृह्येताम्। एतद् दृष्ट्वाऽऽश्वयुजे शुक्लतृतीयस्यां श्रीगान्धी मुहम्मदीयानां मम चैकार्थ्यमित्युदघोषयत्। प्रख्यातैः पञ्चाशताऽखिलभरतवर्षीयकाङ्ग्रेसपारिषद्यैः स्वहस्तपरिचिह्नितेन घोषणापत्रेण च स भवान् सर्वोऽसहोद्योगविषये स्वमतं प्रकाशयितुमर्हतीत्यप्रथयत्। अर्थनीतिदेश[3]विनिपातकरानिमान् शासनेऽधिकृतान्न कश्चिद् भरतवर्षीयो जनो भजेतेति चाभ्यधात्।

श्रीगान्धिन इदं घोषणापत्रं कार्तिके शुक्लपञ्चम्यां देहल्यां मिलितया कार्यनिष्पादिकया काङ्ग्रेससभयाऽन्वमोदि। कृतं दैवाधीनं कर्म, अधुना यद्भावि तद्भवत्वित्यभिधाय सा सभा सर्वः प्रदेशः स्वक्षमतामालोच्य करप्रत्याख्यानादि शासनव्यतिक्रमं प्रक्रमितुमर्हतीत्यन्वजानात्। सत्याग्रहिभिस्तावत् स्वदेशवस्तुविषयः कार्यक्रमः कृत्स्नोऽनुवर्तनीयः, अहिंसाव्रतञ्च चरणीयम्। परार्थोऽयं सर्व आरम्भ इत्यभिव्यङ्क्तुं सत्याग्रहिण इदमावेदिता न यूयं न च युष्माकं पुत्रकलत्रादयः सदसः किमप्यर्थात्मकं साहायकं लप्स्यन्त इति।

प्रत्यासीदन्त्यां सत्याग्रहफलवत्तायां मार्गे कृष्णद्वितीयस्यां युवराजो मुम्बायां पोतादवातरत्। मध्यमा अधमाश्च प्रजाश्रेणयस्तदभिनन्दनं न संव्यभजन्। परमाढ्याः पारसीका राजनियुक्ताश्च काङ्ग्रेसानुशासनं नितान्तमुपैक्षन्त। तेषामत्रैवमात्मिका संस्थिति-

---

१. अथ क्षण उद्धर्षो मह उद्धव उत्सवः—इत्यमरः।

२. स्यादवन्ध्य फलेग्रहिः—इत्यमरः। फलेग्रहिरातमम्भरिश्च इति साधुः।

३. अर्थश्च नीतिश्च देशश्चेति अर्थनीतिदेशाः तेषाम्।

र्जनकदम्बे[1]ष्वेतादृशमावेशमजनयद् यथा तानीश्वराणां सौधान्यरुन्धन्, तत्रस्थानुपाद्रवन्, सर्वस्वं चापाहरन्। स्त्रीरपि न पर्यहरन्। बहवः क्षताः प्राणैश्च वियुक्ताः। परमत्रैवायं प्रमाथोऽभून्नेतरत्र। एतन्नगरं विहाय सर्वत्र भारते वर्षे प्रदिष्टा[2] कार्यनिवृत्तिर्धर्मचर्यैव निरुपद्रवा व्यवस्थिता चाभूत्। कश्चिदपि विमर्दो नाभूत्। मुम्बापुर्याः प्रजाक्षोभस्योदन्तः श्रीगान्धिनं शर इव हृदग्रेऽविध्यत्। यावत्स तमुदन्तमश्रौषीत् तावत्स तं प्रदेशं वेगितया गत्याधावीत्। यदा चोपप्लवकारिणस्तं जयशब्देनासभाजयंस्तदा काप्यस्य मानसी व्यथाऽभूत्। सरोषं स जनाकीर्णं प्रशममनयदपसरणञ्चादिशत्। पारसीका युवराजस्यागममुत्सवेनाभिनन्दितुमार्हन्नैच्छंश्चेत्, प्रमाथो न कथमपि न्याय्यः प्रतिपादयितुं शक्य इति च प्रतिज्ञापूर्वकमकथयत्। सर्वः समुदितो जनोऽवहितेन मनसा महात्मनो वचांस्याकर्णयत्। परमाराद् विमर्दः पुनरुदभवत्। विंशतिसहस्रं मनुष्या रोषाविष्टा विवृद्धमत्सराः[3] सहसा विवेकं ग्राहयितुं न शक्याः। तथापि यूरोपखण्डे कनिष्ठेनापि राज्यपरिवृत्त्यर्थकेनो[4]पप्लवेन यः प्रणाशो भवति तस्यार्धांशोऽप्यत्र नाभूत्। मनस्तापव्यञ्जकैर्वचोभिः श्रीगान्धी मुम्बापौरलोकं सत्याग्रहिणश्च कर्तव्यमबोधयत्। इमे वृत्तान्ताः प्रमाणयन्त्यद्याप्ययं लोकोऽक्षमः सत्याग्रहस्येति। अतः स सत्याग्रहो व्याक्षिप्यता[5]मित्यादिशत्। स्वानुगानां बलात्कृतीर्निष्क्रेतुं स सप्ताह एकाहमुपवस्तुमारभत। भरतवर्षाधिवासिनो यूरोपमहाद्वीपीया मुम्बाप्रकृतिक्षोभैर्नं तथोदवेजयन्त यथा सर्वगामिन्या कार्यनिवृत्त्या। ते राजप्रतिनिधि

---

१. जननिवहेष्वित्यर्थः। कदम्बं निकुरम्बे स्यान्नीपसर्षपयोः पुमान्।

२. प्रदिष्टा विहिता। शिष्टेति यावत्।

३. मत्सरो वैरम्। मत्सरा मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान्—इति मेदिनी।

४. राज्यादिपरिवृत्त्यर्थे केचिदाधुनिकाः संक्रान्तिरिति शब्दं प्रयुञ्जते। तदयुक्तम्। अनभिधानात्।

५. विलम्ब्यतामित्यर्थः। व्याङ्पूर्वः क्षिपतिर्विलम्बनवृत्तिः तथा च रघौ

राजमन्त्रिणश्च प्रतिविधानाय[1] प्राणुदन्। तेन बहुषु प्रदेशेषु बाधका विधयः प्रावर्त्यन्त। चतुःषष्ट्युत्तरनवशतोत्तरसहस्रतमे विक्रमवत्सरे राजद्रोहिणां व्युत्थानानि प्रच्छन्नाः सभाश्च निरोद्धुं यो विहितो विधिः सोऽधुना काङ्ग्रेसस्वेच्छासेवकदलगामी कृतः। सहस्रशः सेवका गृहीताः। सहस्रशश्च जनाः स्वं स्वं नाम सेवकनामावल्याम-लेखयन्। ते च प्रादेशिकीभिः संसद्भिर्विनीताः। अत्रान्तरे पौषे कृष्ण-दशम्यां युवराजागमनकाले कलिकातानगर्यां कार्यनिवृत्तिर्भविष्यतीति निश्चितम्। तस्मिन् वासरे युवराजो नीरवं खिलीभूतं च तन्नगरं मध्येनागमत्।

अखिलभरतवर्षीया काङ्ग्रेससंसद् अमदाबाद इत्यत्र मिलिता। अनन्तरपूर्वं च संसत्पतिर्गृहीत इति समासतो विचारणाऽभूत्। असहो-द्योगेऽहार्यो नो निश्चय इति स्पष्टमावेद्यत। नगरजनाः स्वेच्छासेवा-वृत्तये धरणसहनाय[2] च प्राचोद्यन्त। यत्र तत्र बृहत्यो जनसभाः क्रियन्तामिति लोकः प्रैर्यत। सत्याग्रहः प्रकुप्यन्तीभिः प्रजाभिः शस्त्रबलेन शासनस्यातिक्रमेण साधकतया समोऽपि दयार्द्रतया ततोऽतिरिच्यत इति निश्चित्य सत्याग्रहे तावदेव प्रवर्ततामयं लोको यावद-हिंसातत्त्वं गृह्णीत इत्यन्वमन्यत। भूयांसः पारिषद्या उपवेशनान्ते ग्रहीष्यन्त इति प्रत्यक्षत उपलभ्य ते स्वाधिकाराञ्छ्रीगान्धिनि न्यक्षि-पन्। तेन तमनियन्त्रणमादेशकमकुर्वन्, उत्तराधिकारिनियुक्तौ चा-ध्यकुर्वन्। काङ्ग्रेससमितिसंमत्या विना श्रीगान्धी राजमन्त्रिभिः सन्धातुं काङ्ग्रेसोद्देशं वा परिवर्तयितुं न प्राभवदित्यत्रैव तस्य शक्ति-सङ्कोचः। सभासदामेकदेशो भरतवर्षस्वातन्त्र्याय यथापेक्षं प्रमाथोऽप्य-भ्युपेय इति प्रस्तोतुमङ्गीकारयितुं च प्रायस्यत्। परमयं प्रस्तावो बहु-मतमनुरुध्यापास्तः।

प्रयोगः—अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् इति।

१. प्रतिक्रियार्थम्। क्षिप्रमेव कस्मान्न प्रतिविहितमार्येण इति मुद्राराक्षसे।

२. धरणं बन्धनम्। आसेध इति यावत्।

आगामिषु सप्ताहेषु सर्वगो भरतवर्षीयाणां श्रद्धातिरेकोऽभिव्यक्तिमगात्। पञ्चविंशतिसहस्रं पुरुषाः स्त्रियश्चात्मानं कारारक्षिषु सोल्लासं[1] समार्पयन्। सहस्रशश्च जना भरतवर्षोद्देशे स्वश्रद्धामुपपादयितुमात्मोत्सर्गाय सज्जास्तेषामन्वगतिष्ठन्[2]।

पुनरपि श्रीगान्धी देशजनाः सत्याग्रहस्य क्षमा इत्यमन्यत। मुम्बाप्रदेशान्तर्वर्तिनि मण्डले बारदौलीत्याख्ये सत्याग्रहारम्भस्य सङ्केतश्चिकीर्षित आसीत्। अत्रत्या जनता श्रीगान्धिनो भाषितं सततमगृह्लादकरोच्च। अष्टासप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे माघे शुक्लद्वादश्यां राजप्रतिनिधिमुद्दिश्य लिखिते निरावेष्टने पत्रे श्रीगान्धी स्वकार्यपरिपाटीमस्फोटयत्। तत्र प्रश्रितैः स्पष्टैश्च पदैर्युद्धमुदघोषयत्। असहोद्योगनीतेरहं नायकोऽस्मि, मम च सर्वानुयोज्यतेति च प्रत्यजानीत। सर्वप्रथमं बारदौलीत्यत्र ग्रन्थादेः प्रकाशनस्य, समवायस्य, वाचश्च स्वातन्त्र्यस्यापहर्त्रीं शासनपद्धतिं प्रति निःप्रमाथं जनव्युत्थानं भवितेति च तत्र प्रत्यपादयत्। श्रीगान्धी लार्डरेडिङ्गमहोदयं सप्ताहेन नीतिमार्गपरिवृत्तिप्रख्यापनमयाचत। असति प्रख्यापन ऊर्ध्वमेतस्मात्कालात् सत्याग्रहः प्रारप्स्यत इति च तमावेदयत्।

इदं च पत्रं राजप्रतिनिधिं प्रति प्राहीयत, उदभवच्च चण्डतर उपप्लवः। गोरक्षपुरप्रान्ते चौरीचौरा इत्यस्मिन्पत्तने जनयात्रायामतीतायां केचिदवहीना व्यस्तं पर्यटन्तो रक्षिभिरुपारुध्यन्तापीड्यन्त[3] च। जनैरवस्कन्नास्ते रक्षापुरुषा गुलिकाः प्राक्षिपन्। यदा त आग्नेयचूर्णं निःशेषतामनयंस्तदाऽऽत्मरक्षायै नगरपालागारं प्रत्यगच्छन्। जना नगरपालावासेऽग्निमददुः। अवरुद्धा मुधैव दयामयाचन्त। तेऽदयं न्यषूद्यन्त[4] दह्यन्त च। यतस्ते लोकान् प्राकोपयन् यतश्चासहो-

---

१. सहर्षमित्यर्थः।

२. अन्वक् पश्चात्। अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम्—इत्यमरः।

३. अपीड्यन्तेत्यर्थः। अपपूर्वाद्विदेः कर्मणि लङ्।

४. प्रामथ्यन्तेत्यर्थः षूद क्षरणे चुरादिः। आदेशप्रत्यययोः इति षत्वम्।

द्योगानुषक्तस्य कस्यापि स्वेच्छासेवकस्य तत्रावस्कन्दने व्यापारो नाभूदत एतत्प्रमाथविषये स्वस्य प्रष्टव्यताया अपह्नवोऽपि श्रीगान्धिन्युपपद्येत। परमत्रभवान् सर्वस्य देशस्यैकं संज्ञानमिति स्वजनेषु मध्यादेकस्य कस्यचिदाग[1]स्तस्य मर्माण्यकृन्तत्। मयैवैतेषां प्रजादुष्कृतानामुत्तरं दातव्यमिति सोऽभ्युपागात्। स तथा समत्रस्यद्यथाऽनालोच्य समनन्तरपूर्वं प्रवर्तितं सत्याग्रहमिदानीं पुनर्न्यषेधीत्। मुम्बापुरीजनप्रकोपादूर्ध्वं याऽवस्थितिरभूत्ततः साम्प्रतिकी नितान्तं विषमतरा। किं चाधुनाऽल्पान्येव दिनानि राजप्रतिनिधिं प्रतिघोषणापत्रं प्रेषितवतस्तस्य। स्वकार्यक्रममनुपपन्नतां हासास्पदतां चानीत्वा कथं स एतत्प्रत्यादेष्टुमशकत्। पिशाचा[2]ग्रणीरेतदवारयदिति श्रीगान्धी स्माह। या पिशाचाग्रण्यो वाक् सा दृप्तस्येत्युपलभ्य स घोषणापत्रं प्रत्याख्यातुं निरचिनोत्।

फाल्गुने मासि कृष्णपञ्चम्यां तरुणभरतवर्षम् इतिनाम्नि वार्तापत्रेऽलोकसामान्यं लेख्यं प्रकाशितमभूत्। इदं च श्रीगान्धिनः स्वदोषप्रख्यापणम्। दर्पस्य विनेतारमुपकर्तारं विधातारं स इत्थमस्तुवीत— पर्याप्तो मयि भगवतः प्रसादो वृत्तः। त्रिरहं तेन प्रबोधित इदानीं यावदस्मिन् भारते वर्षे तादृश्यौ सत्यपरायणताऽहिंसाव्रतता च न स्तः, यादृश्योः सत्योरेव संभूय शासनातिक्रमो न्याय्य उपपादयितुं शक्यः स्यादिति।

पञ्चसप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे रोलट्विधानविरोधसंक्षोभावसरे स भगवान्मां प्राबोधयत्। अमदाबादादिपत्तनस्थाः प्रामाद्यन्। अहं न्यवर्तिषि स्थविष्ठं चेमं भ्रममभ्यधिषि। परमेश्वरस्य लोकस्य चाग्रेऽहमात्मानमवानमयम्। न केवलं जनतया संभूय शासनस्यातिक्रममुपारमम्[3], अपि त्वात्मनाऽपि। ...पुनः कालान्तरे-

१. पापम्। पापापराधयोरागः—इत्य .रः।
२. य. पुरुषनधिष्ठायाकार्यं कारयति। एवं विश्वसिति व्यवहरति च लोकः।
३. व्यरमयमित्यर्थः। उपाच्च इति परस्मैपदम्। इह सूत्रे रमिरन्तर्भावितण्यर्थो गृह्यते।

ऽसौ मुम्बापुरीव्यतिकरैर्दारुणं मां प्राबोधयत् । स मां तत्साक्षिणमकरोत् । ···बारदौल्यामविलम्बितं प्रवर्तयिष्यमाणं संभूय शासनातिक्रमं विलम्बयितुमभिप्रैमीति प्राख्यापयम् ।

पञ्चसप्तत्युत्तरनवशतोत्तरसहस्रतमवत्सरभवाया अवमाननया अधुनातनी गरीयसी । परमेषा मामुपाक्रंत । लोकोऽपि व्याक्षेपेणोपाकारीति प्रत्येमि । अहिंसा सत्यं च भरतवर्षस्याभिमते इति व्याक्षेपेणोपपादितम् ।

परमरुन्तुदो न्यक्कारः[1] साम्प्रतं ममोपानंसीत्[2] । परमेश्वरः चौरीचौरावृत्तान्तैर्मामन्वशात् । यतश्च भारतं वर्षमात्मनोऽहिंसाव्रतत्वमभिमन्यते, प्रमाथशून्यैश्चोपायैः स्वातन्त्र्यपदमधिरुरुक्षति, अतो महाप्रकोपप्रयुक्तोऽपि जनप्रमाथोऽशुभं निमित्तम् । निःसाहसा स्वराज्यावाप्तिर्निःसाहसं प्रमाथिजनानां वशीकारं नितान्तमपेक्षते । अहिंसाव्रता असहकारिणस्तदैवामोघक्रिया भवितुमर्हन्ति यदा तैर्दुर्विनीतानामुद्दामवृत्तीनां रथ्यापुरुषाणां[3] यथावत् वशीकारः साधित इति ।

अतो माघे शुक्लचतुर्दश्यां स स्वसंशीतीर्बाधाश्च कार्यनिष्पादिकायै काङ्ग्रेससमित्यै विवृणोति । सर्वे सदस्यास्तेनैकमत्यं नागच्छन् । न जातु कश्चित् कदाचिदेतादृशैर्दत्तावधानैर्मर्षणैः सहकारिभिः सजूर्भिश्च[4] कृतो कृत इति महात्मा तानधिकृत्य न्यगादीत् । ते तस्य विकल्पान् परमादरेणालोचयन् । विज्ञप्ताश्च सत्याग्रहप्रवृत्तिं विलम्बयितुमन्वमन्यन्त । लोकोऽहिंसातत्त्वं ग्राहयितव्य इति च सर्वाः सभाः

---

१. मानावभङ्गः । न्यक्कारो हृदि वज्रकील इव मे तीव्रं परिस्पन्दते इति महावीरचरिते । न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः इति हनुमन्नाटके ।

२. मामुपागमत् । ममेति शेषे षष्ठी । उपानंसीदिति नमेः कर्तरि लुङ् ।

३. रथ्यापुरुषः सामान्यो जनः ।

४. वयस्यैः । सहचरैरिति यावत् । वोरुपधाया दीर्घं इकः ।

प्रायुञ्जत ।

तरुणभरतवर्षनाम्नि स्वके पत्रे प्रकृतां कार्यक्रमपरिवृत्तिमधिकृत्ये-त्यमलेखीन्महात्मा—वेद्मि प्रथमाक्रमलक्षणस्य सर्वस्य कार्यक्रमस्या-त्यन्तविपर्यासो नीतिविद्दृष्ट्याऽनुपपन्नोऽज्ञानप्रयुक्तश्च स्यादिति । परं न संशये[1] धार्मिकदृष्ट्याऽदुष्ट इति । मदीयेन मानावभङ्गेन दोषप्रख्यापणेन चैष देशोऽवश्यमुपकृतो भविता । अहिंसा सत्यं चेत्येको मे गुण इति ब्रुवे । अमानुष्यः शक्तयो मे सन्तीति नाहमभिमन्ये । नाहं ता अपेक्षे । मम च तादृश्येव भौतिक्यपायिनी[2] तनूर्यादृशीतरेषां सजातीनाम् । अतोऽहं तथैव स्खलनशीलो यथा कश्चिदितरः । बहुधा परिच्छिन्ना ममोपकृतयः, परं परमेशो वैकल्ये सत्यपि मां सततमन्वग्रहीष्ट ।

दोषप्रख्यापणं नाम संमार्जन्या साधूपमेयम् । सा ह्यवकरमप-मार्ष्टि भूतलञ्च शुद्धमुज्ज्वलं च करोति । प्रख्यापणेनाहमात्मानं बलीयांसं मन्ये । निवृत्त्या च नोऽर्थोऽवश्यं समर्धिष्यति । न जातु कश्चिद्विमार्गगमनं प्रत्यभिनिविष्टो गन्तव्यं स्थानं गतः । चौरीचौरा-दुष्कृतानि बारदौलीजनेषु नैव विक्रियां जनयेयुरिति केषाञ्चिदुक्तिः । नाहं मनागपि तां संदिहे । परं बारदौलीति भरतवर्षालेख्ये चिह्न-मात्रम् । बारदौलीस्थानां प्रयत्नास्तावदेव साफल्यं भजेयुर्यावत्प्रदेशा-न्तरस्थाः सर्वात्मना तैः सहकुर्युः । यथा च मनःशिलायाः कणेन सम्पृक्तं पयोऽपेयमिति नाङ्गीकार्यं भवति तथैव चौरीचौरा इत्यत आगतेन हालाहलविषसम्पर्केण बारदौलीसौजन्यमप्यग्राह्यं भविष्यति । द्वितीयः प्रदेशो भरतवर्षस्य तथैव प्रतिच्छन्दको यथा प्रथमः । अन्ततः चौरीचौरा इति प्रकुपितया रुजो लक्षणम् । सत्याग्रहप्रवृत्तौ च प्रकोपेण[3] न भाव्यम् । सत्याग्रह इति तूष्णीं दुःखसंवेदनायै[4] सज्जो-

१. सम्पूर्वाच्छेतेः कर्तरि लट् ।

२. अपायो नशोऽस्या अस्तीति । नश्वरेत्यर्थः ।

३. प्रातिपदिकान्तनुम्विभक्तिषु च इति विकल्पेन णत्वम् । तेन पक्षे प्रकोपेन इत्यपि भवति ।

४. दुःखानुभूतये । विद चेतनाख्याननिवासेषु चुरादिः । ण्यासश्रन्थो युच् ।

करणम् । अद्भुतोऽस्य प्रभावः । यद्यप्यलक्षितोऽनुत्कटश्च । चौरीचौरा इत्येतद्गता दुरन्ता घटना प्रदेशनीव तं मार्गं बोधयति यमेतद्देशजा अनुवर्तेरन्, अभ्यर्थाश्चेत् पूर्वोपाया नास्थीयेरन् । यदीच्छामोऽप्रमाथो मा कदाचित्प्रमाथकारणतां गमदिति, असंशयमिदं नः कृत्यं यदस्माभिर्निवर्तनीयं, प्रशमाय च प्रयतनीयं सत्याग्रहप्रवर्तनं च न तावच्चिन्तनीयं यावन्न वयं प्रतीमः सत्यपि च शासितॄणामुत्तेजने स्वास्थ्यं वर्त्स्यतीति । प्रतिपक्षा अस्मन्न्यग्भावे पराजये वाऽऽत्मना विकत्थन्तां[1] नाम। कातरा वयमित्यभियोगो वरं न च शपथप्रत्यादेशः, न चेश्वरेऽपराधः।

अवश्यं मयाऽऽत्मा शोधनीयः । मया युक्ततरेण मामभितो जायमानामणिष्ठामपि सदाचारपरिवृत्तिमुपलब्धुं क्षमेण साधनेन भाव्यम् । मम प्रार्थनाभिरधिकतरार्जवोपेताभिर्विनीताभिश्च भवितव्यम् । न हि म उपोषणा[2]च्छ्रेयोऽघम[3]र्षणम् ।

आत्मना देहेन्द्रियवशीकारावाप्तये क्रियमाणमनशनं क्रमिके नृणां समुत्कर्षे साधकतमं करणम् ।...... निर्विवादं भयावहस्यातङ्कस्य प्रतिक्रियायां प्रकटितापाटवस्य शस्त्रवैद्यस्य पदमधिरोहामि। मयैतत्पदं वाऽपास्यमधिकतरं पाटवं वाऽत्राप्यम् । ......प्रमाथिनीं भवन्तीं प्रमाथपुरोनिमित्ततां वा गच्छन्तीमिमां जनचेष्टां वारयमाणोऽहं मानावभङ्गं वा, बाधां वाऽत्यन्तं विवासनं वा निधनमपि वा स्वेच्छातः सहिष्ये ।

जगति विरला एवार्षेय्यो भणितयोऽस्य सन्दर्भस्य तुलामारोहन्ति।

ततष्टाप् । दुःखसंवेदनायैव रामे चैतन्यमर्पितम् इत्युत्तरे रामचरिते ।

१. कत्थ श्लाघायाम् अनुदात्तेद् भौवादिकः। तत्राविद्यमानगुणसम्बन्धज्ञापनं श्लाघा । तत्रार्थेऽयमकर्मकः । कृत्वा कत्थिष्यते न कः इति भट्टिकाव्ये। सकर्मकत्वे त्वपवादोऽर्थः। न पौरुषेणापि विकत्थतेऽन्यान् इति विदुरनीतौ। भवानस्मान्विकत्थते इति चान्यत्र भारते ।

२. उपोषणमुपवासः । उष दाहे इत्यस्य ल्युटि रूपम् ।

३. पापापनोदकम् । मृष सहने । ल्युट् । सहनमभिभवः ।

अनुपमेयं ह्येतादृश्या व्यवस्थितेर्नये गौरवम् । राजनीतिनिष्णातास्त्वे-तामप्रास्ताविकीं[1] व्याघातकरीं चामन्यन्त ।

अतो देहल्यामष्टासप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे फाल्गुने कृष्णत्रयोदश्यां मिलितायां काङ्ग्रेससंसदि श्रीगान्धिना पारिषद्यानां महान् विसंवादः प्रादुरासीत् । कार्यनिष्पादिकायाः सभायाः प्रस्तावा वादानुवादे चिराय प्रवृत्ते सत्येव प्रमाणीकृताः । लोकाः संभूय शासनातिक्रमस्याक्षमाः, तेषां संहननं कालमपेक्षत इति श्रीगान्धी प्रत्यजानीत । निर्माणात्मकं कार्यक्रमञ्च सविनयं न्यवेदयत् । अनेके पारिषद्याः स्वातन्त्र्यार्थस्योद्योगस्य मान्द्येन रोषं गताः सत्याग्रह-व्याक्षेपं दृढोक्तिपूर्वं न्यषेधन् । श्रीगान्धिनः कार्यपद्धतिर्देशोत्साहस्याव-सादयित्रीति तेऽभ्यमन्यन्त । कार्यनिष्पादिका सभा धिक्क्रियतामिति प्रास्तूयत । प्रतिज्ञाश्चास्या अपास्यन्तामिति चोपाक्षिप्यत । परमन्ते श्रीगान्धिना जितम् ।

कारागमन-संविधानम्

श्रीगान्धी स्वं निरोधं चिरमपेक्षमाण आसीत् । सप्तसप्तत्युत्तर-नवशतोत्तरसहस्रतमे वत्सरे कार्तिक्याः पौर्णमास्याः प्रभृति सर्वाणि तस्य कार्याणि संविहितान्यासन् । स्वश्च सज्जः । स यद्यहं निरुध्येय इत्येतच्छीर्षकेण लेख्येन लोकानुपादिशत् । पुनरपि निरोधप्रवादे प्रथिते सति सोऽष्टासप्तत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे फाल्गुने शुक्लैका-दश्यामित्थमन्वशाज्जनान्—नाहं शासनाधिकृतेभ्य आशङ्के । तैर्नृहत्यया प्रवर्तिता रुधिरकुल्याऽपि मां भीषयितुं नालम् । कामये लोकाः पर्याप्तमात्मसंयमं रक्षेयुर्मन्निरोधदिवसं चोत्सवदिवसमाकल-येयुः । शासितारः प्रतियन्त्यहं ह्यस्याखिलस्योद्योगस्यात्मा, अपसा-रितश्चेत् स्यां स्वस्था वयं भवितास्म इति । इदमेव तर्हि कर्तव्यतया शिष्यते यज्जनशक्त्यनुमानम् । निरुपद्रवाः प्रशान्ताश्च भवन्तु जनाः ।

1. प्रस्तावोऽवसरः प्राप्तोऽस्या इति प्रास्ताविकी । सा न भवतीति ।

सार्वभौमस्य प्रमाथस्योद्भवाद् बिभ्यतोऽधिकारिणो मन्निरोधं परिहरन्तीति यत्तन्न मे मानस्य प्रमोदस्य वा कारणमपि तु न्यग्भावस्य। लोकः कार्यान्मा निवृतत्[1], मा चामर्षं प्रचकाशत्। शासितृभिर्मा भूत्सहकारिता। अधिकरणानि विद्याशालाश्च विनियोगबाह्यानि क्रियन्ताम्। इदमत्र समासत उच्यते—असहोद्योगकार्यकलाप ऐकान्तिकेनानुक्रमेण विनियमेन चानुष्ठीयतामिति। लोका एतं कार्यकलापं निर्वाहयिष्यन्ति चेज्जेष्यन्ति। विपर्ययेऽनर्थाधीना[2]स्ते भविष्यन्तीति।

सर्वस्मिन् वस्तुनि सुविहिते सति महात्मा स्वाभीष्टमाश्रमं शबरवतीस्थमगमत्। तत्र च प्रियैः शिष्यैः परिगतः प्रसंख्यानपरो[3] रक्षापुरुषागममुदैक्षत[4]। नूनं स निरोधस्योदकण्ठत।

फाल्गुने शुक्लद्वादश्यां रक्षिण आगमन्। तेषामागमप्रवृत्तिः पूर्वमेवाश्रमं प्रापत्। गमनायोद्युक्तो महात्माऽऽत्मानं रक्षिसादकरोत्[5]। श्रीगान्धिनः सहधर्मिणी काराद्वारं यावत्पत्या सह गन्तुमन्वज्ञायत।

चैत्रे कृष्णपञ्चम्यां शनौ मध्याह्ने ब्रूम्सफील्ड् इत्याख्येन न्यायाध्यक्षेण[6] श्रीगान्धिनः कार्यपरीक्षणं प्रारभ्यत। अत्र

विचारः विलक्षणस्य सौजन्यस्य मनःसमुन्नतेश्च[7] व्यक्तिरभवत्। तद्दिने स आधिकरणिको राजमन्त्रिणां बहून् दोषान्

---

१. निवृत्तो मा भवत्वित्यर्थः। माङि लुङ् इति सर्वलकारापवादो लुङ् इह लोडर्थे। द्युद्भ्यो लुङि इति वा परस्मैपदम्।

२. कष्टमापन्नाः, दुर्गताः। छिद्रोपनिपातिनोऽनर्थाः इति शाकुन्तले।

३. प्रसंख्यानं ध्यानम्। श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्हरः प्रसंख्यानपरो बभूव इति कुमारे।

४. प्रत्यैक्षत, प्रत्यपालयत्। उदीक्षतिः प्रतीक्षणेऽपि वर्तते। त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती इति मनुप्रोक्तायां भृगुसंहितायाम्।

५. रक्षिणामायत्तमकरोदित्यर्थः। तदधीनवचने इति सातिः प्रत्ययः।

६. प्राड्विवाकेनेत्यर्थः। अत्रार्थे न्यायाधीश इति केषाञ्चिदाधुनिकानां प्रयोगः प्रामादिकः।

७. मनस्वितताया इत्यर्थः।

प्रामाट्[1]। जे० टी० स्ट्रैङ्गमैन् इतिनामा वक्तृपुरोगमो राज्ञि प्रजाविरक्तिजननेन श्रीगान्धिनमभ्यशंसत्। वर्षद्वयं चायमविरतं प्रकृतिप्रकोपायायतिष्टेति च प्रत्यपीपदत्[2]। महात्मैव चौरीचौरा इत्यत्र वृत्तायां नृहत्यायामनुयोज्य इति चाभ्यधात्। कामं सोऽहिंसामुपादिशद् विरक्तिमपि चोपादिशत्। अतो लोकेन कृतायां हिंसायां स प्रष्टव्य इति च प्रत्यजानीत।

महात्मन उपन्यासः

सत्यं ह्याह वक्तृपुरोगमो यदिदमाह—धुर्यतां गतेन सम्यग् विनीतेन[3] लब्धोचितलोकप्रतीतिकेन[4] श्रीगान्धिना वेदितव्यमासीत् कस्क[5] उदर्कः सर्वस्य मे कर्मणो भवितेति। अहमवेदिषं यदहं पावकेन समक्रीडे[6]। अहमात्मानं संशयेऽपातयम्। विसर्जितश्चेत् स्यामद्यापि तथैवाचरिष्यामि। अद्य प्रातरियं मे बुद्धिरभूत् स्वाधिकारात् प्रमाद्येयं न ब्रूयाञ्चेद्यदिह स प्रति ब्रवीमि।

अहं प्रमाथं पर्यजिहीर्षं[7] प्रमाथं च परिजिहीर्षामि। अप्रमाथो मम श्रद्धायाः प्रथममङ्गम्। मत्स्वीकृतस्य मतस्य च चरमावयवः। परं मया वरणं कर्तव्यमासीत्। तां शासनपद्धतीं[8] वा मृष्येयं ययायं मे देशोऽप्रतिविधेयं[9] क्षत इति मन्ये। मन्मुखात्सत्यं शृण्वतां जनानां

१. अध्ययुङ्क्तेत्यर्थः। महापापोपपापाभ्यां योऽभिशंसेन्मृषा परम् इति याज्ञवल्क्यस्मृतौ।
२. अबोधयत्। प्रतिपूर्वाण्ण्यन्तात्पादयतेः कर्तरि लुङ्।
३. कृतविद्येन। विनयं प्रणतौ प्राहुः शिक्षायां विनयो मतः—इति विश्वः।
४. लोकव्यवहारविदेत्यर्थः। प्रतीतिरनुभवः।
५. कस्कादिषु च इति विसर्जनीयस्य सः।
६. समखेलमित्यर्थः। क्रीडोऽनुसंपरिभ्यश्च इत्यात्मनेपदम्।
७. परिपूर्वाद् हरतेः सनि लङि रूपम्। पर्यत्यजमित्यर्थः।
८. बह्वादिभ्यश्च इति वा ङीष्।
९. यथा प्रतिविधातुं न शक्यं तथेत्यर्थः। क्रियाविशेषणमेतत्।

प्राचण्डचोद्धदस्य संशये वाऽऽत्मानं पातयेयम्। जानामि मामका लोकाः कदाचिदुन्मत्ता इवाचारिषुः। एतस्य कृतेऽत्यन्तं विषीदामि। अतो नाहमत्र लघुं दण्डं सहितुं[1] संनिहितोऽपि तु गरिष्ठम्। नाहं दयां याचे। नाहं दोषशमनीं कामपि वार्तां ब्रुवे। गरिष्ठं तं दण्डमाह्वयामि सहर्षं सोढुञ्च सज्जोऽस्मि यो मयि तस्य कर्मणः कारणात् प्रणेयो यद्दण्डनीत्यां कामतः कृतोऽपराधः, यच्चाहं शिष्टस्य पौरस्य परं कृत्यं प्रपश्यामि। एकैव ते गतिर्धर्माधिकारिन्! स्वपदं वा परित्यजेर्गरिष्ठं वा दण्डं मयि निपातयेरिति।

अतोऽचिन्तितपूर्वादुपन्यासादनन्तरं श्रीगान्धी पत्रमारोपितमिदं प्रख्यापणमवाचयत्—

अयं मे धर्मो यदहं भरतवर्षीयेभ्य आङ्ग्लेभ्यश्च व्याख्यायां[2] कस्मादहं दृढमनुरक्तः सहकारी च भूत्वेदानीं नितान्तमपरक्तोऽसहकारी च संवृत्तोऽस्मीति। ब्रिटिशशासनपद्धतेः संशोधने पञ्चविंशति वर्षाण्यनारतं पर्यश्रमम्। भरतवर्षस्याङ्ग्लदेशस्य च संबन्धविच्छेदमन्तरेणैवैतत्संशोधमं सुसाधमिति प्रत्ययं प्रत्यभिन्यविक्षि[3]। सत्सु बहुषु विसंवादेषु[4] षट्सप्तत्युत्तरनवशतोत्तरसहस्रतमं संवत्सरं यावदहं गाढमनुरक्तोऽभवम्। परं तत आरभ्य साहसानि पातकानि च परिच्छेदमत्यायन्। प्रमार्जनीयेषु चान्याय्याचारेषु शासितारो भरतवर्षस्य सत्त्वमवजानन्त इव दुष्कृतिनो नियोगिनः सममानयन् वृत्त्यादिदानेन पर्यतोषयंश्च। त एवान्योन्यसंश्लेषणानि व्यश्लेषयन्। ब्रिटिशशासनं हि स्वार्थसिद्धये परेषां विनियोग इति नीतौ प्रतितिष्ठति। स्वार्थसिद्धसौकर्याय च विधयो विधीयन्ते। स्वार्थघटकानां हिताय च ते

---

१. तीषसहलुभरुषरिषः इति तादेरार्धधातुकस्य तुमुन इड् वा।
२. ख्या प्रकथने इत्यस्य सार्वधातुके लिङि रूपम्।
३. अभिनिविशश्च इति विशतेराधारस्य कर्मसंज्ञा। तेन प्रत्ययमिति द्वितीयान्तं पदम्। नेर्विशः इत्यात्मनेपदम्।
४. विप्रलम्भो विसंवादः— इत्यमरः। अत्र षष्ठी चानादरे इति सप्तमी।

बुद्धिपूर्वमबुद्धिपूर्वं वा विनियुज्यन्ते। अणुरप्यव्यर्थो भीतिजननो विधिर्व्यूढस्य बलस्य प्रदर्शनं च प्रजा हतवीर्या अकार्ष्टाम्। अपदेश[1]-शीलत्वं चाजीजनताम्। भरतवर्षीयाः क्षुधार्ता उत्सन्ना विनिपतिताश्च। भूतपूर्वशासनक्रमापेक्षयाऽऽङ्ग्लदेशेन भरतवर्षस्य महीयोपाकारि। अनिष्टेन सहासंसर्गो धर्मः, एष चाचरितो मया। अतीते कालेऽसहोद्योगो दुष्कृतिषु बलात्कृतिरूप आसीत्। साहसं हि तदानीं साधकतमं मतम्। मया तु नूतनमजय्यं हिंसारूपमस्त्रं लोकेभ्योऽदायीति।

एतदनन्तरं प्राड्विवाकः श्रीगान्धिनं सम्बोध्य प्रावोचत्—

श्रीगान्धिन्! अभियोगान्प्रतिपद्यमानेन भवता दुःशकं मे कार्यं सुशकमकारि। तथापि न्याय्यस्य दण्डादेशस्यावधारणमिति यदवशिष्यते तदपि नाम तादृग् दुर्ज्ञेयं प्रमेयं यादृगिह देशे केनाप्यक्षदर्शकेन[2] परीक्ष्यं भवितुमर्हति। विधानं हि समं सर्वेषु वर्तते। नादः पुरुषविशेषमाद्रियते। तथापीदमनुपेक्ष्यं यानहमद्य यावत् पर्यैक्षिषि, आयतौ वा येषां व्यवहारपदं विचारयितुं लब्धावसरः स्यां तेभ्यः सर्वेभ्यो भवान् भिन्नकक्ष इति।

इदमप्यनुपेक्ष्यमेतद्देशजानां कोटिशो जनानां दृष्टया भवानग्र्यः स्वदेशभक्तो विश्रुतो नायकश्च। येऽपि भवता राजनीतौ विवदन्ते तेऽपि भवन्तमुच्चैरुद्देशं सौजन्योपेतमवदातचरितं चावगच्छन्ति। परमेष मे धर्मो भवन्तं विधानपरवशं जनमिव परीक्षेयेति।...इह भारते वर्षे विरला एव ते सन्ति ये नाव्थाजं शोचन्ति भवांस्तथाऽतनिष्ट यथा भवतोऽनर्गलत्वं येषां केषांचिद्राजमन्त्रिणामप्यसह्यं भवेदिति। परमयं भूतार्थः। एतदेवम्। यद्भवानर्हति यच्च प्रजानां हितायापेक्षितमिति भाति तदुभयं परस्परापेक्षमिति विवेक्तुं व्यवस्यामि[3]।

---

१. व्याजशीलत्वम्। अपदेशः पुमाँल्लक्ष्ये निमित्तव्याजयोरपि—इति विश्वः।

२. द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ—इत्यमरः। अक्षान् व्यवहारान् पश्यतीति। अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोः—इति विश्वः।

३. यते इत्यर्थः। व्यवपूर्वः स्यतिरुद्योगे वर्तते।

आज्ञाप्यं दण्डमधिकृत्याधिकरणिकोऽभियुक्तं महात्मानं महता प्रश्रयेणेदमवोचत्—दण्डादेशविषये प्रकृतसंवादिनस्तस्य व्यवहारपदस्यानुकारो मेऽभीष्टो यस्य निर्णीतस्याद्य द्वादश समा गताः। श्रीबालस्य गाङ्गाधरेस्तिलकस्य व्यवहारपदमिहाभिप्रैमि। षडब्दान् कारावासो हि तत्रभवतो दण्ड आज्ञप्तोऽभूत्। कच्चिद्[1] भवान् श्रीतिलकेन समकक्षतां नानुपपन्नां मंस्यत इति। यद्यत्र देशे कालपर्यये[2] वृत्तपरिवर्तेन राजमन्त्रिभिर्नियतकालस्य लघूकरणं सम्भवि स्यान्नहि कश्चन मत्तोऽधिकतरं नन्दिष्यतीति।

प्राड्विवाको मां प्रश्रयेणातिशयीतेति श्रीगान्धी नाशकत् सोढुम्। स प्रत्यवोचत्—महत्येषा मे सत्क्रियाऽभिमततमोऽधिकारश्च यन्मन्नाम लोकमान्यस्य श्रीतिलकस्य नाम्ना सहोच्चार्येत। दण्डविषये त्विदमेव विवक्षे। अयं तथा लघुर्यथा केनापि न्यायाध्यक्षेणाज्ञाप्य आसीत्। सकलं कार्यक्रमं चाधिकृत्येदमभिधित्से—नाहमतो भूयांसं प्रश्रयमपेक्ष इति।

अवसितो विचारः। श्रीगान्धिनः सुहृदः सगद्गदं रुदन्तस्तच्चरणयोरपतन्। महात्मा सस्मितं तानापृच्छ्य शबरवतीकारागृहं प्राविशत्। प्रविष्टमात्रे च तस्मिन् प्यधीयतास्य[3] द्वारम्॥

इत्युपाध्यायश्रीचारुदेयशास्त्रिणः कृतौ श्रीगान्धिचरिते
चतुर्थः परिच्छेदः॥

---

१. कच्चित् कामप्रवेदने।

२. अतिपातस्तु स्यात्पर्यय उपात्ययः—इत्यमरः।

३. समव्रियतेत्यर्थः। अत्रापेरुपसर्गस्याकारस्य पाक्षिको लोपः। तथा च व्याकरणस्मृतिः—

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिशा॥ इति

अथ पञ्चमः परिच्छेदः

कारायां निरुद्धे महात्मनि सर्वथा साधु व्यवाहरन्नधिकृताः। तस्य वासाय परिसृष्टं परिष्कृतं चैकमागारं प्राकल्पयन्।

कारावासः अभिरुचितं भोज्यमधिजिगांसितानि पुस्तकानि चोपाकल्पयन्। श्रीगान्धिनि सुतरां सगौरवास्ते तद्वरिवस्यायां[1] न कदापि प्रामाद्यन्, तन्निर्वृतये च सन्ततं प्रायस्यन्। एवमवेक्षितः संभावितश्च स महतौत्सुक्येनाध्ययने व्याप्रियत। विविधविषयावगाहिनीश्चाध्यर्धशतं प्राच्यानां प्रतीच्यानां च विपश्चितां कृतीः सादरमध्यैत। भरतवर्षीया आर्या मुहम्मदानुगाः ख्रिस्तानुयायिनश्च स्वं स्वं मतं विवृण्वन्ति पुस्तकानि तत्सकाशं प्राहिण्वन्। एवं हि तत्रभवान् स्वाध्ययनमधिकृत्यालेखीत् --

अहन्तावन्तं ग्रन्थसम्भारमध्येयं निरचिनवं यावते षण् निरोधवत्सरा न पर्याप्नुवन्। प्रथमे मासत्रय आसीदपरिच्छिन्ना ममेयमाशंसा भरतवर्षीयाः प्रस्तावसदृशं[2] समाचरिष्यन्ति, वैदेशिकवाससो विनियोगबहिष्कृतिं निर्वर्तयिष्यन्ति, काराद्वारश्चोद्घाटयिष्यन्तीति। परं द्रागहमवेदिषं नैतद् भविष्यतीति। अहमदर्शं कष्टसाध्यया निरुद्वेगया पञ्चभिर्वर्षैर्भूयोभिर्वा लभ्यया विरचनयैतत्सुसाधमिति। आदिष्टादण्डावधेः प्राङ्नाहं कारायाः विमोक्षमैषिषम्। अतोऽहं चतुःपञ्चाशद्वर्षो गलिताङ्गयष्टिरपि चतुर्विंशतिवर्षो युवेव सोत्साहमध्ययने प्रावृतम्। अहं कलामात्रमप्युपायुक्षि। विमोक्षसमय उर्दुद्रामिलयोर्विशेषज्ञता

---

१. शुषश्रूयामित्यर्थः। वरिवस्या तु शुश्रूषा परिचर्याप्युपासना—इत्यमरः।

२. प्रस्तावः स्यादवसरः—इत्यमरः।

३. कारागारद्वाराणि। स्त्री द्वार्द्वारं प्रतीहारः—इत्यमरः।

संस्कृतमर्मज्ञता च मे भविष्यत इत्याशासिषि। संस्कृतमूलग्रन्थाधिजिगांसा मे समर्धिष्यतीत्यमंसि। परं नैतेन भवितव्यमासीत्। अविरतं ममाध्ययनं दैवदुर्विपाकभूतेनोपतापेनार्तकितं व्यच्छेदि। अहश्चामोचीति।

कारायां निरुद्धस्य कालं गमयतः श्रीगान्धिनो यावद्वर्षद्वयं नात्यक्रामत्तावत्स आर्तिमाच्छंत्[1]। अगदङ्कारैः[2] परीक्षणे निर्वृत्ते शस्त्रवैद्यास्तं पर्यैक्षन्त शस्त्रक्रियां चावश्यकीममन्यन्त। कालहरणस्याक्षमोऽयमामय इति च त आकलयन्त। अतो महात्मा सेसन् इतिनाम्ना प्रतीतां पुण्यपत्तनस्थां चिकित्साशालां तूर्णमानाय्यत। यत्र समुचिता सर्वा संविधाऽभूत्। यत्र च महात्मनः पुत्रकलत्रादयः सगन्धाः[3] सुहृदश्च तमुपचरितुमभ्यन्वज्ञायन्त। शस्त्रक्रिया सफला समजनि। तेन प्रकृतिस्थशरीरता समभाव्यत। क्रमेण च बलं प्रत्यापद्यत।

विमोक्षः

अस्या रुजाया हेतोरधुना महात्मनः कारायां वासो नोचित इति साध्वपश्यन् राजमन्त्रिणः। देशावस्थितेश्च प्रशान्तत्वादनन्तरायं हितं च तस्य विसर्जनमजानन्। अतोऽशीत्युत्तरनवशतोत्तरसहस्रतमे विक्रमाब्दे माघेऽमावस्यायां सार्धसप्तनादमितायां प्रातस्तन्यां वेलायां गुल्मपतिर्मेडिक इत्याख्यश्चिकित्सको महात्मानमुपासर्पत् तद्विमोक्षप्रवृत्तिं चाशंसत्। इमां प्रवृत्तिं निशम्य महात्मा क्षणं तूष्णीमास्त ततः सस्मितमवोचत–किं भवान् किञ्चित्कालान्तरं चिकित्साशालायां मदीयमवस्थानमनुज्ञास्यति मय्यातिथ्यकारितां चाश्रयिष्यतीति। वैद्यः सहासं प्रत्यवोचत् —भवान् मदनुशासने वर्तताम्। अहं भवत उपचारेण महान्तमानन्द-

---

१. आर्ती रोगः। आङ ऋच्छतेः क्तिनि उपसर्गादृति धातौ इति वृद्धिः।

२. वैद्यैः। अगदमरोगं करोतीति अगदङ्कारः। कारे सत्यागदस्य इति मुम्।

३. सगन्धाः सम्बन्धिनः। ज्ञातय इत्यर्थः। गन्धो गन्धक अमोदे लेशे सम्बन्धगर्वयोः इति विश्वः। वामश्चायं नदति मधुरं चातकस्ते सगन्धः इति मेघदूते ॥

माप्स्यामीति। ततो व्रणं विलिप्य पट्टिकया चावेष्ट्य पुनरगादीद् यदि महात्मानं दर्शका जनास्तदभ्याशमेष्यन्ति तर्हि तस्य प्रकृतिप्रत्यापत्तिः प्रतिभन्त्स्यते। अत इदमेव साधीयो यावन्न स सुतमां सुस्थो भवति तावत् सोऽत्यन्तं विश्रमयितव्य इति। यतोऽद्य यावद् व्रणं न यथेष्टं विरोपितम्। आसप्ताहद्वयं यदि स पर्याकुलीक्रियेत व्रणं विक्रियतेति।

अतोऽनन्तरं भिषङ्‌निदेशानुसारेण महात्मानं प्रवातं सातपं चागारान्तरमानयन्।

अचिरेण महात्मनो विमोक्षवार्ता सर्वस्मिन् देशेऽप्रथत। यः कश्चिन्न्यशामयत[1] स प्रामोदत। यत्र तत्रोत्सवा अक्रियन्त। महात्मन आरोग्यं क्षेमं च दुःखहरो हरिरयाच्यत।

कारया विमुक्तो महात्मा भयङ्करां देशदुःस्थितिम[2]पश्यत्।

देशदुःस्थितिः नासीत् स प्रदेशो यत्र हिन्दवो मुहम्मदीयाश्च मिथो नाकलहायन्त[3]। शस्त्रैरस्त्रैरिष्टकाभिर्लोष्टैश्च प्रकाशं वाप्रकाशं वा व्यत्यघ्नन्[4]। विवृद्धमत्सरा उद्भूतकोपाटोपाः परस्परोच्छेदमचिन्तयन्। वेतालोपसृष्टा वा विनाशकाल उपागत इति विपर्यस्तबुद्धयो वा गर्हितं समाचरन्। पञ्चापप्रदेशे तु तेऽत्युत्कटमशत्रवन्[5]। अत्र मूलत्राणेऽमृतसरसि साधारणपुरेऽन्यत्र च बहुत्र हिन्दवो मुसलमीनाश्चान्योन्येन व्यगृह्णन्[6]। तेन च सर्वे जना

---

१. आकर्णयदित्यर्थः। शम लक्ष आलोचने इत्यस्य धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः। नान्ये मित इति मित्त्वनिषेधः। निशामय तदुत्पत्तिं विस्तराद्गदतो मम इति च प्रयोगः।

२. दुरः षत्वणत्वयोरित्युपसर्गत्वप्रतिषेधादुपसर्गात्सुनोतीत्यादीना न षत्वम्।

३. कलहं नाकुर्वन्। शब्दवैरकलहाभ्रमेघेभ्यः करणे इति क्यङ्।

४. परस्परमघ्नन् इत्यर्थः। न गतिहिंसार्थेभ्यः इति कर्मव्यतिहारे विहितस्यात्मनेपदस्य निषेधः।

५. शत्रव इवाचरन्। सर्वप्रातिपदिकेभ्यः क्विब्वा इति क्यङि्वषये वा क्विप्।

६. विपूर्वो ग्रहिः सकर्मकोऽकर्मकश्च। उभयथा हि प्रयोगा दृश्यन्ते।

अक्षुभ्यन् । अकिञ्चित्करमर्थं च हेतूकृत्य संप्रहर्तुं समनह्यन् ।

गदान्निर्गतो महात्मा चिकित्साशालाया अमदावाद इत्यत्रागमत् । कञ्चित्कालं विश्रमोऽपेक्षित आसीत् । परं दिदृक्षूणां गमागमाभ्यां सर्वस्या दिशो विदिशश्च निमन्त्रणावाप्त्या लोकस्य च पर्यटनस्यापेक्षया स चिरं विश्रमं नालब्ध । अतो मासद्वयमाश्रमेऽवस्थाय स बहुषु प्रदेशेषु पर्याटीत् । श्रीगान्धी बहुधा लोकान्प्राबोधयत् । यथा भ्राता भ्रातरि वर्तते तथान्योन्यस्मिन् वर्तितव्यमित्यन्वशात् । परं नैतदनुशासनं कश्चिदबाधात् । बुद्धिविपर्ययो[1] हि तत्र बलवानभूत् । हिन्दुभ्यो मुसलमोनेभ्यश्चान्योन्यमभिशंसन्त्यनेकानि[2] पत्राणि महात्मानं प्राप्तानि । भूयोभिश्च पक्ष्यतादोषस्तत्रभवति समारोपितः ।

एवमवस्थिते सति महात्मा सविस्तरमेकं प्रबन्धं प्राकाशयत् । यत्र तदानीन्तनीं स्थितिं सम्यगालोचयत् । उपद्रवकारणान्युपावर्णयत् । हिन्दूनां मुहम्मदीयानाञ्चाचारविचारपद्धतिं प्रकृतिं च गुणदोषतः[3] पर्यच्छिनत् । शान्तिप्रिया निष्पक्षपाताश्च सुजना एतं प्रबन्धं नितान्तमभ्यरोचयन् । अत्र महात्मा हिन्दून् सम्बोध्येत्थं प्राचोदयत्— युष्माभिः साधीयो वर्तितव्यम् । कातर्यमुत्सार्यम् । धैर्यमालम्ब्य चेतरेषु विश्वसनीयम् । एवं हि सर्वं समाधास्यते । यतः सर्वस्य संकटस्य विघ्नस्य चापनयनं युष्मास्वायतत इति ।

अत्रान्तरे देहल्यां हिन्दवो मुहम्मदीयाश्चावैरायन्त । एतदाकर्ण्य श्रीगान्धी नितान्तमदूयत । प्रशान्ते सत्युपद्रवे स देहलीमगच्छत् । लब्धतदागमप्रवृत्तयः परःशताः पौरास्तं प्रत्युदगच्छन् । जयतु जयतु

---

१. स्याद् व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये—इत्यमरः ।

२. दोषमारोपयन्तीत्यर्थः । महापापोपपापाभ्यां योऽभिशंसेन्मृषा परम् इति याज्ञवल्क्यस्मृतौ ।

३. गुणान्दोषांश्चाधिकृत्येत्यर्थः । ल्यब्लोपे कर्मण्युपसंख्यानम् इति पञ्चमी । पञ्चम्यास्तसिरादेशः ।

महात्मेति निनदैर्दिशः प्रतिध्वानिता अभूवन् । श्रीगान्धी वृत्तान्तजातं निपुणमैक्षत । परःसहस्रान् समवेताञ्जनान् सम्बोधयन्स एवं स्माह— अद्य भवन्तो मदागमं प्रतीक्षमाणा इहासीना महान्तं क्लेशमन्वभूवन् । नाहं लघुतरं[1] भवतां पुरः संनिधातुमशकम् । अतः क्षमां याचे । नाहमिह काञ्चिद्वार्तां श्रावयितुमागतोऽस्मि यया भवतां मम च परितोषः स्यात् । ममागमनकारणं च नाविदितं भवताम् । देहल्यां हिन्दवो मुहम्मदीयाश्च संप्राहृषतेति[2] दूषितमस्या अवदातं यशः ! उपक्रोशश्च[3] महान् संभूतः । अनेन व्यतिकरेण सर्वोऽयं देशो विकारस्य गमनीयो भवेदित्याशङ्क्यते । अस्य च प्रसरः कथं वार्येतेति चिन्तयन्ति नेतृतमा नो बन्धवः । परमद्य यावन्न तैरुपायः कश्चिदुपलब्धो यमावेदयेय । अतोऽहं खिद्ये[4] ।

अहमत्र भवतो विज्ञापयेऽस्माभिः सर्वैः परमेश्वरो नो धियं प्रचोदयेदिति प्रार्थनीयः, येन वयं स्वधर्मं परमार्थतो ज्ञात्वाऽऽचरेमेति । अहमितः श्वो गन्तास्मि यतोऽमदावादेऽल्पीयान्व्यापारः करणीयोऽवशिष्यते । विद्युद्वार्तां प्राप्य त्वरितं ततः प्रास्थिषि । यदि देहल्यां मन्निघ्नं किमपि कर्तव्यमस्ति तर्ह्याश्विने मासि कृष्णद्वितीयायां प्रत्यावर्तितुं प्रभवामि । अतः परं मे न किञ्चिदाख्येयम् । अहं सदो विसर्जयामि । भवन्तः सर्वे यथास्वं गृहाणि यान्तु । अत्रावस्थित्या नास्ति कश्चिदर्थ इति ।

विरतवर्चसि श्रीगान्धिनि जयतु जयतु महात्मेति घोषः समुदचरत् । श्रद्धया प्रयुक्ताः सामाजिकाः पीठं प्रति तरसाऽधावन् । कथं कथमपि च महात्मा मोटराख्यं बाष्पयानं यावदानीयत ।

---

१. द्रुततरम् । अथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम्—इत्यमरः ।
२. अन्योन्यं प्राहरन्नित्यर्थः । हरतेरप्रतिषेधः इत्यात्मनेपदं प्रतिप्रसूयते ।
३. उपक्रोशो निन्दा, गर्हा । राज्सेन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा इति रघौ ।
४. कर्मकर्तरि प्रयोगः । नायं धातुर्दिवादिषु पठितः ।

भाद्रे शुक्लैकादश्यां कोहाट इत्यत्र मुसलमीना हिन्दूनायुध्यन्त। मुहम्मदीयभूयिष्ठा सा पूः। तेन तत्र हिन्दवोऽदयं विशस्ताः। केचित् संत्रस्ता जीवितस्य हेतोर्विद्रुताः। परःशता गृहा भस्मसात्कृताः स्वापतेयं[1] चापहृतम्। अशरणाः केचिद् मुहम्मदमतं हठाद् ग्राहिताः। एतेन व्यतिकरेणोभयेषां वैमनस्यमतितरामुपचितम्। तेनात्यन्तं दूनो महात्मोपद्रवव्युपरमामोघोपायचिन्तनायां प्रवृत्तः।

त्रैसप्ताहिकमुपोषणम्[2]

अमदावाद इत्यत्रापेक्षितं कृत्यं निर्वाह्य श्रीगान्धी देहलीं प्रत्यावर्तत। सर्वे देहलीस्था अदिदृक्षन्त विमनसां हिन्दूनां मुहम्मदीयानां च साम्मनस्यापादनाय महात्मा कमुपायमास्थास्यतीति। सर्वे सोत्कण्ठमशुश्रूषन्त संमर्दप्रशममधिकृत्य किं नः सन्देक्ष्यतीति। अत आश्विने मासि कृष्णपञ्चम्यां श्रीगान्धिनो विस्रम्भभाजा कार्याधिकृतेनेयं सन्देशवाक् प्रकाशिता—

अचिरसंवृत्ता व्यतिकरा मयातिदुःसहाः। आशाभङ्गश्च मे महीयान्। इयं नो धर्मदेशनाऽत्यन्तापन्नेन[3] व्यापदं वारयितुमनीशेन जनेनोपोषणेनेश्वरप्रणिधानेन च कालो नेय इति। अतोऽहमपि तथैवाचरिष्यामि। लेखैर्वावाचिकैर्वा हिन्दूनां मुहम्मदीयानां चान्योन्यवृत्तौ न विशेषः कश्चिदभूत्। अतो मयैकविंशतिं वासरानुपवस्तव्यमित्यवश्यं मन्ये। अयं म उपवासोऽद्य प्रारप्स्यत आश्विने मासि शुक्लैकादश्यां च पर्यवसास्यते[4]। अहमहरहो लवणितमलवणं च पानीयं

---

१. स्वपतौ साधु स्वापतेयं रिक्थम्। पथ्यतिथिवसतिस्वपतेर्ढञ्। द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु—इति धननामस्वमरः।

२. त्रिसप्ताहं भूतं त्रैसप्ताहिकम्। कालाट्ठञ्। कालात् इत्यधिकारात् तमधीष्टो भृतो भूतो भावी इति भूतेऽर्थे प्रत्ययः। सप्ताहशब्दो न संख्या। अतः संख्यायाः संवत्सरसंख्यस्य च इत्यनेनोत्तरपदवृद्धिर्न।

३. आपन्न आपत्प्राप्तः स्यात्—इत्यमरः।

४. षोऽन्तकर्मणि इत्यस्मात्कर्मणि लृट्।

व्रतयिष्यामि[1]। यद्यहमेतद्व्रतं प्रायश्चित्तमित्येवाचरिष्यं नास्य प्रख्यापणमपेक्षितमभविष्यत्। परमेतदाशंसमानोऽहमावेदयामि ये हिन्दवो मुहम्मदीयाश्चान्योन्यविनाशाय प्रयतन्ते, संसृज्य च न व्याप्रियन्ते त इमामावेदनां हृदयग्राहिणीं मेऽभ्यर्थनां गणयिष्यन्तीति।

अतोऽहं सर्वेषां समाजानां नेतॄन् सप्रश्रयं प्रार्थय इमान्मानुष्यकस्य[2] धर्मस्य चापकर्षकानुपद्रवान् पर्यवसाययन्त्विति। इमे वृत्तान्ताः शंसन्ति लोक ईश्वरं विरुणद्धीति। यतेमहि पुनरपि देवतां हृदये दधीमहीति।

इतः पूर्वं श्रीगान्धी चौरीचौरा इत्यत्र जनताकृतं प्रमाथं निमित्तीकृत्य पञ्चाहान्युपावसत्। ततोऽपि प्राग् आफ्रीकाभूखण्डे गृह्ये कस्मिंश्चित्कर्मण्यसाधुत्वं समीक्ष्य स चतुर्दश दिवसानुपावसत्। परं त्रैसप्ताहिकमनशनं निशम्य सर्वे भरतदेशीया अस्वस्थमनसोऽभवन्। अतो ये नेतारो महाजनास्तदानीं देहल्यामासत ते महात्मानमुपेत्य सनिर्बन्धं प्रार्थयन्त—आसेधेनोपतापेन च कार्श्यं गतेयं भावत्की तनूः। अतो हातव्योऽयं विनिश्चय इति। महात्मा तु प्रत्यवोचत्—अहं व्यवसितं व्रतमवश्यमाचरिष्यामि। अत्रान्तरे यथा हिन्दूनां मुहम्मदीयानां च वैमनस्यं व्येतु सौहार्दं चास्तु तथा भवन्तः प्रयतन्तामिति।

उपवासं न्याय्यं प्रतिपादयितुकामो महात्मा तरुणभरतवर्षनामके स्वके साप्ताहिके वार्तापत्त्र इत्यलेखीत्—

अहं पठकान्[3] विश्वासयितुमिच्छामि नायमुपवासोऽसमीक्ष्य

---

१. मुण्डमिश्रश्लक्ष्णलवणव्रतेत्यादिना णिच्। व्रताद्भोजनतन्निवृत्त्योः इति वार्तिकेन क्रियाविशेषे भोजनेऽर्थे णिच्।

२. मनुष्यस्य भावः मानुष्यकम्। योपधाद्गुरूपोत्तमाद्वुञ्।

३. पठन्ति इति पठकाः। पचाद्यच्। ततः स्वार्थे कन्।

प्रारब्ध इति। यत्सत्यमसहकारितायाः उद्भवात्प्रभृत्यहं संशयितजीवितोऽभूवम्। नाहं तां रभसोपाक्रंसि[1]। अहमेतदानुषङ्गिकाननर्थान्पर्याप्तं पूर्वं प्राबुधम्। न ह्यध्यात्वा देवतां किञ्चिदारभे। स्खलनधर्मा मनुष्यः। स स्वस्य प्रक्रमाणां युक्तरूपतां[2] नालं[3] वेद। यत्स स्वस्य प्रार्थनस्योत्तरं गणयेत्साऽहंयताप्रतिश्रुद्भवेत्[4]। श्रमवर्जितायाः वैधात्र्या अनुशिष्टेरात्मानं पात्रीकर्तुमिह मानवेन तथा विमलमानसेन भाव्यं यथाऽनिष्टचिन्तनाऽसंभविनी स्यात्। अहं तथा विमलमना अस्मीति नाभिमन्ये। अहं चेष्टे प्रयस्यामि श्रमामि च। सिद्धिश्च मे नास्ति। परं परेषामात्मनश्चानुभूत्यैवाहं समुच्छ्रायमीप्सामि। अहमेकमद्वितीयं निर्गुणं ब्रह्म प्रत्येमि। ऐकात्म्यमिदं सर्वमिति च। देहनानात्वं ह्यकिञ्चित्करम्। एक एव नः सर्वेषामात्मा। आदित्यरश्मयो वक्रीभावेन बहुत्वं यान्ति। परं सप्रसवास्ते[6] भवन्ति। अतोऽहं महापातकिनोऽपि जनादात्मानं विवेक्तुं न क्षमे। (न च धर्मिष्ठेन मे तादात्म्यं प्रतिषेध्यम्)। अतः कामये वा न वा मदनुभवफलेन सर्वसजातीयगामिना भाव्यम्। न चाहमनुभवमन्तरेण निर्वोढुं क्षमः। जीवितं ह्यनन्तानुभवपरम्परा।

शबरवत्या देहल्यै प्रतिष्ठासुरहं श्रीमत्याः सरोजिनीनायिकात इत्यर्थकं पत्रं प्रापम्—प्रशमविषयधर्मवाक्योपन्यासैः प्रवर्तिकाभिर्वा

---

१. उपोपसृष्टात् क्रमो लुङ्। प्रारप्सि इत्यर्थः। प्रोपाभ्याम्० इत्यात्मनेपदम्। स्नुक्रमोरनात्मनेपदनिमित्ते इतीण्न।

२. युक्तरूपमतियुक्तम्। तस्य भावः। प्रशंसायां रूपम्। प्रकृत्यर्थस्य परिपूर्णतेह प्रशंसा न तु स्तुतिः। तेनेहापि भवति—चौररूपोऽयं यदक्ष्णोरप्यञ्जनं हरति—इति तत्त्वबोधिनीकारः।

३. नात्यर्थम्। अलं भूषणपर्याप्तिशक्तिवारणवाचकम्—इत्यमरः।

४. अहंयुः अहंकारवान्। अहंशुभमोर्युस्। तस्य भावोऽहंयुता।

५. प्रतिश्रुत् प्रतिध्वनिः। बद्धप्रतिश्रुन्ति गुहामुखानि इति रघौ।

६. समानः प्रसवो येषां ते। प्रसूयतेऽनेनेति प्रसवः कारणम्। एकयोनय इत्यर्थः।

वा गिरभिर्नार्थः । अव्यर्थः कश्चिद्योग[1] उपलम्भनीय इति । स्थाने[2] सा मामत्र प्रष्टव्यमपश्यत् । न खल्वहं[3] प्रजानां प्रचितोत्साहसमुत्पादकारणतामगच्छम् । स चोत्साहस्तद्गतां विनाशकारो निरपादी[4]त्यवश्यं मयोपायः कश्चिदास्थेयः । अहमिदमुत्तरं प्रादाम्—मन्दमन्दं निरन्तरमुद्यम्याभ्युपायप्राप्तिमाशास इति । कर्मणाऽसहचरितं प्रार्थनं प्रणिनददारकूटं वा निक्वणद् झल्लकं वा । नाहं तदाऽवेदं दीर्घोऽयमुपवास उपायो भविष्यतीति । इदं चेदानीं वेद नायं तथा दीर्घो यथा मनस्तापशमनायालं भवेदिति । किमहमस्खालिषमुताधीरोऽभूवमुताहोऽनिष्टमापूपुषम्[5] । अहमेतत्सर्वं वाऽकार्षमेकतरमपि[6] वा नाकार्षम् । तदेवाहं वेद यदहं पुरः प्रपश्यामि । यदि सम्प्रति वैरायमाणैर्लोकैः पारमार्थिक्यहिंसा सत्यं चास्थास्येतां न तर्हि प्रवर्तमानं मारात्मकं नियुद्धं समभविष्यत् । अभिव्यक्तं मे पर्यनुयोज्यता क्वचिदस्तीति ।

इह नृणां वरिष्ठ एतद्देशस्य चोदात्ततमो नायकः स्वानुगानां दुष्कृतीनां कृते स्वं शास्ति तदेनोनिष्कृतये च देहं क्षपयतीति चिन्तयित्वाऽऽत्मनाऽपात्रपन्त हिन्दवो मुहम्मदीयाश्च । यत्र तत्रान्तर्भेदमपाकर्तुं प्रशमं च प्रतिष्ठापयितुं संमिलनान्यभूवन् । संमिलिता जना महात्मन आरोग्यं क्षेमं च भगवन्तमीशमयाचन् । हिन्दूनां मुहम्मदीयानां शिष्याणां ख्रिस्तानुगानामाङ्ग्लानां च मुखराणां हृदयान्युदताम्यन् । अतस्ते देहलीमागत्यैक्यनिष्पादिकां मन्त्रणसभां संविधातु-

---

१. योग उपायः । योगः संनहनोपायध्यानसंगतियुक्तिषु—इत्यमरः ।
२. साम्प्रतम् । युज्यत इत्यर्थः । युक्ते द्वे साम्प्रतं स्थाने—इत्यमरः । स्थाने इति सुबन्तप्रतिरूपकमव्ययम् ।
३. अत्र खलुशब्दो जिज्ञासायाम् । निषेधवाक्यालङ्कारे जिज्ञासानुनये खलु —इत्यमरः ।
४. निःपूर्वात्पद्यतेर्लुङि रूपम् । चिण् ते पदः । चिणो लुक् । निष्पन्नऽभूदित्यर्थः ।
५. पुष धारणे इत्यस्माच्चौरादिकात्कर्तरि लुङि रूपम् ।
६. एकतरात्प्रतिषेधो वक्तव्यः इति वार्तिकेन अदडो निषेधः

मारभन्त। येन यस्मा अर्थाय महात्मना महानयं कायक्लेशः सोढुं व्यवसितः स फलवत्तामासादयेत्।

आश्विने मासि कृष्णत्रयोदश्यामपराह्णे सङ्गमरङ्गे ऐक्यनिष्पादिका मन्त्रणसभा मिलिता। हिन्दूनां मुहम्मदीयानां मतान्तरस्थानां च द्विशतं नेतारस्तत्र समवायन्। अचिन्तयंश्च तानुपायान् यैरविरोध ऐक्यं च स्याताम्। प्रथमं

ऐक्यनिष्पादिका मन्त्रणसभा

मुहम्मदीयानां मूर्धन्यो मुहम्मदालिर्महात्मनो दीर्घायुष्ट्वं[1] परमात्मानमचायत ततः प्रतिनिधींश्च सदकुरुत। ततः पण्डितः श्रीमोतिलालो नेहरुरध्यक्षासनं पर्यगृह्णीत। तदात्मजः श्रीज्वाहरलालो नेहरुस्तदानेकेभ्यो देशविभागेभ्य आगता महात्मनो दीर्घायुष्ट्वप्रार्थनाविषया हिन्दुमुस्लिमैक्याश्रयाश्च संदेशवाचोऽवाचयत्। सन्देष्टारो मन्त्रणसमाजस्य साफल्यं कामयमाना अपि कार्यान्तरोपरोधवशान्नोपस्थातुमपारयन्। ततोऽनन्तरं श्रीपण्डितमोतिलाल इति प्रास्तावीत्—

इयं सभा महात्मनः श्रीगान्धिन उपवासेन निमित्तेन शोचतितमामत्यर्थं चोद्विजते।

इयं सभा दृढं मन्यते संज्ञाने धर्मे च नियन्त्रणभावोऽभिमततमोऽपेक्षिततमश्चेति। इयं च येषां केषाञ्चिद्देवतायतनानां दूषणं धर्मान्तरानुवृत्तेः[2] परित्यक्तपूर्वं धर्मं वा प्रत्यावृत्तेर्यस्य कस्यचिच्च विप्रकारं शासनं वा बलवद् गर्हते। गर्हते च स्वधर्मं बलाद् ग्राहयितुं प्रयत्नान्। धिक्करोति च पराधिकारानवगणय्य स्वधर्मक्रियाणामनुष्ठानम्।

सभ्याश्च महात्मानमाश्वासयन्ति प्रतिजानते च वयं यावच्छक्यं लोकेनासां व्यवस्थानामनुवृत्तिं च निर्देक्ष्याम इति।

---

१. दीर्घमायुरस्येति दीर्घायुः। तस्य भावः। आदेशप्रत्यययोः इति प्रत्ययसकारस्य मूर्धन्यादेशः।

२. विभाषा गुणेऽस्त्रियाम् इत्यत्र विभाषेति योगविभागादगुणे स्त्रियां च हेतौ पञ्चमी।

इयं च सभाऽध्यक्षमधिकारोति स महात्मानमुपेत्य दृढामिमां प्रतिज्ञां निवेदयेत् । सभ्यानां प्रतिनिधीभूय चोपवासपरित्यागं प्रार्थयेत येनेयं सभा तत्रभवतः सहकारितयाऽनुशासनेनाऽधिष्ठातृतया चोपकृता त्वरितं बहुलीभवतोऽस्यानिष्टस्य साधकतमं वारणोपायं चिन्तयेदिति ।

शय्यामधिशयानो महात्मेदमुत्तरं प्रादात्—

प्रियश्रीमोतीलाल !

स्नेहार्द्रयाऽनुक्रोशाविष्टया च भवदधिष्ठितया सभयैष उपन्यासः स्वीकृतो यं भवान् ह्यो मह्यमवाचयत् । विज्ञापये भवान् सभां श्रद्धापयेदहं प्रकाममस्याः काममन्ववर्त्स्यमशक्ष्यञ्चेदिति । परमह मसकृदात्मानं पर्यैक्षिषि व्रतभङ्गस्य संभवं च नोपालप्सि । इदं हिमे धर्मो माऽनुशास्ति व्रतमारभ्य न हाप्येत[2] श्रेयसे वा कृतं प्रतिज्ञानं न भज्येतेति । भवांश्चेदं वेदाद्य चत्वारिंशतोऽप्यधिकानि वर्षाण्येवञ्जातीयकनियानुरोधेन जीवितमतिवाहयतो मम ।

गहनानुपवासहेतून्नाहमत्र पत्रे व्याकर्तुं पारयामि । एतेन ह्युपवासेनाहमात्मनः श्रद्धां प्रकटयामि । नह्यसहकारितायाश्चिन्तनमाङ्गलविद्वेषेण प्रयोजितम् । निःप्रमाथं च तद्रूपं प्रेम्णाऽऽङ्ग्लसंवननायाभिप्रेतम् । न केवलमनयाभीष्टस्तदर्थो न साधितोऽपि त्वेतज्जनितया शक्त्या परस्परद्रोहः समुद्भावितः । एतया संवित्त्या[3]ऽऽकुलीकृतोऽहमनन्यथाकरणीय एतस्मिंस्तपसि स्थितः ।

अतोऽयमुपवासो द्वयमेवान्वेति मां च परमात्मानं च । तस्मादहं प्रार्थये यदहं व्रतं न व्यलोपयं तन्मे मृष्यतामिति । इदं च याचे भवन्तो

---

१. विस्तारं गच्छत इत्यर्थः ।

२. ओहाक् त्यागे णिचि कर्मणि लिङि रूपम् । अत्र स्वार्थे णिच् । पञ्चैतान्य महायज्ञान्न हापयति शक्तितः इत्यत्र मानवे धर्मशास्त्रे यथा ।

३. संवित्तिरनुभवः । श्वस्त्वया सुखसंवित्तिः स्मरणीयाऽधुनातनी इति किरातार्जुनीये ।

मामुत्साहयिष्यन्ति क्षेम्यां च व्रतपूर्तिं व्रतपतिं परमेश्वरमभ्यर्थयिष्यन्त इति ।

अतोऽहं सप्रश्रयं[1] सभां प्रेरये सा प्रतिज्ञाभिव्यञ्जितं सर्वं मय्यनुरागं साभिनिवेशं कृतेन स्थिरेणावितथेन च तेन कर्मणा विपरिणमयिष्यति यत्स्वोद्देशभूताय हिन्दुमुसलिमसांहित्याय[2] कल्पिष्यत इति ।

आश्विने मासि शुक्लैकादश्यामध्यर्धनादमितायां वेलायामुपवासावधिरपूर्यत । पारणायाः[3] प्राग्वैद्या आकार्यन्त ।

व्रतपूर्तिः

तान्महात्मेत्यवादीत् - भवतां मयि प्रणयेना[4]सक्त्या च सुतरामनुगृहीतो ऽस्मि । ततः स्निग्धः सादरश्चातिथ्यकृन्मुहम्मदालिरन्वागात् । ततः सर्वे युगपदुत्थाय महात्मनोऽगारं प्राविशन् । संनिहिता अङ्गनाः शयनान्तिक आसत । यतिः श्रद्धानन्दो ध्याननिमीलिताक्षः खट्वापादमूल उपाविशत् । पण्डितः श्रीमोतिलालो देशबन्धुश्चित्तरञ्जनदासः स्वतन्त्रोऽबुल्-कलामोऽलिभ्रातरौ चेमे सर्वे शय्याभ्यर्णं[5] समासत । ततो मुहम्मदीयधर्मसंहितायाः पाठादूर्ध्वं खिस्तवेदोपनिषच्छ्रुतयश्च सस्वरमगीयन्त । श्रीबालकृष्णश्च शिष्यः परमार्थभागवतं निरूपयन्तीं गीतिकामगायत् ।

ततोऽनुसारीत्यभिधो भिषङ् नारङ्गरसमानयत् । तं महात्माऽपिबत् । एष ह्यस्य पारणाभूत् । यस्तत्र परमात्मोपकारस्तवोऽभूद् यश्च संनिहितानां गुरुः प्रहर्षः स उभयो नः परिच्छेदमत्यन्तमत्येति ।

---

१. विनयप्रश्रयौ समौ—इति यादवः ।

२. पर्याप्तिवचनस्य क्लृपेरलमर्थत्वान्नमःस्वस्ति० इति चतुर्थी । न तु क्लृपि सम्पद्यमाने इत्यनेन । तेन हि प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी विधीयते । यथा मूत्राय कल्पते यवागूः इत्यत्र ।

३. पारणा व्रतान्तभोजनम् ।

४. प्रणयेन प्रेम्णा । प्रणयास्त्वमी । याच्ञाविस्रम्भप्रेमाणः—इत्यमरः ।

५. उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्—इत्यमरः । अर्द गतौ । कर्मणि कर्तरि वा क्तः । अभेश्चाविदूर्ये इतीडभावः ।

दिष्टचा सक्षेमं व्रतपारणेन भवान्वर्धत इति सर्वे संप्रावदन्त[1]। निश्चेष्टो महात्मा तूष्णीं व्यश्रमत्। अचिरेण तदागारं व्यरिच्यत। श्रीगान्धी वाचंयमोऽवृतत् क्षिप्रं च निरवृणोत्[2]। ततस्तिस्रस्तिस्रो होरा व्यवधाय नारङ्गरसोऽपाय्यत। अपरेद्युः पयःपानमारभ्यत। ततः क्रमेणान्यदभ्यवहार्यमुपाकल्प्यत। दीर्घेणैतेनोपवासेन कृशतनुर्महात्मा निःसत्त्वः समजायत। अतो दिदृक्षवो जनास्तं द्रष्टुं नाभ्यन्वज्ञायन्त।

समृद्धे सति महात्मनो व्रते सर्वस्मिन्देश उत्सवा अक्रियन्त पारमेश्वर उपकारश्चास्तूयत। राजमन्त्रिणां मूर्धन्या अन्ये च नरर्षभाः स्वप्रीतेः परितोषस्य च द्योतिकाः सन्देशवाचो महात्मनेऽहारयन्। ताः समधिगत्य महात्मामुं सन्देशं प्राचारयत्—

हिन्दुमुहम्मदीयानामैक्यं सर्वप्रथमं साध्यमित्ययं मे सन्देशः।

कतिपयैरहोभिर्महात्मा सत्त्वं प्रत्यापद्यत निरुक्तस्यैक्यस्यापादने च सर्वात्मना प्रावर्तत।

एकाशीत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे पौषे मासि प्रतिपदायां बिलग्राम इत्यत्राखिलभरतवर्षीयकाङ्ग्रेस-परिषत्संमेलिष्यतीति निश्चितम्। श्रीगान्धी चाध्यक्षासनं परिग्रहीष्यतीति च निर्णीतम्।

बिलग्रामकाङ्ग्रेसोपवेशनम्

अध्यक्षतामनभिलषन्नपि महात्मा स्वदेशजानां प्रणयं[3] विहन्तुं नाशकत्। यत्तत्रभवान् पारिषद्यानाभाषत तत्समासेनेहोपन्यस्यते —

यदवस्था वयं तदवस्थानां नो विश्रम आवश्यकः। यतो यदि विरलाः केचिदसहकारितायां यथापूर्वं दृढं विश्वसन्ति तदनुषक्ता

---

१. सहाब्रुवन्नित्यर्थः। व्यक्तवाचां समुच्चारणे इत्यात्मनेपदम्।

२. वृञ् वरणे स्वादिः। निर्वृतिमाप्नोदित्यर्थः। निर्ववार मधुनीन्द्रियवर्गः इति शिशुपालवधे।

३. प्रणयो याच्ञा। प्रणयास्त्वमी। याच्ञाविस्रम्भप्रेमाणः—इत्यमरः।

भूयांसस्तु वैदेशिकवासःपरित्यागव्यतिरिक्तां तां न प्रतियन्ति। अनेकाविंशतयो विधिज्ञानां स्वां पूर्वां वृत्तिं पुनरुपजीवन्ति। केचित् तत्परित्यागमनुशोचन्ति। व्यवस्थापिकाः सभाः परिहृतवन्तो बहवस्ताः पुनराश्रयन्ते। तदाश्रयं च प्रतियतां संख्या प्रचीयते। परःशता राजकीयविद्याशालाः परित्यक्तवन्तः कुमाराः कुमार्यश्च पुनस्ताः प्रपद्यन्ते। अवकाशापर्याप्तेः सर्वे प्रविविक्षवस्तत्र प्रवेशं न लभन्त इति वार्ता। एवमवस्थितेऽधिकरणादीनां परित्यागो दुष्करोऽनुपपन्नश्च। नहि काङ्ग्रेसपरिषद्विधिज्ञादीनुपेक्षितुमर्हति। साम्प्रतमेषां बहिष्कृतिस्तथैवाशक्या यथासहकारिणाम्। उभयैरपि काङ्ग्रेसपरिषद्यन्तर्भवितव्यम्। न तैरन्योन्यार्था विहन्तव्याः। न च विपक्षवणग्गुदोषा विमर्ष्टव्याः। यद् हिन्दुमुहम्मदीयसांहित्यविषये सुवचं तद्राजकार्यनिर्वाहयितृषु कृतसंसर्गेषु जनेष्वप्यविपरीतम्। अस्माभिः परस्परस्मिन् क्षमावद्भिर्भवितव्यमागमयितव्यं[1] च कालेन मतपरिवर्तो भविष्यतीति। नात्रैवास्माभिर्विरन्तव्यम्। काङ्ग्रेसपरिषदोऽपक्रान्ता विमुखीभूता जनाः प्रणोद्याः पुनस्ते तां समवयन्त्विति। यद्यसहकारिता परित्यक्तास्ति तर्हि तेषां बहिःस्थितिर्नोपपद्यते। अस्माभिः काङ्ग्रेससदस्यैस्तेऽनुनेतव्याः। सौहार्देन च निमन्त्रणीयाः। हतप्रत्यूहश्च तेषां संगमः करणीयः।....

तन्तुवापचक्रमधिकृत्य सविस्तरमभ्यधां यतः स्वदेशजेभ्यः किमप्यन्यच्छ्रेयो मे सन्देष्टव्यं नास्ति। यदि स्वराज्यावाप्तिर्न्याय्यैर्निरुपप्लवैश्चोपायैश्चिकीर्षिता तर्ह्यहमव्यर्थं साधनान्तरं नोपलभे। यथाहं प्रागेवावोचमिदमेव सर्वदेशस्वीकार्यं प्रमाथस्थानीयं वर्तते। अहं सत्याग्रहं श्रद्दधे। परं तावत् सत्याग्रहमास्थातुं न प्रभवामो यावद् वैदेशिकवासःपरिहारं न साधयामः। इदानीं भवन्तः स्फुटमुपलप्स्यन्ते किं कारणमहं काङ्ग्रेसपरिषदोऽनर्थकं मार्गादेशको भविष्यामि तन्तु-

१. त्वरा न करणीयेत्यर्थः। अत्रार्थ आगमेः क्षमायाम् इति वार्तिकं लिङ्गम्।

वापचक्रविषयं मन्मतं चेद्भवतामग्राह्यं भवेत्। नूनं भवन्तो यथान्यायमेव मां देशोत्कर्षप्रतिबन्धकं गणयिष्यन्ति यदि भवन्तस्तन्तुवापचक्राधारभूतस्य तत्त्वस्य मे व्याक्रियां[1] भ्रान्तिमूलिकां पश्यन्ति। परं यद्येषोपपत्तिमती वा हृदयङ्गमा वा नास्ति तर्हि भवन्तः स्वधर्मात्प्रमदिष्यन्ति मदीयं नायकत्वं चेन्न निराकरिष्यन्ति। यत्पुरा किल लार्डवल्लिङ्गडनमहाशयोऽस्मानुद्दिश्योदाहरद्भरतभूमिजा नेति वक्तुं क्षमन्त इति तन्मा कश्चिदिदानीं वोचत्। यदि भवन्तो मदीयेऽस्मिन्नुपन्यासे न विश्वसन्ति नियतं तत्प्रत्यादेशः स्वराज्यावाप्तेरुपकरिष्यति।

हिन्दुमुहम्मदीयसाहित्यं प्रयोजनवत्तया कर्तनचक्रान्न हीयते। इदं हि न आत्मा। नात्र विषये बहु विवक्षे। एतद्धि स्वराज्याधिगमायापेक्ष्यतेतमामिति प्रायशः सर्वैः प्रतिपन्नम्। प्रायश इति साभिप्रायं प्रयुञ्जे। अहं हि साधु वेद्मि सन्तीह केचिद्ये मन्यन्ते यदि वयं कृत्स्नं भरतखण्डं हिन्दुत्वं मुहम्मदीयत्वं वा नेतुं न पारयामस्तर्हि ब्रिटिनायत्ततालक्षणा साम्प्रतिकी नोऽवस्थितिरेव श्रेयसीति। दिष्टचाल्पसंख्यास्ते भवन्ति।.........

अस्पृश्यताऽपरं स्वराज्यप्राप्तेः प्रतिबन्धकम्। एतन्निराकृतिस्तथैवापेक्ष्यते यथैव हिन्दुमुहम्मदीयैकतावाप्तिः। अयं हि सारतो हिन्दूनां विचारविषयः। हिन्दवश्च तावन्न स्वराज्यमर्हन्ति तदधिगन्तुं वा शक्नुवन्ति यावन्न विनिपातितेभ्यो जनेभ्यः पुनः स्वातन्त्र्यं प्रतिपादयन्ति। कारुणिको भगवान् भूतभावनो[2]ऽस्पृश्यं कमपि जनवर्गमसृजदिति तन्निन्दा। हिन्दुभिः काङ्ग्रेसपारिषद्यैरेषा नियन्त्रणा निराकरणीयेत्यवधारणीयमिति।

बिलग्रामात्प्रतिनिवृत्तः कञ्चित्कालं लब्धविश्रमो महात्मा निरुक्तपूर्वं स्वस्य संमतं कार्यत्रितयं निविष्टचेतसा प्रक्रान्तः[3]। एतदर्थमेव

---

१. व्याख्यामित्यर्थः।
२. ब्रह्म। भूतानि भावयति सृजतीति व्युत्पत्तेः। नन्द्यादिल्युः।
३. कर्तुमारब्धवानित्यर्थः। प्रशब्द आदिकर्मणो द्योतकः। आदिकर्मणि क्तः कर्तरि च इति कर्तरि क्तः।

तत्रभवान् कदाचिद्वङ्गेषु पर्यटन् कलिकातां गतः। तत्र ख्रिस्तीय-प्रचारकमण्डलेन निमन्त्रितो यदवादीत्तत्तस्य ख्रिस्तमतविषयं हिन्दु-धर्मविषयं च दर्शनं विशदीकरोतीति समस्य विन्यस्यते। तद्यथा—

न भवतां बहवो विदुरहं ख्रिस्तीयैः न ख्रिस्तीयाभासैः परं परमार्थ-ख्रिस्तीयैः—एकोननवत्यधिकाष्टादशशततमे ख्रिस्तवत्सरे संसर्गमकरवं यदाऽभिनववयस्कोऽहं लन्दननगर्यां न्यवसम्। स च संसर्गो गच्छता कालेनोत्तरोत्तरमुदकृष्यत[1]। यत्राफ्रीकाभूखण्डेऽहमशरण्यजनमध्यगतो-ऽस्मीत्यपश्यं तत्रापि परःशतान् ख्रिस्तीयान् मित्राण्यकरवम्।

यथैतेषां पुरातनसुहृदामेकतमस्मै प्रत्यश्रौषं तथावश्यकमजीगणं मया भरतवर्षभवानां ख्रिस्तीयानां मूर्धन्यः श्रीकालिचरणो वन्द्यो-पाध्यायो द्रष्टव्य इति। अहं तमुपागममवोचं च तत्त्वं जिज्ञासुरहं त्वामुपसन्नः[2]। 'परमार्थालोकाय' सर्वात्मना यतिष्य इति यदहं केभ्यश्चित्प्रियतमेभ्यः सुहृद्भ्यः प्रत्यज्ञासि तदिदानीं चिकीर्षमाणस्त्वामुपसर्पामीति। अहं तमाख्यं विश्वासिता मया सुहृदो नहि कश्चिदर्थलाभो मामालोकाद्वारयिष्यति यदि परं तमुपलभेयेति। भवतु। नाहमल्पस्यावयोर्वादानुवादस्योपवर्णनया कालं क्षपयितुं समीहे। स सर्वः शोभन उदारश्चाभूत्। अहं प्रत्यावर्तिषि परं नाह-मुद्विग्नो न च विषण्णो न वा मनोहतोऽभूवम्। श्रीकालिचरणोऽपि मां न प्रत्याययदित्येवाशोचिषम्। अयं हि मेऽन्त्यः प्रेक्षापूर्वकं कृतः ख्रिस्तीयो[3]पलब्ध्यर्थको यत्नः। अद्याहं ख्रिस्तीये बहु प्रशस्यं पश्यामि परमहं ख्रिस्तवेदाक्षरार्थानुसारिभिः ख्रिस्तानुगैस्सारूप्यमधिगन्तुं न प्रभवामि। नम्रं निवेदये हिन्दुधर्मो यथाहमेतं वेद निरवशेषं मामन्त-रात्मानं परितोषयति व्यश्नुते च। गीतासूपनिषत्सु च यां सान्त्वनां लभे नाहं तां पर्वतभवे ख्रिस्तोपदेशेऽपि विन्दे। तत्र निर्दिष्टं परं पुमर्थं नाहं बहु मन्य इति न। तदङ्गभूतैः कैरप्यनुशासनैरवासितान्तःकरणोऽ-

---

१. उत्कर्षम् (वृद्धिमिति यावत्) आपद्यतेत्यर्थः।

२. उपेत इत्यर्थः। उपसेदुर्दशग्रीवम् इत्यत्र भट्टिकाव्ये यथा।

३. ख्रिस्तेन प्रोक्तं ख्रिस्तीयम्। तेन प्रोक्तमित्यस्मिन्नर्थे वृद्धाच्छः इति

स्मीत्यपि न। परमिदं मया भवतां पुरः प्रतिपत्तव्यं यदा सन्देहा मे मानसमाक्रामन्ति, आशाभङ्गश्च बद्धलक्ष्यं मां प्रेक्षते, लोकं च निरालोकं पश्यामि तदाहं गीताः समाश्रये शोकापहं श्लोकं च लभे। लब्धमात्रे च तस्मिञ्शोकसमाकुलोऽप्यहमेकपदे स्मेराननो भवामि। दुरन्तैर्वृत्तान्तैर्व्याप्तं मे जीवितम्। परं यदि तेषामत्र किमपि दृग्गोचरमलोप्यं च फलं न लक्षये भगवद्गीतानुशासनं तत्र कारणमिति।

ख्रिस्तीयप्रचारका यूयं संभिन्नबुद्धीनां प्रतिमोपासकानामनात्मज्ञानां चैषा भूरिति धियेमं भरतखण्डमुपपद्यध्वे। ख्रिस्तमतमार्मिकाणामुपदेष्टॄणामन्यतमः श्रीहेबर इदमावलिद्वयमलिखद्यत्स्मृतमात्रं ममारूंषि नित्यमतुदत्—यत्र सर्वो विशेषो रम्यः, मनुष्यश्च केवलो नीच इति। यदि स भवान्नेदमलेखिष्यत्साम्प्रतमभविष्यदिति मन्ये। सर्वं भारतं वर्षं सञ्चरतो मम त्वन्यादृश एवानुभवः। पक्षपातासंस्पृष्टेन चेतसाऽश्रान्तं तथ्यमन्वेषमाणोऽहमिमं देशं पर्यन्तादेकस्मादारभ्याऽपर्यन्तान्तरं बह्वभ्रमम्। परं भगवत्या भागीरथ्या लौहित्येन नदेन कलिन्दतनयया च प्रोक्षिते रुचिरेऽस्मिञ्जनपदे जनो नीच इति वक्तुं न पारये। नहि स नीचः। स तथैव तथ्यं मृगयते यथा यूयमहं वा। स मृगयतेतरामिति सुवचं स्यात्।……

यूयमेतद्देशजानां परितापकारणानामुपलम्भाय तदपनोदाय चेहोपेताः। संभावये चेहस्था यूयं वेद्यवेदनोन्मुखा इति। तेन यदि भरतभुवा किञ्चिदुपदेष्टव्यमस्ति नहि यूयं कर्णौ पिधास्यथ दृशौ वा संवरिष्यथ हृदयं वा कठिनीकरिष्यथ, अपि तूभौ विवरिष्यथ हृदयं च विशिष्य समुत्तानयिष्यथ येन यदिहोपादेयं स्यात्सर्वं तदुपादीयेत। प्रत्याययामि वो भारते वर्षे ऽनल्पमुपादेयमस्तीति।……

द्व्यशीत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे ज्येष्ठे मासि भुवि कीर्तिशेषं गतवति श्रीचित्तरञ्जनदासे श्रीगान्धी तत्स्मारकमुद्दिश्य

च्छः। वा नामधेयस्य इति वैकल्पिकयत्र वृद्धसंज्ञा।

जनताया धनं समाहर्तुं प्रारभत। तदर्थं च बहून्प्रदेशान् व्यचरत्। तत्र कृती सन् स्वस्याभिमतस्य कार्यत्रितयस्य सिद्ध्यै ग्रामान् नगराणि च पुनः पर्यटत्। कर्तनचक्रं मे कामधेनुरिति च यत्र तत्राख्यत्। जाताध्वखेदो विश्रमसव्यपेक्षो महात्मा पौषे मासि कर्णपुरभवेऽखिल-भरतवर्षीयकाङ्ग्रेसपरिषदः संमिलने संनिहितैर्हितैः प्रेक्षावद्भि[1]र्जनैः प्रार्थितो बोधितश्च वत्सरमेकं पर्यटनमुपारमत्। अग्रिमां सर्वां समाम-मदावाद इत्यतो बहिर्नागमत्। आश्रमभूतये चाविरतं प्रायसत्[2]।

आषाढे कृष्णाष्टम्यां गुर्जरमहाविद्यालयच्छात्रान्सम्बोध्य यच्छ्री-गान्धी स्माह तन्महात्मनो विचारसरणीं तदानीन्तनीं देशावस्थितिं च सम्यग् व्यनक्तीतीह समासतो विन्यस्यते —

अहो कियता भिन्ने सप्तसप्तत्युत्तरनवदशशतमितवत्सरभवा द्व्यशीत्युत्तरनवदशशतमितवत्सरभवा चास्मद्देशावस्थिती। अहं शोककरीं वार्तामाचिख्यास इति न तर्कणीयम्। न वयं प्रतीपं गच्छामः। न नो देशः प्रतीपं गतः। नेदमारेकणीयं[3] वयं पञ्चभिर्वर्षैः स्वराज्यस्य नेदीयांसः संवृत्ता इति। यदि कश्चिद् ब्रवीति सप्तसप्तत्युत्तरनवदशशततमे वत्सरे स्वराज्यं हस्तगतप्रायमासीत्, अद्य तु दूरे वर्तते—न ज्ञायते कियति दूर इति— तन्नैव प्रत्येतव्यम्। दैवतं प्रार्थ्य सदाशयेन कृतो यत्नो न कदाचिद् बन्ध्यो भवति। एतादृशो यत्न एव पुरुषस्य सिद्धार्थता। फलं पुनर्विधातर्य्यायतते।

बहुसंख्यत्वं त्रस्नूनामेव[4] परितोषाय भवति। उदारसत्त्वानान्त्व-

---

१. प्रेक्षा बुद्धिः तद्वन्तः प्रेक्षावन्तो बुद्धिमन्तः, तैः। प्रेक्षोपलब्धिश्चित्सं-वित्प्रतिपज्ज्ञप्तिचेतनाः—इति बुद्धिनामस्वमरः।

२. यसु प्रयत्ने इति दैवादिकाल्लुङि रूपम्। पुषादित्वाच्च्लेरङ्। आ गणा-न्तात् पुषादय इति सिद्धान्तः।

३. आरेकणीयमाशङ्कनीयम्। रेकृ शङ्कायाम् इति भौवादिक आत्मनेपदी धातुः।

४. त्रसनशीलानामित्यर्थः। त्रसिगृधिधृषिक्षिपेः क्नुः।

सहाये सम्पराग्रे ऽभिमानः । तत्सत्त्वौदार्यानुशीलनेनेह[1] यूयमवतिष्ठध्वे यूयमेको वा बहवो वा स्यात सत्त्वौदार्यमेव वास्तवं वीर्यम् । वीर्यान्तरं चासत् । सत्त्वौदार्यं चोत्सर्गादध्यवसायाच्छ्रद्धाया आर्जवाच्चर्ते दुरापमिति ।

त्र्यशीत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे पौषे मासि कृष्णप्रथमायां महात्मा काङ्ग्रेसोपवेशने संनिधातु यथाप्रतिज्ञमाश्रमात् कामरूपेषु गुहाटीत्याख्यं नगरं[2] प्रातिष्ठत । विविक्तवासश्च परिणतिमभजत ।

इतः पूर्वं काङ्ग्रेसपरिषदि पक्षद्वयं चिरमाविरासीत् । एको राजकार्यविरुरुत्सया स्वराज्यार्थोपचिकीर्षया च व्यवस्थापिकाः सभाः प्रविविक्षूणां पक्षः, अपरश्चासहकारितायां निश्चितमतीनां तास्तित्यक्षूणाम् । अयं मतभेदः कालेन वैमनस्येन पर्यणमत । वैमनस्येन च क्रमेणातिभूमिं गतम् । अनेन भैरवेण वैरानुबन्धेन काङ्ग्रेसपरिषदन्तर्भिन्ना बहुशाखत्वं गता विशरारुतां[3] चापन्ना सर्वस्माद्गौरवाद्भ्रास्यतेऽनिष्टं च महत्प्रसङ्क्ष्यत इत्यालोच्य महात्मा विरोधिनो द्वयान्संधातुं सर्वात्मना प्रायतत । सिद्धिं चालभत । इदं हि तत्रभवानुपन्यास्थत्—

व्यवस्थापिकानां सभानां परित्याग इति योऽयं काङ्ग्रेसावसायः सोऽवस्थास्यते परं ये ऽन्तःकरणप्रवृत्तिप्रामाण्यात् स्वेन धर्मेणानुशिष्टा वा तत्प्रवेशं सार्थकं पश्यन्ति ते वरणकर्मणि प्रवर्तितुमभ्यनुज्ञायन्त इति ।

अयमुपन्यासः सर्वैरङ्गीकृतः । विरोधश्च शान्तः । अनर्थश्च वारितः ।

---

१. हेतौ तृतीया । हेतौ इत्यस्मिन्सूत्रे फलमपीह हेतुरित्युक्त्वा अध्ययनेन वसति इत्युदाजहार दीक्षितः ।

२. अत्र प्रस्थानक्रियाया अकर्मकत्वेऽपि तदङ्गभूतोद्देशक्रियापेक्षया सकर्मकत्वम् ।

३. विशीर्यत इत्येवंशीलो विशरारुः । तस्य भावः विशरारुता । शिरः कम्पविशीर्यमाणबन्धविशरारोर्जटाकलापस्य इति श्रीहर्षचरिते ।

एतदनुषङ्गेणायमपर उपन्यासः श्रीगान्धिना समुपस्थापितः—वरणादौ तस्यैव काङ्ग्रेसपारिषद्यस्य संमतिदानेऽधिकारो वर्तिष्यते यो यथाभ्यासं स्वदेशीयं खद्दराख्यं वासो वस्त इति। इदं च सामाजिकाः संबोध्योक्ताः—इदं नियमशोधनमात्मनः परिशोधने साधनं मतम्। यदि भवन्तो मन्यन्ते परिशुद्धस्यास्य नियमस्यातिवृत्तिरेवानुवृत्तिरिति, यदि चेहैनं स्वीकृत्य काङ्ग्रेसमण्डपाच्च निर्गत्यातिक्रमितुमिच्छन्ति तर्हि विज्ञापये निराक्रियतामेष इति। वर्तमानो नियमोऽत्यन्तं मानहरः। अयमपनेयो वा मूलतः परिशोध्यो वा। खद्दराख्येन वाससा स्वावष्टम्भेन भवितव्यम्। यदीममुपन्यासं स्वीचिकीर्षन्ति भवन्तस्तर्हि प्रार्थये मया कीर्तितपूर्वं सर्वमनुषङ्ग[1] बुद्ध्वैव स्वीकुर्वन्त्विति।······नाहमनुग्रहमपेक्षे यतो नाहमनुगृह्णामि। यतोऽहं स्वातन्त्र्यप्रियः, अतो नाहं कस्यचित्स्वातन्त्र्यं परिच्छेत्तुं किमपि कर्तुकामः। अहं ह्यात्मनः प्रसत्तये[3] यते स हि मे परो देव इति।

गुहाटीतः प्रतिनिवृत्तो महात्मा विहारदेशे खद्दराख्यं वासः समुद्दिश्य धनराशीन्समाहर्तुं तद् विक्रेतुं च पर्यटनमारभत। निर्णेजकास्तन्तुवापाश्चोच्चैःपदस्था अनुच्चैःपदस्थाश्च, आढ्या अनाढ्याश्च स्वशक्तिमनतिक्रम्य धनं व्यश्राणयन्[4]। एवं पर्यटन् गलितार्धे माघे मासि स विहारविद्यापीठविद्यार्थिनः सम्बोध्यार्थगुर्वीमिमां गिरमगादीत्—

यदाहं राजकीयविद्याशालाः परित्यक्तवतां छात्राणामुपाध्यायानां च संख्यामनुध्यायमि नाहमीषदप्यनुतप्ये। न चाहमनुशये[5] तेषां बहवः

---

१. पूर्वपरयोः कर्मणोः सम्बन्धोऽनुषङ्गः।

२. परिच्छिन्नं मर्यादितं कर्तुमित्यर्थः।

३. प्रसादायेत्यर्थः। प्रसाद इह परितोषः। प्रसत्तये गोत्रभिदस्तपांसि इति किरातार्जुनीथे।

४. व्यतरन्नित्यर्थः। श्रण दाने चुरादिः। प्रायेणायं विपूर्वः। निःशेषविश्राणितकोषजातम् इति रघौ।

५. अनुपूर्वात् शीङ् स्वप्ने इत्यस्माल्लट्। अनुशयो मे नास्तीत्यर्थः। अथा-

परावृत्ताः, बहवश्चासन्तुष्टा अनिर्वृताश्चेति। तेषु सदयोऽस्मीति शोचामि। परमनुशोकोऽनुशयो वा मे नास्ति। इमे क्लेशा विषादाश्च प्रत्यहं न उपनमन्ति[1] प्रत्यहं च तैरुपनन्तव्यम्। यदि सत्यानुवृत्तिः प्रवालशय्याशयनमिव स्यात्, यदि सत्ये स्थितिरसहित्वा क्लेशं साध्येताव्यवहितश्च सुखनिर्वेशः[2] स्यात्तदास्य जगतो रामणीयकं न स्यात्। अस्माभिः सत्ये संलग्नैर्भाव्यं द्यौरपि पतेच्चेत्। नायं गरीयानर्थः सत्यं चेदनुवर्तमाना वयं सहैव भरतवर्षेण सर्वां जगतीं हारयेमेति। वयं तत्त्वतः सत्योपासका भविष्यामो यदि वयं विततेऽस्मिन् परमात्मनः प्रशासने[3] भरतवर्षसहितान्सर्वान्नोऽभीष्टानर्थानाप्स्याम इति श्रद्दधाना आ मृत्योः सत्यमनुवर्तेमहीति।

विहारपर्यटनं परिसमाप्य श्रीगान्धी महाराष्ट्रीवाग्व्यवहारेषु मध्यदेशेषु विदर्भेषु च पर्यटनमारब्ध। अकोला इत्यत्र गतो महात्माऽस्पृश्यतामधिकृत्येत्यवादीत् —

मदीया अस्पृश्यताविषया विचारा नाङ्गलशिक्षानिबन्धनाः। एतानहं प्रागाङ्गलदेशगमनात् प्राक् च शास्त्राध्ययनात् तदननुगुणायां चावस्थायां व्यवास्थापयम्। अहं हि शास्त्राक्षरार्थानुसारिणि वैष्णवान्ववाये[4] जातः। यदाऽहं प्राप्तव्यवहारः समजनिषि तदा प्रभृत्येव विनिश्चिता इमे मे विचाराः सन्ति। एते चोत्तरकालभवेन मतान्तरापेक्षया हिन्दुशास्त्राध्ययनेनानुभवेन च केवलमुपोद्बलिता इति।

विदर्भेभ्यो विनिवृत्तः श्रीगान्धी महाराष्ट्रदेशे विचरितुमुपाक्रमत। धूलिया इत्यत्र वणिज इतरैरसंभूयाभिनन्दनपत्रप्रदेशननिर्बन्धपरा

नुशयो दीर्घद्वेषानुतापयोः—इत्यमरः।

१. प्राप्नुवन्तीत्यर्थः। कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा इति मेघदूते।

२. निर्वेशो भोगः। निर्वेशो भृतिभोगयोः—इत्यमरः। क्रीडारसं निर्विशतीव बाल्ये इति कुमारे।

३. राज्य इत्यर्थः। एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः इति बृहदारण्यकोपनिषदि।

४. भागवतानां वंशे इत्यर्थः। वंशोऽन्ववायः सन्तानः—इत्यमरः।

अभ्वन्। स्वसकाशादेव च केवलाद्धनवितरणं निरचिन्वन्। श्रीगान्धी नो ज्ञातिरिति चार्थं पत्रे न्यबध्नन्। वाचितेऽभिनन्दनपत्रे महात्मना यदवाचि तद् द्योतयति न तत्रभवतो लोकप्रियता मनीषिता, न जनः रञ्जनमभिप्रेतं, न च विद्विषो दरः[1]। न ह्यस्य कश्चिन्निजः कश्चिद्वा परः। एवं हि स भवानवादीत्—

यदहं जलपैगुरी इत्यत्र द्व्यशीत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे ऽत्रादिषं तदिहानुवदामि—ब्रह्माणो वा राजन्या वा शूद्रा वा भरतवर्षं नाहारयन्। विश एवाहारयन्। विश एव च तत्प्रतिलाभे प्रभव इति। भरतवर्षेतिहासे ते वणिजः प्राचुर्येण निर्दशिताः सन्ति य आङ्गलमापणिकं[2] तथोपाकुर्वन्नभजंश्च यथा भरतवर्षमपकृतमभूत्। ये विपणिनो व्यापारार्थमिहागमंस्ते व्यापाररक्षायै क्षत्रियवदाचरन् व्यापारश्रितराज्यकार्यनिर्वाहाय च ब्राह्मणवदाचरन्। नायं नो वर्णधमो वणिजा क्षत्रियवन्नाचरणीयं मातुः स्वसुर्वा चारित्रं परिरक्षितुं न योद्धव्यमिति। न चायं नियमः स ब्राह्मणवद्विद्यां नोपाददीत। शूद्रवद्वा न शुश्रूषेतेति। आङ्गलो हि सर्वैश्चातुर्वर्णिकैर्गुणैर्मण्डितः। तस्याद्भुतकर्मणा विस्मापिता वयं स्वधर्मं व्यस्मराम। वयं कापुरुषत्वमगच्छाम। व्यस्मराम च विशः स्वभावजं कर्म कृषिः पाशुपाल्यं वाणिज्यं चेति। तेन च स्वदेशशत्रवोऽभूम। भवन्तः परमार्थवणिक्त्वप्रतिलाभेन देशे सर्वस्य व्यापारस्य स्वायत्तीकरणेन चेमां दुःस्थितिं समाधातुमर्हन्ति। अस्माकमसितानि शिरस्त्राणानि यन्त्रनिर्मितानि च स्नानीय[3]वस्त्राणि, कुलाङ्गनानामंशुकशाटिकाश्च नो ह्रीपदं

---

१. दरो भयम्। दरोऽस्त्री साध्वसे गर्ते कन्दरे तु दरी स्मृता। दराव्ययं मनागर्थे—इति मेदिनीकरः।

२. पण्याजीवी ह्यापणिकः क्रयविक्रयिकश्च सः—इत्यमरः। आपणो व्यवहारो ऽस्यास्तीति आपणिकः। अतः इनिठनौ।

३. स्नात्यनेनेति स्नानीयम्। कृत्यल्युटो बहुलम् इति बहुलत्वोक्त्याऽत्र करणेऽनीयर्।

दासत्वलिङ्गं चेति।

नित्यं पर्यटतोऽनारतं च श्राम्यतः श्रीगान्धिनः कायो वैकल्यमापत्। अतः स मासद्वयं व्यश्रमत्। ततो मसूरदेशे पर्यटितुमारब्ध। चतुरशीत्युत्तरनवशतोत्तरसहस्रतमे संवत्सरे भाद्रे मासि शुक्लसप्तम्यां स मद्रापुरीमध्यगमत्। चतुरहोवासेन च सप्तदश समाजान् संबोध्य सविस्तरं धर्ममन्वशात्। मद्रासदेशे नगरान्तराणि भ्राम्यन् कार्यत्रितयं च व्याचक्षाणो महात्मा कदाचित् केरलदेशं गतः।

कार्तिके मासि श्रीगान्धी सिंहलद्वीपमगच्छत्। तत्र कोलाम्बुरित्यादिनगरेषु महतो जनसमवायान्सम्बोध्य धर्मसंहितानि वचांस्यवोचत्। तत्रत्या नरा नार्यश्च महात्मानं देवतामिवाभ्यपूजयन्। एकतमस्मिन्स्थाने कश्चिदप्राक्षीत्—किं कस्तूरबाई इति श्रीगान्धिनः सवित्र्या[1] नाम। सविनोदं सहर्षं च महात्मा प्रत्यवादीत्—आं सा मे सवित्रीति। अपरेद्युः कल्ये महात्मानं शुश्रूषवः संनिपतिता जनास्तामसंनिहितामुपलभ्याप्राक्षुः—कुतो माता नायासीदिति। श्रीगान्धीत्थं प्रत्यभाषिष्ट—अतीतायां निशि कश्चित्सुजनः सा मे मातेति तामन्यथागृह्णात्। मम च तस्याश्च न केवलं मर्षणीयोऽयं प्रमादोऽपि त्वभिनन्दनीयः। अद्य बहवो वत्सरा अन्योन्यानुमत्याऽऽवयोर्दाम्पत्यस्य व्यपेतस्य। अद्य चत्वारिंशद्वत्सरा अनाथतां गतस्य मम। त्रिंशत्प्रायांश्चाब्दान्सा मे मातृस्थानीयाभूत्। सा मे माता रुग्णपालिका सूपकारी पात्रसम्मार्जनकरी अन्यद्वा सर्वम्। यदि सा प्रत्युषसि संभावनां संविभजितुं मया सहैवागमिष्यन्न मे भोजनमुपाकल्पयिष्यत न वा मे वासांस्यवैक्षिष्यन्त न च शरीरसुखोपकरणान्यादरिष्यन्तेति।

सहस्ये मास्यखिलभरतवर्षीयकाङ्ग्रेसपरिषन्मद्रापुर्यां मिलिता। तत्र पूर्णस्वातन्त्र्यप्राप्तिः काङ्ग्रेसोद्देशः स्थिरीक्रियतामिति प्रस्तुतं स्वीकृतं चाभूत्।

---

१. जनन्या इत्यर्थः। स्वरतिसूतिसूयतिधूञूदितो वा इतीडागमः। तथा च प्रयोगः—तथा दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकाशे इति कुमारे।

आगामिनि वत्सरे नेहरुवंशललामभूतेन श्रीमोतिलालेनाधिष्ठितैका समितिर्नेहरुविवरणाख्यं स्वराज्यपद्धतिग्रन्थं व्यररचत्। तत्र हि ब्रिटिशसाम्राज्येऽन्तः स्वराज्याधिगमो भरतवर्षोद्देशः प्रदिष्टः। इममुद्देशं कलिकातायां मिलितः सर्वपक्ष्यसमाजोऽन्वमोदत। परं सर्वमहता[1] काङ्ग्रेसाख्येन राष्ट्रियसमाजेन तस्योद्देशस्य स्वीकृतिरावश्यकीति बहवः प्रत्यपद्यन्त।

अयं ह्युद्देशः स्वीकृतपूर्वमुद्देशं व्यरुणत्। अतो यदा पञ्चाशीत्युत्तरनवशतोत्तरसहस्रतमे वत्सरे पौषे मास्यखिलभरतवर्षीयकाङ्ग्रेसपरिषत्कलिकातायां मिलिता तदा मतविरोधेनान्तर्भेदः संजनिष्यत इत्याशङ्क्यत। स्थेमरुचयः काङ्ग्रेसोद्देशपक्षपातिनः स्वोद्देशहानं नारोचयन् परं नेहरुविवरणस्य विरचयितारस्तदनुग्राहकाः काङ्ग्रेसपरिषद्यन्तर्भूता अनन्तर्भूताश्च नयकोविदा ऐच्छन् साम्राज्येऽन्तः स्वराज्यमिति भरतवर्षस्यैकोभियोग ऐकमत्येन निश्चीयतामिति। यदा काङ्ग्रेसपरिषदि नेहरुविवरणविचारः प्रास्तूयत तदा वक्तॄणां वादानुवादः सोत्साहं चिरमभूत्। एकतो विवरणकृच्छ्रीमोतिलालः साम्राज्येऽन्तः स्वराज्यप्राप्तिरुद्देशोऽङ्गीकार्य इति पक्षमपुषत्। अपरतस्तदात्मजः श्रीज्वाहरलालो महाभागः पित्रा प्रतिपादितेऽर्थे[2] बलवत्प्रत्यवास्थित[3], निर्धारितपूर्वाच्चोद्देशाद्रेखामात्रमपि विचलितुं नान्वमंस्त। पण्डितः श्रीमदनमोहनो मालवीयः श्रीनिवासोऽय्यङ्गरश्च बहु व्यवदिषाताम्[4]। ऊर्जिताश्रयैः श्रीसेनगुप्तस्य श्रीसुभाषचन्द्रस्य च भाषितैरुत्तेजिता युवानः पूर्णस्वातन्त्र्यमिति शब्दमसकृदुच्चैरुदैरयन्। एवमुपस्थितायां संकटवेलायां नेहरुविवरणं दूषयिष्यत इति जातायामाशङ्कायां महात्मनः प्राप्तावसरेण प्रस्तावेन तत्तेजोमहिम्ना च सर्वे वैमत्यं

---

१. सर्वेषां महत्तरः तेन। गुणात्तरेण तरलोपश्च इति वार्तिकेन समासः तरलोपश्च।
२. बोधिते इत्यर्थः। प्रतिपत्तिर्बोधः।
३. विरोधेनातिष्ठदित्यर्थः। व्यरुणद् इति यावत्।
४. भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः इति विमतावर्थे तङ्।

विहायैकमतयोऽभवन् । इदं हि तत्रभवान् प्रास्तावीत् ·

यदि ब्रिटिनराजमन्त्रिण एकोनत्रिंशदुत्तरनवशतोत्तरसहस्रतमे खिस्ताब्दे दिशाम्बरे मास्येकत्रिंशं दिवसं यावन्नो भरतवर्षीयेभ्यः साम्राज्येऽन्तः स्वराज्यं न वितरिष्यन्ति तर्हि काङ्ग्रेसपरिषत्पूर्ण-स्वराज्यप्राप्तिलक्षणमुद्देशमुद्घोषयिष्यतीति ।

एतं प्रस्तावं विवृण्वानो महात्मा सविस्तरमवादीत्, लोकोत्तरया च वाचोयुक्त्या स्वपक्षयाथार्थ्यमुद्दिश्य सर्वान् सभ्यान् प्रत्याययत् । यदि ब्रिटिनराजमन्त्रिणोऽस्माकमिममभियोगं नाभ्युपैष्यन्ति तदाहं त्रिंशदुत्तरनवशतोत्तरसहस्रतमेऽब्दे जनवरीमासि प्रथमेऽहर्मुखे स्वतन्त्रो जागरिष्यामीति च वाचमुपसंहरन्प्रत्यजानीत ।

इत्थं विवृतः प्रस्तावो बहुसंमत्या स्वीकृतः ।प्रभूतेन च महात्मनः प्रभावेण जितम् ।

लन्दनपुर्यां मन्त्रण-समाजः

षडशीत्युत्तरनवशतोत्तरसहस्रतमे विक्रमवत्सर आश्विने मास्याङ्गलदेशात्प्रत्यावृत्तो लार्डाविन्महोदय उदघोषयत् त्रिसप्तत्युत्तरनवशतोत्तरसहस्र-तमे वत्सरे राजाधिराजेन क्रमिकेण शक्ति-संक्रमेण कालेन भरतवर्षीयाः स्वराज्यभाजो भविष्यन्तीति यत्प्रतिज्ञातं प्रख्यापितं च तदनुरोधतः प्राप्तावसरं शक्तिसङ्क्रमं विचारयितुं भरतवर्षप्रतिनिधीनां ब्रिटिशराजमन्त्रिणां च मन्त्रणसमाजो [1]नचिराल्लन्दनपुर्यां संमेलिष्यतीति ।

श्रीगान्धी नीतिनिष्णाता इतरे काङ्ग्रेसपारिषद्याश्चेमां घोषणा-मन्वमोदन्त परं व्यंसिता मा भूमेति ते प्रत्ययवचनमपेक्षन्त स्वराज्य-मूलकशासनपद्धतेर्निर्माणमेव मन्त्रणसमाजस्यार्थो भविष्यतीति । अतः

---

१. सुप्सुपा समासः । नात्र नञ् । नेत्यव्ययस्य सुबन्तप्रतिरूपकेण चिराद् इत्यव्ययेन सह समासः ।

पौषे मासि कृष्णाष्टम्यां श्रीगान्धिपुरोगमा जननायका राजप्रतिनिधिना सममन्त्रयन्त निरुक्तं प्रत्ययवचनं चापैक्षन्त । अविन्महाभागस्तस्मिन्प्रत्ययवचने तं तं प्रत्यूहं व्याकरोत् परमिदं स्पष्टमभ्यदधाद् मन्त्रणसमाजे यत्र विषये भूयःसाम्मत्यं भविष्यति स मन्त्रिसभयोपष्टब्धः प्रतिनिधिसभायां तत्स्वीकृतिलाभायोपस्थापयिष्यत इति ।

नेतॄणां राजप्रतिनिधिना सहेदं मन्त्रणं होरात्रयमभूत् ॥

इत्युपाध्यायश्रीचारुदेवशास्त्रिणः कृतौ श्रीगान्धिचरिते
पञ्चमः परिच्छेदः ॥

अथ षष्ठः परिच्छेदः

पूर्णस्वराज्यप्रस्ताव-स्वीकृतिः

अखिलभरतवर्षीया काङ्ग्रेसपरिषद् एकोनत्रिंशदुत्तरनवशतोत्तरसहस्रमिते खिस्ताब्देऽन्त्ये मास्यन्त्येषु दिवसेषु पञ्चापराजधान्यां लवपुरे मिलिता । यतः श्रीगान्धिनो राजप्रतिनिधिनाऽर्विन्महोदयेन सह संवृत्ताभिः संकथाभिरिदमस्फुटद् भविष्यति साम्राज्यप्रतिनिधीनां भरतविषयवासिनां नीतिवित्प्रमुखाणां च मन्त्रणसमाजे भारतं वर्षं साम्राज्येऽन्तः स्वराज्यभाक्त्वं नाप्स्यतीति, अतः कलिकाताकाङ्ग्रेसोपन्यासानुरूप्याय स्वसंविदविसंवादाय च महात्मा पूर्णस्वराज्यावाप्तिः काङ्ग्रेसोद्देशः स्थिरीक्रियतामिति प्रास्तावीत्, तत्समर्थनायां च भूयांस्युपपत्तिमन्ति वाक्यान्यगादीत् । एकत्रिंशेऽह्न्यानिशीथं परःसहस्राः समवेता जना अजागरुः । अनेके वक्तारः प्रस्तावस्यानुग्राहिकास्तद्विरोधिनीर्वा युक्तीरवादिषुः । ततः पक्षद्वयस्यानुकूलानां संमतीनां संख्यानमारभ्यत । यावदेव द्वादशनादमिता क्षणदात्ययाद् आगाच्च नवो वत्सरस्तावदेव निरवर्तत संख्यानं पूर्णस्वराज्यप्रस्तावश्चोररीकृत इति प्राख्याप्यत । ततोऽनन्तरमानन्दपरवशाः स्वेच्छासेवका ध्वजदण्डं परितः समवायन् स्वातन्त्र्यपताकाश्चोदश्राययन्[1] । तेन च सर्वस्य कर्मकलापस्य सरसतामापादयन् ।

यथायं प्रस्ताव आ पांसुलादहालिकात् सर्वस्य जनस्य विदितः यद्यथा च सर्वे साम्प्रतिकीं देशावस्थितिं सम्यक् परिचिनुयुस्तथा विधेयमिति परिभावयन्ती[2] कार्यनिष्पादिका सभा माघे कृष्णद्वादशी पूर्णस्वराज्यदिवस इति सर्वत्र भारते वर्षे उत्सवेनाभिनन्दनीयेति

---

1. उच्छ्रितामकुर्वन्नित्यर्थः । वैरोन्नत्योः समुच्छ्रयः—इति रभसः ।
2. भूत्रोऽवकल्कने इत्यस्माच्चौरादिकाच्छतृप्रत्ययः । तत्रावकल्कनं चिन्तनम् ।

निरचिनोत्, व्यादिशच्च प्रदेशकाङ्ग्रेसपरिषदोऽत्राह्नि समानीतो जनसमाजो वक्ष्यमाण उपन्यासः प्रदेशभाषयाऽनूद्य श्राव्यतां, स च हस्तोद्यमनेन स्वसांमत्यं व्यञ्ज्यादिति प्रार्थ्यतामिति।

अयमस्त्युपन्यासग्रन्थः—

वयं विश्वसिमो यथा देशान्तरवासिनां तथा भरतविषया[1]धिवासिनामयमनन्यहार्योऽधिकारो यत्स्वातन्त्र्यावाप्तिः स्वपरिश्रमफलप्रतिभोगोऽन्नोदकाधिगमश्च, यथा ते ससाधनाः सन्तः स्ववृद्धयेऽलं स्युरिति। इदं च विश्वसिमो यदि काचिच्छासनपद्धतिर्लोकानेभिरधिकारैर्विना करोति तर्हि लोका एतां विपरिणमयितुमपनेतुं वार्हन्तीति। भरतवर्षीया न केवलं स्वाधीनतया विनाकृता अपि तु तेषां धनं विद्याऽध्यात्मशक्तिश्च परार्थमेव विनियुक्तानि। अतो विश्वसिमो भरतवर्षेणावश्यं पूर्णस्वराज्यमधिगन्तव्यमिति।

उत्सादितो भरतवर्षस्यार्थः। यो ह्यस्मल्लोकेभ्यः कर आदीयते स आस्माकस्यऽऽगम[2]स्यात्यन्तमननुरूपः। सामान्यतो न प्रत्येकं सप्त पणा अह्निक आयः। यान् गुरून् भागधेयान्[3] दद्मस्तेषां विंशत्युत्तरं शतं कृषीवलेभ्यः क्षेत्रकर इति गृह्यन्ते। त्र्युत्तरं च लवणकरः। स हि दरिद्रान् बलवद्बाधते।

कर्तनादयो ग्रामव्यवसायाः समुच्छिन्नाः। तेन कृषका वत्सरे चतुरवरान् मासान् व्यापारं न लभन्ते लभन्ते च धियो जाड्यं हस्तक्रियाराहित्यात्। देशान्तर इव नात्र विनाशितानां शिल्पानां स्थाने

---

१ विषयो देशः।

विषयो गोचरे देशे तथा जनपदेऽपि च।

प्रबन्धाद्यस्य यो ज्ञातस्तत्र रूपादिके पुमान्॥ इति मेदिनी।

२. आगम आयः। आगमप्राधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति इति स्वप्ननाटके।

३. करानित्यर्थः। भागधेयः करो बलिः—इत्यमरः। करवाची भागधेयशब्दः पुमान् दैववाची नपुंसकम् इति विवेकः।

किमप्युपकल्पितम् ।

शुल्कं प्रचलितमुद्रा च तथा चाल्येते यथा कृषकैरतिरिक्तो भरो वोढव्यो भवति । विदेशीयपण्यानां बंहिष्ठोंऽश[1] आङ्गलदेशात् समागच्छति । शुल्कं चाङ्गलं शिल्पनिर्मितं वस्तुजातमनुगृह्णाति । ततो भागधेय इति समासादितोऽर्थो न जनताभारलघूकरणे विनियुज्यतेऽपि त्वत्यर्थमतिव्ययसाध्यशासनप्रवर्तने । स्वेच्छया प्रवर्तितेन विनिमयप्रमाणेन च कोटिशो रूप्यका इतो देशापदपवाहिताः ।

भरतभूमिजानां राजनीतिनिष्ठा प्रतिष्ठा यथाङ्गलेषु शासत्सु ह्रसिता न तथा पूर्वं कदाचन । यैः कैरपि संशोधनैर्लोकेभ्यः परमार्थतो राज्यनिर्वाहाधिकारा नादिषत । अस्मासु मध्ये महामहिमभिरपि जनैरनुयोगाधीनेष्वधिकृतेष्ववश्यं वैतसी[1] वृत्तिराश्रयणीया भवति[2] । अनियन्त्रणाभिप्रायकथनाधिकारेणाऽनियन्त्रणसमागमाधिकारेण च वयं वियुक्ताः । अनेके चैतद्देशजा निर्वासिताः प्रवसन्ति स्वगृहं प्रत्यावर्तितुं च न प्रभवन्ति । सर्वः शासनोपयोगी बुद्धिविभवो विनष्टः । अवशा च जनता क्षुद्रैर्ग्रामाधिकारैः कायस्थकर्मभिश्च तुष्यति ।

अनुशासनसरण्या वयं निरालम्बाः कृताः । अस्माकं विनयेन[3] च वयमिदानीन्तन्या नोऽवस्थित्या[4] परितोषिताः । इयं व्युत्पत्तिविषयिका नः क्षतिः ।

बलान्निःशस्त्रीकरणमस्मान् क्लैब्यमजीगमत् । राज्याभावद्योतिकाया अनीकिन्याः सान्निध्येनेयं नो मतिर्जनिता वयमात्मानमवे-

---

१ बहुलशब्दस्य इष्ठनि रूपम् ।

२. आत्माऽवनमयितव्यो भवतीत्यर्थः । यथा वेतसः स्रोतोजवादवनमनेनात्मानं परित्रायते तद्वत् इत्यर्थः ।

३. आचारः शिक्षा । कर्तरि तृतीया ।

४. करणे तृतीया । एवमादिषु करणत्वं हि विवक्षन्ति शिष्टा न तु कारकान्तरम् । तथा च प्रयोगः—रत्नैर्महार्हैस्तुतुषुर्न देवाः इति ।

क्षितुं वैदेशिकादवस्कन्दा[1]द्वा गोपायितुं स्तेनेभ्यो लुण्टाकेभ्यो[2] जाल्मेभ्यश्च स्वगृहाणि रक्षितुं वा न क्षमामह इति। इयमाध्यात्मिकी नो विनष्टिः।

चतुर्विधस्य निरुक्तस्यानर्थस्यापादयितुर्वस्तुक्रमस्य याऽनुवृत्तिस्तद्देवेषु मर्त्येषु चाग इति दृढं मन्यामहे। परमिदमभ्युपेमः स्वातन्त्र्यावाप्तेः साधकतमं करणं प्रमाथो नेति। अतो वयं वर्तमानेन राज्यतन्त्रेण सर्वं कामतः प्रवृत्तं संसर्गं यावच्छक्यं परिहृत्यात्मानं संनत्स्यामहे। संनत्स्यामहे च निःप्रमाथाय शासनातिक्रमाय कराप्रदानाय च। वयं प्रतीमो यदि वयं सत्यामप्युत्तेजनायां प्रमाथमनास्थाय यादृच्छिकं साहायकमेव संहर्तुं शक्यामहे[3] करप्रदानं च विरमयितुं ध्रुवं नश्चारितार्थ्यमिति। अतो वयमिह दृढं प्रतिजानीमहेऽन्तराऽन्तरा काङ्ग्रेसेन करिष्यमाणान्पूर्णस्वराज्यावाप्तिहितान्निदेशान्वयमनुविधास्याम इति।

काङ्ग्रेसनिदेश[4]वर्तिनः कोटिशो जना नियतेऽहनि नगरेषु निगमेषु ग्रामेषु च निर्दिष्टेषु प्रदेशेषु संनिपतिताः। सर्वत्रास्मिन्देशे प्रादोषिक्यां पञ्चनादमितायां वेलायामयमुपन्यासो वाचयितुमारभ्यत। समुदितो जनव्रातः परमादरेण सर्वमाकर्णयत् सांमत्यं च प्राकाशयत्। सर्वत्र चन्द्रशालासु[5] स्वातन्त्र्यपताका उद्धूयन्त। रथ्यासु[6] निषद्यासु[7] हर्म्येषु कुटीरेषु च सर्वत्र दीपोत्सवोऽक्रियत।

---

१. अवस्कन्द आक्रमः। पुरीमवस्कन्द लुनीहि नन्दनम् इत्यत्र यथा।
२. अपहारकेभ्यः। जल्पभिक्षकुट्टलुण्टवृङः षाकन् इति ताच्छीलिकः षाकन्।
३. शक विभाषितो मर्षणे इति दैवादिकाद्धातोर्लटि रूपम्।
४. निदेश आज्ञा। अववादस्तु निर्देशो निदेशः शासनं च सः—इत्यमरः।
५. चन्द्रशाला शिरोगृहम् इति कोषः।
६. प्रतोलीषु। सविधनगरीरथ्यया पर्यटन्तम् इति मालतीमाधवे।
७. आपणेषु। आपणस्तु निषद्यायाम्—इत्यमरः। संज्ञायां समजनिषद इति क्यप्।

अतो दिवसात् प्राचीने सप्ताहे सुराष्ट्रविद्यापीठस्नातकान्संबोध्य यच्छ्रीगान्धी स्माह तत्स्वातन्त्र्यप्रस्तावं विस्तरेण विशदयतीति संक्षिप्येहोपन्यस्यते । तद्यथा—

स्थाने भवन्तो मयि संभावयिष्यन्त्यहं लवपुरे काङ्ग्रेसोपवेशने स्वीकृतिं स्वातन्त्र्यप्रस्तावमन्तरेण[1] सत्याग्रहं च विशेषतः किमपि वक्ष्यामीति । विविदिषिष्यन्ति चास्माकमिहोद्योगे को भाग इति । अस्तु । यथाहमसकृदवोचं न वयं बहुसंख्यत्वं संश्रयामहेऽपि त्ववदातचारित्र्यमिति । यथाल्पसंख्याकानेव जनानुद्देशस्य कृते प्राणानुपजिहीर्षून् प्रतियन्न[2]हं सत्याग्रहमुपन्यास्थं[3] न तथा निमन्त्रणमनुवर्तिष्यमानस्य जनस्य भूमानम् । इदं हि विदितं वो यत्कलिकाताभवे काङ्ग्रेसोपवेशनेऽभ्युपगतेन प्रस्तावेन वयं प्रतिज्ञां कारिताः काङ्ग्रेसनिर्माणस्य प्रथमो नियमोऽस्माभिः परिवर्त्यः । सत्याग्रहविषयिकेतिकर्तव्यता चानुचिन्त्या यद्येकोनत्रिंशदुत्तरनवशतोत्तरसहस्रमितख्रिस्तवत्सरान्तं यावत् साम्राज्येऽन्तर्नः स्वराज्यभाक्त्वं न स्यादिति । व्यृद्धे[4]ऽस्मिन् कामे सत्यप्यननुगुणस्य गुणदोषविवेचनस्याऽन्यथावर्णनस्य च संशये सङ्गरपालनमेव नः कृत्यमापतितम् ।

प्रस्तावस्य पश्चादागतैर्व्यतिकरैरस्य दार्ढ्यमुपपादितम् । रसलेन्द्रेण वयं प्रव्यक्तं बोधिता भरतवर्षस्य स्वराज्यभाक्त्वं केनेडेत्यादीनां स्वराज्यभाक्त्वाद्भिद्यत इति । एतेऽर्थतः स्वायत्ता देशा इति स भवानभ्युपैति । भरतवर्षस्य स्वराज्यभाक्त्वमधिकृत्य ब्रुवन्नहमपि न कदाचिदन्यदचिन्तयम् । तस्य महानुभावस्य व्याहारस्या[5]यमाशयः—

---

१. प्रस्तावमधिकृत्येत्यर्थः । अथ भवन्तमन्तरेण कीदृशोऽस्या दृष्टिरागः इति शाकुन्तले ।

२. विश्वसन्, जानन् । प्रतिपूर्वाद् इण गतौ इत्यस्माच्छतृ ।

३. असु क्षेपे इत्यस्य लुङ्युत्तमैकवचने रूपम् । अस्यतेस्थुक् ।

४. विफल इत्यर्थः । इदं समृद्धमित्यस्य विपरीतार्थकम् ।

५. वचस इत्यर्थः । व्याहार उक्तिर्लपितं भाषितं वचनं वचः—इत्यमरः ।

चिरमायसैर्निगडैः संदानिता[1] भरतभूमिजा इदानीमिच्छन्ति चेत् कनकमयैस्तान् विनिमातुमर्हन्तीति। केचिच्चेममुपन्यासमभिनन्दन्तीति प्रतीयते। वयं तथा परित्रस्ता यथा ब्रिटिशसम्बन्धविच्छेदः प्रमाथं संकुलं[2] च करिष्यतीति प्रतिपद्यामहे। भवतु। अहं स्वाभिप्रेतं पुनर्विवरीतुमिच्छामि। अहिंसोपासकस्यापि मे यदि संकुलस्यागतिकः साक्षी वा स्यां सदातनस्य पारतन्त्र्यस्य वेति कामचारः स्यात्तर्ह्यसंशय्य ब्रूयामिह देशे संकुलसाक्षित्वं सुतरां रोचयिष्यामीति। अहं हिन्दून् मुसलमीनांश्च संप्रहरमाणानन्योन्यांश्च निघ्नतो दिदृक्षेय। न तु विराजितं नः पारवश्यमनुदिनं दिदृक्षे। अहं मन्ये हैमा निगडा आयसेभ्यो नितरां हीयन्ते यतो मानवः परेषां पारुष्यं क्लेशावहत्वं चानुभवति पूर्वांस्तु प्रस्मरति[3]। तदस्य शीलम्। अतो यदि भरतभुवा निगडैः संयतया भाव्यं कामये त आयसाः स्युर्न तु सौवर्णा महार्घधात्वन्तरविकारा वेति।

यावदेव वयं स्वातन्त्र्यं संकीर्तयामस्तावदेव कैश्चिदुद्यानवास्तव्याक्रमवेताल उत्थाप्यते। नाहं तदाऽऽक्रमं गणये यदास्माभिर्ब्रिटिन इत्यनेन पराधीनतासम्बन्धो विघटितः। अप्रतिसमाधेयोऽनागतेः श्रेयसि मे विश्वासः। नृहत्यावर्जितेन परिवर्तनेन भारतं वर्षं स्वातन्त्र्यमाप्स्यतीत्यचला मे श्रद्धा। श्रीज्वाहरलालो नः कर्णधारः[4]। नाहं मन्ये वयं कर्हिचिदपि प्रशस्यतरं तरुणमध्यक्षं लब्धास्मह इति। कामये तस्मिन् कार्यधुरां वहति सति वयं सिद्धार्थाः स्यामेति। इदं च

---

१. बद्धाः। दान अवखण्डने इति धातोर्भौवादिकात् क्तः। उपसर्गवशादर्थान्तरत्वम्।

२. व्याकुलता, व्यस्तता इत्यर्थः। अत्रार्थे तुमुलं रणसंकुले इति पठन्नमर एव प्रमाणम्।

३. प्रपूर्वस्य स्मरतेर्विस्मरणेऽर्थे रूढिरित्यभियुक्ताः।

४. कर्णधारस्तु नाविकः—इत्यमरः। कर्णः श्रोत्रमरित्रं च इति दुर्गः। तं धरतीति।

संभवतितरां यदि यूयं प्रतिज्ञां पालयिष्यथेति ।

फाल्गुने मास्याद्येषु दिवसेष्वमदावाद इत्यत्र मिलितया काङ्ग्रेस-कार्यनिष्पादिकया सभयाऽयमुपन्यासोऽभ्युपेतः

सत्याग्रहाभ्यनुज्ञानम्

—एषोऽभिप्रायः कार्यनिष्पादिकायाः सभाया ये पूर्णस्वराज्यावाप्तयेऽहिंसां धर्ममभ्युपयन्ति ते सत्याग्रहं प्रस्तुयुरिति । यतः काङ्ग्रेसपरिषदि न केवलमेवञ्जातीयका नरा नार्यश्चान्तः समाविशन्ति, अपि तु तेऽपि ये ऽहिंसां वर्तमानायां देशस्थितावावश्यकीं सरणीं प्रतिपद्यन्ते, अतः कार्यनिष्पादिका सभा महात्मन. श्रीगान्धिन उपक्षेपमभिनन्दति, तं च तेन सहकारिण इतरांश्च यथोक्तमहिंसाधर्मिणोऽधिकरोति, ते यत्र यदा च कामयेरन् यथा यावच्चावधारयेरन् सत्याग्रहं प्रस्तुवीरन्निति ।

एवमभ्यनुज्ञातो महात्मा सत्याग्रहगोचरं कार्यक्रमं व्यवसातुमारभत । व्यवसितेतिकर्तव्यताकः काङ्ग्रेससदस्यैः सह कृतपरामर्शः स राजप्रतिनिधिमुद्दिश्य घोषणापत्रमेकमलेखीत् । तस्य प्रापणाय चाश्रमिणामेकतममाङ्गलकुमारं रेनाल्ड् इत्याख्यं देहलीं प्रास्थापयत् ।

अयं हि तत्र लोकविश्रुते पत्रे निबद्धोऽर्थः—

प्रियसुहृद् !

यावदहं निःप्रमाथं शासनातिक्रमं नातिष्ठामि तेन च यतः संशयादिमाः समा अहमभैषं तत्रात्मानं न पातयामि तावत्प्रकामं भवन्तमुपयामि विविदिषामि चौपयिकान्तरम्[२] । विशदो मे स्वो धर्मः[१] । नाहं कमपि जीवं जिहिंसामि किमुत सजातीयान् मानवान् यद्यपि ते महिष्ठं ममापकुर्युः । अतो यद्यप्यहं ब्रिटिशशासनं भरतवर्ष-

---

१. धर्मशीलवर्णान्ताच्च इतीनिः ।

२. अन्यदौपयिकमौपयिकान्तरम् मयूरव्यंसकादिः । विनयादिभ्यष्ठक् इति स्वार्थे ठक् । उपायाद्ध्रस्वश्च इति गणसूत्रेण ह्रस्वः । स्वार्थिकाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपीति नपुंसकत्वम् ।

स्याधिं मन्ये तथाप्यहमेकमप्याङ्गलम्, उपपन्नं परिग्रहे[1] तस्याधिकारं वा नोपजिघांसामि।

नान्यथा ग्रहणीयं मे वचः। यद्यप्यहं ब्रिटिशशासनं भरतवर्षस्याङ्गारं मन्ये नाहं तत एव कारणदाङ्गलजातिं भूमिष्ठा[2]न्मानवजात्यन्तरादपकृष्टां गणये। अनेक आङ्गलाः प्रियतमा मदीयाः सखाय इत्यभिमन्ये। यत्सत्यं ब्रिटिशशासनकृतापायविषये यदहं वेद्मि तत्प्रायशो विक्रान्तानां स्फुटवादिनां ब्रिटिशशासनविषये निर्विशङ्कमप्रियं सत्यं च शस्तव्रतामाङ्गलानां निबन्धेभ्य एवावेदिषम्।

किं[3] कारणमहं ब्रिटिशशासनमाधिं मन्य इति चेत्। उच्यते। इदं हि शासनमानुक्रमिकस्वार्थसाधनविधानेन प्रणाशकर्या बहुव्ययसाध्यया दुर्वहया राज्यधुरया चैतद्देशजानां बह्वीः कोटीर्गतविभवा अकार्षीत्। इदञ्चेमं देशं दासत्वमनैषीत्। अस्मद्व्युत्पत्तिमूलं चाश्लथयत्। इदञ्च नो निःशस्त्रीकृत्य हृदयदौर्बल्यमापाद्याध्यात्मिकीं नो हानिमजीजनत्। सार्वत्रिकेण निःशस्त्रीकरणेन विध्यन्तरैश्च वयं कातरस्येव वैक्लव्यं गमिताः।

यथेतरेषामनेकेषामेतद्देशजानां तथा ममाप्यासीदाशंसा प्रस्तुतेन मन्त्रणसमाजेन प्रतीकारः कश्चिदुपलप्स्यत इति। यदा पुनर्भवान् स्पष्टमवादीत्—अहं वा ब्रिटिशधीसचिवसभा वा साम्राज्येऽन्तः पूर्णस्वराज्यस्य पद्धतीमनुमंदिष्यत इति प्रतिज्ञातुं न पार्यत इति तदा मन्ये निरुक्तः समाजस्तमभ्युपायं निर्देष्टुं नाशकद्यस्य प्रबुद्धा भरतवर्षीया बुद्धिपूर्वमुत्कण्ठन्ते ऽबुद्धिपूर्वञ्चाप्रबुद्धाः कोटयः। पुरा कदापि

---

१. परिग्रहो धनम्, स्वं वा। पत्नीपरिजनादानमूलशापाः परिग्रहाः—इत्यमरः।

२. भूमौ तिष्ठतीति, तस्मात्। सुपि स्थः इति कः। आदेशप्रत्यययोः इति षत्वम्।

३. निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् इति वार्तिकेनात्र किमः कारणशब्दाच्च प्रथमा।

प्रतिनिधिसभाया निर्णयः पूर्वं नागृह्यतेति न वाच्यम्। पुरापि धीसचिवसभया प्रतिनिधिसभाया निर्णयं प्रागेव ज्ञात्वा कस्मैचित् प्रत्यश्रावीत्युदाहर्तुं शक्यम्।

यतो देहल्यां वृत्तो भवता संलापः फलविधुरोऽभूदतः पण्डितः श्रीमोतीलालोऽहं चागतिकौ सताविंशत्युत्तरनवशतोत्तरसहस्रतमे खिस्ताब्दे कलिकाताभवे काङ्ग्रेसोपवेशने विहितां दृढां प्रतिज्ञां तरीतुमपेक्षितं प्रक्रममभजावहि। पूर्णस्वराज्यस्वीकृतिर्नोद्वेगकरी[1] भवितुमर्हति यदि भवता स्वस्मिन् प्रख्यापणे स्वराज्यमिति पदमभ्युपेते तदर्थे प्रायोजि। यतो न खलु[2] पर्यनुयोज्यैर्ब्रिटिशनीतिज्ञैः प्रतिपन्नं स्वराज्यं परमार्थतः स्वातन्त्र्यमिति। अहन्त्विदमाशङ्के प्रत्यासीदति भविष्यति काले भरतवर्षायैतल्लक्षणं स्वराज्यं न कदापि दित्सितमभूत्।

परमेतत्सर्वं पुरावृत्तम्। प्रख्यापणादूर्ध्वं वृत्ता बहवो व्यतिकरा ब्रिटिशनयसरणिमभिव्यक्तं सूचयन्ति। इदं हि प्रव्यक्तं प्रतिभाति ब्रिटिशराजकार्यधुरन्धरा ब्रिटिशनीतिमार्गे तं परिवर्तं नेच्छन्ति येनाङ्गलदेशस्य भरतवर्षेण सह निगमो[3]ऽवसीदेत्। यदि स्वार्थसाधनक्रममवसाययितुं न किञ्चिदनुष्ठीयते तर्हि भारतं वर्षमुत्तोत्तरं त्वरितया गत्या रिक्तीकरिष्यते।

धनागमस्यावेक्षकः पारिषद्योऽष्टादशपणप्रमाणं व्यवस्थितं जानीते। एतद्धि कतिपयी[4]र्धनस्य कोटीरितो देशादपवाहयति। यदा

---

१. उद्वेगो भयम्। तद्धेतुः। कृञो हेतुताच्छील्यानुलोम्येषु इति टः।

२. अत्र खलुशब्दो जिज्ञासायाम्। न खलु तामभिक्रुद्धो गुरुः इत्यत्र विक्रमोर्वशीये यथा। निषेधवाक्यालङ्कारे जिज्ञासानुनये खलु—इत्यमरः।

३. निगमो वाणिज्या। तत एव नैगमो वणिग् उच्यते।

४. कतिपयशब्दे ऽयच्प्रत्ययः पुगागमश्च। अतः टिड्ढाणञ्० इत्यनेन स्त्रीत्वविवक्षायां ङीप्। तत्र मात्रजिति नेदं प्रत्ययग्रहणं किं तर्हि प्रत्याहारग्रहणम्। क्व संनिविष्टानां प्रत्याहारः। मात्रशब्दादारभ्य आ अयचश्चकाराद् इति भाष्यम्।

चैवंविधस्यानर्थस्य प्रतिविधित्सया निःप्रमाथेन विधिना बलवद्यत्यते तदाऽवशो भवानप्यृद्धिमतः क्षेत्रवतो जनांस्तथा प्रचोदयति यथा त इमं देशं चूर्णपेषं[1] पिषतोऽस्य शासनस्य कृते निरुक्तं प्रयत्नं विहन्तुं भवतः साहायकमुपेयुः ।

लवणेऽपि तथा करन्यासो यथाऽधनैर्गरिष्ठो भरो वोढव्यो भवति । शीधु[2]भैषज्यादिशुल्कमपि दरिद्रेभ्य आयाति । सर्वः स्वाच्छन्द्यमर्हतीति तत्समर्थनायां मिथ्याऽपदेशः[3] ।

एकतो भागधेयभारो दरिद्रान् समपीपडत्, अपरतश्च कर्तनाख्यस्य परिशिष्टव्यवसायस्य विनाशस्तेषां धनार्जनशक्तिं व्यनीनशत् ।

भरतवर्षस्यैश्वर्यभङ्गोपाख्यानं न तावत्पूर्तिमेति यावत् तन्नाम्ना कृतान्यृणानि नानुसन्दध्मः । अधिगतस्वातन्त्र्येण भरतवर्षेणेमान्यृणानि निपुणं परीक्षणीयानि । तानि चापाकरणीयानि यान्यविदितपक्षपातया न्यायसभयाऽनुपपन्नानि न्यायादपेतानि चाध्यवसीयेरन् ।

दृष्टान्तिता इमेऽन्याया यस्येह जगति सर्वमहार्घता सूपपादा तस्य शासनस्य वैदेशिकैः प्रवर्तनाय समाचर्यन्ते । तद्यथा । भवानेकविंशतिशतादप्यधिकानि रूप्यकाणि मासिकं वेतनं लभते । अपरोऽपि भवत आगम एतदतिरिक्तः । ब्रिटिशप्रधानसचिवः प्रतिवर्षं पञ्चसहस्रं सुवर्णमुद्राः प्राप्नोति । तेन मासिकं तस्य वेतनं चतुःशतोत्तरपञ्चसहस्रादधिकानि रूप्यकाणि भवति । प्रचरितेन विनिमयप्रमाणेन भवान् प्रत्यहं सप्तशतादधिकानि रूप्यकाण्यधिगच्छति, अणकद्वया-

---

१. शुष्कचूर्णरूक्षेषु पिषः इति णमुल् ।
२. मैरेयमासवः शीधुः—इत्यमरः । भेषजमेव भैषज्यम् औषधम् । अनन्तावसथेतिहभेषजाञ्ञ्यः इति स्वार्थे ञ्यः ।
३. निमित्तं, हेतुः । अपदेशः पुमाँल्लक्ष्ये निमित्तव्याजयोरपि—इति विश्वः ।

दल्पीयांश्च सामान्यतः प्रात्यहिको भरतवर्षीयाणामायः ब्रिटिशप्रधानसचिवस्तु प्रत्यहमशीत्युत्तरशतं रूप्यकाण्यवाप्नोति, रूप्यकद्वयं च तत्रत्यः सामान्यतः प्रात्यहिक आयः ।

अञ्चितजानु[1]रहं याचे भवानिदं विमृशतु । यदहं पुरुषविशेष भवन्तमदृष्टान्तयं तत्र विरसस्य तथ्यस्य सम्यग् बोधनमेव मेऽर्थः । मनुष्य इत्यत्रभवति मेऽस्ति बहुमानः, येनाहं भवन्मनो दुनुयामित्येषितुं न पारयामि । यद् राजप्रतिनिधेर्वेतनविषयेऽवितथं तत् सामान्यत इतरेषामप्यधिकृतानां विषयेऽविपरीतं वेद्यम् ।

अमूलं बलेरपकर्षणं[2] शासनव्ययस्यापि तादृशमपकर्षणमन्वायतते । तच्च शासनपद्धतेर्विपरिणतिमपेक्षते । सा चर्ते स्वातन्त्र्यान्न संभविनी । एतदर्थकान्येव स्वतः प्रवृत्तानि माघे कृष्णद्वादश्यां भवानि भावविजृम्भणानि यत्रानेककोटिमिता जानपदा अप्यन्तःप्रवृत्त्या कर्तृतामभजन्त । एषां हि निष्पेषकाद् भाराद्विमोक्ष एव स्वातन्त्र्यम् ।

सादरमभ्यर्थये भवानेतेषामनिष्टानामविलम्बिताय विप्रकर्षणा[3]योपायमास्थास्यति येन यादृच्छिकेन साचिव्येन भुवनभावुकोत्कर्षोत्कानां[4] परस्परोचितसाह्यवाणिज्यसमयावधारणसमुत्सुकानामर्थवत्समानां समैः संमिलनमात्मानं लप्स्यते ।

परं यदि भवान् दोषानेतान् समाधातुमपर्याप्तमात्मानं मन्यते, अयं मेऽर्थबन्धश्च नेषदपि भवन्तं प्रयुङ्क्ते तदाहं वर्तमाने फाल्गुने

---

१. जानुनी अन्वाच्येत्यर्थः । एवं हि पारसीकाः प्रार्थयन्ते । तदितरेऽनुकुर्वन्ति । अञ्चितमिति अञ्चु गतिपूजनयोरित्यस्य णिजधिकस्य निष्ठायां रूपम् ।

२. न्यूनत्वापादनम् । मूल्योत्कर्षापकर्षौ इत्यत्र यथा । अपकर्षेदेवं यावत् पञ्चदश इत्यत्र वा यथा ।

३. दूरीकरणायेत्यर्थः । कामान्दुग्धे विप्रकर्षत्यलक्ष्मीम् इत्युत्तरे रामचरिते ।

४. भुवनस्य जगतः भावुकं कल्याणं तस्योत्कर्षः वृद्धिः तत्रोत्कानामुत्कण्ठितानाम् । उत्क उन्मनाः इत्यमरः । उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन् ।

मासि शुक्लैकादश्यामाश्रमस्थान्कानपि सहकारिणः सहादाय लवण-विधानमतिक्रमितुं प्रयास्यामि । अहमेतं करं दरिद्रदृष्ट्याऽधर्म्यतमं मन्ये । जाने भवान्मां बद्ध्वा म संविधानं प्रतिहन्तुमर्हति । परमाशासेऽनेकसहस्रसंख्यका विनीता भरतवर्षीया मत्तोऽनन्तरमभ्युपेतार्थं करिष्यन्ति, तेन च लवणविधानेन विधिग्रन्थकलङ्कभूतेनात्मानं दण्ड्यतां नेष्यन्ति ।

नायं पत्रार्थोऽपकारगो'रित्यभिप्रेतः । अयं हि निश्चयात्मनः सत्याग्रहिणः पुण्यं सामान्यं च कृत्यम् । अत एवाहमेतदर्थमेव विधात्रा विसष्टेनेव भरतवर्षोद्देशमप्रमाथं च श्रद्दधानेनाङ्गलेनैकेन मित्रेणेदं पत्रं प्रापितम् ।

इति निवेदयते

भावत्कः सुहृद्

मोहनदासकर्मचन्द्रो गान्धी ॥

एतत्पत्रार्थं प्रतिब्रुवन् राजप्रतिनिधिरेतमर्थमुपन्यबन्धयत् ।

नूतनदेहलीतः ।

फाल्गुने शुक्लपञ्चम्याम् ।

प्रिय सुहृच्छ्रीगान्धिन् !

तत्रभवान् राजप्रतिनिधिरभिप्रैति फाल्गुने मासि शुक्लद्वितीयस्यां विन्यस्ताक्षरं पत्रं प्राप्तमित्यभ्युपेयामिति । भवानेतादृशं कार्यक्रममनुचिन्तयति येन शासनातिक्रमो दुर्निवारः प्रजास्वास्थ्यसंशयश्च भविष्यत इत्युपलभ्य स दूयते ।

इति निवेदयते

भावत्कः सुहृद्

जी० कनिङ्गहम्

अनधिकारी सचिवः ॥

---

१. मम वचनं नानुष्ठास्यते चेदहं तेन तेन प्रकारेण तवापकरिष्यामीत्यादि-स्वरूपा ।

अधिगत एतस्मिन्प्रतिवचसि श्रीगान्धिनः पत्रे समुदिष्टं प्रयाणम-धिकृत्योपश्लोक्यो[1] राजनीतिलब्धवर्णः[2]

विश्रुतं प्रयाणम् पण्डितः श्रीज्वाहरलालनेहरुः काङ्ग्रेसाध्यक्ष इत्थं लोकान् प्रैरयत्—

कृतोऽपरिवर्तनीयो निश्चयः अतः षष्ठे दिवसे फाल्गुने शुक्लद्वादश्यां श्रीगान्धी निःप्रमाथं शासनातिक्रमं प्रक्रमितुं बह्वर्थां यात्रां प्रारभते। स याति वीराश्चानेके तेन सह यान्ति। कस्तमनुयातुं सज्जः। कोऽप्रयुक्तो जोष[3]मासिष्यते यदा चिरविलुप्तस्य स्वातन्त्र्यस्य प्रत्यापत्तये भरतदेशजा महान्तं यत्नमातिष्ठन्ति। कोऽनुद्युक्तोऽवस्थास्यते यदा वीरतमा भरतभूमेः पुत्रा दुहितरश्च प्रियायास्तस्याः कृते प्रद्राणान् कोटिशस्तज्जांश्च सुखयितुं क्लेशं कारावासं निधनमपि च रोचयन्ते। द्वय्येव नः सर्वेषां गतिः। अपरतन्त्रता परवत्ता च। सङ्घद्वयमेवेह जनपदे भवितुमर्हति—स्वातन्त्र्यं प्रेप्सुश्चमूः परार्थोपघातेन स्वार्थसाधिकाऽनीकिनी च। कतरां गतिं गच्छामः कतरस्मिंश्च संघ आत्मानमन्तः पातयामः। सर्वः चेतस्यस्योत्तरं विचिनोतु। भरतवर्षस्य च यस्मा अर्थाय वयमुद्युञ्ज्महे तस्य च सदृशानि कर्माण्येव तदुत्तरं सन्त्विति।

फाल्गुने सितषष्ठ्यां भगवदाराधनवेलायां संकल्पितं प्रयाणं विषयीकृत्य श्रीमहात्माऽऽश्रमस्थांश्छात्रानित्थमन्वशात्—

यावदुद्देशो नासाद्यते न तावत् प्रत्यावर्तनीयमिति व्यवसीयताम्। कारावासमेव लम्भयिष्यध्व इति नावधार्यताम्। न नावकल्पये[4]

---

१. श्लोकैरुपस्तुत्य इत्यर्थः। सत्यापपाश—इत्यादिना णिच्। अचो यत्।

२. विचक्षण इत्यर्थः। धीमान्सूरिः कृति कृष्टिर्लब्धवर्णो विचक्षणः—इत्यमरः।

३. तूष्णीमित्यर्थः। तूष्णीमर्थे सुखे जोषम्—इत्यमरः।

४. संभवतीति मन्य इत्यर्थः।
नावकल्प्यमिदं ग्लायेद्यत्कृच्छ्रेषु भवानपि—इति भट्टिकाव्ये।

यूयमभ्यवस्कद्यध्वे[1] बहुविधस्य कदर्थनस्यास्पदीक्रियेध्वे चेति। युष्माकं यः कश्चिदात्मानमनलंकर्मीणं[2] पश्यति स स्वं नाम संहर्तुमभ्यनुज्ञायते। परं प्रक्रान्ते प्रयाणे यदि कश्चिद्धैर्येण हास्यते तर्ह्यहं नितान्तं दविष्ये[3]। वयं प्रत्यहं पञ्च क्रोशान् पादचारेण चरिष्यामः। पूर्वाह्णे पराह्णे च प्रयास्यामः। मध्याह्ने विश्रमिष्याम इत्येष क्रम इति।

प्रस्थानम्

संनिकृष्यमाणे प्रस्थानदिवसे सर्वं सुष्ठु संव्यधीयत। फाल्गुने शुक्लैकादश्यां सर्वां क्षपां शतशो जना आश्रमाभोगे[4] समुदिता गीतानि गायन्तो जयतु जयतु महात्मेति च घोषयन्त आसत। विभातायां विभावर्यामागते च द्वादशे तिथौ सर्वे प्रसन्नवदना उत्साहवन्तः प्रमुदितचेतसश्चालोक्यन्त। अयं वासर इतिहासग्रन्थेषु प्रख्याततमो भविता। अत्र हीश्वरप्रेरितोऽहिंसादेशक इदं निदर्शयितुं प्रायान्निःप्रमाथापि संयत्[5] संभविनीति।

ऐलिस्सेतुरित्यत आरभ्याश्रमं यावदनुमार्गं शतशः पुरुषाः स्त्रियो बालाश्च महात्मनो दर्शनस्योत्कण्ठमानास्तं च तस्यैकोनाशीतिं स्वेच्छासेवकांश्चापि[6]पृच्छिषमाणाः पङ्क्तिक्रमेण स्थिताः। आश्रमाभोगेऽङ्गुलमात्रोऽपि प्रदेशो जनानध्यासितो नासीत्।

---

१. युष्माकमभ्यवस्कन्दनं स्यादित्यर्थः। अभ्यवस्कन्दनं त्वभ्यासादनम्—इत्यमरः। स्कन्दिर् गतिशोषणयोरित्यस्य इरित्त्वाद् अनिदितां हलः इत्यादिनोपधाय नस्य लोपः।

२. कर्मणेऽलम् अलंकर्मीणः। स न भवतीति। अषडक्षाशितङ्गु० इत्यादिना स्वार्थे खः।

३. दूङ् परितापे इति दैवादिकाद्धातोर्लृटि रूपम्।

४. आभोगः परिपूर्णता—इत्यमरः।

५. युद्धमित्यर्थः। स्त्रियः संयत्समित्याजिसमिद्युधः इति युद्धनामस्वमरः।

६. आङ्पूर्वात्प्रच्छेः सन्, तत आङि नुप्रच्छ्योः इत्यात्मनेपदविधानाल्लटः शानच् आमन्त्रयितुकामा इत्यर्थः।

आगाराद्बहिरागमात् पूर्वभवे विंशतिकलात्मके काले महात्मा कांश्चित्स्थानीयान् संभाविता[1]ञ्जनानदर्शत्।

सपादषण्नादमितायां प्रगेतन्यां वेलायां श्रीमहादेवेन, सम्प्रति स्वेच्छासेवकतामापन्नेन स्वसचिवेन श्रीप्यारेलालेन च समेतः सोऽगारान्निरक्रामत्। तस्याष्टसप्ततिः स्वेच्छासेवकाः प्रसेवान्[2] शय्योपकरणानि च वहन्तो द्विशोऽन्वगायन्।

श्रीगान्धी विंशतिं कला अस्थात्। स भगवन्तं प्रार्थयत। आश्रमवास्तव्या अङ्गनास्तस्य भालं कुङ्कुमकर्दमेनातिलकयन् स्वहस्तकृत्तेन सूत्रेण च तमस्रजयन्[3]।

श्रीगान्धी यथापुरं जघनवासोऽवस्त, खद्दराख्येन पटखण्डेन च तनूमाच्छादयत्। प्रशान्तगम्भीराकृतिः समानीतकरपुटः स भक्तवत्सलं सिद्धिदं परमेशं प्रार्थयत। ततः प्रायिकं स्मेरत्वमपुष्यत्[4]।

ततः स्वस्तिवाचनमभूत्। सर्व आश्रमस्थो महात्मानमामन्त्रयत। श्रीगान्धी सर्वमाशिषाऽऽशास्त सर्वस्य च पृष्ठं हस्तेनामृशत्। आप्रच्छनं नितान्तं हृदिस्पृगभूत्। सर्वस्य संनिहितस्य जनस्य नेत्राभ्यामानन्दजं वारि प्रास्रवत्।

निवृत्त एतस्मिन् कृत्ये श्रीगान्धी कालघटिकायां दृशमपातयत्। सार्धषण्नादमितायामेव वेलायां स जातीयसैन्यसङ्घेन सहाभिप्रेतायाभिक्रमाय[5] प्रायात्।

---

१. लब्धगौरवान्, कृतादरान्। संभावितस्य चाकीर्तिर्मरणादतिरिच्यते इति भगवद्गीतासु।

२. स्यूतानीत्यर्थः। स्योनस्यूतप्रसेवकाः—इति रभसः। एतानि वस्त्रशाणादिनिर्मितस्य थैला इति ख्यातस्य।

३. स्रग्विणमकुर्वन् इत्यर्थः। प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च इति गणसूत्रेण णिच्। इष्ठे यथा तथात्र विनो लुक्।

४. अदधादित्यर्थः। सूर्यागमे न खलु कमलं पुष्यति स्वामभिख्याम् इत्यत्र यथा।

५. अहितान् प्रत्यभीतस्य रणे यानमभिक्रमः—इत्यमरः।

वन्दे मातरमिति घोषणायां क्रियमाणायां वेगितया स्थिरया च गत्या स प्रगात्। स तथोत्साहवत्त्वरितं चाचलद्यथा यात्रामनुयान्तः परःशता जनाश्चलितेन[1] सह गन्तुं नाशकन्। एकया होरया क्रोशादधिकोऽध्वाऽत्यक्रान्तः।

आश्रमादारभ्य एलिस्सेतुमभिव्याप्य वर्तमाने पथि कोटीश्वराः कर्मकराश्च महात्मनः सत्क्रियायामन्योन्यमस्पर्धन्त। सर्वे समेता जना महात्मानं मुद्राभिर्जपापुष्पदलैः कौङ्कुमैः क्षोदैश्चावाकिरन्।

सार्धदशनादमितायां वेलायां सत्याग्रहदलमसलालीत्याख्यं ग्राममापत्। ग्रामजनाः पताकाभिः पुष्पैर्दुन्दुभिभिर्वंशैश्च[2] महात्मन आगममभ्यनन्दन्। असलालीग्रामस्थाः कुलाङ्गना महात्मन उपदेशमुपश्रोतुमिदंप्रथमतयाऽवगुण्ठनमपानयन्। परःसहस्रान् समवेताञ्जनान् संबोधयन्महात्मेदमवोचत्—विदितमस्तु वः सर्वेषां पणनवकार्घं खारिप्रायपरिमाणकं लवणमस्माभिः सपादरूप्यकेण क्रेतव्यं भवतीति। दरिद्रा अस्मासु शासनाधिकृतेषु च शापान्मुञ्चन्ति। यदि धनिका एव लवणकरं दाप्येरन्नुपपन्नमिव स्यात्। साम्प्रतिकी दुःस्थितिरुभयथा सुसमाधाना[3]—प्रमाथेन सत्याग्रहेण च। यद्यहं शासिता स्यामहं तमालपत्रगुटिकासु मद्येषु च करं न्यस्येयम्। युष्माभिः काराप्रवेशान्नोद्विजितव्यम्[4]। यदि त्रिंशल्लक्षमिताः सौराष्ट्राः पुरुषाः स्त्रियश्च कारानिक्षेपं लभेरंस्तर्हि कस्यामपि राजकीयकारायां तेषां वासं परिकल्पयितुं प्रदेशो नाप्येत। सर्वथा लवणकरापाकरणं साध्यम्। असलालीग्रामस्थाः कथं कियच्चास्या युद्धप्रवृत्तेरुपकरिष्यन्तीत्यावेदयन्तु। येऽत्र स्वेच्छासेवकत्वमिच्छन्ति ते स्वं स्वं नामधेयं कथयन्तु। आत्मानमधिकृत्येदमेव विवक्षे मयाऽवश्यं

---

१. प्रस्थितेन सैन्येनेत्यर्थः। प्रचक्रं चलितार्थकम्—इत्यमर।

२. सुषिरवाद्यविशेषैः। कूजद्भिरापादितवंशकृत्यम् इति रघौ।

३. आतो युच् इति खल्विषये युच्।

४. विज इट् इति इडादिप्रत्ययो ङिद्वद्भवति। क्ङिति च इति गुणनिषेधः।

यातव्यं करायां च वस्तव्यं जीवितं वोत्स्रष्टव्यमिति। नान्यच्चिकीर्षे। आश्रममसलालों वा नाववृत्सामि[1]। मया निश्चितोदर्कः प्रक्रम आस्थितः। नाहमिमं विजिहासामि[2]। मामनु युष्माभिः कार्यभारो वहनीयः। सुविचिन्त्य कार्यं प्रारम्भणीयम्। परं प्रारभ्य न विरमणीयम्। प्रयाणाभिमुखोऽहं जनानामाशिषः प्रत्यग्रहीषम्। लवणकरापनुत्तिसाधना स्वराज्यावाप्तौ प्रथमारम्भः। शिष्टं कृत्यं लघ्वनुष्ठास्याम इति।

चैत्रे कृष्णद्वितीयायां सत्याग्रहिमण्डलमानन्दसंज्ञं संवसथ[3]मध्यगमत्। यावत्तन्न परापतत्तावत्सर्वः पन्थाः प्रोक्षितो नीरजस्कतां नीतः। अत्र श्रीगान्धी महतो जनसमुदायस्य साम्मुख्यमादधत्सुतरां हृदयग्राहि भाषितमकरोद् यस्यायं संक्षिप्तोऽर्थः—सत्याग्रहसरणिः प्रणय[4]सरणिरिव हुताशं मध्यतो याति। इयं ह्यात्मानं प्लोषतीतरांश्च निर्वापयति[5]। यत्सत्याग्रहिमण्डलमहं नयामि तत्प्राणव्ययेन प्रतिज्ञानं पालयिष्यति। श्रद्दधे ममानुयात्रिकाः सत्याग्रहिण इव प्रतिपन्थिषु[6] मन्युं वा प्रद्वेषं वाऽकृत्वा प्राणान्मोक्तुमर्हन्तीति।

आनन्द इत्यतः प्रस्थाय श्रीगान्धी नवा इत्याख्यं ग्राममापत्। अत्र शुश्रूषून्ग्रामीणान् संबोधयन्महात्मेदमभाषिष्ट—कियच्चिरं यूयं रक्षिवृत्तिमुपजीवन्तः शासनाधिकृतः सहोद्योक्ष्यध्वे तत्साहायकं वा

---

१. आवर्तितुमिच्छामि। वृद्भ्यः स्यसनोः इति वा परस्मैपदम्। न वृद्भ्यश्चतुर्भ्यः इतीण्निषेधः।

२. ओहाक् त्यागे इत्यस्मात्सनि लटि रूपम्।

३. समौ संवसथग्रामौ—इत्यमरः।

४. प्रणयः प्रेम। प्रणयास्त्वमी। विस्रम्भयाच्ञाप्रेमाणः—इत्यमरः।

५. तापं शमयतीत्यर्थः। स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः इति शाकुन्तले।

६. शत्रुषु। परि दोषाख्याने पन्थयितुं शीलः। अभिघातिपराराातिप्रत्यर्थिपरिपन्थिनः—इत्यमरः।

करिष्यध्व इति। सत्याग्रहिणः किमपि गोप्यं नास्ति। प्रकाशा मेऽभ्युपायाः। लवणादौ प्रथमायां जीवितापेक्षायां ये राजमन्त्रिण करं न्यस्यन्ति रक्षिषु चाधिकं धनमुत्सृजन्ति तेषु विरक्तेर्जननं मे धर्मः। यद्यहं बन्दिग्राहं[1] गृह्येय श्रीवल्लभभाईपटेल इव च मासत्रयं कारायां वस्तुमाज्ञाप्येय तर्ह्यहं हृष्यामि प्राड्विवाकः शासनाधिकृताश्च हृष्यन्ति। ममासेधदिवस उत्सवेनाभिनन्द्यताम्। परं नैतत् पर्याप्स्यति। त्यागपत्रैरेवाहं न सन्तोक्ष्यामि। लवणकरे सत्याग्रहमास्थास्याम इति भूयोभिर्युष्माभिः प्रतिज्ञायतामितीच्छामि।

चैत्रे कृष्णसप्तम्यां सत्याग्रहिमण्डलमङ्खोलीतिनाम्नि ग्रामे न्यविशत्। तत्र लोकाः श्रीगान्धिभाषितान्यावेदयितुं समाजेषु संनिहितं रक्षिणामेकं कार्याध्यक्षं सर्वस्मात् संव्यवहारात्तथा बहिरकुर्वन् यथा स भोज्यादिकमपि नालभत्। इदं च महात्माऽवेदीत्। अपरेद्युः स जम्बूसर इत्यत्र प्राप्त एतदधिकृत्य लोकानेवमबूबुधत्—

नायं नो धर्मो राजनियुक्ताननशनेन नाशयेमेति। यदि कश्चिद्राजनियोगी ममाङ्गमाग्नेयगुलिकया क्षणुयात् पश्चादाशीविशेषण[2] च दश्येत तर्ह्यहं सत्यपि प्राणसंशये तद्विषं पास्यामि। इमं धर्ममाचरामि। युष्माभिरपि स एवाचर्यताम्। पञ्चनद इव बलात् प्रवर्तितैरपि युष्माभी राजनियुक्ता न प्रणन्तव्याः परं प्राणभृत इति तेभ्योऽन्नं तु देयमेव। मां कारामपि नयन्तस्ते मे मित्रधेयान्येवेति।

एवं ग्रामाद् ग्रामं यन् मनस्वी श्रीगान्धी स्वसहायेषु किमपि शैथिल्यं तनूनि च कानिचित्स्खलितान्यैक्षत। सुरतप्रदेशे यात्रायाः संविधातृषु चामितव्ययवचनीयम्[3] पश्यत्। तद्यथा। स सुरतात् पयसः

---

१. उपमाने कर्मणि च इति कर्मण्युपमान उपपदे णमुल्।
२. आशीविषः सर्पः। आशिषि विषमस्येति पृषोदरादित्वात्साधुः। केचित्त्वी-आशीस्तालुगता दंष्ट्रा तया विद्धो न जीवति इति ह्युक्तम्। केचित्त्वीकारान्तमाशीशब्दमाहुः। आशीमिव कलामिन्दोः इति राजशेखरः इति भानुजिदीक्षितः।
३. वक्तव्यं, गर्ह्यम्। न कामवृत्तिर्वचनीयमीक्षते इति कुमारे।

शाकादीनाञ्चाहरणमत्यर्थमद्वेट् । चैत्रे कृष्णचतुर्दश्यां भट्टग्राम इत्यत्र प्राप्तः श्रीगान्धी एतत्सर्वं मनसि कृत्वा नक्तं समेताँल्लोकान् हृदयग्राहिणीमर्थ्यामिमां गिरमगादीत् अहमनुदिनमात्मनि स्वीयेषु सहायेषु च दौर्बल्यमोक्षे । अतोऽहं सुरतस्थान् कर्मिणो जनान् मया सह कृतात्यन्तसंसर्गान् विज्ञापयामि न मम न च ममानुयात्रिकाणामतिरिक्ता विकारहेतव उत्पादनीया इति । वयं हि कोटिशोऽकिञ्चनान् भरतखण्डजान् प्रतिनिदध्मः । अतो वयमत्यन्तापेक्षिताधिकं व्यययितुं नार्हामः । युष्मांस्तु प्रतिनिदधानोऽहं भरतदेशजानां सामान्यस्यायस्य पञ्चसहस्रगुणं वेतनमधिगच्छति राजप्रतिनिधिरिति तमुपालभेयेति कथं युज्यते ।

यात्रावसाने परीक्षितायां गणनायां मैषा वचनीयता भूत्सर्वः सत्याग्रही भरतदेशे सामान्यस्याह्निकस्यायस्य पञ्चाशद्गुणेन द्रव्येण पोष्योऽभूदिति । अहं नितान्तं दविष्ये न्यरभविष्यामि च । यथेदानीं फलानि शाकान् पय आदीनि च सुरतादानाययामः तन्तुवापचक्राणि च बारदौलीतः प्रज्वलनान् प्रदीपांश्च विनियुञ्ज्महे तथा मन्ये सर्वस्य सत्याग्रहिणो व्ययः सप्तपणात्मकस्य पञ्चाशद्गुणतामापत्स्यत इति । अतः कर्मिभिर्व्ययेऽत्यन्तमप्रमत्तैर्भाव्यम् । यदि पयः सुप्रापं न स्यान्नाहं तानधिक्षेप्स्यामि । प्रज्वलनाः प्रदीपाश्च नात्यन्तमपेक्ष्यन्ते विशेषतो ग्रामीणसंसत्सु ।

नैशिक्यां[1] यात्रायां कर्मकराणां केनचिदधिष्ठितदारुपीठो गुरुरेकः प्रज्वलनः प्रदीपः शिरसाऽवाह्यतेति बलवन्निन्द्यम् । प्रतीच्येष्विदमसंभवि । न जातु कश्चिद् यूरोपीय एवं गुरुं पृथुं प्रदीपं शिरसा वहेत् । यस्य मे बलात्कारिते श्रम उपपन्नः प्रद्वेषः सोऽहं कर्मकरान् बलात् कर्म कारयेयेति कथं युज्यते ।

यदृते प्रदीपादिभ्यो वयं महतीषु समज्यासु[2] संनिधातमृते च

---

१. निशाप्रदोषाभ्यां च इति वैकल्पिकष्ठञ् । निशायां भवा नैशिकी ।

२. सभासु । समज्यापरिषद्गोष्ठीसभासमितिसंसदः—इत्यमरः ।

महतो व्ययाज्जनतां सन्देशं प्रापयितुं न पारयामस्तदाहं खिद्ये। स्वातन्त्र्यार्थेऽस्मिन्नुद्योगे वयं सद:परिकल्पनां वार्तापत्रवृत्तान्तानुच्चैर्भाषणानि वा नापेक्षामहे। स्वातन्त्र्यं हि परमेश्वरानुग्रहेणैवाप्यम्। पारमेश्वरोऽनुग्रहश्च मनःशौचेनान्तरज्ञानेन च विना सुदुर्लभः। यदि वयमात्मानं पाप्मभ्यो[1] न पुनीमः कोटिशो दरिद्राणां चान्तरतमाः प्रतिपुरुषा न भवामस्तदा मन्ये स्वराज्यं नाधिगंस्यते। मया तावद्योऽयं प्रक्रम आस्थितस्तमन्यथयितुं नालमस्मि। सर्वोऽपि जनो मां विरहयेच्चेदहमेकलो योत्स्ये।

वाचमवसाययन् श्रीगान्धी शौचं सेव्यतां विश्वसनशीलाभ्यो जामिभ्यो[2] मुग्धेभ्यो ग्रामीणेभ्यश्चागच्छन् सर्वः पणो निपुणमवेक्ष्यतामिति च सामाजिकान् सविनयमयाचीत्।

अद्यापि चाल्यमानया तर्कुट्या श्रीगान्धी ततः संमिलनात् प्रास्थित। स भवांस्तत्र चत्वारिंशतं कला अवदत्। तेनोदीर्यमाणानि वचांसि वाचंयमैः सामाजिकैः सादरमवहितानि। स्वेच्छासेवकानां सहायानां चातर्कितेन तर्जनेन सर्वे विस्मयमापन्नाः सर्वे च द्रवीभूताः।

श्रीगान्धी सत्याग्रहिमण्डलेनानुयातो चैत्रे शुक्लतृतीयायां प्रदोषवेलायां नवश्रीरित्यत्र प्रापत्। धामन्नितयतो नवश्रियं यावत्सर्वो मार्गः प्रोक्षितः प्रसाधितः प्रेक्षकजनैरुभयतोऽधिष्ठितश्चासीत्। अदृष्टचर इह जनतायामुत्साह प्रादुरासीत्। परःसहस्रा जना महात्मदर्शनसमुत्सुकाः समवायन्।

---

१. पापेभ्य इत्यर्थः। अस्त्री पङ्कं पुमान्पाप्मा पापं किल्बिषकल्मषम्—इत्यमरः। पुनातिरत्र पृथक्क्रियायां प्रयुक्तः। अतोऽपादानत्वात्पञ्चमी। तथा चोत्तरे रामचरिते प्रयोगः—पाप्मभ्यश्च पुनातु वर्धयतु च श्रेयांसि सेयं कथा इति।

२. कुलाङ्गनाभ्यः इत्यर्थः। जामिः स्वसृकुलस्त्रियोः—इत्यमरः।

३. अस्मीत्यहमर्थेऽव्ययम्। दासे कृतागसि भवेदुचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये—इत्यत्र यथा।

पारसीकसमाजं सम्बोधयन् महात्मा सोत्साहं करुणं च प्रयन्मद्यक्रयविक्रयौ त्यज्येयातामिति। पारसीकानां साहाय्येन मा कश्चिच्चषकमपि प्रापदिति सम्यगवधीयताम्। यदि भवन्तो लवणकरस्य मद्यव्यापारस्य चापनयनेऽमोघक्रिया भविष्यन्ति, जितमहिंसया भविष्यति। का सा शक्तिरिह जगति या तदानीं भरतखण्डजान् स्वराज्याधिगमाद्वारयिष्यति। यद्यस्ति सा तामस्मि[२] दिदृक्षे। सिद्धसमीहितो वाऽहं निर्वर्तिष्ये व्यसुर्मे तनुर्वा समुद्राम्भसि प्लोष्यत इत्युक्त्वोपाशमत् सः।

नवश्रीरित्यतः प्रस्थाय श्रीगान्धी चैत्रे शुक्लषष्ठ्यां जलालपुरमध्यगमत्। तत्र शुश्रूषून् समेताञ्जनान् सम्बोधयन् स इदं प्रावोचत् शबरवतीत्यतः प्रतिष्ठमानोऽहं न प्रत्यायं डाण्डीत्येतत्स्थानमाप्स्यामीति। प्रयाणप्रारम्भेऽपि मदीया अनुप्लवाः प्रयातुमभ्यनुज्ञायेरन् न त्वहमित्यचिन्तयम्। यदहमेतत्स्थानमापं तन्नाम सत्यस्याहिंसायाश्च बलं प्रकर्षं च व्यनक्ति। एतस्य कृते राजमन्त्रिणोऽपि कामयन्ते चेद्दिष्टचा वर्ध्यन्ताम्। यतो नाहं संशये ते मां ग्रहीतुमत्यर्थं प्रभवन्तीति।

यावच्छासनातिक्रमो निःप्रमाथतां नात्येति तावदिदं द्रष्टव्यमवशिष्यते प्रयाणं सोढवन्तो राजमन्त्रिणः श्वः प्रभृति संख्यातिगैर्जनैर्लवणविधानस्य विध्वंसनं सहिष्यन्ते न वेति।

ईश्वरेच्छा चेदहं श्वः प्रातः सार्धषण्नादमितायां वेलायां शासनातिक्रमं प्रक्रंस्ये[१]। चैत्रशुक्लाष्टमी घोराज्जल्लोद्यानवैशसात् प्रभृत्यस्माकं प्रायश्चित्तदिवसः स्मृता। अतो वयमेतन्मुख ईशानं प्रार्थयामह उपवसामश्च। आशंसे सर्वे भरतखण्डजाः श्वस्तः प्रवर्तिष्यमाणं जातीयसप्ताहं तेनैव भावेन निषेविष्यन्ते येनाय-

---

१. प्रारप्स्य इत्यर्थः। प्रोपाभ्यां समर्थाभ्याम् इत्यात्मनेपदम्। स्नुक्रमोरनात्मनेपदनिमित्ते इतीण्निषेधः।

मुपज्ञात.[1]। अहं दृढं विश्वसिमि यथा यथा देशकार्यतात्पर्य[2]मन्तः-करणवैमल्यं च वर्धेते तथा तथा त्वरितं सेत्स्यति सोऽर्थो यस्य कृते बुद्धिपूर्वमबुद्धिपूर्वं वा कोटिशो भरतदेशजाः प्रयस्यन्तीति।

जलालपुरं विहाय श्रीगान्धी डाण्डीत्याख्यं गन्तव्यं स्थानमगमत्। डाण्डीत्येषाऽनुवेलमेका ग्रामटिका। अत्र केवलं द्विशतं जना वसन्ति। ते च प्रायेण मत्स्यजीवाः। कूपद्वयमेवेह कस्यापि स्वमस्ति। तत एव पानीयं प्राप्यते। अत्र किमप्यभ्यवहार्यं नासाद्यते। अत्र वास्तव्या अपि सर्वमपेक्षितं वस्तुजातं जलालपुरादानयन्ति। अब्धितीरस्थितत्वादस्य ग्रामस्य प्रकृतिः स्वास्थ्यकरी नाम[3]। अत्र श्रीगान्धी मुम्बापुर्यां शस्त्रवणिजो मुहम्मदानुगस्य श्रीनिजामुद्दीनस्य वशिनो गृहिणोऽभ्यागतोऽभूत्। तस्यैवेह गृहेष्ववात्सीत्।

अष्टम्यां निर्दिष्टात् समयात् प्राक् चिरं शतशो जना मोटराख्ययानैर्गन्त्रीरथैश्च तत्र संनिपतितुमारभन्त।

आह्निकं दैवं कृत्वा झटिति श्रीगान्धी स्वेच्छासेवकैः परःशतैरितरैर्जनैश्च समन्वितः पादोनषण्नादमितायां प्रातस्तन्यां वेलायां विश्रमस्थानात् प्रास्थित। दशभिः कलाभिः स वार्धिवेलामापत्। उरोदघ्नं[4] च जलमवागाहिष्ट। वेलावृद्ध्या स वीचिक्षोभस्तथा महानासीद्यथा पुरुषद्वयं श्रीगान्धिनः करावालम्बत। स सलिलेऽन्तः सप्त कला अवास्थित। तेन कालेनाप्लवत देवमावाहयच्च। स्वेच्छासेवकाश्च नेतारमनु कृतोदकाः समजायन्त।

अभिषेकोत्तीर्णेषु तेषु बृहत्येका जनयात्रा विरचिता। पृष्ठे क्नूतेन[5] जघनवाससा खद्दरोत्तरीयेण च श्रीगान्धी स्थितः। पृष्ठत

---

१. उपज्ञा ज्ञानमाद्यं स्यात्—इत्यमरः।

२. तत्परे प्रसितासक्तौ— इत्यमरः। तत्परस्य भावः तात्पर्यम्।

३. प्रसिद्धेत्यर्थः। नाम प्राकाश्यसम्भाव्यकुत्साभ्युपगमेषु च—इति विश्वः।

४. प्रमाणे द्वयसज्दघ्नञ्मात्रचः इति दघ्नच्प्रत्ययः।

५. क्नूयी शब्दे उन्दे च इति भौवादिकात् क्तः। आर्द्रेणेत्यर्थः।

एकाशीतिः स्वेच्छासेवका महाञ्जननिवहश्च। उदवसित[1]मुपसर्पति महात्मनि श्रीमती सरोजिनी नायिका यात्रया संमिलिता।

स धर्षणादमिते काले सा जनश्रेणी वासभवनोपकण्ठे गर्तमेकमगमत्। श्रीगान्धी पङ्कपूर्णं तं गर्तं प्राविशत् प्रशान्तकारोऽवनतपूर्वकायः[2] स प्रतिषिद्धमक्षीवपिण्डं[3] स्वतः संजातमुदहरत्। स्वेच्छासेवकाश्च तथैव पिण्डान्तराण्युदहरन्।

इत्थं वृत्ते लवणविधानातिक्रमे श्रीगान्धी परिणतप्राये दिवसे समुदिताञ्जनान् संबोधयन्नगादीत्—मङ्गल्योऽद्यतनः प्रक्रमः। शासनाधिकृता अस्मान् ग्रहीष्यन्ति वा न वा, अस्माभिस्तु स्वधर्मश्चरितव्यः। विधातरि विश्वस्यास्माभिरद्य सत्याग्रहः प्रक्रान्तः। नाहं तावल्लवणमत्र प्रापं यावदाप्स्यामीत्यासीन्मेऽपेक्षा यतो भूयो लवणं राजनियुक्तैर्विध्वंसितम्। गुर्जरप्रदेशस्थान् प्रयुञ्जानस्तत्रभवानिदमन्वशात्—नित्यं शमप्रधानैरहिंसाव्रतैश्च भाव्यमिति। श्वस्तः सर्वो जनो यत्र तत्र प्राप्यं लवणमासादयितुं विनियोक्तुञ्चार्हतीति चाब्रवीत्।

विरतवचसि श्रीगान्धिनि तेन प्रातर्गृहीतं प्रमृष्टञ्च द्वितोलभारं लवणं सपादपञ्चशतेन रूप्यकैः श्रेष्ठिने रणच्छोडलालशोधनाय[4] सघोषणं विक्रीतम्।

वार्तापत्रप्रतिपुरुषेण दृष्टः पृष्टश्च श्रीगान्धीत्थं समदिशत्—सम्प्रति यतः पारिभाषिको व्यावहारिको वा लवणविधानातिक्रमः समजन्यतो यः कश्चिल्लवणविधानानुरोधेनात्मनोऽभियोगं न गणयति स सर्वो यत्रेच्छेद्यत्र वा सुकरं भवेत्तत्र शिल्पेन लवणं निर्मिमीत। कर्मिणो जना यत्र तत्र शिल्पेन लवणं निर्मिमतां निर्मितं चादो

---

१. गृहं गेहोदवसितं वेश्म सद्म निकेतनम्—इत्यमरः।
२. पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणेन इति तत्पुरुषः। कायस्य पूर्वः।
३. सामुद्रं यत्तु लवणमक्षीवं वसिरं च तत्—इत्यमरः।
४. एष जातिनिमित्तक उपाह्वयः।

विनियुञ्जतां ग्रामीणांश्च तन्निर्माणं बोधयन्तामिति मेऽनुशासनमिति।

एवं वृत्तो लवणविधानातिक्रमः। राजनियुक्तैरनुशिष्टा रक्षापुरुषा न केवलं नात्रान्तरायन्न[1]पि तु दूरत एवासत। परमन्यत्रातिक्रान्तलवणविधानाः शतशो जना अविलम्बितमगृह्यन्त कारासु च न्यक्षिप्यन्त। अतो द्व्यहं डाण्डीत्यत्रावस्थाय श्रीगान्धी तस्य नातिदूरवर्तिषु प्रदेशेषु विधानमतिक्रमितुमना अभूत्।

एवं निश्चित्य श्रीगान्धी प्रतिषिद्धलवणोद्धरणेन शासनमतिक्रमितुं भीमरदनामानं ग्राममगच्छत्। तत्र हि वहून् दिवसान् रक्षापुरुषा इतस्ततोऽदरीदृश्यन्त। लवणविधानमतिक्रामन् महात्मनस्तनूजः श्रीरामदासश्चाध्रियत। महात्मन आगमात्प्रागेव स्वेच्छासेवकाः कार्यमारप्सत। रक्षिणोऽत्यन्तं तिरोदधत[2]। नैक ऽपि रक्षापुरुषस्तं प्रदेशमभितः संन्यधत्त।

श्रीगान्धी स्वेच्छासेवकांस्तत्र समुदितांल्लोकांश्च सम्बोधयन्नभाणीत्—राजमन्त्रिणो नेतॄन्धृत्वाऽस्माकं नाडीं परीक्षन्ते प्रतीतिं चोत्पादयन्ति। इदं च नः कृत्यं कारावासेन न वयं भीषयिष्यामह इति प्रदर्शयेमेति। नायकानामनारतमागच्छन्तीभिरासेधवार्ताभिर्जनितो गुरुः प्रहर्षो न मे वपुषि माति। स्वेच्छासेवकानामभिमुखीभूय महात्मेत्थमात्मनः परितोषमकथयत्—केषुचिद्वृद्धेष्वपि युष्मान् प्रसन्नवदनान्दृष्ट्वाहं प्रीये। आशासे यदा युष्मासु केचन क्षता मृताश्च भुवि शयीरन्, तदापि सर्वान्वस्तथैव प्रसन्नवदनान्द्रक्ष्यामीति। जातीयसप्ताहं यावच्चणकाद्यन्नमेव यथापुरमुपजीव्यताम्। अतीते तस्मिन्यथाकामं भोजनान्तरमाश्रीयतामिति च तानुपादिशत्। ततोऽग्रेऽप्येतदेवोपभुज्यतामितीच्छामि। साम्प्रतं लोका युष्मभ्यमभ्य-

---

१. अस्मिन्कर्मणि विघ्नं नाकुर्वन्नित्यर्थः। मध्ये नागच्छन्निति पदार्थः।

२. अन्तर्दधते स्मेत्यर्थः। अत्र दधातिरकर्मकः। तथा च प्रयोगः—इति व्याहृत्य विबुधान् विश्वयोनिस्तिरोदधे इति।

वहार्यं ददति। किं करिष्यध्वे यदि ते राजप्रेरणया तद्दानं प्रत्याचक्षीरन्निति व्याहृत्य व्यरमत्सः।

पुनः श्रीगान्धी डाण्डीत्येतत्प्रत्यावर्तत। तत्र चैत्रे शुक्लचतुर्दश्यां महान्तं जननिवहं सम्बोधयन्स्माह—एकत्रिंशत्युत्तरनवशतोत्तरसहस्रमिते ख्रिस्ताब्दे कृतान्येनांसि पुनरद्य समाचर्यन्त इत्यावेदयन्ति पत्राणि मया मुम्बापुरीतः प्राप्तानि। तत्र हि केचन श्रद्धोन्मादवन्तोऽन्तिकस्थानां जनानां शिरोभ्यः शिरस्का[1]न्यपनयन्तीति वृत्तान्त उपलब्धः। नाहं जाने सत्या प्रवृत्तिरियमिति। परं यद्येवमिदमतीव शोच्यम्। एतादृंशि हि कर्माणि प्राप्तप्रायमपि विजयमसमस्त आच्छिन्दन्ति। नेदं परप्रमाथकरमायोधनम् प्रत्युतात्मपीडाकरम्। यत्र देशहितां कार्यपरिपाटीं नानुवर्तन्ते ते हृदयङ्गमैर्वचोभिर्विज्ञाप्याः। अन्ये समाभिप्रायान् न बलाद् ग्राह्याः। इदं मे वाचिकं[2] यत्र तत्र लोकाः श्रावयितव्याः। यदि यूयं पर्याप्तमन्तःशुचय उत्साहवन्तश्च तर्हि स्खलत्सु सत्याग्रहमास्थातुमर्हथ। यदि मे पर्याप्ता विशुद्धिरुत्साहश्च स्यातामहं स्वयमेव प्रमाथे प्रवृत्ते सत्याग्रहमास्थास्यामि।

परमिदानीं युद्धं विरमयितुं नालमस्मि। इदं हि मे चरमं युद्धम्। अहं यत्किमपि कुर्यां न तद्युद्धप्रवृत्तिं विच्छेत्स्यति। परं यूयं मां सत्याग्रहपरिग्रान्न वारयिष्यथ यदि लोकः साहसं कुर्यात्। इदं च मे कर्म न यन्त्रेणेव कार्यतेऽपि तु सहजावबोधेन प्रवर्तते।

अहं प्रतिपद्येऽहिंसेति मे मर्मस्थानम्। यदा कदाचिदहमभ्युपाय इति वा धर्म इति वाऽहिंसामभ्युपेतवतो जनानितरान्प्रमथ्नतः शृणोमि तदा क्षुभ्यामि कञ्चित्कालं रामनाम जप्त्वैव च स्वस्थमना भवामि। यस्य म एवंशीघ्रवेदि[3] चेतः सोऽहं न वेद कदाहं प्रायोपवेशनं[4]

---

१. शीर्षकाणीत्यर्थः। शिरसः प्रतिकृतिः शिरस्कम। इवे प्रतिकृतौ इति कन्।

२. सन्देशवाक्। सन्देशवाग्वाचिकं स्याद् इत्यमरः। वाचो व्याहृतार्थायाम् इति ठक्।

३. शीघ्रं वेदयते चेतयते इत्येवंशीलम्।

४. संन्यासवत्यनशने पुमान् प्रायः—इत्यमरः।

कुर्यां यदि येषु साध्वाचारः संभाव्यते ते प्रमाथे प्रवर्तेरन् । काले काले मया सम्बोध्यमानेषु समाजेषु ये संन्यधीयन्त, अहिंसाविषयकानुपन्यासांश्च प्रत्यपद्यन्त ते यदि तान् काले कालेऽतिवर्तेरंस्तर्हि शीघ्रग्राहि मे मनो बलवत् संक्षुभ्यति । अतश्चाहं न वक्तुमीशे तदाहं किं कर्तुमकर्तुं वा प्रभवामीति । अन्त्येऽस्मिन् पुण्याहे[1] सर्वान्वः प्रबोधयामि योऽयं नो युष्मासु विश्वासो यमुपाश्रित्य चाहमन्त्येऽस्मिन्युद्धे प्रवृत्तः स नो घातनीय इति ।

नाहं प्रमाथमध्यक्षयितुमीहे । यद्यप्यहं जाने भरतवर्षीयाः प्रमाथं कर्तुमर्हन्तोच्छेयुश्चेत् । परं नैषा मे पद्धतिरस्ति । आशासे च न कर्हिचिद्भवितेत्युक्त्वा वचः समहरत् ।

वैशाखे कृष्णप्रथमायां कल्ये[2] श्रीगान्धिनः स्वेच्छासेवकाः कटाहत्रये लवणं समभरन् । रक्षिणां पर्यवेक्षकस्तान् कतिपयान् सहादाय तत्रागच्छत् । परं स्वेच्छासेवकास्तत् परितो मण्डलाकारेण निरन्तरमतिष्ठन् । एवमवस्थिते रक्षापुरुषा अविहत्य[3] तत्कार्यं प्रत्यागच्छन् । एतदधिकृत्य महात्मा स्वेच्छासेवकान्संबोधयन्नवादीत्—इतः पूर्वमिदमेवाहं युष्मानुपादिशं युष्माभी रक्षिभिर्वो बद्धमुष्टिभ्यो लवणस्याच्छेदो विरोद्धव्यः । तैः क्रियमाणा हतिततयश्च जोषमनुद्धतं च सोढव्या इति । नाहमेतावता परितुष्यामि । अतः परं प्रचिक्रमिषामि । इच्छाम्यतः प्रभृति यूयमात्मानं न केवलं मुष्टिबद्धस्यानर्घस्य निक्षेपस्यापि तु लवणकटाहेषु संप्रति संभ्रियमाणस्य शेवधेर्गोपां[4] गणयध्वमिति । इमं शेवधिं प्राणैर्गोपायत यदि

---

१. पुण्यं च तदहश्च पुण्याहम् राजाहःसखिभ्यष्टच् । पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा ।

२. प्रभाते ।
कल्यं प्रभाते क्लीबं स्यात्कल्यो वाक्श्रुतिवर्जिते ।
सज्जनीरोगदक्षेषु कल्याणवचनेऽपि च ।। इति मेदिनी ।

३. विघ्नमनुत्पाद्य । वा ल्यपि इत्यनुनासिकलोपः ।

४. गोपाः परित्राता । आतो मनिन्क्वनिब्वनिपश्च इत्यत्र चकारानुकृष्टो विच् ।

तदस्य देयं मूल्यम् । यदा रक्षापुरुषाः कटाहाभिद्रवेच्छयाऽऽयान्ति तान् परिवेष्टयत । मा ते तावत्तान् स्प्राक्षन् यावन्न युष्मान्शारीरेण बलेनाभिभावयेयुः । युष्माकं दुःखसंवेदनाया न केवलं स्वराज्यमुदेष्यत्यपि तु तद्रक्षार्था निःप्रमाथा वाहिनीति ।

श्रीगान्धी डाण्डीतश्चारवादसंज्ञं स्वल्पमेकं ग्राममगच्छत् । चारवाद इत्यत्र केवलं द्वादशशतं जना वसन्ति । अतः कतिचित्सु नल्वेषु[1] धरासनेत्याख्यः प्रदेशो यत्रास्ति राजकीया लवणशिल्पशाला ।

एतदभिमुखे नातिविप्रकृष्टे प्रदेशे महाञ्जनसंनिपातोऽभूत् । तत्र संनिपतितैरनल्पसंख्यैर्ग्रामीणैः श्रीगान्धी नूतनेन प्रकारेण जयतु जयतु लवणतस्कर इति घोषणाभिः सभाजितः । अनेन सभाजनेन प्रयुक्तो महात्मा गुर्वर्थामेकां घोषणामकरोत् ।

इमा जनघोषणा अधिकृत्य सोऽभणत्—अहमभिनवं लवणतस्कर इति शब्दं[2] यथा रोचये न तथा महात्मेति । अद्यत्वे महात्मेति व्यपदेश इह जनपदे सुप्रापः, परं लवतस्करता दुरापा । लवणन्यासादल्पीयस्या मात्राया उद्धरणेन न वयं लवणतस्करतामापद्यामहे । सा हि धरासनेत्यत्र सञ्चितानां लवणचयानामात्मसात्क्रिययैव लभ्या । वयं तावदेव लवणतस्करा इति व्यपदेशभाजो भवामो यावल्लवणमाददाना महान्तं क्लेशं सहामहे । स्यादेतदवमाचरतां नः शिरोऽस्थीनि भज्येरन् एवं सत्यपि प्रशान्तैरनाक्रोशैरस्माभिः सर्वा ताडना सोढव्या । तदा कारुणिकः परमेश्वरः सदयं नो द्रक्ष्यति । अहं विश्वसिमीतरत्रापि जगति करुणा समस्ति । परमार्थलवणतस्करः स्यामित्युत्कटो मेऽभिलाषः । यदि यूयमप्यहमिव परमार्थलवणतस्करा भुभूषथ, तदात्मानं शुन्धत खद्दराख्यं वासः परिधत्त सुरापानं च विजहीत । तदाहमनुशासिष्यामि धरासनां गच्छता ऽत्रस्कन्दत यथापेक्षं च लवणं गृह्णीत ब्रूत च वयमस्य सर्वस्येश्महे इति ।

---

१. नल्वः किष्कुचतुःशतम्—इत्यमरः ।

२. शब्दो व्यपदेश उपाधिर्वा । द्वितीयगामी नहि शब्द एष नः—इति रघौ ।

अन्यत्र लोकानुपदिशन् श्रीगान्धी धरासनाशिल्पशालाक्रमं चिन्तयामि, बहोः कालात् प्रागेव च तं सिषाधयिषामीति प्राख्यापयत्। अनेन प्रख्यापणेनोद्वेजिता राजमन्त्रिणोऽस्य धरणं बुद्धावकुर्वन्।

वैशाखे शुक्लसप्तम्यामर्धरात्रे मण्डलस्य धर्माध्यक्षो मण्डलस्य रक्षिपर्यवेक्षकश्च स.युधैर्विंशत्या रक्षिभिः समेतौ जला पुरतः कराडीं प्रति प्रास्थिषाताम्। अचिरेण च तं प्रदेशमध्यगाताम्। तत्र श्रीगान्धी कञ्चित् कालं निविष्ट आसीत् स्फुरत्प्रकाशाभिर्दीपिकाभिस्तौ खट्वामधिशयानं महात्मानमभ्यावर्तेताम्। तन्मुखे च तद्विलसनमकुरुताम्। तेन सोऽजागः। रक्षिणः खट्वां पर्यक्षिपन्। श्रीगान्धी धर्माध्यक्षादीनपृच्छत्—भवन्तो मां जिघृक्षन्ति किम्। धर्माध्यक्षः प्रत्यवोचत्—बाढम्, वयं भवन्तमासेद्धुमादिष्टाः। ततो महात्माऽन्वयुङ्क्त—किं दन्तान् पुनीयामाहोस्विन्नेति। रक्षिपर्यवेक्षकः प्रत्यभाषत—न वयं दन्तपवनं विरुन्ध्म इति। यदा श्रीगान्धी कूर्चकेन दशनेषु लवणमर्पयन्नासीत् तदा स्वेच्छासेवकास्तत्र समवायन्। ततः स मण्डलस्य धर्माध्यक्षमप्राक्षीत् को मेऽभियोगो येनाहमासिद्ध इति। इत्थं विज्ञप्तो धर्माध्यक्ष इत्यधिकारपत्रमवाचयत्—

महात्मनः आसेधः

यतो राजमन्त्रिणः श्रीमोहनदासकर्मचन्द्रस्य गान्धिन उद्योगं सोद्वेगं पश्यन्त्यतस्त आज्ञापयन्ति सप्तविंशत्युत्तराष्टशतोत्तरसहस्रमिते ख्रिस्तवत्सरे लब्धोदयेन पञ्चविंशेन नियमेन सोऽवरोद्धव्यः। यावच्च राजमन्त्रिण इच्छेयुस्तावत् कारायां रक्षणीयः, तदर्थं च यरोडाकारामह्नाय[1] नेय इति।

इदं च पत्रं मुम्बाराजमन्त्रिभिः स्वहस्तपरिचिह्नितमासीत्। वाचित एतस्मिन् पत्रे श्रीगान्धी नित्येन प्रश्रयेण महानयं प्रसाद

१. सपदि। स्राग्झटित्यञ्जसाह्नाय द्राङ् मङ्क्षु सपदि द्रुते—इत्यमरः।

इत्यवादीत्। सज्जोऽस्मि गन्तुम्। केवलं काश्चित् कला दैवतं प्रार्थयिष्य इति चाब्रवीत्। ततः सामवायिकं दैवतप्रार्थनमभूत्। खारेनामा पण्डिततल्लजः श्रीगान्धिनोऽभीष्टां गीतिकामगायत्। पर्यवसित एतस्मिन् महात्मा राजप्रतिनिधिमुद्दिश्य ह्यो विन्यस्ताक्षरं पत्रं स्वेच्छासेवके न्यास्यत्। एवं संविदधानं महात्मानं त्वरतां भवानित्ययाचद्रक्षिणामध्यक्षः।

एवं विज्ञप्तः श्रीगान्धी हस्तनेयं प्रसेवं तर्कुटीं श्रीभगवद्गीतापुस्तकमाश्रमप्रार्थनापुस्तकं कतिपयीस्तूलपूणीश्चादत्त। तदा सहेतिभिः कतिचिद्भी रक्षिभिरध्यासितपूर्वे मोटराख्ये याने समास्तां भवानिति प्रार्थितः स तत्रोपाविशत्। उपविशन्तं तं कश्चित् स्वेच्छासेवक उपेत्यायाचत तात श्रीमत्यै कस्तूरबाय्यै सन्देशः कश्चिद् हारयितव्यश्चेदुच्यतामिति। धीरा सा सीमन्तिनी, न तस्या अस्ति सन्देशव्यपेक्षेत्युक्त्वा स आसनं पर्यग्रहीत्। यानं चापवाहितमभूत्।

यरोडाकारामवाप्य महात्मेत्यलापीत्—सौख्यस्य सुस्थतायाश्चानेन संविधानेन सुतरां परितुष्टोऽस्मि। यात्रा चातिरुचिराऽभूदिति। तत्र स कारापर्यवेक्षकाणां मूर्धन्ये मेजरडायल् इत्याख्ये समर्पितः।

बन्दिग्राहं गृहीतस्य श्रीगान्धिनोऽद्योपसप्ता मासाः। नृणां श्रेष्ठो मुनिवृन्दारक[1]वृन्दवन्द्यः स कारायां निरुद्धः कालं क्षपयति। तेन प्रवर्तितः संपरायोऽद्याप्यनारतं प्रवर्तते। षष्टिसहस्रं योद्धारश्च बद्धाः। शतशोऽभिरूपाः[2] सुकुमाराः कुमारा अनवद्यहृद्यरूपा व्युत्पत्तिमत्यः पतिवत्न्यः[3] स्तनन्धयान् धापयन्त्यो जामयः श्रीमन्तोऽभिजनवन्तो ज्ञानवन्तः सहस्रशो युवानः स्थविराश्च सहर्षं कारानिरोध-

---

१. मुनिप्रवरनिवहैः स्तुत्य इत्यर्थः। वृन्दारकनागकुञ्जरैः पूज्यमानमिति समासः। वृन्दारकः सुरे पुंसि मनोज्ञश्रेष्ठयोस्त्रिषु—इति मेदिनी।

२. मनोज्ञाः। प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः—इत्यमरः।

३. पतिवत्न्यः जीवद्भर्तृकाः। अन्तर्वत्पतिवतोर्नुक्।

मलप्सतेति प्रतिहार्यमिव[1] संवृत्तम् । सत्यमेव जयते नानृतम्, यतो धर्मस्ततो जय इत्यनाशङ्क्चे श्रुतिस्मृती ब्रूतः । यदि श्रौती स्मृत्युदिता वा वाग् विप्लुतार्था न भवति यथा नः प्रत्ययस्तदा ध्रुवं महात्मा जेष्यति ध्रुवं च भारतं वर्षं स्वातन्त्र्यमाप्स्यतीति ।।

इत्युपाध्यायश्रीचारुदेवशास्त्रिण: कृतौ श्रीगान्धिचरिते
षष्ठ: परिच्छेद: ।।

।। सम्पूर्णश्चायङ्ग्रन्थः ।।

★

१. प्रतिहार: माया स एव प्रातिहार्यम् । स्वार्थे ष्यञ् ।

मेघप्रबोधनम्

(रच०—डा०रमाकान्त शुक्लः, ६ वाणी-विहारः
नयी दिल्ली-११००५९)

क्रूरहृदय मेघ ! कथं सुप्यते त्वया ?
गर्ज्यते न तर्ज्यते न वृष्यते त्वया ।
कोऽस्या अपराधोऽभूद् रोषमितो येन
मेदिन्यै जीवनं न दीयते त्वया ॥ क्रूरहृदय मेघ०

जल्पयसि धरणीं नु हहा ! शंकसे न भोः !
कर्तव्यमकृत्वा त्वं लज्जसे न भोः !
सर्वंसहवसुन्धरा तुद्यते त्वया ॥ क्रूरहृदय मेघ०

प्रथमे ह्याषाढदिने दृष्टो न त्वम्
श्रावणेऽथ भाद्रपदे वृष्टो न त्वम्
कार्यनिहसि वद क्व खेल्यते त्वया ? क्रूरहृदय मेघ०

वसुधाहृदयं भिन्नं पश्य कीदृशम्
खगमृगगणवैवश्यं पश्य कीदृशम् ।
अपि कर्षकदीनदशा लक्ष्यते त्वया ? क्रूरहृदय मेघ०

आतपनिःश्वासान् हा ! धरा मोमुचीति ।
रारटीति चातकः पिकश्च रोरुदीति
क्रन्दनं निशम्य मौनमास्यते त्वया ! क्रूरहृदय मेघ०

पशुगण उद्विग्नमना हन्त बम्भ्रमीति
मीनगणः कासारे हन्त तात्रसीति
दुर्भिक्षं क्षाल्यते कथं न हा ! त्वया ? क्रूरहृदय मेघ०

तप्तानां त्व शरणं कथ्यसे मुधा
पर्जयादन्नसम्भवो मतो मुधा
यर्हि जगत् तप्तं सन्ताप्यते त्वया ॥ क्रूरहृदय मेघ०

त्वय्यायत्तं कृषिफलमिति ये प्राहुः
किं ते कविकुलगुरवोऽनृतमेवाहुः ?
किं तेषां कलकीर्तिर्दूष्यते त्वया ! क्रूरहृदय मेघ०

दोला नो मल्हारं नापि कज्जली
नो कर्गलनौकैवर्तकसुमण्डली ।
नो वर्षास्नानमभूत्, किं कृतं त्वया ! क्रूरहृदय मेघ०

उद्याने सम्फुल्लं नीपसुमं नो
रम्या हरितालिकातृतीयापि च नो
सर्वमिदं वीक्ष्य कथं हृष्यते त्वया ? क्रूरहृदय मेघ०
किं तडिता सेवाव्रततो निवारितः ?
आहोस्विच्छक्रेण त्वं निलम्बितः ?
किं नातपतप्तवनं सिच्यते त्वया ? क्रूरहृदय मेघ०

प्लावनं क्वचित्तथा क्वचित्त्ववर्षणम्
उभयथापि हन्यते त्वया तु कर्षणम् !
नो कथं विनाशतो विरम्यते त्वया ॥ क्रूरहृदय मेघ०
स्वनियोगमशून्यं कुरु वर्ष सत्वरम् ।
नर्तय शितिकण्ठगणं जलद ! सत्वरम्
चातककुशलं न कथं पृच्छ्यते त्वया ? क्रूरहृदय मेघ०

पादपेषु वल्लरीषु वर्ष वर्ष वर्ष
ग्रामनगरवीथिकासु वर्ष वर्ष वर्ष
नवजीवनमेतेभ्यो दीयतां त्वया । क्रूरहृदय मेघ०

पशुगणस्तृणानि गोचरेषु चञ्चुरीतु ।
कर्षकोऽथ कार्मिको मुदं च बाभजीतु ।
सान्त्व्यतां बलाकेयं साम्प्रतं त्वया । क्रूरहृदय मेघ०

अल्पय दारुणविपदं जीवखेदिनीम्
तर्पय धारासारैस्तप्तमेदिनीम् ।
अयि नीरद ! मे वचनं श्रूयते त्वया ? क्रूरहृदय मेघ०
अधिकं त्वां प्रेरयितुं नाहमुत्सहे
निर्ह्रीकं ह्रेपयितुं नाहमुत्सहे ।
स्तोकं बहु नैव किमिति गृह्यते त्वया ? क्रूरहृदय मेघ०

क्रूरहृदय मेघ ! कथं
कुलिशहृदय मेघ ! कथं
अयि निर्घृण मेघ ! कथं सुप्यते त्वया ?
गर्ज्यते न तर्ज्यते न वृष्यते त्वया ?
क्रूरहृदय मेघ !

(रचनातिथिः ५-१०-१९८७ ई०)

हिमगिरे !

—प्रो० देवदत्त भट्टिः, संस्कृतविभागाध्यक्षः, राजकीय
महाविद्यालयः, मालेरकोटला (पंजाबः)

हिमगिरे !
भारतदेशस्य रक्षकः प्रहरी च कथ्यसे।
त्वं सदैवास्य शीलमरक्षः।
एतस्य गरिमानमैधथाः।
स्वाक्षुण्णखनिजग्रामैरिममैश्वर्यशालिनकमकरोः।
अमृतपयसा चास्य सस्यान्
सेचितान् श्यामलांश्च व्यदधाः।
किमधिकम् ?
त्वं चेन्नाभविष्यः
भारतं भारतं नाभविष्यत्।
वयं वयं नाभविष्याम।
अद्य पश्यति त्वयि
देशोऽयं नश्यति।
इतिहासमानितोऽस्य गरिमा
भूतस्य विषयो जातः।
तव साक्ष्य एव—
अस्योपवनानां सुमेभ्यः सुवासः प्रतिष्ठते।
प्रत्येकं सुमं स्वदलानि बद्धुं नालम्।
उद्यानपालो गाढं स्वपिति।
भृशं प्रबोधितोऽपि न बोधते।
अत्र पुष्पाणामेव मिथः कलहः—
रक्तजपा श्वेतां, श्वेता कृष्णाम्,
कृष्णा चेतराणि जपापुष्पाणि
परकीयानि मन्यमाना विभक्तुं तत्परा वर्तते।
त्यजत पुष्पाणां वृत्तम्।
प्रसूनदलानि—
यानि युगपदेव मुकुलितान्यासन्।

युवत्वं च प्रापन्
इतिहासेन येषाम्
पुष्पेभ्यः पार्थक्यस्य कल्पनाऽपि न कृता ।
तान्यद्य, पुष्पबन्धे स्वपार्थक्यबीजान्यन्विष्यन्ति ।
बालपादपस्य प्रतीपे द्वे शाखे विस्मरतः—
यत्तयोः स्कन्ध एकः, मूलमेकम्,
तयोर्जन्मभूरेका, स्वामी एकः,
तयोः कर्म गुणो धर्म एकः ।
इदानीमेतस्यामनैक्यप्रतियोगितायाम्
सर्वेऽहमहमिकया न्यक्कर्तुमीहन्ते ।
स एव प्रशस्यते, योऽनैक्यं साधयति ।
स एव महानन्वेषकः,
यो नवान् पार्थक्यबिन्दून् अन्विष्यति ।
स एव वीरो मन्यते—
योऽधिकाधिकान् निरागसो हन्ति ।
शिष्टा जोषमासीनाः ।
इतरे दोषारोपरताः ।
यत्र तत्र सर्वत्र—
विधवानां प्रोञ्छितसिन्दूरम्,
भग्नकङ्कणानि च राशिभूतानि ।
सद्यः शून्यक्रोडाया मातुः क्रन्दनेन
धरा वेपते ।
किन्तु, हे हिमगिरे !
त्वमद्यापि जोषमासीनः
क्रन्दनमेतन्न शृणोषि ?
स्यात्ते कर्णशष्कुल्यौ हिमपूरिते !
रक्तसरितो महासागरे पतन्ति,
न तास्त्वामुपयान्ति ।
कथय—
किं तवाक्षिणी पिहिते ?
किं त्वामेवरेस्टगन्तारः
परश्शताः यात्रिणो न वदन्ति ?

किं त्वं नाभिगन्धैः सुरभितशिलः सन्
उन्मादितः ?
किं त्वं कंचन दशाननं प्रतीक्षसे ?
यस्त्वां स्वभुजोच्छ्वासित—
प्रस्थसंधिं कुर्यात् !
हिमगिरे !
अवस्कन्द पिशाचानेतान्,
ये त्वां वृद्धां मातरम्
तस्या अंगप्रत्यंगानि
संविभक्तुं यतन्ते ।
हिमगिरे !
प्रवाहय चिरसञ्चितं सकूलं हिमम्,
निमज्जय चैतान् मातुः 'सुपुत्रान्' ।
गृहस्य प्रतिष्ठा गृह एव तिष्ठेत्,
आत्मनश्च वृत्तमात्मन्येव वर्त्तेत ।

मातरमाहुः

—प्रो० देवदत्त भट्टिः, संस्कृतविभागाध्यक्षः, राजकीय
महाविद्यालयः, मालेर कोटला (पंजाबः)

कदाचित्
कयाचन म्लानाननया रुदत्या च
योषिता
एवमभवन्मे संवादः—
"काऽसि ?"
"ते मां भारतमातरमाहुः ।"
"किमर्थं रोदिषि ?"
"शीलभङ्गाशंकया ।"
"कुतस्ते शीलभङ्गाशंका ?"
"निरूपित-मूल्येन कार्यनिर्वाहकात्,
स्वार्भकादेव ।"

देववाणी-परिषद्वार्ता

(१) देववाणी-परिषदा २०-८-१९८७ तारिकायां स्व आजीवनसदस्यः विश्रुतो विद्वान् कविश्च डा० राधावल्लभत्रिपाठी सप्तमविश्वसंस्कृतसम्मेलने उपस्थातुं हालैण्ड-गमनात्पूर्वम् अभिनन्दितः। अस्मिन्नवसरे डा० त्रिपाठि-महाभागस्य यात्राव्ययस्यांशिकसाहाय्यरूपेण सार्धाष्टसहस्राणि रूप्यकाणि परिषत्पक्षतः महासचिवेन डा० रमाकान्तशुक्लेन तस्मै सादरं समर्पितानि।

(२) २१.८-१९८७ तारिकायां वाणी-विहारे देववाणी-परिषदा स्व संकल्पनादिवसमुपलक्ष्य एकमायोजनं कृतम् यत्र दृश्यश्रव्यसामग्रीप्रदर्शन-मुखेन परिषदः प्रगतियात्रा प्रदर्शिता जाता। अस्मिन्नवसरे **'विश्वसंस्कृत-सम्मेलनेषु संस्कृतभाषायाः स्थानम्'** इति विषयमवलम्ब्य मुख्यवक्ता डा०रमेश कुमारलौ-महाभागेनाभिभाषितम्। परिषदुपाध्यक्षस्य डा०उमाकान्तशुक्ल-महाभागस्याध्यक्षत्वे अस्मिन्नवसरे एका संस्कृतकविगोष्ठी अप्यायोज्यत यत्र नैके कवयः स्व रचनाः प्रस्तुतवन्तः। अक्षरश्लोकमप्यायोज्यत।

परिषदोऽध्यक्षाणामाचार्यश्रीरमेशचन्द्रशुक्लमहाभागानां शल्यचिकित्सा-नन्तरं स्वास्थ्यलाभाय सदस्यैः परमेश्वरः प्रार्थितः। स्मरणीयं विद्यते यत् ११-७-१९८७ तारिकायां आचार्यशुक्लमहाभागानां पौरुषग्रन्थेः शल्यचिकित्सा जाता। तैरत्यन्तं दौर्बल्यमनुभूतम्। परिषन्महासचिवेन डा०रमाकान्तशुक्लेन सूचितं यदस्मिन् वर्षे दिसम्बरमासस्य त्रयोदशतारिकायां परिषदा नाट्योत्सवस्य दशमाखिलभारतीयसंस्कृतसम्मेलनस्य च आयोजनं करिष्यते।

संस्कृत-जगद्वार्ता

(१) राँचीसंस्कृतसेवासंघस्य रजतजयती-समारोहः आगामिनो दिसम्बर-मासस्य १२-१३ दिनाङ्कयोः राँचीनगरे समायोजयिष्यते यत्र अखिल-भारतीयसंस्कृतकविसम्मेलनादि-विविधकार्यक्रमा अनुष्ठास्यन्ते तथा च 'साम्प्रतिकं संस्कृतकवित्वम्' इति ग्रन्थोऽपि लोकार्पितो भविष्यति—इति अर्वाचीनसंस्कृत-सम्पादकं ७-८-८७ दिनांकितपत्रमुखेन सूचयामास राँची-संस्कृतसेवासङ्घस्य मन्त्री डा० वनेश्वर पाठकः। अधिकसूचनाप्राप्त्यै "इरगू रोड, पहाड़ी साइड, राँची—८३४००१" इति सङ्केते डा० पाठक-महाभागः प्रष्टव्यः।

(२) ९-८-१९८७ तारिकायां मुम्बय्यां भारतीयविद्याभवनस्य गीता-मन्दिरे मुम्बापुरीस्थ-सुरभारतीसोमैया-संस्कृतकेन्द्र-प्रभृतिविविधसंस्थानां

संयुक्ततत्त्वावधाने संस्कृतदिवससमारोहः समायोज्यत तत्र विदुषां भाषणानि, संस्कृतविदुषां सत्कारः, छात्रगणस्याभिनन्दनम्-इत्येतदादिकाः कार्यक्रमाः सम्पन्नाः। श्री दादा साहेब रूपवते-महाभागेन मुख्यातिथित्वं तथा श्रीप्रतापरावमाने-महाभागेनाध्यक्ष्यं सम्पादितम्। पं० गुलामदस्तगीर-विराजदार-महाभागेन धन्यवादो ज्ञापितः।

अस्मिन् समारोहे इमे संस्कृतसेविनः सत्कारमलभन्त—१. पं०रामस्वरूप शास्त्री, २. पं० राजाराम शास्त्री नाटेकरः, ३. श्री ग०बा० करन्दीकरः, ४. डा० ग० मो० पाटीलः, ५. प्रा० रं० रा० देशपाण्डे, ६. श्री बा०का० लिमये तथा ७. सौ० डा० उज्ज्वला धत्ते।

(३) ६-८.१९८७ तारिकायां पुण्यपत्तने 'उद्यानप्रासाद-कार्यालयः, सदाशिव पेठ पुणे-४११०३० इति स्थाने महाराष्ट्रशासनेन संस्कृतदिवस-समारोहः समायोजितः। महाराष्ट्रशासनस्य मानार्हसंस्कृतसंघटकेन श्री श्री० धुं० कवीश्वर-महाभागेन अतिथिभ्यः स्वागतं व्याहृतम्। ज्योतिष्-द्वारका-शारदा-पीठा-धीश्वरैः जगद्गुरुशङ्कराचार्यश्रीस्वामिस्वरूपानन्दसरस्वती-महाराजैः शुभाशिषो वितीर्णाः। श्री वि० वि० चिपलूणकरमहाभागेन प्रमुखातिथिपदतथा च शिक्षणसञ्चालकेन श्री ऋषिकुमार जांभुले-महोदयेन अध्यक्षपदं समलङ्कृतम्।

अस्मिन् समरोहे वक्तार आसन्—१. डा० श्री वा० सोहोनी २. श्री अनन्तराव पाटीलः तथा च ३. डा० सौ० सरोजा भाटे। एते महानुभावाः सत्कृता अजायन्त—१. पं० दत्तमहाराज धुण्डिराज कवीश्वरः, २. प्र०रं०द० वाडेकरः, ३, डा०चिं०ग० काशीकरः ४. डा०वसन्तराव पाटीलः, ५. डा०कुमुद पावडे च। छात्रगणस्याभिनन्दमप्यनुष्ठीयत।

(४) भारतस्य महामहिमराष्ट्रपतिना स्वातन्त्र्यदिवसावसरे समुद्घोषितं यदिमे दश संस्कृत-विद्वांसोऽस्मिन् वर्षे (१९८७-८८) संस्कृतसेवार्थं सम्मानयिष्यन्तेः—१. डा०पी० रामचन्द्रुडु, २. डा० करुणापति त्रिपाठी, ३. पं०टी० एस० श्रीनिवासशास्त्री, ४. पं जगदानन्द झा, ५. श्री वी० एन० के० रामानुजताताचार्यः, ६. डा० प्रभुदयालु अग्निहोत्री, ७. डा० रामचन्द्र द्विवेदी, ८. डा० विश्वनाथ बनर्जी, ९. डा० रामकरण शर्मा, तथा १०. श्री बालकृष्ण नीलकण्ठ पञ्चोली शास्त्री।

(५) दिल्ली दूरदर्शनेन संस्कृतदिवसावसरे १०-८-१९८७ तारिकायां रात्रौ ८.३० वादनवेलायां 'विदेशों में संस्कृत' इति विषयमवलम्ब्य एका

साक्षात्कार-वार्ता प्रसारिता यत्र अमेरिकातः प्रतिनिवृत्तो डा० रवीन्द्रनागर-महाभागः, डा० रमाकान्त शुक्लेन सह भाषमाणः विदेशेषु संस्कृतस्य दशाम-वलम्ब्य सूचनाः प्रादात्। कार्यक्रमोऽयं श्रीशरददत्त-महाभागेन निष्पाद्य प्रस्तुतः।

(६) १३-८-१९८७ तारिकायां रायपुरस्थे शासकीयसंस्कृतमहाविद्यालये रायपुर-सम्भागीय-संस्कृत-परिषदा स्वर्गीय पं०गोपीनाथकविराज जन्मशताब्दी-वर्षसंगोष्ठी समायोजिता यत्र मुख्यातिथिरासीत् खैरागढस्थ-इन्दिरा-कला-संगीतविश्वविद्यालय-कुलपतिःडा० कु०प्रेमलता शर्मा। रायपुरसम्भागायुक्तेन श्री शेखरदत्तमहाभागेनाध्यक्ष्यमकारि। सुश्री डा० उर्मिला शर्मा, डा० रामनिहाल शर्मा, डा० विष्णुसिंह ठाकुरः डा०विष्णुप्रसाद पाण्डेयश्चास्मिन्न-वसरे स्व विचारान् प्रकटीचक्रुः। परिषदः 'शोध-पत्रिका' अपि समुदघाट्यत।

(७) १८-८-१९८७ तारिकायां दिल्लीविश्वविद्यालयस्य टैगोरसभागारे श्री वैद्यरामगोपाल-शास्त्रिस्मारकसमिति-दिल्लीविश्वविद्यालय-संस्कृत-विभा-गाभ्यां षोडशी वेदगोष्ठी आयोजिता यत्र 'एकं सद् विप्रा बहुधा वदन्ति' इति विषयमवलम्ब्य दिल्लीस्थवेदसंस्थानाध्यक्षेण डा० फ़तहसिंहमहाभागेन निबन्धो वाचितः। गोष्ठ्या आध्यक्ष्यं गुरुकुलकांगडीविश्वविद्यालयस्य कुलाधिपतिना डा०सत्यकेतु विद्यालङ्कार-महाभागेन कृतम्।

(८) २३-२९.८.१९८७ ई० तारिकासु नीदरलैण्डदेशस्य लाइडिन-नगरस्थिते लाइडिनविश्वविद्यालये सप्तमं विश्वसंस्कृत-सम्मेलनं समायोज्यत तत्र षड्विंशागस्तदिवसेसंस्कृत-कवि-सम्मेलन मेकं संयोजितमभूत्। आधुनिक-संस्कृत-नवरचना अधिकृत्य परिचर्चागोष्ठी पूर्वयोजिता आसीदेव, परमद्यत्वे भारते कीदृशं नवरचनात्मकं साहित्यं जन्म लभते, सस्कृत-काव्यं कानि-कानि नवरूपाणि गृह्णाति इति परिज्ञाननिमित्तमेवात्र आधुनिक-संस्कृत-काव्यस्य व्या-वहारिकं प्रदर्शनं जातम्। कविसम्मेलनस्याध्यक्ष्यं भारतवर्तिनः खैरागढस्थ-कला-सङ्गीत-विश्वविद्यालयस्य कुलपति-पदमलङ्कुर्वाणया डा० प्रेमलता-शर्म महोदयया कृतम्। सम्मेलनस्य सञ्चालनम् इलाहाबाद-विश्वविद्यालयस्य संस्कृतविभागीयेन प्राध्यापकेन डा० हरिदत्त शर्मणा विहितम्। आरम्भे सागर-विश्वद्यिालयीय-संस्कृतविभागाध्यक्षेण प्रो० राधावल्लभ त्रिपाठि-महोदयेन विमानयात्रागानमेकं, पुनश्च 'भ्रान्त्वा क्लान्तः' इत्यादि गीतं श्रावितम्। जोधपुर विश्वविद्यालयीय-संस्कृत-विभागाध्यक्षेण प्रो० दयानन्द भार्गव-महोदयेन गुरुगभीरया गिरा कालिदास-साहित्य-स्वारस्य-समन्विता कवितैका

स्तुतीकृता । शान्तिनिकेतनवर्तिन्यां विश्वभारत्यां प्राध्यापकेन डा० मञ्जुल-ांक-महाशयेन अभिनवच्छन्दःशैलीमनुसरता संस्कृतकाव्यधारा प्रवर्तिता । खनऊ विश्वविद्यालयसम्बद्ध-महिलाविद्यालयस्य प्राचार्यया डा० मनोरमा-वारिकवयित्र्या सुरक्तया गिरा लोकगीतलयमनुसृत्य विरचितं श्रावणमास-वलम्ब्य, सम्मेलनतिथिमवलम्ब्य च सङ्गीतमयं सुगीतद्वयं गीतम् । दिल्ली श्वविद्यालय-वर्तिनी डा० सुन्दरी सिद्धार्थी स्वकवितायां सप्तमविश्वसंस्कृत-म्मेलनस्य वर्णनं कृतवती । पुणेनगरस्थितेन भण्डारकरप्राच्यशोधसंस्थान-म्बद्धेन विदुषा प्रो० जी०बी० पालसुले-महानुभावेन आंग्लकवितायाः एकस्याः स्कृतानुवादः प्रस्तुतः । डा० हरिदत्तशर्मणा योरोपसंस्कृतिमवलम्ब्य रचितं ीतमेकं 'योरोपीयम्' अपरञ्च संस्कृतलोकगीतमेकं प्रस्तुतम् । अवसाने ग्लैण्डदेशे सङ्गीताध्या-पिकायाः डा०इन्दुश्रीवास्तव्यायाः मङ्गलाशंसागीतेन कविसम्मेलनस्य समापनं सञ्जातम् ।

ज्ञातव्यमिदं यत् विश्व-संस्कृत-सम्मेलने इदमेव केवलमेतादृशमायोजन-मासीत्, यत् संस्कृतभाषामाध्यमेन प्रवर्तितमभूत् । यद्यपि वैदेशिकानाम् अवगमनाय कदाचित् रचनापरिचयरूपेण आङ्गलभाषाया अपि प्रयोगः स्वल्पः सञ्जातः । काव्यश्रोतॄणां सहृदयजनानां मध्ये अनेके भारतीयाः विविधदेशीयाः वैदेशिकविद्वांसोऽपि समुपस्थिता आसन्, यैः कविसम्मेलनस्य सफलसम्पादने भूरिशः प्रशंसनं वर्धापनं च विहितम् ।

(९) १९-९-१९८७ तारिकायां मुम्बय्यां देववाणीमन्दिरेण ब्राह्मण-सहायकसंघेन च पारितोषिकवितरणसमारोहः समायोजितः । तत्र १९८७ तमवर्षे आयोजितासु संस्कृतसंगीतस्पर्धासु विजेतृभ्यः प्रतियोगिभ्यः श्रीमती सुनन्दा स्वरूप-महाभागया पुरस्काराः समर्पिताः । मुख्यातिथिना श्री गोविन्द स्वरूप आइ०ए०एस०-महाभागेन पुरस्कृताः बाला आशीर्वचोभिः सभाजिताः ।

(१०) ६-१०-१९८७ तारिकायां जबलपुरस्थे शहीदस्मारकभवने मध्य-प्रदेश-संस्कृत-अकादेम्या 'स्वरिता' संस्कृतगीतसन्ध्या आयोजिता । अकादेमी-सचिवेन किञ्च सालङ्कारतवचोविन्यासप्रवीणेन कविना डा० भास्कराचार्य-त्रिपाठिना अस्या गीतसन्ध्याया सञ्चालनं कृतम् । आध्यक्ष्यं डा०बच्चूलाल-अवस्थिभिः कृतम् । गीतरचना प्रास्तावीरन्—१. डा०कु० प्रेमलता शर्मा, २. डा० प्रभुदयालु अग्निहोत्री, ३. आचार्य श्रीनिवास रथः ४. डा० विन्ध्येश्वरी प्रसाद मिश्रः, ५. डा० पुष्पा दीक्षिता, ६. डा० रहसविहारी द्विवेदी ७. डा० हरिदत्त शर्मा, च । डा० रमाकान्त शुक्लेन, ५-१०-१९८७

तारिकायां विरचितं 'क्रूरहृदय मेघ !' इति मेघप्रबोधनात्मकं गीतं श्रावितम् यस्मिन् शताब्द्या भीषणतमं शोषम् अवृष्टिम् च अधिकृत्य मार्मिका भावा अभिव्यक्ता आसन् । ६-१०-१९८७ तारिकायां जबलपुरे वृष्टिरपि सञ्जाता । संयोगमात्रमिदमथवा कवेराक्रोशस्य मेघे प्रभाव इति निर्णयस्तु उत्प्रेक्षाविशारदैरेव कर्तुं शक्यते । अस्तु !

६-१०-१९८७ तारिकायामेव जबलपुरस्थशहीदस्मारकभवने राष्ट्रपतिपुरस्कृतानां डा० प्रभुदयालु अग्निहोत्रिमहाभागानामन्येषाञ्च विदुषामभिनन्दमपि अक्रियत यत्र रानीदुर्गावतीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षैः डा० कृष्णकान्तचतुर्वेद-महाभागैरन्यैश्च विद्वद्भिर्महात्मभिश्च स्वविचाराः प्रस्तुताः । अभिनन्दनसमारोहस्य सञ्चालनं डा० राजेन्द्र त्रिवेदि-महाभागेन कृतम् ।

एतेष्वेव दिवसेषु जबलपुरस्थ रानीदुर्गावतीविश्वविद्यालयसंस्कृतविभागेन संस्कृतप्राध्यापक प्रशिक्षण-गोष्ठी अपि संयोजिता यत्र भासमवलम्ब्य आचार्यश्रीनिवासरथमहामागस्य भाषणं सञ्जातम् । विभागाध्यक्षेण डा० कृष्णकान्तचतुर्वेदमहाभागेन आध्यक्ष्यं सम्पादितम् ।

(११) १२-१०-१९८७ तारिकायां मध्यप्रदेश-संस्कृतम् अकादेमी-सचिवेन डा० भास्कराचार्य त्रिपाठिना विज्ञापितं यत् अकादेमी दिसम्बरमासस्यान्तिमे सप्ताहे रायपुरे 'नवोदितप्रतिभाप्रोत्साहनकार्यक्रमम्' आयोजयिष्यति यत्र व्याकरणशास्त्रार्थ-साहित्यशास्त्रार्थ - स्वरचितसंस्कृतकाव्यपाठ - नाट्यप्रस्तुतिप्रभृतीन्यनुष्ठानानि सम्पत्स्यन्ते ।

(१२) १६.९.१९८७ तारिकायां खन्नानगरे सरस्वतीसंस्कृतमहाविद्यालये राष्ट्रपतिपुरस्कृतानां पं० विश्वनाथशास्त्रिणामाध्यक्ष्ये समायोजिते सम्मानसमारोहे पञ्चाम्बुप्रशासन - पक्षतः राज्यपुस्कारस्वरूपं ताम्रपट्टमेकं सहस्ररूप्यकराशिं चार्पयता पञ्चाम्बुराज्य-भाषाविभागनिदेशकेन श्रीमता राजेन्द्रसिंह भसीन-महाभागेन प्रो० देवदत्तभट्टिः संस्कृत सेवार्थं सम्मानितः पुरस्कृतश्च । पञ्चाम्बुराज्यस्य नैके विद्वांसोऽस्मिन् समारोहे उपस्थिता आसन् । विद्वद्भिः प्रो० भट्टि-महाभागस्य संस्कृत-साहित्यं प्रति योगदानमथ च हालैण्डदेशे 'नवसंस्कृत-विषयकं' प्रकाशितं शोधलेखमुद्दिश्य शंसापरा चर्चा कृता ।

—रमा शुक्ला

*

अर्वाचीनसंस्कृतस्य ग्राहशुल्कम्

(१५-१-१९८७ तः)

ंस्थानां कृते	वार्षिकं (भारते) रु० 40.00	
	वार्षिकं (विदेशेषु) यू० एस० डालराः 10	
	आजीवनं (भारते) रु० 300.00	
	आजीवनं (विदेशेषु) यू० एस० डालराः 100	
व्यक्तीनां कृते	वार्षिकं (भारते) रु० 25.00	
	वार्षिकं (विदेशेषु) यू० एस० डालराः 10	
	आजीवनं (भारते) रु० 250.00	
	आजीवनं (विदेशेषु) यू० एस० डालराः 100	
डाकव्ययः	[यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]	
	भारते	: रु० 20.00
	विदेशेषु	: यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं ंष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः ःयात्। ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** Arvacheenasans-:ritam/*Arvācīnasaṃskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते :

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन देववाणी प्रिंटर्स उत्तम नगर, नयी दिल्ली-११००५९, इति मुद्रणालये मुद्रापयित्वा '६ वाणी,-वेहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (९/४)
धानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-१०-१९८७

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ३०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदराजकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

दूरभाषः : ५५३४९९